RAGHUVANSAM
Cantos III—IV.

EDITED

With an Introduction, a Critical estimate of the Poem, an essay on the Age of the Poet Sanjivani (the commentary of Mallina'tha), Substance of each Verse in easy Sanskrit, Geographical notes, Explanation by use of Synonyms, Remarks on Rhetoric, &c., &c., &c.

BY

SA'STRI HARI CHARANA GANGOPA'DHYA'YA, M.A., B.L.,
(Late Senior Professor of Sanskrit, Ripon College, Calcutta)

AND

PANDIT KAVIRA'TNA RA'MAGOPA'LA BHATTA'CHA'RYA.

Translated into English

BY


PANDIT KISORI MOHUN GANGULI, B.L.,
(Literary Pensioner, English Translator of Mahábhárata, and Charaka Samhitá, etc, etc, etc.)

Calcutta:
PUBLISHED BY
B. Banerjee & Co.
25, Cornwallis Street and 54, College Street.

1902

PRINTED BY P. C. SHAHA AT THE VICTORIA PRINTING WORKS,
203/2, CORNWALLIS STREET, CALCUTTA.

तृतीयः सर्गः ।



अथेप्सितं भर्तुरुपस्थितोदयं
सखीजनोद्वीक्षणकौमुदीमुखम् ।
निदानमिक्ष्वाकुकुलस्य सन्ततेः
सुदक्षिणा दौहृदलक्षणं दधौ ॥ १ ॥

Prose order.—अथ सुदक्षिणा उपस्थितोदयं भर्तुः ईप्सितं सखीजनोद्वीक्षणकौमुदीमुखम् इक्ष्वाकुकुलस्य सन्ततेः निदानं दौहृदलक्षणं दधौ ।

Explanation by use of synonyms.—अथ (गर्भधारणानन्तरं) सुदक्षिणा (दिलीपमहिषी) उपस्थितोदयं (प्रादुर्भूतप्रायं) भर्तुः (पत्युर्दिलीपस्य) ईप्सितं (मनोरथरूपं) सखीजनोद्वीक्षणकौमुदीमुखं (सखीजनानां नयनयोः चन्द्रिकोदयरूपं, कार्त्तिकपूर्णिमाविहितदीपोत्सवविधिरूपम् वा, दृष्टिसुखकरम्) इक्ष्वाकुकुलस्य (इक्ष्वाकुवंशस्य, सूर्यवंशस्येत्यर्थः) सन्ततेः (अविच्छेदस्य) निदानं (मूलम् आदिकारणमिति यावत्) दौहृदलक्षणं (गर्भचिह्नं) दधौ (धारयामास) ।

Substance.—सुदक्षिणा गर्भमाधत्त इत्युक्तम् । अधुना तद्गर्भं वर्णयितुमिच्छुः कविरादौ राज्ञी गर्भचिह्नानि दधौ इति सामान्यतः आह । कीदृशानि तानि ? इक्ष्वाकुकुलस्याविच्छेदस्योपायभूतानि खलु तानि यतो तेभ्यो वंशस्य ...नुमीयते । किञ्च तानि सखीजनानां चन्द्रोदयवत् नयनानि ह्लादयन्ति स्म । ...तात्पर्य—न तानि चिह्नानि, अपि तु पत्युर्दिलीपस्य च सफलप्रायः मनोरथः

...ange of Voice.—...सुदक्षिणया...दध्रे ।

...jivani.—उपाधिगम्योऽप्यनुपाधिगम्यः समावलोक्योऽप्यसमावलोक्यः । ...ोऽभूदभवः श्रियोऽयं जगत्यपायादपि नः स पायात् ॥ राज्ञी गर्भमाधत्ते-

त्युक्तं, सम्प्रति गर्भलक्षणानि वर्णयितुं प्रस्तौति, अथेति। (अथ) गर्भधारणानन्तरं (सुदक्षिणा) (उपस्थितोदयं) प्राप्तकालं (भर्तुः) दिलीपस्य (ईप्सितं) मनोरथम्—अपूर्वे म:—पुनः सखीजनस्य उद्वीक्षणानां दृष्टीनां कौमुदीमुखं चन्द्रिकाप्रादुर्भावं [सखीजनोद्वीक्षणकौमुदीमुखं] यद्वा कौमुदी नाम दीपोत्सवतिथिः—तदुक्तं भविष्योत्तरे—"कौ मोदन्ते जना यस्यां तेनासौ कौमुदी मता" इति—तस्याः मुखं प्रारम्भम्—अतएव केचित् कौमुदीमहमिति पाठं पठन्ति—(इक्ष्वाकुकुलस्य) (सन्ततेः) अविच्छेदस्य (निदानं) मूलकारणम्—"निदानं त्वादिकारणम्" इत्यमरः (Cole. p. 32) एवंविधं (दौहृदलक्षणं) गर्भचिह्नं अवस्थाविशेषं (दधौ)। स्वहृदयेन गर्भहृदयेन च द्विहृदया गर्भिणी। यथाह वाग्भटः—"मातृजन्यस्य हृदयं मातुश्च हृदयेन तत्। सम्बद्धं तेन गर्भिण्याः श्रेष्ठं श्रद्धाभिमाननम्॥" इति तत्सम्बन्धित्वाद्गर्भो दौहृदमित्युच्यते—सा च तद्योगाद् दौहृदिनीति।—तदुक्तं संग्रहे—"द्विहृदयां नारीं दौहृदिनीमाचक्षते" इति। अत्र दौहृदलक्षणस्येप्सितत्वेन कौमुदीमुखत्वेन च निरूपणात् रूपकालङ्कारः।

अस्मिन् सर्गे वंशस्थवृत्तम्—"जतौ तु वंशस्थमुदीरितं जरौ" (V. वृत्तरत्नाकर, कारिका ४६) इति लक्षणात्॥ १॥

Sanjivani Explained.

उपाधिगम्योऽप्यनुपाधिगम्यः &c.—May that Siva who is both cognisable and not cognisable by attributes, who is both perceivable and unperceivable, who is both born and unborn, may He, save us in this world from destruction!

कौमुदीमुखम्—कौमुदी is explained in two ways. It gen... means the lunar beam. मुख, in that case, means begi... So the whole word means 'advent of lunar beams'.

Next कौमुदी is taken to mean the festivity now kn... 'Dewali.' Lamps are lighted in every house in the night... new moon of the Bengali month 'Kárttika'. Mallinátha, ... its derivation, quotes from Bhavishya Purána—कौ मोद... It means—'This festival is called कौमुदी because men on... are gladdened on this occasion.'

चिह्न ... हर्षा अ... रूपवेश ... एवंति। Cha ... Sar ... अथोऽपि स

भू—Earth. See Derivation.

व्यहृदयेन * * * गर्भिणी—A woman who has conceived becomes द्विहृदया or endued with two hearts, in consequence of her own heart and that of the fœtus in her womb.

यथाह वाग्भटः—As the learned physician, वाग्भट, says :

मातृजं हृदयम् * * * श्रद्धाभिमाननम्—Because the hearts of the fœtus and the mother are united in a woman that has conceived, she, therefore, becomes an object of high honour.

तद्दसम्बन्धित्वाद् * * दृश्यन्ते। गर्भ (fœtus) is called दौहृद and गर्भिणी is called दौहृदिनी, because they have relation with द्विहृदय।

तदुक्तं संग्रहे—द्विहृदयां नारीम् * * इति। So it is said in the medical work, 'Sangraha.' A woman with two hearts is called दौहृदिनी"।

अत्र दौहृदलक्षणस्य इंग-त्वं * * रूपकालङ्कारः...See Rhetoric.

अस्मिन् सर्गे वंशस्थं वृत्तम्—The metre used in this canto is वंशस्थवृत्त।

"जतौ तु वंशस्थमुदीरितं जरौ" इति लक्षणात्—Because the definition of वंशस्थवृत्त is जतौ &c." It means—"The symbols ज, त, ज and र constitute the metre वंशस्थ (also called वंशस्थविल)।"

The scanning stands thus :

⏑—⏑ | ——⏑ | ⏑—⏑ | ⏑—⏑— |

ज त ज र

⏑—⏑ | ——⏑ | ⏑—⏑ | —⏑— |

अ थे प्सि तं भ र्तु रु प स्थि तो द यम्

Bengali.—অনন্তর সুদক্ষিণা পতির আনন্দজনক মনোরথ স্বরূপ, সখীগণের নয়নদ্বয়ের চন্দ্রালোক স্বরূপ, এবং ইক্ষ্বাকুকুলের অবিচ্ছেদের কারণভূত গর্ভলক্ষণ ধারণ করিলেন। ১।

English rendering.—At length, Sudakshiná bore signs of conception,—(signs) which constituted her lord's desire the fruition whereof was at hand, which were even as the rise of

moonlight unto the eyes of her companions, and which were the cause of the continuation of Ikshaku's race.

Grammatical notes, &c., &c.

Sama'sa.—(१) सु (सुष्ठु) दक्षिणा (उदारा) सुदक्षिणा (सुप्सुपा) 'दक्षिणो दक्षिणोद्भूतसरलच्छन्दवर्तिषु। श्वामि विषु यज्ञादिविधिदाने दिशि स्त्रियाम्' (मे.) or thus—सुष्ठु दक्षिणा (पुरस्कारः) यस्याः—उदारचरितत्वात्—सा (बहु)। (२) उपस्थितः (प्राप्तः) उदयः (फलरूपः) यस्य तत् उपस्थितोदयम् (बहु)। Adjective of 'ईप्सितम्' (३) सखीनां जनः (वर्गः), सखीजनः। कौमुद्याः मुखं कौमुदीमुखम् (षष्ठीतत्)। सखीजनस्य उद्वीक्षणानि सखीजनोद्वीक्षणानि (षष्ठीतत्) तेषां कौमुदीमुखं, सखीजनोद्वीक्षणकौमुदीमुखम् (षष्ठीतत्) (४) इक्ष्वाकूणां कुलम्, इक्ष्वाकुकुलम् (षष्ठीतत्) तस्य (५) दौहृदस्य लक्षणं दौहृदलक्षणम् (षष्ठीतत्) तत्।

Case ending—(१) भर्तुः—"क्तस्य च वर्त्तमाने" इत्यनुक्ते कर्त्तरि षष्ठी (V. notes on सताम् Sl. 16, C. II) क्त in 'ईप्सित' is used in वर्त्तमानकाल (२) इक्ष्वाकुकुलस्य कृद्योगेऽनुक्ते कर्मणि षष्ठी, "कर्तृकर्मणोः कृति" (V. Case ending, Sl. 4, C. I.) (३) सन्ततेः—संबंधे षष्ठी, निदानं निवर्त्तकं सम्बन्धः। ईप्सितं, सखीजनोद्वीक्षणकौमुदीमुखं and निदानम् are adjectives of 'दौहृदलक्षणम्'।

Synonyms.—(१) कौमुदी—'चन्द्रिका कौमुदी ज्योत्स्ना' (अ.)

Different meanings.—(१) निदान—"निदानं कारणे[1] शुद्धौ[2] तपसः फलयाचने[3]। वत्सदाम्नि[4] अवसाने[5] च'। (मे) (२) सन्तति—'सन्ततिः स्यात्पङ्क्तौ[1] गोत्रे[2] पारम्पर्ये[3] च पुत्रपौत्राणाम्।' (मे.)

Derivation.—(१) ईप्सितम्—आप् + सन् + क्त (भावे) (२) कौमुदी—कु + मुद् + क (कर्त्तरि) "इगुपधज्ञाप्रीकिरः कः" (३।१।१३५ पा. २८९० सि.)। or 'कप्रकरणे मूलविभुजादिभ्य उपसंख्यानम्' (३।२।५ पा. वा. २९१९ सि. वा.) कुमि कुमुदः। (See Notes on [illegible] III, 60).

N. B. The group consists of—मूलविभुज नखमुच, काकगुह, कुमुद, महीध्र, कुध्र and गिध्र । कुमुद + अण् + ङीप् ।

(3) दौर्हृद—दिहृदय + अण्—निपात्यते (Mallinátha.) N. B. By anomaly दि is changed into दौ । The Sutra "न य्वाभ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यामैच्" (७।३।३ पा. १०८८ सि.) does not help. The change of हृदय into हृद् at the end of a पद is not enjoined by any Sutra. So it is a case of निपातन ।

Or, it may be derived thus: There is the word हृद् equivalent to हृदय । So दुर्हृद + अण् = दौर्हृदम्—"हायनान्तयुवादिभ्योऽण्" (५।१।१३० पा. १७८५ सि.) (V. यौवनम् ; Sl. 5—9, C. I.)

The annotators Sumati and Vallabha substitute दोहद for दौर्हृद ।

(4) दधौ—धा + लिट् + णल् ।

Conjugation.—(1) धा (V. Sl. 24, C. I.) (2) आप् (V. Sl, 48, C. I.)

Rhetoric.—The figure of speech is रूपक ।

The signs of pregnancy are represented as identical with the wish, about to be fulfilled, of the husband, as also with the advent of the moon. Though they are really different, yet they are spoken of as without difference. Here we have two रूपक's । (V. Rhetoric, I, 4.)

शरीरसादादसमग्रभूषणा,
मुखेन सालक्ष्यत लोध्रपाण्डुना ।
तनुप्रकाशेन विचेयतारका
प्रभातकल्पा शशिनेव शर्वरी ॥ २ ॥

Prose order.—शरीरसादात् असमग्रभूषणा लोध्रपाण्डुना मुखेन (उप-

लक्षिता, सा विचेयतारका तनुप्रकाशेन शशिना (उपलक्षिता) प्रभातकल्पा शर्वरी इव अलक्ष्यत।

Explanation by use of synonyms.—शरीरसादात् (देह-क्षीणत्वात्) असमग्रभूषणा (परिमिताभरणा) लोध्रपाण्डुना (लोध्रपुष्पवत् पाण्डुवर्णेन) मुखेन (आननेन)—उपलक्षिता सा (सुदक्षिणा) विचेयतारका (विरलनक्षत्रा) तनुप्रकाशेन (अल्पकान्तिना) शशिना (चन्द्रमसा उपलक्षिता—प्रभातकल्पा (प्रभात-प्राया) शर्वरीव (रजनी इव) अलक्ष्यत (आलोकित)।

Substance.—गर्भलक्षणमेव क्षामतादौ वर्णयति। तस्या शरीरं क्षीणतम् अलङ्कारभारधारणेऽपि सा अक्षमनुदभूत। अत परिमितान्याभरणानि सा दधार। मुखं च तस्या नैसर्गिकं बिम्बरागं विहाय लोध्रकुसुमवत् पाण्डुतां भेजे। अत सा क्षीणज्योतिषा शशिनोद्भासिता प्रभाततुल्या परिमिततारका रजनीव बभासे।

Change of voice.—असमग्रभूषणा तां विचेयतारकां प्रभात-कल्पां शर्वरीम् अलक्षयन् वा अलक्षयत् जना इति शेष।

Sanjivani—सम्प्रति क्षामताख्यं गर्भलक्षणं वर्णयति—शरीरेति—शरीरस्य सादात् कार्श्यात् [शरीरसादात्] (असमग्रभूषणा) परिमिताभरणा, [लोध्रपाण्डुना] (मुखेन)—उपलक्षिता—सा) सुदक्षिणा विचेया, मृग्या, तारका, यस्या सा तथोक्ता [विचेयतारका] विरलनक्षत्रा इत्यर्थः (तनुप्रकाशेन अल्पकान्तिना (शशिना) लोध्रपुष्पेण इव पाण्डुना—उपलक्षिता—ईषदसमाप्तप्रभाता प्रभातादीषदूना इत्यर्थः—'तसिलादिष्वाकृत्वसुच' (६।३।३५ पा. ८३६ सि.) इति प्रभातशब्दस्य पुंवद्भाव—(शर्वरी) रात्रि, (इव अलक्ष्यत)।—शरीरसादादिगर्भलक्षणं वाग्भट—'क्षामता गरिमा कुक्षे: मूर्च्छा छर्दिररोचकम्। जृम्भा प्रसेक: सदनं रोमराज्या प्रका-शनम्' ॥ इति ॥ २ ॥

Sanjivani Explained

क्षामता—leanness (due to pregnancy.)

शरीरसादादिगर्भलक्षणे * * * इति—As regards the signs of

pregnancy, such as leanness of the body, Bhágbhata says,—"Leanness of other limbs and heaviness of the belly, swoons, vomiting, disgust for food, constant yawning, langour, and the manifestation of hairy streaks on the body, are the signs of pregnancy".

GRAMMAR.

प्रभातकल्पा—The affix कल्प means ईषदसमाप्त । The time that is almost प्रभात is प्रभातकल्प ।

The word being an adjective of शर्वरी is feminine. The वाक्य is ईषदसमाप्ता प्रभाता । Why does not the whole word become प्रभाताकल्पा? Why does प्रभाता assume the masculine form? The Sutra is :—

"तसिलादिष्वाकृत्वसुचः"—Feminine words assume the masculine form if one of the affixes of the group beginning with तसिल् and ending in सुच् follows them.

Várttikakára, for the prevention of error, enumerates them. They are त्र, तल्, तरप्, तमप्, चरट्, जातीयर्, कल्पप्, देशीयर्, रूपप्, पाशप्, थाल्, तिल् and थ्यन् ।

Bengali.—শরীরের ক্ষীণতাহেতু অসমগ্রভূষণা লোধ্রপুষ্পবৎপাণ্ডুবর্ণমুখের দ্বারা (উপলক্ষিতা) সেই মহিষী বিরলনক্ষত্রা ক্ষীণচন্দ্রালোকের দ্বারা (উপলক্ষিতা) প্রভাতপ্রায়া রজনীর ন্যায় লক্ষিতা হইতে লাগিলেন ।২।

English rendering.—Without all her ornaments owing to the emaciation of (her) body, (and) with a face as pale as the flowers of *symplocos racemosus*, she looked like the Night, that is about to break into day, with stars only here and there, and with the Moon of bedimmed lustre.—2.

Grammatical notes, &c. &c.

Sama'sa.—(1) शरीरस्य सादः शरीरसादः (षष्ठीतत्) तस्मात् (2) समग्रं भूषणं समग्रभूषणम् (सुप्सुपा) न समग्रम् असमग्रम् (नञ्तत्) असमग्रं भूषणं यस्याः सा असमग्रभूषणा (बहु) (3) लोध्रमिव पाण्डु लोध्रपाण्डु (उपमानकर्मधारयः) तेन—"उप-

आपादि वालाम्बवचने:" (V. notes on राजेन्दु I, 12), (3) तनु: (स्वल्प:) प्रकाश: यस्य स: तनुप्रकाश: (बहु) तेन (4) विचेयतारका (V. Sanjivani.) प्रकर्षेण भाता (भातुमारब्धा) प्रभाता (प्रादि:) वा प्रकृष्टं भातं (भाति:) अस्यामिति प्रभाता (बहु) [V. R. T. of Amarakosa, N. S. P. Ed. p. 50.)

Case-ending.—(1) शरीरसादात्—हेतौ पञ्चमी पाणिनी "विभाषेति योगविभागात् अगुणे स्त्रियाञ्च क्वचित्" (V. notes on आपीनभारोद्वहनप्रयत्नात् in II, 18 and on मोहात् in I, 2.) (2) मुखेन—उपलक्षणे तृतीया —"इत्थम्भूतलक्षणे" (V. notes on केशै:, II, 8.) (3) सा—उक्ते कर्मणि प्रथमा (4) शर्वरी—विधेयोपमानकर्मपदं, 'सा' इत्युद्देश्योपमेयकर्मपदस्य (5) शशिना—उपलक्षणे तृतीया (6) असमग्रभूषणा, लोध्रपाण्डुना, तनुप्रकाशेन, विचेयतारका and प्रभातकल्पा are the adjectives of सा, मुखेन, शशिना and शर्वरी respectively.

Synonyms.—(1) शर्वरी—(V. निशा, I, 95.)

(2) तारका—'नक्षत्रमृक्षं भं तारा तारकाप्युडु वा स्त्रियाम्' (अ.)

(3) प्रभात—'प्रत्यूषोऽहर्मुखं कल्यमुष: प्रत्युषसी अपि । प्रभातञ्च' (अ.)

Different meanings.—(1) मुख—'मुखमुपाये प्रारम्भे श्रेष्ठे नि:सरणास्ययो:' (हे.) (2) पाण्डु—'पाण्डु: कुन्तीपतौ सिते' (हे.) (3) तनु—'तनु: स्त्रीदेहे त्वचि स्त्री स्यात् त्रिष्वल्पे विरले कृशे' (वि. मे.)

Derivation.—(1) सादात्—सद + घञ् (भावे, 5th c. s.) (2) शरीरम् शॄ + ईरन् (औणादिक:) (3) मुखेन—खन् + अच (3rd c. s.)—'डित् खनेर्मुट् चोदात्त:' (उ. 5।20) धातोर्मुडागम: (4) असमग्र—अस् + रक्—त (कर्मणि) (5) पाण्डु—पडि + कु—'मृगय्वादित्वात्' (उ. 1।37) पृषोदरादित्वात् दीर्घ: "पाण्डुस्तु पीतभागार्ध: केतकीधूलिसन्निभ:" इति शब्दार्णव: । (6) विचेय—वि + चि + यत् (कर्मणि) + टाप् (7) तारका—तृ (or तॄ + णिच्—तारि) + ण्वुल् + टाप् —'तारका ज्योतिषि' (7।3।45 पा. वा. 389 सि. कौ.) इत्त्वाभाव: [To mean a star, the form is तारका and not तारिका । To mean a woman who protects, the form is तारिका ।]

(7) प्रभातकल्पा—प्र+आ+भा (भावे)+टाप् = प्रभाता। प्रभाता+कल्पप् (ईषदूनार्थे)+टाप्। प्रभाता is changed into प्रभात (V. Sanjivani explained). (8) शर्वरी—शृ+ष्वरच्+ङीप्—' कॄगॄशॄवृञ्चतिभ्यः ष्वरच्' (उ. २।१२१)। The alternative form is शार्वरी—"प्रभायामपि शार्वर्यपि—'शर्वरी शार्वरी शर्या' इति शब्दार्णवः (V. R. T. of Amarakosha, N. S, P. Ed. p. 51.).

Conjugation.—(1) लक्ष् (to see, to know, to mark) लक्षयति-ते (लट्) अलक्षयत्—त (लङ्) लक्षयामास, लक्षयाञ्चक्रे &c. (लिट्) अललक्षत्-त (लुङ्) अलक्षि (कर्मणि लुङ्) लक्षयिष्यति—ते (लृट्) लक्षयिता (लुट्) लक्षितः (क्तः) (2) चि to collect चयति—ते, चिनोति, चिनुते (लट्) अचिनोत्, अचिनुत, अचयत्-त (लङ्) चिकाय, चिचाय, चिकयिथ, चिकेथ, चिचयिथ, चिचेथ, चिक्ये, चिच्ये (लिट्) चेता (लुट्) चेष्यति—ते (लृट्) चीयात्, चेषीष्ट (आ. लिङ्) अचैषीत्, अचैष्टाम् अचैषुः। अचेष्ट, अचेषाताम्, अचेषत (लुङ्) अचायि (कर्मणि लुङ्) चिकीषति—ते, चिचीषति-ते (सन्-लट्) चेचीयते (यङ् लट्) चापयति, चाययति (णिच्-लट्) चितः (क्तः)। It is also चु. उ. चययति-ते; चाययति-ते; चपयति-ते (चु-लट्)।

Rhetoric.—The figure of speech is simile. सुदक्षिणा is compared with a moonlit night, and her ornaments with stars. Her pale face resembles the dim moon.

Remark.—One of the Calcutta editors says that the 3rd case in मुखेन and अक्षिणा is in हेतु and not in उपलक्षण। He argues much. Yet we are convinced that उपलक्षणे तृतीया is preferable to हेतौ here. उपलक्षण means that one is the लक्षण (indicator), the other is लक्ष्य (indicated). हेतु means it is the निमित्त of a द्रव्य (individual), जाति (class), गुण (attribute), or क्रिया (action). (See notes on गौरया, I, 57). If अक्षिणा be a हेतौ तृतीया, it would be connected directly with प्रभातकल्पा and indirectly with the night. Why does the night look (pale) like the morn? Because of the moon of dim lusture.

In the उपमेय clause, however, मुखेन, which is the उपमेय of शशिना, is directly connected with सा, the उपमेय of शर्वरी ।

Hence a discrepancy arises in the उपमान and the उपमेय clauses. If, again, शशिना be in हेतौ तृतीया, मुखेन should be so. But of what shall it be the हेतु ? If possible, the face can be the cause of अलक्ष्यत or resemblance. But it does not alone determine the resmblance of the two. मुखेन cannot, properly, be the हेतु of anything mentioned in this verse. How are we to parse it then ? It is undoubtedly an attributive of सा । The face is of Sudakshiná. Unless the तृतीया be a case of उपलक्षण or इत्थम्भूतलक्षण, मुखेन would bear no connection with सा । A pale face is a characteristic feature of pregnancy. सुदक्षिणा is pregnant. Therefore, the pale face may now be said to be her characteristic mark. It is the लक्षण and she is the लक्ष्य । So तृतीया is determined by the Sutra "इत्थम्भूतलक्षणे" (V. notes on केशैः in II, 8.) The objection that 'pale face,' cannot be a characteristic of सुदक्षिणा because it is not always to be seen in her is puerile. Here सुदक्षिणा in her pregnant state is described. In that state, a pale face is doubtless one of her characteristic marks. If मुखेन be directly connected with सुदक्षिणा, शशिना should be directly connected with शर्वरी । If it bears a direct connection, it cannot be a हेतौ तृतीया । It is, rather, लक्षण, and शर्वरी is the लक्ष्य । What sort of a night is it ? It is the moon-lit night. It is endued with the moon. The dim moon is its characteristic feature. The difference between उपलक्षण and हेतु is thus shown by ज्ञानेन्द्रसरस्वती ;—"जटाभिस्तापस इत्यादौ तु लक्ष्यलक्षणभावविवक्षायां हेतुत्वाविवक्षणादनेनाप्राप्ता तृतीयेत्थम्भूतलक्षणमित्यारब्धम् ।" "When the intention of the speaker is to express the relation of लक्ष्य and लक्षण, हेतौ तृतीया is impossible. Hence is the necessity of the Sutra "इत्थम्भूतलक्षणे" ।

In the Slokas quoted from S'is'upálavadham by the

Calcutta editor, Malinátha is right in parsing पताकया and वपुषा as हेतौ तृतीया । In नगरं पताकया व्यरोचत—पताका is certainly the हेतु of व्यरोचत ।* So in क्वचित अनिमेषदृष्टिना वपुषा पुरदेवतेव व्यभाव्यत, the हेतु of looking like a goddess of the city is the unwinking eyes.

तदाननं मृत्सुरभि क्षितीश्वरो
रहस्युपाघ्राय न तृप्तिमाययौ ।
करीव सिक्तं पृषतैः पयोमुचां
शुचिव्यपाये वनराजिपल्वलम् ॥ ३ ॥

Prose order.— शुचिव्यपाये पयोमुचां पृषतैः सिक्तं वनराजिपल्वलम् (उपाघ्राय) करी इव क्षितीश्वरः रहसि मृत्सुरभि तदाननम् उपाघ्राय तृप्तिं न आययौ । Mallinátha shows only the connection between उपमान and उपमेय without exhibiting the prose order systematically.

Explanation by use of synonyms.—शुचिव्यपाये (ग्रीष्मावसाने) पयोमुचां (मेघानां) पृषतैः (जलबिन्दुभिः सिक्तम् (उक्षितम्, अभिषिक्तमिति यावत्) वनराजिपल्वलं वनपङ्क्तिस्थितं सुद्रसरः) उपाघ्राय करीव (गज इव) क्षितीश्वरः (महीपतिर्दिलीपः) रहसि (निभृतं) मृत्सुरभि (मृदभक्षणसौरभान्वितं) तदाननं (प्रियावदनम्) उपाघ्राय (आघ्राय, विमृश्येति यावत्) तृप्तिं (सन्तोषं) न आययौ (न लेभे) ।

Ssubstance.—अधुना तस्या गर्भलक्षणरूप लक्षणमाह । अरुचिस्तस्याः क्रमात् प्रादुर्भूता । अरुचिपरवशा सा केवलं मृत्तिकायै रुरुचे । मुखं च तस्या मृद्गन्धेनामोदितम् । स गन्धो दिलीपस्य नितरां सुखकर आसीत् । असकृत् स तमाघ्रायापि तृप्तिं नाययौ । यावत् स तन्मुखं जिघ्राय तावत्तस्य घ्राणेच्छाभूत् । तत्र कविरुपमां दर्शयति । ग्रीष्मावसाने नवमेघोदकसिक्तं सुरभि वनराजिस्थितं पल्वलमाघ्राय करीव स दिलीपोऽभूत् ।

Change of voice.—...करिणा...क्षितीश्वरेण...तृप्तिः...आययौ ।

Sanjivani.—तदिति । (क्षितीश्वरः रहसि) (मृत्सुरभि) मृदा सुगन्धि,

तस्याः आननं (तदाननं) मृद्‌गन्धि‌आमुखम् (उपाघ्राय तृप्तिं न आययौ) । कथमिव ? (शुचिर्व्यपाये) ग्रीष्मावसाने—"शुचिः शुद्धेऽनुपहते शृङ्गाराषाढयोः सिते । ग्रीष्मे हुतवहेऽपि स्यात् उपधाशुद्धमन्त्रिणि ।" इति विश्वः—(पर्यवसुचा) मेघानां (पृषतैः) बिन्दुभिः—"पृषन्ति बिन्दुपृषताः" इत्यमरः (Cole. p. 61.)—(सिक्तम्) उक्षितं वनराज्याः पल्वलं [वनराजिपल्वलम्] उपाघ्राय (करी) गजः (इव) । अत्र करिवनराजिपल्वलानां कान्तकामिनीवदनसमाधिरनुसन्धेयः । गर्भिणीनां मृद्भक्षणं लोकप्रसिद्धमेव । एतेन दोहदाख्यं गर्भलक्षणमुच्यते ॥ ३ ॥

सञ्जीविन्याः पाठान्तरम् ।

शुचिः शुद्धे &c. &c.—शुचि means शुद्ध (pure), अनुपहत (unpolluted), शृङ्गार (passion), आषाढ, (the third month of the Bengali year), सित (white), ग्रीष्म, (summer), हुतवह (fire), as well as उपधाशुद्धमन्त्रिणि (a candid minister void of all machinations.)

गर्भिणीनां मृद्भक्षणम् * * * एव—It is well known that pregnant women take earth.

एतेन दोहदाख्यम् * * * उच्यते—By this the poet mentions the sign of pregnancy known as दोहद or a longing after certain kinds of edibles.

अत्र करिवनराजिपल्वलानां * * अनुसन्धेयः—Here the reader should seek out the resemblance of the elephant with the husband, of the rows of forests with the wife, and of the watery pools with the face.

Bengali.—গ্রীষ্মাবসানে মেঘনিপাতিত বারিবিন্দু দ্বারা অভিষিক্ত বনরাজিস্থিত পল্বল আঘ্রাণ করিয়া হস্তী যেরূপ পরিতৃপ্ত হয় না, সেইরূপ মহীপতি (দিলীপ) নির্জনে মৃত্তিকাসৌরভান্বিত মহিষীর বদন আঘ্রাণে তৃপ্তিলাভ করেন নাই। ৩।

English rendering.—The lord of Earth was never satiated with inhaling, in the seclusion of solitude, (the scent of) her mouth of earthy fragrance, like an elephant at the expiry of summer that is never satiated with a forest-lake drenched with the drops of pouring clouds.—3.

Grammatical notes, &c., &c.

Sama'sa.—(1) तस्याः आननं तदाननम् (षष्ठीतत्) तत् (२) मृदा गन्धि

सतसुरभि (तृतीयातत्) (3) क्षितेः वा क्षित्याः ईश्वरः क्षितीश्वरः (षष्ठीतत्) (4) पयांसि मुञ्चति इति पयोमुचः (उपपदतत्) तेषाम् (5) विशिष्टः अपायः व्यपायः (प्रादिः) शुचेः व्यपायः शुचिव्यपायः (षष्ठीतत्) तस्मिन् or शुचेः व्यपायः यस्मिन् काले स शुचिव्यपायः (बहु) (6) वनानां राजिः वनराजिः (षष्ठीतत्) तस्याः पल्लवं वनराजिपल्लवम् (षष्ठीतत्) तम् ।

Case-ending.—(1) रन्ध्रेषु—अन्वयं, used in 7th case. (2) शुचिव्यपाये—कालाधिकरणे सप्तमी (3) पृषतैः—अनुक्ते कर्तरि तृतीया (4) पयोमुचाम्—शेषे षष्ठी (5) करी—विधेयोपमानकर्तृपदं,—'क्षितीश्वरः' इत्युद्देश्योपमेयकर्तृपदस्य ।

Synonyms.—(1) करिन्—(V. द्विप, II, 7.) (2) पल्लव—(V. Sl. 17, C. II.) (3) पृषत—"पृषन्ति विन्दुपृषताः पुमांसो विप्रुषः स्त्रियः ।" (अ.)

Different meanings.—(1) सुरभि—(V. Sl. 3, C. II.) (2) शुचि—(V. Sanjivani) (3) वन—(V. Sl. 49, C. I.) (4) पृषत—'पृषतस्तुमृगे विन्दौ पृषतश्वेतरोहिते । श्वेतविन्दुयुतेऽपि स्यात् ।' (हे.)

Derivation.—(1) उपाघ्राय—उप + आ + घ्रा + ल्यप् (2) क्षितिः—क्षि + क्तिन् (अधिकरणे) (3) ईश्वरः—(V. Sl. 1, C. I.) (4) आययौ—आ + या + (लिट्-णल्) (6) करी—कर + इनि (अस्त्यर्थे, 1st c. s.) (6) पृषतैः—पृष् + अतच् (3rd c. p.)—'पृषिरञ्जिभ्यां कित्' (उ. ३।११९) (7) पयोमुचाम्—पयस् or पी + असुन् । पयस् + मुच् + क्विप् (कर्तरि, 6th c. p.) (8) पल्लवम्—(V. Sl. 17, C. II.) (9) शुचिः—शुच् + इन्—'इगुपधात् कित्' (उ. ३।१२०।) or शुचि-शब्दात् 'तत्करोति तदाचष्टे' इति वार्त्तिकात् क्विपि कृते शुचि (नामधातुः) । ततः इः—'अच इः' (उ. ४।१३९।) (10) व्यपाये—वि + अप + इ (ण) + घञ् (भावे, 7th c. s.)

Conjugation.—(1) घ्रा—(V. I, 43.) (2) या (to go) याति (लट्) अयात्, अयुः, अयान् (लङ्) ययौ, ययिथ (लिट्) अयासीत् (लुङ्) यातः (क्तः) ।

The alternative form of राजि is राजी—'कृदिकारादक्तिनः' (V. notes on प्रतिपत्तये, Sl. 1, C. I.)

Rhetoric.—The figure of speech is simile. The आनन of the queen is compared to पल्वल of the forest; her गर्भकाल to शुचिव्यपाय। क्षितीश्वर is compared to करी and the queen to वनराजि। As the elephant is never satiated with smelling the pool so the king also was not satiated with smelling the wife's mouth.

दिवं मरुत्वानिव भोक्ष्यते भुवं
दिगन्तविश्रान्तरथो हि तत्सुतः।
अतोऽभिलाषे प्रथमं तथाविधे
मनो बबन्धाऽन्यरसान् विलङ्घ्य सा॥ ४॥

Prose-order.—हि, तत्सुतः दिगन्तविश्रान्तरथः (सन्) मरुत्वान् दिवम् इव, भुवं भोक्ष्यते—अतः सा प्रथमम् अन्यरसान् विलङ्घ्य तथाविधे अभिलाषे मनः बबन्ध। Mallinátha places 'दिगन्तविश्रान्तरथः' 'प्रथमम्' and 'तथाविधे अभिलाषे' before 'तत्सुतः', 'सा', and 'अन्यरसान् विलङ्घ्य' respectively.

Explanation by use of synonyms.—हि (यस्मात्) तत्सुतः (तत्पुत्रः) दिगन्तविश्रान्तरथः (दिगन्तसञ्चारिस्यन्दनः सन्, एकच्छत्रेण निखिलधराविजयी सन्नित्यर्थः) मरुत्वान् (इन्द्रः) दिवमिव (स्वर्गमिव) भुवं (महीमण्डलं) भोक्ष्यते (उपभोक्ष्यते) अतः (अस्मात् कारणात्) सा (महिषी सुदक्षिणा) प्रथमं (पूर्वमेव) अन्यरसान् (अन्यानि भोज्यवस्तूनि) विलङ्घ्य (विहाय) तथाविधे (तादृशे) अभिलाषे (मृत्तिकाभक्षणरूपे अभिप्रेते) मनः (मानसं) बबन्ध (विदधौ)।

Substance.—गर्भावस्थायां महिषी सर्वाणि भोज्यवस्तूनि परित्यज्य प्रथममेव मृत्तिकाभक्षणे मतिमकरोत्—इत्यर्थः। अधुना तस्य लौकिकस्य कार्यस्याचित्य-कारणमाह। तद्गर्भोत्पन्नः पुत्रः अपराजित इव निखिलधराधीश्वरः सन् शचीपतिः स्वर्गमिव कृत्स्नां महीमुपभोक्ष्यते अतएव सा धरायामीदृशानुरक्ताभूत्।

Change of voice.—...तत्सुतेन दिगन्तविश्रान्तरथेन मरुत्वता द्यौः or दिवं (neuter)...भूः...तया...बबन्धे।

Sanjivani.—दोहदकामपि कारणमुत्प्रेक्षते,—दिवमिति। (हि) यस्मात् (दिगन्तविश्रान्तरथः) चक्रवर्ती—तस्याः सुतः (तत्सुतः) (मरुत्वान्)

इन्द्रः—"इन्द्रो मरुत्वान् मघवा" इत्यमरः (Cole. p. 7)—(दिवं) स्वर्गम् (इव) (भुवं भोक्ष्यते)—"भुजोऽनवने" (१।३।६६। पा. २०१० सि.) इत्यात्मनेपदम्—(अत: प्रथमं) (सा) सुदक्षिणा (तथाविधं) भूविकारे मृद्रूपे ; अभिलष्यते इति अभिलाष: भोग्यवस्तु तस्मिन् [अभिलाषे] कर्मणि घञ्प्रत्यय:—रस्यन्ते आस्वाद्यन्ते इति रसा, भोग्यार्था: ; अन्ये च ते रसाश्च तान् [अन्यरसान्] (विलङ्घ्य) विहाय मन: (बबन्ध) विदधौ इत्यर्थ: । दौहृदहेतुकस्य मृद्भक्षणस्य पुत्रभूभोगसूचकार्थत्व-मुत्प्रेक्ष्यते ॥ ४ ॥

Sanjivani Explained.

दौहृदहेतुकस्य * * उत्प्रेक्ष्यते—The queen's taking earth is due to pregnancy. But the poet fancies that it prognosticated the future sovereignty of her son.

अभिलाष—It is in कर्मवाच्य । So it means not 'desire' but the 'thing desired.'

रस—रस is also in कर्मवाच्य । It means 'objects of enjoyment.'

"भुजोऽनवने"—The root भुज् is आत्मनेपदी when it does not mean अवन ('to protect'). Here भुज् means 'to enjoy'. So it is in आत्मनेपद । In महीं भुनक्ति, भुज् means 'to protect.'

Bengali.—ইন্দ্র যেরূপ স্বর্গ ভোগ করেন, সেইরূপ তাঁহার পুত্র দিগন্তপর্যান্ত রথচালনাপূর্ব্বক মহীমণ্ডল ভোগ করিবেন, এইজন্যই (যেন) তিনি অন্য ভোগ্যবস্তু পরিত্যাগ করিয়া সেইরূপ অভিলাষে (মৃত্তকণভক্ষণ অভিলাষে) মনঃ সমাধান করিলেন । ৪ ।

English rendering—Since her son, with (his) war-car halting only at the extreme bounds, would enjoy the entire earth like the chief of the celestials enjoying the entire Heaven, therefore, did she set her mind upon a desire like that, disregarding all other tastes.—4.

Grammatical notes, &c. &c.

Sama'sa.—(1) दिशाम् अन्त: दिगन्त: (षष्ठीतत्) तस्मिन् विश्रान्त: दिगन्त-विश्रान्त: (सप्तमीतत्) तादृश: रथ: यस्य स दिगन्तविश्रान्तरथ: (बहु) (2) अन्या:

सुत: तत्सुत: (षष्ठीतत्) (3) तथा (तादृशी) विधा यस्य स तथाविध: (बहु) तस्मिन् (4) अन्ये एवा: अन्यरता: (कर्मधा) ताम्।

Case-ending.—(1) दिवम्—विशेषोपमानकर्मपदं—'भुवम्' इत्युद्देश्यो-पमेयकर्मपदस्य (2) अत:—अव्ययं, हेतौ पञ्चमी (3) अभिलाषे—विषयाधिकरणे सप्तमी (4) प्रथमम्—क्रियाविशेषणम्।

Synonyms.—(1) मरुत्वत्—(V. मघवन्, Sl. 26, C. I.) (2) दिव—'स्वरव्ययं स्वर्गनाकत्रिदिवत्रिदशालया:। सुरलोको द्योदिवौ द्वे स्त्रियां क्लीबे त्रिपि-ष्टपम्॥' (अ०) (3) दिश्—'दिशस्तु ककुभ: काष्ठा आशाश्च हरितश्च ता:' (अ०)।

Different meanings.—(1) दिव्—'द्यौ: स्त्री स्वर्गे च गगने दिवं क्लीबं तयोरपि स्मृतम्' (मे०) (2) भू—'भू: स्थानमात्रे कथिता धरण्यामपि योषिति' (मे०) (3) रस—(V. Sl. 18, C. I.)

Derivation.—(1) दिवम्—दिव् + डिवि: (औणादिक:, 2nd c. s.) The alternative form is द्याम् (2) मरुत्वान्—मृ + उति:—मरुत्। मरुत् + मतुप् (1st c. s.) Here म of मतुप् is changed into व by 'झय:' (V. notes on शुद्धिमति Sl. 12, C. I.) "तसौमत्वर्थे" (१।४।१९। पा० १८६६ सि.) इति सूत्रात् तसयो: पदान्तकार्य्याभावात् तकारस्य न दत्वं, तेन मरुत्वान् नतु मरु-द्वान्। A word ending in त् or स् receives the grammatical appellation भ if it is followed by an affix having the sense of मतुप्। So मरुत् is not a पद when मतुप् is added to it. Hence by sandhi the त् of मरुत् cannot be changed into द्। (3) भोक्ष्यते—भुज् + लृट्—स्यते। (4) विद्यान्त:—वि + यम् + क्त: (कर्त्तरि)—The penultimate vowel of यम् is lengthened by the rule,—"अनुनासिकस्य क्विझलो: क्ङिति (६।४।१५। पा. २९६६ सि.)। [The penultimate vowel of a root ending in a nasal letter becomes lengthened if the affix क्वि or a कित् or ङित् affix beginning with a letter of the group झल् follows it. यम् is a root ending in a nasal letter and क्त is a कित् affix beginning with क—a letter of the group झल्।] (5) अभि-लाषे—(V. Mallinátha) (6) अत:—एतद् + तसिल् (5th c. s.) (7) भवन्ति—गम् + लट्—अत् (8) विजहार—वि + हृ + णप्।

Conjugation.—(1) गम्—(V. I, 22.) (2) भुज् (V. I, 66.)

न मे ह्रिया शंसति किंचिदीप्सितं
स्पृहावती वस्तुषु केषु मागधी ।
इति स्म पृच्छत्यनुवेलमादृतः
प्रियासखीरुत्तरकोशलेश्वरः ॥ ५ ॥

Prose order. -मागधी ह्रिया किञ्चित् ईप्सितं मे न शंसति (सा) केषु वस्तुषु स्पृहावती ? इति अनुवेलम् आदृतः (सन्) उत्तरकोशलेश्वर, प्रियासखीः पृच्छति स्म । Mallinatha places 'उत्तरकोशलेश्वरः' after 'प्रियासखीः' ।

Explanation by use of synonyms.- मागधी (मगधराजदुहिता) ह्रिया (लज्जया) किञ्चित् (किमपि) ईप्सितं (वाञ्छितं) मे (मह्यं) न शंसति (न कथयति) ? सा -केषु वस्तुषु (केषु भोग्यद्रव्येषु) स्पृहावती (अभिलाषिणी) इति (इदम्) अनुवेलम् (अनुक्षणम्) आदृतः (सप्रणयः सन्) उत्तरकोशलेश्वर (अयोध्यापतिः) प्रियासखीः (प्रियासहचरीः) पृच्छति स्म (पप्रच्छ) ।

Substance. अयोध्येश्वर प्रियायाः सहचरीः वारंवारं सादरं पप्रच्छ—यत्, भो यूयं वदत मा मम प्रिया अधुना कान्येतानि भोज्यवस्तूनि भक्षयितुं इच्छति । कथनमात्रेणैव गर्भदोहदोऽस्या तूर्णं मया सम्पाद्यः । सा भवतीभ्यः मनोवाञ्छितं कथयितुं शक्नोति, लज्जया मत्समक्षं किमपि न वक्ति । अतएव यूयं तां पृच्छत ।

Change of voice. -मागध्या शस्यते । (तया)...स्पृहावत्या (भूयते) आदृतेन उत्तरकोशलेश्वरेण प्रियासख्यः पृच्छ्यन्ते स्म ।

Sanjivani.—नेति । मगधस्य राज्ञः अपत्यं स्त्री (मागधी) सुदक्षिणा—"द्व्यञ्मगधकलिङ्गसूरमसादण्" (४।१।१७०। पा० ११८८ सि०) इत्यण्प्रत्ययः—(ह्रिया) (किञ्चित्) किमपि (ईप्सितं) इष्टं (मे) मह्यं (न शंसति) न आचष्टे (केषु वस्तुषु स्पृहावती इति) (अनुवेलम्) अनुक्षणम् (आदृतः) आदरवान्—कर्तरि क्तः—"आदृतौ सादरार्चितौ" इत्यमरः (Cole. p. 324)—प्रियायाः सखीः

[प्रियासखी:] सहचरी: (उत्तरकोशलेश्वर:) दिलीप: (पृच्छति स्म) पप्रच्छ—"लट् स्मे" (३।२।११८ पा० ७७८ सि०) इति भूतार्थे लट् । लज्जाशीला विश्रम्भ-भूमित्वात् इति भाव: ॥ ५ ॥

Sanjivani Explained.

विश्रम्भभूमि:- विश्वासपात्र ।

"द्व्यच्मगध ० ० –"A word having two vowels, or मगध, or कलिङ्ग, or सूरमस, receives the तद्धित affix अण् to signify 'its inhabitant' or 'king'. So मगधस्य राजा is मागध । अस्यापत्यं स्त्री मागधी ।

"लट् स्मे"—लट् takes the place of लिट् when स्म is used.

Bengali.—অযোধ্যাধিপ প্রিয়ার সহচরীদিগকে অনুরূপ সাদরে এই কথা জিজ্ঞাসা করিতেন, যে, মগধদুহিতা (একণে) কি বস্তুতে অভিলাষিণী ? তিনি লজ্জাবশতঃ আমার নিকটে কোন অভিলাষ কি ব্যক্ত করেন না ? । ৫ ।

English rendering.—Unto me she does not express any wish (of hers). What are those things for which the princess of Magadha cherishes desire ? Even thus did the lord of the Uttara-kos'alas, filled with affection, frequently questioned the companions of his beloved (queen).—5.

Grammatical notes, &c., &c.

Sama'sa.—(1) वेलायां वेलायाम् अनुवेलम् (वीप्सायेऽव्ययीभाव:)। The rule which changes वेला into वेल is—"ह्रस्वो नपुंसके प्रातिपदिकस्य" (१।२।४७ पा० ३१८ सि०)। A प्रातिपदिक ending in अच् becomes shortened in the neuter. (2) प्रियाया: सख्य: प्रियासख्य: (षष्ठीतत्) ता: (3) उत्तरा: कोशला: उत्तरकोशला: (कर्मधा.) तेषाम् ईश्वर: उत्तर-कोशलेश्वर: (षष्ठीतत्)। "दिक्संख्ये संज्ञायाम्" (२।१।५० पा० ७२८ सि०) When संज्ञा (name) is meant, a word denoting दिक् or संख्या

forms a तत्पुरुष समास with another word.] Here उत्तरकोशल denotes the name of a region ; so उत्तर, a word denoting दिक्, forms a तत्पुरुष with कोशल ।

Case-ending.—(1) मे—'क्रियाग्रहणमपि कर्त्तव्यम्' (१।४।३२ पा० वा० ५७९ सि० वा०) इति वार्त्तिकात् क्रियाग्रहणात् चतुर्थी (2) क्रिया—इतौ तृतीया –"विभाषा गुणेऽस्त्रियाम्" cannot be applicable here. Although क्री is a गुण, yet it is a feminine word ; so it cannot admit पञ्चमी (3) वस्तुषु -विषयाधिकरणे सप्तमी (4) इति—अव्ययं, तुल्यार्थकं (5) अनुवेलम्—अव्ययं, क्रियाविशेषणम् (6) प्रियामुखौ:—गौणे कर्मणि द्वितीया । (For द्विकर्मक roots see पृच्छन्ती in I. 45)

Synonyms.—(1) क्री—'मन्दाक्षं ह्रीस्त्रपा व्रीड़ा लज्जा ।' (अ०)

(2) ईश्वर 'स्वामीत्वीश्वरः पतिरीशिता । अधिभूर्नायको नेता प्रभुः परिवृढोऽधिपः ।' (अ०)

Different meanings.—(1) ईश्वर—'ईश्वरो मन्मथे शम्भौ स्वामिनि वाच्यवत् । ईश्वरी पुंश्चलीमायाम् ।' (वि मे.)

Derivation.—(1) क्रिया – क्री + क्विप् (3rd c. s.) (2) ईप्सितम्—आप् + सन् + क्त (भावे, 2nd c. s.) (3) स्पृहावती—स्पृह् + अङ्, "षिद्भिदादिभ्योऽङ्" (V. notes on जरसा Sl. 23, C. I.) स्पृहा + मतुप् + ङीप्—मकारस्य वत्वम् । (4) मागधी—मगध + अण् (अपत्यार्थे) + ङीप् (5) आहृतः—आ + हृ + क्तः (कर्त्तरि) (6) कोशलः—कु + शल् + अच् (कर्त्तरि, पृषोदरादित्वात् गुणः इति वाचस्पत्ये) को (पृथिव्यां) शलति (गच्छति, पराक्रमं प्रदर्शयति) । The alternative form is कोसल । (7) उत्तरकोशलाः—उत्तरकोशलानां निवासो जनपदः इति वाक्ये जनपदे इत्यर्थे उत्तरकोशल + अण् । This अण् is enjoined by the Sutra "तस्य निवासः" (४।२।६९ पा० ११५१ सि०) । It elides and the resultant becomes plural.

Conjugation.—(1) प्रच्छ्—(V. Sl. 45, C. I.) For its double objects (see notes on पृच्छन्ती, Sl. 45, C I, 1) (2) (ह्री to feel shame) जिह्रेति जिह्रीतः, जिह्रियति (लट्) अजिह्रेत्, अजिह्रीताम्, अजिह्रयुः (लङ्) जिह्रयाञ्चकार, जिह्राय, जिह्रियतुः, जिह्रयिथ, जिह्रेथ (लिट्) अह्रैषीत्, अह्रैष्टाम्, अह्रैषुः (लुङ्) ह्रेता (लुट्) ह्रेष्यति (लृट्) ह्रीयात् (आ॰ लिङ्) जिह्रीषति (सन्-लट्) जेह्रीयते (यङ्-लट्) ह्रेपयति (णिच्-लट्) अजिह्रिपत् (णिच्-लुङ्) ह्रीतः, ह्रीणः (क्त)—"नुदविदोन्दत्राघ्राह्रीभ्योऽन्यतरस्याम्" (८।२।५६। पा॰ ३०३८ सि॰)। The त of क्त is optionally changed into न when क्त is affixed to नुद्, विद्, उन्द्, त्रा, घ्रा, and ह्री। (3) शंस् (to tell) (V. II, 64). शस्तः (क्तः)। The root शंस् is read in धातुपाठ as 'शंसु'। Hence शंस् must not get इट् in निष्ठा क्त by "उदितो वा" (७।२।५६। पा॰ ३३२८ सि॰) and "यस्य विभाषा" (See Remark under I, 30.)

Grammatical peculiarity in उत्तरकोशल. The affix अण् elides by the Sutra "जनपदे लुप्" (४।२।८१ पा॰ १२६३ सि॰) "A तद्धित affix of the चातुरर्थिक class elides to mean a जनपद"।

The resultant word becomes plural by the Sutra "लुपि युक्तवद्व्यक्तिवचने" (१।२।५१ पा॰ १२६४ सि॰)।

The gender and number of a word formed by a चातुरर्थिक affix which elides, follow those of the original word. In उत्तरकोशलानां जनपदः, the original word उत्तरकोशल, meaning the people, is plural and masculine; so the resultant, meaning the country, should be plural and masculine.

For the geographical position of उत्तरकोशल see notes on the same word in VI, 71.

Remark.—(1) One of the Calcutta editors says that the fourth case in मे is determined by the rule "कर्मणा यमभिप्रैति स सम्प्रदानम्"। The Vritti is दानस्य कर्मणा यमभिप्रैति स सम्प्रदानसंज्ञः

ख्यात् । In the case of मे भ्रंसति, this rule is not applicable, because मे is here associated not with the कर्म of the root दा but with the कर्म of भ्रंस्। So क्रियाग्रहण is meant here. Therefore, क्रियाग्रहणात् चतुर्थी is preferable. See notes on वनाय, II, 1. (2) The same editor says that क्त in 'ईप्सितं' is used in कर्मवाच्य। When क्त is used in कर्मवाच्य, the word formed by it generally becomes a verb and not a noun. Words formed by क्त in भाववाच्य may be verbs as well as nouns. Here 'ईप्सितम्' is a noun. So क्त should not be in कर्मवाच्य।

उपेत्य सा दोहददुःखशीलतां
यदेव वव्रे तदपश्यदाहृतम् ।
न हीष्टमस्य त्रिदिवेऽपि भूपते-
रभूदनासाद्यमधिज्यधन्वनः ॥ ६ ॥

Prose order—सा दोहददुःखशीलताम् उपेत्य यदेव वव्रे, तत् आहृतम् अपश्यत्, हि, अधिज्यधन्वनः अस्य भूपतेः त्रिदिवे अपि इष्टं (वस्तु) अनासाद्यं न अभूत् । Mallinātha places 'एव' after 'अपश्यत्' and uses 'अधिज्यधन्वनः' as an explanatory word of 'भूपतेः' ।

Explanation by use of synonyms—सा (सुदक्षिणा) दोहददुःखशीलतां (गर्भिणीमनोरथनिबन्धनक्लेशम्) उपेत्य (प्राप्य) यदेव (यद्वस्तु) एव वव्रे (प्रार्थितवती) तत् (तदेव वस्तु) आहृतम् (आनीतम्) अपश्यत् (ददर्श) हि (यतः) अधिज्यधन्वनः (आरोपितमौर्वीकशरासनस्य) अस्य भूपतेः (राज्ञो दिलीपस्य) त्रिदिवेऽपि (स्वर्गेऽपि का कथा मर्त्यलोकस्य) इष्टम् (अभिलषितं वस्तु) अनासाद्यम् (अप्राप्यं) नाभूत् (नासीत्) ।

Substance.—परोक्षं भङ्ग्यन्तरेण भूयो वर्णयति । अतिविस्मयकरं सा नितरां [illegible] समुपययौ, दुर्लभान् वस्तूनि स्पृहयाम्बभूव च । राजापि यत् यत् सा

प्रार्थितवती तत्तदाजहार । ननु तादृशः शास्त्रज्ञः राजा कथं लौल्योऽभूत् ? न । गर्भिणीमनोरथोऽवश्यं पूरणीयः । अपूरणे गर्भस्य दोषः स्यादिति हेतोः शास्त्रकाराः दोहदं पूरयितुमादिशन्ति । तत्पूरणेन च दिलीपः शास्त्रगौरवं ररक्ष । ननु सुदक्षिणा यद्यत् प्रार्थितवती तत्तदेव दिलीपः कथमाहर्तुं शशाक इत्यत आह । स हि एक धनुर्धरः ससागरायाः भुवो भर्ता । अस्यां भुवि किमपि नासीत् यत् राजाधिराजस्य तस्य दुर्लभम् । किमु वक्तव्यम् धरेयं तस्य वशगा स्वर्गोऽपि तस्य परवश आसीत् । अधिज्यकार्मुकमद्वितीयधानुष्कं तमिन्द्रोऽपि प्रीणयितुं यत्नपरो बभूव । स्वर्गेऽपि तद्वस्तु नाभूत् यत् दिलीपस्याप्राप्यम् ।

Change of Voice.—तया......अदृश्यत......दृष्टं न अनासाद्यं न... अभाजि ।

Sanjivani.—उपेत्येति । दोहदं, गर्भिणीमनोरथः—"दोहदं दौर्हृदं श्रद्धा लालसञ्च समं स्मृतम्" इति हलायुधः—(सा) सुदक्षिणा, दोहदेन गर्भिणीतर्षेण दुःखशीलतां, दुःखस्वभावतां [दोहददुःखशीलताम्] (उपेत्य) प्राप्य (यत्) वस्तु (वव्रे) आचकाङ्क्ष (तत्) (आहृतम्) आनीतं—भर्त्रा इति शेषः—(अपश्यत् एव) अलभत इत्यर्थः— कुतः ?— (हि) यस्मात् (अस्य भूपतेः) (त्रिदिवे अपि) स्वर्गे अपि (दृष्टं) वस्तु (अनासाद्यम्) अनवाप्यं (न अभूत्)—किं याञ्चया ? नेत्याह—अधिज्यधन्वनः इति । नहि वीरपत्नीनामलभ्यं नाम किंचिदस्ति इति भावः । अत्र वाग्भटः "पादशोफो विदाहोऽन्ते श्रद्धा च विविधात्मिका" इति । एतच्च पत्नीमनोरथपूरणाङ्गीकरणं दुष्टदोषसम्भवात् न तु राज्ञः स्त्रीलौल्यात् । तदुक्तम्—"देयमप्यहितं तस्यै हिताय हितमल्पकम् । श्रद्धाविघाते गर्भस्य विकृतिश्च्युतिरेव वा" ॥ अन्यत्र—"दोहदस्याप्रदानेन गर्भो दोषमवाप्नुयात्" इति ॥ ६ ॥

Sanjivani Explained.

दोहदं दौर्हृदम् ○ ○ ○ स्मृतम्—दोहद, दौर्हृद, श्रद्धा, and लालस are synonymous.

"पादशोफो विदाहः ○ ○ ○ विविधात्मिका"—Bāghata enumerates the supervening symptoms of pregnancy. The legs of the

woman become slightly swollen. She feels a burning sensation of the skin ; and various sorts of longings appear

एतत्र * * * शीलत्वम् – Why did the king pay so much attention to her ? Was it because he was fond of his wife ? Mallinátha answers, – 'He did it, not because he was a slave of his wife but because he knew that if the wishes of a pregnant wife be not fulfilled, the fœtus might be deformed'.

"ईयमप्यहितम् * * एव वा"—Even what is baneful should be given to her for her good ; what need be said then of what is beneficial ? But everything should be given in small measure. If her longing be not fulfilled, the fœtus would either be deformed or expelled untimely.

दोहदस्य * * * अवाप्नुयात् The fœtus becomes tainted if the wishes of the mother be not fulfilled.

Bengali. তিনি দোহদনিমিত্তক্লেশকরী অবস্থা প্রাপ্ত হইয়া যে বস্তু আনয়নের নিমিত্ত কহিতেন, তাহাই সমাহৃত দেখিতে পাইতেন, যেহেতু সজ্যশরাসন সেই ভূপতির অভীষ্ট বস্তু স্বর্গস্থিত হইলেও অপ্রাপ্য হইত না। ৬।

English rendering. —Arrived at the distressful condition induced by the longings of pregnancy, she beheld whatever she asked for already brought (before her), since of that lord of Earth (armed) with the strung bow there was not even in heaven a wished for object that was unattainable.—6

Gramamatical notes &c. &c.

(1) दोहम् (आकर्षं) ददाति इति दोहदः (उपपदतत्)—"अयमिच्छामात्रवाच्यपि विशेषेण गर्भिणीच्छायां प्रयुज्यते ।" (भानुजिः) दोहदजनितं दुःखं दोहददुःखम् (शाकपार्थिवादित्वात् मध्यपदलोपी समासः) तत् शीलं यस्याः सा दोहददुःखशीला। (बहु) तस्या भावः दोहददुःखशीलता ताम् अथवा दुःखं (दुःखकरं) शीलं यस्याः सा दुःखशीला (बहु) तस्याः भावः दुःखशीलता दोहदेन दुःखशीलता

दौहृददुःखशीलता (तद्दीयावत्)। दौहृददुःखशीला in this case should be taken as a गुणवचन word. Some grammarians say that not the words expressive of गुण (qualities) are गुणवचन but those expressive of even धर्ममात्र (any property of a द्रव्य) are also called गुणवचन। ज्ञानेन्द्र is against this view. By गुणवचन he understands words which express such well-known qualities as whiteness. The alternative derivation we give below, viz., दौहृददुःखशीलम् तस्य भावः is after ज्ञानेन्द्र। We quote from his तत्त्वबोधिनी—"नन्विह जातिसंज्ञाव्यतिरिक्तं धर्ममात्रं गुण इति यत् प्राचोनैरुक्तं तत् स्तौकर्यमन्यथा—'निरीक्ष्य केमे शरदः कृतार्थताम्।' 'सा चरति दुःखशीलताम्'—इत्यादिषु पुंवद्भावाप्रवृत्त्या दौर्घ्यश्रवणं स्यात् इत्यत आह सामान्ये नपुंसकम्। एवं 'नैष्ट' पुरी द्वारावतीत्वमासीत्' इत्यादि प्रयोगो निर्बाध एव।" (V. तत्त्वबोधिनी on ६।३।३५ पा० ८३६ सि०)। By the addition of त्व and तल्, feminine गुणवचन words must be changed into musculine. "त्वतलोर्गुणवचनस्य" (६।३।३५। पा० वा० ८३६ सि० वा०)। So दुःखशीला, a feminine गुणवचन word, assumes the masculine form दौहृददुःखशील। Or, we may derive it as दुःखं (दुःखकरं) शीलं यस्य तत्। दुःखशीलम्। दौहृदेन दुःखशीलम्=दौहृददुःखशीलम्। तस्य भावः। It may be asked, how can दौहृददुःखशील, which is an adjective of सुदक्षिणा, be in the neuter gender? The answer is it is a case of सामान्ये नपुंसकम्। See notes on दर्शितविघ्नभक्तिः II. 40. There is now no necessity of दौहृददुःखशीला assuming a masculine form.

(2) तृतीया द्यौरिति त्रिदिवः (पूरणार्थे पृषोदरादित्वात् साधुता.) According to मेदिनी it is also neuter as त्रिदिवम्—"त्रिदिवं तु खे स्वर्गे च त्रिदिवा नद्याम्" or त्रिसृष्वप्यवस्थासु बयो बालविपर्ययेषु वा दीव्यन्ति अत्र इति त्रिदिवः (उपपदसमास) or thus—बाल्यकौमारयौवनेन त्रिविधाः रात्रिंदिवम्…

भेदेन वा विविधो दीव्यति व्यवहरति प्रकाशते वा (उपपदसमास)—"दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु" [V. R. T. of Amarakosha N. S. P. Ed. p. p. 4—5] (3) भुवः or भुवाः पतिः भूपतिः (षष्ठीतत्) तस्य (4) न आसाद्यम् अनासाद्यम् (नञ्तत्) (5) अधिज्यधन्वनः—(V. अधिज्यधन्वन्, Sl. 8, C. II.)

Case-ending.—(1) भूपतेः 'ण्यत्' इति कृत्ययोगे अनासाद्य इत्यस्य कर्त्तरि षष्ठी पाक्षिकी । The alternative form is—भूपतिना ।—"कृत्यानां कर्त्तरि वा" (V. notes on मनीषिणाम्, Sl. 11, C. I.) (2) त्रिदिवे—आधाराधिकरणे सप्तमी ।

Synonyms.—(1) त्रिदिव—(V. दिव्, Sl. 4, C. III.) (2) दोहद—"अथ दोहदम् । इच्छाकाङ्क्षास्पृहेहातृड्वाञ्छा लिप्सा मनोरथः । कामोऽभिलाषस्तर्षश्च ।" (अ०)

Different meanings.—(1) दोहद—'दोहदो गर्भलक्षणे । अभिलाषे तथा गर्भे ।' (हे०)

N. B.—This word is also used as a masculine by हेमचन्द्र । (*vide* Different meanings.)

Derivation.—(1) उपेत्य—उप + इ (ण्) + ल्यप् । "ह्रस्वस्य पिति कृति तुक्" (६।१।७१ पा० २८५८ सि०) इति तुगागमः । (2) दोहदम्—दुह् + घञ् (भावे)=दोहः । दोह + दा + कः । "आतोऽनुपसर्गे कः" [V. notes on मकरध्वजाभम् in II, 10.] (3) बभ्रे —भृ + लिट्—ए (4) इष्टम्—इष् + क्त (भावे) (5) त्रिदिवे – त्रि + दिव् + घञ् । संज्ञापूर्व्वकत्वात् न गुणः or त्रि + दिव् + क (7th c. s.) "इगुपधज्ञाप्रीकिरः कः" (V. notes on केश, I, 5—9) (6) अनासाद्यम्–आ + सद् + णिच् (स्वार्थे)= सादि + ण्यत् (कर्मणि).

Conjugation.—(1) भृ—(V. Sl. 63, C. II.) (2) इष् in अपश्यत् – (V. Sl. 15, C. I.)

Force of हि is हेतु । 'हि हेतावधारणे' (अ०)

अपि —सम्भावनायाम् ।

क्रमेण निस्तीर्य च दोहदव्यथां
प्रचीयमानावयवा रराज सा ।
पुराणपत्रापगमादनन्तरं
लतेव सन्नद्धमनोज्ञपल्लवा ॥ ७ ॥

Prose order. सा क्रमेण दोहदव्यथां च निस्तीर्य प्रचीयमानावयवा (सती) पुराणपत्रापगमात् अनन्तरं सन्नद्धमनोज्ञपल्लवा लता इव रराज ।

Explanation by use of Synonyms.—सा (सुदक्षिणा) क्रमेण (पर्यायेण) दोहदव्यथां (गर्भिणीमनोरथानिबन्धनक्लेशं) च (पश्चात्) निस्तीर्य (अतिक्रम्य) प्रचीयमानावयवा (पुष्यमाणाङ्गी सती) पुराणपत्रापगमात् (पुरातनपर्णनाशात्) अनन्तरं (परं) सन्नद्धमनोज्ञपल्लवा (सञ्जातमनोहरपत्रा) लता इव (व्रततीव) रराज (शोभां प्राप) ।

Substance. कामतानन्तर गर्भिण्याः शरीरपुष्टिः लोकप्रसिद्धा । तां पुष्टिमधुना कविरुपमया वर्णयति । वसन्ते लता यथा पुरातनपत्राणि विहाय नवीनपल्लवैराच्छादिता सती परमरमणीयां शोभामवाप्नोति, तथा महिषी दोहदनिबन्धनक्लेशकारीमवस्थां क्रमेणातिक्रम्य परमां पुष्टिमधिगतैरवयवैः कामपि रमणीयां शोभां प्राप्तवती ।

Change of voice.—तया ..... प्रचीयमानावयवया...... सन्नद्धमनोज्ञपल्लवया लतया... रेजे वा रराजे ।

Sanjivani.—क्रमेणेति । (सा) सुदक्षिणा (क्रमेण दोहदव्यथां च निस्तीर्य) (प्रचीयमानावयवा) पुष्यमाणावयवा सती पुराणपत्राणाम् ; अपगमात्, नाशात् [पुराणपत्रापगमात्] (अनन्तरं) सन्नद्धाः, सञ्जाताः ; प्रत्यग्रत्वात् मनोज्ञाः पल्लवाः यस्याः सा [सन्नद्धमनोज्ञपल्लवा] (लता इव रराज) ॥ ७ ॥

Sanjivani Explained.

प्रत्यग्र=New.

Bengali.—পুরাতনপত্র পতিত হইলে, মনোহর নবপত্রনিকর দ্বারা আচ্ছাদিত লতা যেরূপ শোভা পায়, তদ্রূপ, তিনিও গর্ভজনিতা কষ্টকরী দশা অতিক্রমান্তে পুষ্টাবয়বশালিনী হইয়া শোভা পাইতে লাগিলেন।

English rendering.—Having gradually got over the pains induced by the longings of pregnancy, she, with growing limbs, shone like a creeper decked with beautiful foliage after the fall of the old leaves.- 7.

Grammatical notes, &c., &c.

Sama sa. –(१) दोहदजनिता व्यथा दोहदव्यथा (शाकपार्थिवादित्वात् मध्यपदलोपी समासः) ताम् (2) प्रचीयमानाः अवयवाः यस्याः सा प्रचीयमानावयवा (बहु) (3) पुराणानि पत्राणि पुराणपत्राणि (कर्मधा.) तेषाम् अपगमः पुराणपत्रापगमः (षष्ठीतत्) तस्मात् (4) अविद्यमानम् अन्तरं यस्मिन् कर्मणि तद् यथा तथा अविद्यमानान्तरं, अनन्तरम् वा (बहु) 'नञोऽस्त्यर्थानाम्—' V. notes on अनन्यशासनाम्, Sl. 30, C. I.) (5) सम्यक् नद्धाः सन्नद्धाः (सुप्सुपा) मनसा जानन्ति इति मनोज्ञाः, पलवान् लुनाति (कर्मधा.) वा, पल्लां लूयन्ते इति पल्लवाः (उपपदतत) [V. R. T. of Amarakos'a, N. S P. Ed. 151] मनोज्ञाः पल्लवाः मनोज्ञपल्लवाः (कर्मधा.) सन्नद्धाः मनोज्ञपल्लवाः यस्याः सा सन्नद्धमनोज्ञपल्लवा (बहु)।

Case-ending. (1) क्रमेण - प्रकृत्यादिभ्यस्तृतीया (2) पुराणपत्रापगमात् कालवाचिनः अनन्तरशब्दस्य योगेन पञ्चमी—'तेन सम्प्रतिदिश्यकालवृत्तिना योगेऽपि भवति' (V. Vritti on २।३।२९। पा० ५९५ सि०) [V. notes on मन in Sl. 6, C. I.] (3) अनन्तरम्—क्रियाविशेषणम्।

Synonyms.—(1) पुराण—"पुराणे प्रतनप्रत्नपुरातनचिरन्तनाः"। (अ०) (2) लता—'वल्ली तु व्रततिर्लता' (अ०)।

Different meanings. (1) पक्ष—(V. Sl. 15, C. II.) (2) पुराण –'पुराणं प्रत्नपात्रयोः । पुराणः षोडशपणे' (हे०)।

Derivation. – (1) निस्तीर्य—निर्+तॄ+ल्यप् (2) दोहदम्– (V. Sl. 6, C. III.) (3) प्रचीयमानाः—प्र+चि+शानच् (कर्मणि 1st c. p.) (4) रराज राज्+लिट्+णल् (5) पुराणम्—पुरा+ट्युल् (भवार्थे) निपातनात् न तुट् । "सायचिरंप्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च" (४।३।२३। पा० १३११ सि०) V. notes on प्राक्तन in I, 20.

पुराण is formed by निपातन, but it does not fall under पृषो दरादि । भाष्यकार says 'बवाधकान्यपि निपातनानि' । V. परिभाषेन्दुशेखर of नागेशभट्ट । (6) समुद्गः सम्+उद्+गम्+डः (कर्मणि, 1st c. p.) (7) मनोज्ञाः—मनस्+ज्ञा+कः (कर्मणि, 1st c. p. "इगुपधज्ञाप्रीकिरः कः" (V. notes on देश, Sl. 5, 9, C. I)

Conjugation.– (1) तॄ—(V. Sl. 2, C. I.) (2) राज्—(V. Sl. 20, C. II.)

Force of च is पश्चात्तन ।

दिनेषु गच्छत्सु नितान्तपीवरं
तदीयमानीलमुखं स्तनद्वयम् ।
तिरश्चकार भ्रमराभिलीनयोः
सुजातयोः पङ्कजकोशयोः श्रियम् ॥ ८ ॥

Prose order.—दिनेषु गच्छत्सु नितान्तपीवरम् आनीलमुखं तदीयं स्तनद्वयं भ्रमराभिलीनयोः सुजातयोः पङ्कजकोशयोः श्रियं तिरश्चकार ।

Explanation by use of synonyms.—दिनेषु (दोहददिवसेषु) गच्छत्सु (अतियत्सु सत्सु) नितान्तपीवरम् (अतिस्थूलम्) आनीलमुखं (समन्तान्नीलचूचुकं) तदीयं (तत्सम्बन्धि), स्तनद्वयं (पयोधरयुगलं) भ्रमराभिलीनयोः

(द्विरेफाभिध्यासयोः) सुजातयोः (सुन्दरयोः) पङ्कजकोशयोः (पद्ममुकुलयोः)° श्रियं (कान्तिं) तिरश्चकार (पराबभूव) ।

Substance.—लक्षणान्तरं मुखे । सम्प्रति स्तनस्य पीनतां वर्णयति । दिनेषु गच्छत्सु तस्याः स्तनावत पीवरस्तनौ पीनतरौ बभूवतुः । चूचुकद्वयं च कृष्णवर्णता-मवाप । अधुना स्तनयोः शोभा कीदृशी जाता तामाह—भ्रमरयुक्तयोः सुन्दरपद्म कोशयोर्यथा शोभा स्यात, कृष्णचूचुकविशिष्टयोः तयोस्तथा समजनि ।

Change of voice. ...नितान्तपीवरेण आनीलमुखेन तदीयेन स्तन-द्वयेन......श्रीः तिरश्चक्रे ।

Sanjivani.—लक्षणान्तरं वर्णयति—दिनेष्विति । (दिनेषु) दौहृद दिवसेषु (गच्छत्सु) स्तनम् (नितान्तपीवरम्) अतिस्थूलम् ; आ, समन्तात , नीले, मुखे, चूचुके , यस्य तत् [आनीलमुखं] (तदीयं स्तनद्वयं) भ्रमरैः अभिलीनयोः, अभिध्यासयोः [भ्रमराभिलीनयोः] (सुजातयोः) सुन्दरयोः (पङ्कजकोशयोः) पद्ममुकुलयोः (श्रियं तिरश्चकार)– अत्र वाग्भटः—“अम्ल इष्टता स्तनौ पीनौ श्वेतान्तौ (सकान्ती) कृष्णचूचुकौ” इति ॥ ८ ॥

Sanjivani Explained.

अम्ल इष्टता स्तनौ ... कृष्णचूचुकौ - During pregnancy, a desire for sour things appears. The breasts become swollen. A white streak sets in round them, and the nipples become black.

Bengali.—কিছু দিন গত হইলে তাঁহার অতিস্থূল এবং চতুর্দ্দিকে কৃষ্ণবর্ণ মুখবিশিষ্ট স্তনদ্বয়, ভ্রমরাভিব্যাপ্ত পদ্মকোশদ্বয়ের কান্তিকে পরাভূত করিল। ৮।

English rendering.—As days went, her two bosoms, exceedingly deep, (and) endued with nipples blue all round, cast into the shade the beauty of a couple of well-born lotus-buds with bees sitting on them.—8.

Grammatical notes, &c., &c.

Sama'sa.—(1) नितान्तं पीवरं नितान्तपीवरम् (सुप् सुपा) (2) आ (समन्तात्) नीले आनीले (प्रादिः) आनीले मुखे यस्य तत् आनीलमुखम् (बहु),

(3) स्तनयोरिदं स्तनंदयम् (षष्ठीतत्) (4) भ्रमं (भ्रमणं) राति (अधिगच्छति) इति भ्रमराः (उपपदतत्) अभि (सम्यक्) लीनौ अभिलीनौ (प्रादिः) भ्रमरैः अभिलीनौ भ्रमराभिलीनौ (तृतीया तत्) तयोः ; (5) शोभनं जातं (जननं) ययोः तौ सुजातौ (बहु) तयोः or सुष्ठु जातौ सुजातौ (सुप्सुपा) तयोः ; (6) पङ्के जायते इति पङ्कजं (उपपदतत्) तयोः कोशौ पङ्कजकोशौ (षष्ठीतत्) तयोः ।

Case-ending. (1) द्विषेषु -भावाधिकरणे सप्तमी—"यस्य च भावेन भावलक्षणम्" (V. notes on ज्ञाने, I. 22.) (2) पङ्कजकोशयोः - शेषे षष्ठी—'श्रियम्' इत्यनेन सम्बन्धः ।

Synonyms.—(1) स्तन - "स्तनौ कुचौ" (अ०) (2) भ्रमर—"मधुव्रतो मधुकरो मधुलिण्मधुपालिनः । द्विरेफपुष्पलिड्भृङ्गषट्पदभ्रमरालयः ॥" (अ०) ।

Different meanings.—(1) भ्रमर - "भ्रमरः कामुके भृङ्गे" (मे०) (2) कोश—"कोशोऽस्त्री कुड्मले पात्रे दिव्ये खड्गपिधानके । जातिकोशेऽर्थसंघाते पेश्यां शब्दादिसंग्रहे ॥" (मे०) ।

Derivation. (1) पीवरम् प्याय् + ष्वरच् (निपात्यते , 'छित्वरछत्वरधीवरपीवरमीवरचीवरतीवरनीवरगह्वरकट्वरसंयद्वराः' (उ० ३।१)) [The eleven words mentioned above have been formed irregularly by ष्वरच् ।] (2) गच्छतस् --गम् + शतृ (7th c. p.) (3) तदीयम्—तद् + छ. (4) स्तनः -स्तन् + अच् (कर्तरि) स्तनति (कथयति) यौवनोदयम् or स्तनति (शब्दायते) कामुकैः or "पुंसि संज्ञायां घः प्रायेण" (३।३।११८। पा० ३२९६ सि०) इति 'घ' प्रत्ययेन सिध्यति [V. R. T. of Amarakos'a, N. S. P. Ed. P. 262.] (5) तिरश्चकार—तिरस् + कृ + लिट् + णल् (6) भ्रमरः—भ्रम् + करन्—'असिकसिकमिभ्रमि—' (उ० २।१२२।) or, it may be derived thus.—भ्रम् + घञ् = भ्रम—वृद्ध्यभावः—"नोदात्तोपदेशस्य—" (V. notes on भ्राम्य, Sl. 48, C. I.) भ्रम + रा + कः—"आतोऽनुपसर्गे कः" (V. notes on मदनरक्षास II, 10.) (7) अभिलीनयोः—अभि + ली + क्त (श्लिषि, 6th c. d.) This root is always [illegible]

in many other places of Raghuvans'am it is used as सकर्मक by Kālida'sa. (8) कोशयोः—कुश्+घञ् (6th c. d.) The alternative from is कोषयोः (9) श्रियम्—श्रि+क्विप्=श्रीः (2nd c. s.)—'क्विब्वचिप्रच्छ्यायत—' (V. notes on वाच्, I. 1.). By the above rule इ of श्रि is lengthened.

Conjugation.—(1) कृ (to do &c.) V. I, 55.

Rhetoric.—The figure of speech is व्यतिरेक (V. I, 24.). Generally things are compared with lotuses because their beauty is well-known. Here the उपमेय's are said to excell the उपमान's.

निधानगर्भामिव सागराम्बरां
शमीमिवाभ्यन्तरलीनपावकाम् ।
नदीमिवान्तःसलिलां सरस्वतीं
नृपः ससत्त्वां महिषीममन्यत ॥ ९ ॥

Prose order.- नृपः ससत्त्वां महिषीं, निधानगर्भां सागराम्बराम् इव, अभ्यन्तरलीनपावकां शमीम् इव, अन्तःसलिलां सरस्वतीं नदीम् इव, अमन्यत ।

Explanation by use of synonyms.—नृपः (राजा दिलीपः) ससत्त्वां (गर्भिणीं) महिषीं (कृताभिषेका राज्ञी) निधानगर्भां (रत्नगर्भां) सागराम्बराम् इव (समुद्रवसनामुर्वीमिव) अभ्यन्तरलीनपावकाम् (अन्तर्निहितहुताशनां) शमीम् इव (शमीवृक्षमिव) अन्तःसलिलाम् (अन्तर्जलां) सरस्वतीं नदीम् इव (तदाख्यां निम्नगामिव) अमन्यत (बुबुधे) ।

Substance.—यथा समुद्रवसनायाः पृथिव्याः गर्भे रत्नराशयः सन्ति, यथा शमीतरोरभ्यन्तरे पावकः विराजते, यथा सरस्वत्या अभ्यन्तरे जलं गुप्तं वर्तते, तथा

महिष्यां गर्भं धारयन्तीमिति: तेजस्वी पावन: पुत्रोऽस्ति। अत: नृप: तां पत्नीं रत्नगर्भां पृथिवीमन्त:पावकां शमीमन्तर्जलां सरस्वतीमिव च मेने।

Change of voice.—नृपेण समस्ता महिषी निधानगर्भा सागराम्बरा ... अभ्यन्तरलीनपावका शमी...अन्त:सलिला सरस्वती नदी......।

Sanjivani. निधानेति। (नृप:) (समस्त्वाम्) आपन्नसत्त्वां गर्भिणीम् इत्यर्थ: —"आपन्नसत्त्वा स्याद् गुर्विण्यन्तर्वत्नी च गर्भिणी" इत्यमर: (Cole. P. 142) (महिषीं) निधानं निधि: गर्भं यस्या: तां —[निधानगर्भां] (सागराम्बरां) समुद्रवसनां भूमिमित्यर्थ:. तामिव "भूतधात्री रत्नगर्भा विपुला सागराम्बरा" इति कोष:—अभ्यन्तरे लीन: पावक: यस्या: ताम् [अभ्यन्तरलीनपावकां] (शमीमिव) —शमीतरौ वह्निरस्ति इत्यत्र लिङ्गं शमीगर्भादग्निं जनयतीति (अन्त:सलिलाम्) अन्तर्गतजलां (सरस्वतीं नदीम् इव अमन्यत) एतेन गर्भस्य भाग्यवत्त्व तेजस्वित्व पावनत्वानि विवक्षितानि ॥ ९ ॥

Sanjivani Explained.

आपन्नसत्त्वा ... —आपन्नसत्त्वा, गुर्विणी, अन्तर्वत्नी, and गर्भिणी are synonymous

शमीतरौ ... जनयतीति—There is fire in शमी tree It is indicated by the fact that it creates fire from its core.

एतेन भाग्यवत्त्व तेजस्वित्व-पावनत्वानि विवक्षितानि—By the first उपमा, the prosperity, by the second the energy and by the third the purity of the foetus is intended to be spoken of.

Bengali.—নৃপতি অন্তঃসত্ত্বা মহিষীকে রত্নগর্ভা সমুদ্রবসনা উর্বীর ন্যায়, অন্তর্লীনবহ্নি শমীর ন্যায় এবং অন্তঃসলিলা সরস্বতী নদীর ন্যায় জ্ঞান করিলেন। ৯॥

English rendering.—The monarch regarded the queen with child in (her womb) as resembling the ocean-girdled Earth with treasures in (her) bowels, (or) as *Sami* wood with fire lurking within, (or) as the river Saraswati with current underground.—9.

Grammatical notes, &c., &c.

Sama'sa.—(1) निधानं गर्भे यस्याः सा निधानगर्भा ताम् (व्यधिकरण बहु.) । So says Mallina'tha. But then by the rule "सप्तमीविशेषणे बहुव्रीहौ" the word गर्भ must be placed before, so the form should be गर्भनिधाना । How is Mallina'tha then to be defended? The answer is by the Va'rttika 'गड्वादिः परा सप्तमी' the सप्तम्यन्त word गर्भ comes after निधान । Similar instances are चन्द्रशेखर and ऊर्णनाभ, &c. Bhattoji, following काशिका, acknowledges व्यधिकरणबहुव्रीहि without any restriction. Va'mana accepts it in the following places although he does not say that it is inadmissible in other places.—"अवर्ज्यो हि बहुव्रीहिः व्यधिकरणो जन्माद्युत्तरपदः" (का० सू० ५ अधि : २ अ० १८ सू०) । Va'mana says that when जन्मन्, भव, प्रभव, and उत्पत्ति, &c., are उत्तरपद, then व्यधिकरणबहुव्रीहि must be acknowledged. Mallina'tha follows काशिका । So instead of giving the विग्रहवाक्य as निधानं गर्भः यस्याः सा निधानगर्भा, he gives निधानं गर्भे यस्याः । [For particulars, V. notes on सायकपाणिहस्ता, Sl. 21. C. II.] (2) सागरः एव अम्बरं यस्याः सा सागराम्बरा (बहु) ताम् (3) अभ्यन्तरे लीनः अभ्यन्तरलीनः (सप्तमीतत्) तादृशः पावकः यस्याः सा अभ्यन्तरलीनपावका (बहु) ताम् । (4) अन्तः (मध्ये) सलिलं यस्याः सा अन्तःसलिला (बहु) ताम् (5) नॄन् पातीति नृपः (उपपद-तत्) (6) सत्त्वेन सह वर्तमाना ससत्त्वा or सहसत्त्वा ताम् (तुल्ययोग बहु)—"वोपसर्जनस्य" (६।३।८२ पा० ८४९ सि०) V. notes on सार्गलम्, I, 79.

Case-ending.—(1) महिषीम्—उद्देश्योपमेयकर्मपदम् (2) सागराम्बराम्, शमीम् and सरस्वतीम्—विधेयोपमानकर्मपदम् ।

Synonyms.—(1) सागर—(V. Sl. 32, C. IV.) (2) पावक—(V. अपि Sl. 5—9, C. I.) (3) शमी—"शमी सक्तुफला शिवा" (अ०) (4) नदी—"अथ नदी सरित् । तरङ्गिणी शैवलिनी तटिनी ह्रादिनी धुनी । स्रोतस्वती द्वीपवती स्रवन्ती निम्नगापगा ॥" (अ०)।

Different meanings.—(1) गर्भ—"गर्भो भ्रूणेऽर्भके कुक्षौ सन्धौ पनसकण्टके ।" (मे०) (2) अम्बर—"अम्बरं न व्योम्नि सुगन्धान्तरवस्त्रयोः" (मे०) (3) सरस्वती—"सरस्वती सरिद्भिदि । वाच्यापगायां स्त्रीरत्ने गोवाग्देवतयोरपि ।" (हे०)।

पनस=the jack tree. गी=word.

Derivation.—(1) निधानम्—नि+धा+ल्युट् (करणे) (2) सागरः—V. Sl. 2, C. I.) (3) पावकः—पू+ण्वुल् (कर्तरि) (4) सरस्वतीम्—सरस्+मतुप्+ङीप् (2nd c. s. मकारस्य वत्वम्) (5) महिषीम्—मह्+टिषच्+ङीष् (2nd c. s.)—"अविमह्योष्टिषच्" (उ० १।४५) (6) अमन्यत—मन्+लङ्—त ।

Conjugation.—(1) मन—(V. I. 32.)

Allusion in शमीमिवाभ्यन्तरलीनपावकाम्—तारकासुरवधाय देवप्रसादितः धूर्जटिर्वह्नौ स्वतेजः पातयामास । पावकस्तु तत्तेजः सोढुमशक्नुवन् प्राक् रसातलं ततः अश्वत्थपादपं पश्चात् शमीमाश्रितवान् । देवास्तु कार्त्तिकसृष्टये समस्तादपि सन्दधानास्तं शमीगर्भलीनमालोकयाञ्चक्रुः । शमीगर्भप्रवेशनात् शिवतेजसः ज्वलननिःसृतिरभूदिति शम्याश्च विशेषत्वं मन्तव्यमिति । (V. Maha'bha'ratam, Anus'asana parvan, ch. 85.)

Once, in the Krita age, an Asura, Ta'raka by name, grew in power through the boon of Brahma'. He became the lord of the universe. The gods were forced to quit the heavens. They went to Brahma' who told them that only a son begotten by S'iva could relieve them. S'iva's semen fell on fire. The fire-god, unable to bear its potency, fled into

the nether regions. He then entered into the Ficus religiosa, and then into the S'ami, which thence became his abode, because he was relieved of the burning sensation by entering into it. The gods found him out.

The site and position of सरस्वती--Saraswati rises from the Hima'laya mountains and flows by the north-west corner of Kurukshetra. It passes by Tha'nesvara and then it is lost in the desert. It is said to meet the Ganges at Preya'ga (Allahabad), and bifurcate from the Ganges at Triveni (near Magra') It falls into the Dámodara.

Rhetoric.--The figure of speech is मालोपमा । [V. Rhetoric. II, 75.] The queen is compared with the Earth, the शमी tree, as well as the river Saraswati. The son in her womb is, therefore, likened to the rich treasures in the womb of the Earth, the fire, and the holy waters of the river Saraswati.

Parallel passage.--'दुष्मन्तेनाहितं तेजो दधानां भूतये भुवः । अवेहि तनयां ब्रह्मन् ! अग्निगर्भां शमीमिव ॥' (V. अभिज्ञानशकुन्तलम्, ४ थमङ्कः) ।

One of the Calcutta editors says that सागराम्बरा is not a proper name but is an adjective of पृथिवी. So he finds fault with Mallina'tha. But Mallina'tha has cited authority, viz., कोष, to show that सागराम्बरा may be used as a proper name. Va'mana takes the word for an adjective used as a noun.

प्रियानुरागस्य मनःसमुन्नते-
र्भुजार्जितानाञ्च दिगन्तसम्पदाम् ।
यथाक्रमं पुंसवनादिकाः क्रिया-
धृतेश्च धीरः सदृशीर्व्यधत्त सः ॥ १० ॥

Prose order.—धीरः सः प्रियानुरागस्य मनःसमुन्नतेः भुजार्जितानां दिगन्तसम्पदां च धृतेश्च सदृशीः पुंसवनादिकाः क्रियाः यथाक्रमं व्यधत्त ।

Explanation by use of synonyms—धीरः (ज्ञानवान्) सः (राजा) प्रियानुरागस्य (भार्य्यास्नेहस्य) मनःसमुन्नतेः (चित्तौदार्य्यस्य) भुजार्जितानां (भुजबलेनाहृतानां) दिगन्तसम्पदाञ्च (दिगन्तविभवानां) धृतेश्च (पुत्रो मे भविष्यतीति सन्तोषस्य च) सदृशीः (अनुरूपाः) पुंसवनादिकाः (पुंसवनप्रभृतीः) क्रियाः (कार्य्याणि) यथाक्रमं (यथाविधि) व्यधत्त (कृतवान्) ।

Substance. भार्य्यायां तस्य यादृशोऽनुरागः यादृक् तस्य चित्तौदार्य्यं यादृश्यः तस्य बाहुबलार्जिताः सम्पत्तयः, पुत्रस्य भाविजन्मनः यादृशश्चास्य सन्तोषोऽभूत् तदनुरूपाः पुंसवनादिकाः क्रियाः स कुलोद्भवो नृपः यथाविधि सम्पादितवान् ।

Change of voice. धीरेण तेन......सदृश्यः ......व्यधीयन्त ।

Sanjivani.—प्रियेति । (धीरः) (सः) राजा, प्रियायाम् अनुरागस्य, स्नेहस्य [प्रियानुरागस्य] मनसः समुन्नतेः, औदार्य्यस्य [मनःसमुन्नतेः] भुजेन, भुजबलेन, करेण वा ; अर्जितानां [भुजार्जितानां] न तु वाणिज्यादिना— दिगन्तेषु सम्पदां [दिगन्तसम्पदां] (च) (धृतेः) पुत्रो मे भविष्यतीति सन्तोषस्य (च)—"धृतिर्योगान्तरे धैर्य्ये धारणाध्वरतुष्टिषु" इति विश्वः—(सदृशीः) अनुरूपाः—पुमान् सूयते अनेनेति पुंसवनं, तत् आदिः यासां ताः [पुंसवनादिकाः] (क्रियाः) (यथाक्रमं) क्रमम् अनतिक्रम्य (व्यधत्त) कृतवान् । आदिशब्देन अनवलोभनसीमन्तोन्नयने गृह्येते । अत्र "मासि द्वितीये तृतीये वा पुंसवनं यदहः पुंसा नक्षत्रेण चन्द्रमा युक्तः स्यात्" इति पारस्करः—"चतुर्थेऽनवलोभनम्" इति आश्वलायनः,—"षष्ठेऽष्टमे वा सीमन्तोन्नयनम्" इति याज्ञवल्क्यः (याज्ञवल्क्यसंहिता) ॥१०॥

Sanjivani Explained.

न तु वाणिज्यादिना—Trade is degrading to the Kshatriyas. They should earn wealth by the prowess of their arms.

पुंसवन—It is a ceremony performed on the second or the third month of gestation.

आदिशब्देन * * प्रयोग--By the word आदि, the ceremonies known as अनवलोभन and सीमन्तोन्नयन are to be understood.

"मासि द्वितीये * * * स्यात्"—In the second or the third month (of gestation) should be performed the rite of पुंसवन or on the day on which the moon combines with a male asterism. The male asterisms are कृत्तिका, विशाखा, अश्लेषा &c.

"चतुर्थेऽनवलोभनम्"—The ceremony known as अनवलोभन is performed on the fourth month of gestation.

"षष्ठेऽष्टमे वा सीमन्तोन्नयनम्"—The ceremony of सीमन्तोन्नयन should be observed on the sixth or the eighth month of gestation.

The sum and substance of the verse is that the king performed the rites of पुंसवन, &c., with great *eclat.* He did it in a style befitting his love for his wife, his own breadth of mind, his wealth, and his joy at the birth of a son.

Bengali.—ভার্যার প্রতি যাদৃশ অনুরাগ, চিত্তের যাদৃক্ ঔদার্য্য, ভুজবল দ্বারা অর্জ্জিত যাদৃক্ দিগন্তব্যাপী বিভব এবং (পুত্র হইবে এই বলিয়া) যাদৃশ সন্তোষ, তদনুরূপই (মহিষীর) পুংসবনাদি ক্রিয়া সেই ধীর নৃপতি যথাক্রমে সম্পাদন করিলেন ॥ ১০ ॥

English rendering.—That wise monarch performed, in due order, the rites beginning with *Pungsavana*, (in a style) befitting his affection for his dear spouse, the loftiness of his own mind, wealth acquired by his own arms and extending to the (very) verge of the points of the compass, and (the measure of) his own gratification.—10.

Grammatical notes &c. &c.

Samasa.—(1) प्रियायाम् अनुरागः प्रियानुरागः (सप्तमीतत्) तस्य (2) सम्यक् उन्नतिः समुन्नतिः (सुप्सुपा) मनसः समुन्नतिः मनःसमुन्नतिः (षष्ठीतत्) तस्याः (3) भुजाभ्याम् अर्जिताः भुजार्जिताः (तृतीयातत्) तासाम् (4)

दिशाम् अन्ताः दिगन्ताः (षष्ठीतत्) तेषु सम्पदः दिगन्तसम्पदः (सप्तमीतत्) तासाम् (5) क्रमम् अनतिक्रम्य यथाक्रमम् (अव्ययीभावः)—V. notes on आसमुद्र I. 5—9. (6) पुंसवनादिकाः—(V. Sanjivani.)

Case-ending.—(1) प्रियानुरागस्य, मनःसमुन्नतेः, दिगन्तसम्पदां and धृतेः—तुल्यार्थं सदृशौ शब्दयोगे षष्ठी पाक्षिकी । The alternative forms are प्रियानुरागेण, मनःसमुन्नत्या, दिगन्तसम्पद्भिः and धृत्या । "तुल्यार्थैरतुलोपमाभ्यां तृतीयाऽन्यतरस्याम्" (V. notes on प्रज्ञया, I. 15.) (2) यथाक्रमम्—अव्ययं, क्रियाविशेषणम् ।

Synonyms.—(1) धीर—V. I, 11.

Different meanings.—(1) धीर—'धीरो धैर्यान्विते स्वैरे बुधे क्लीबं तु कुङ्कुमे । स्त्रियां मद्यप्रभेदाख्याम् ।' (मे०) (2) धृति—(V. Mallina'tha) (3) क्रिया—V. III, 20.

Derivation.—(1) अनुरागस्य—अनु+रञ्ज्+घञ्, (भावे, 6th c. s.) चवर्ग is changed into कवर्ग "चजोः कु घिण्ण्यतोः" (७।३।५२ पा० २८६२ सि०) (2) भुजः—V. महाभुजः I. 13. (3) धीरः—धी+रा+कः—"आतोऽनुपसर्गे कः" (३।२।३ पा० २९१५ सि०) धियं (बुद्धिं) राति इति or thus धी+ईर्+अण्—"कर्मण्यण्" (३।२।१ पा० २९१३ सि०) धियं (बुद्धिम्) ईरयति (प्रेरयति, नियोजयतीत्यर्थः) इति (3) पुंसवनम्—पुम्स्+सू+ल्युट् (करणे)—पुमान् सूयते अनेनेति । (5) सदृशीः—V. सदृश in I. 15. (6) व्यधत्त—वि+धा+लङ्—त ।

Conjugation.—(1) धा—(V. I, 24.)

पुंसवनादिकाः—कप् is added to it in बहुव्रीहि by the rule—"शेषाद्विभाषा" (V. notes on व्यूढोरस्क, I. 13.)

None of the expressions, प्रियानुराग, मनःसमुन्नति, दिगन्तसम्पद्, भुजार्जित, and धृति, is unnecessary. Unless the king bears love for his wife, he cannot be desirous of performing any

ceremony. His love alone will not enable him to fulfill his wishes unless he has wealth to spend. Again, his heart must be broad before he can do justice to his love even if his wealth be vast.

सुरेन्द्रमात्राश्रितगर्भगौरवात्
प्रयत्नमुक्तासनया गृहागतः।
तयोपचाराञ्जलिखिन्नहस्तया
ननन्द पारिप्लवनेत्रया नृपः ॥ ११ ॥

Prose order गृहागतः नृपः सुरेन्द्रमात्राश्रितगर्भगौरवात् प्रयत्नमुक्तासनया उपचाराञ्जलिखिन्नहस्तया पारिप्लवनेत्रया तया ननन्द।

Explanation by use of Synonyms. गृहागतः (गृहमागतः) नृपः (राजा) सुरेन्द्रमात्राश्रितगर्भगौरवात् (लोकपालांशानुप्रविष्टगर्भभारात्) प्रयत्नमुक्तासनया (आयासमन्यत्र विष्टरया) उपचाराञ्जलिखिन्नहस्तया (सम्मानार्थाञ्जलिशिथिलभुजया) पारिप्लवनेत्रया (चञ्चललोचनया) तया (महिष्या) ननन्द (अहृष्यत्)।

Substance. अधुना कृच्छ्रविस्तारादिकं वर्णयति। लोकपालांशानुप्रवेशात् महिष्याः गर्भस्तया गुरुभार आसीत्, यत् सा नृपं गृहागतं तत्सम्मानार्थम् अत्यायासेन आसनादुत्थात् प्रभाक्, अञ्जलिकरणे तस्य हस्तद्वयं शिथिलमभूत्, नेत्रद्वयञ्च अविरतनिमीलनात् चाञ्चल्यं भेजे। तथाविधां तामवलोक्य अविलम्बं गाढं पुत्रमुखं द्रक्ष्यामि इति मत्वा राजा नितरां मुदमन्वभूत्।

Change of voice.—गृहागतेन नृपेण......ननन्दे।

Sanjivani.—सुरेन्द्रेति। (गृहागतः नृपः) सुरेन्द्राणां लोकपालानां मात्राभिः अंशैः आश्रितस्य अनुप्रविष्टस्य गर्भस्य गौरवात् भारात् [सुरेन्द्रमात्राश्रितगर्भगौरवात्] प्रयत्नेन मुक्तासनया आसनादुत्थितया इत्यर्थः [प्रयत्नमुक्तासनया] उपचारस्य अञ्जलिकरणे खिन्नहस्तया [उपचाराञ्जलिखिन्नहस्तया०] (पारिप्लवनेत्रया) तरलाक्ष्या—"चञ्चलं तरलं चैव पारिप्लवपरिप्लवे" इत्यमरः (Cole.—

p. 277) (तया) सुदक्षिणया (ननन्द)—सुरेन्द्रमात्राश्रितेत्यत्र मनुः—"अष्टाभिश्च सुरेन्द्राणां मात्राभिर्निर्मितो नृपः" इति ॥ ११ ॥

Sanjivani Explained.

अष्टाभिश्च सुरेन्द्राणाम् * * * नृपः—A king is made up of eight parts derived from the eight foremost ones of the deities. See II, 75.

मुक्तासनया—The wife should rise from her seat to honour the husband and sit after he takes his seat.

पारिप्लवनेत्रा—Sanskrit poets often attribute to their heroines restless eyes. Eyes as restless as those of the gazelle are regarded by them as exceedingly beautiful.

Bengali.—রাজা গৃহমধ্যে উপস্থিত হইলে, লোকপালগণের অংশানুপ্রবিষ্ট (গুরুতর) গর্ভভারহেতু, (মহিষী) কষ্টে আসন ত্যাগ করিয়া দণ্ডায়মান হইতেন,—(রাজার) সম্মানপ্রদর্শনে বদ্ধাঞ্জলি হইতে গিয়া (তদীয়) হস্তদ্বয় শিথিল হইয়া যাইত এবং নেত্রযুগল (বারংবার নিমীলন হেতু) চঞ্চল হইত। তাদৃশী মহিষীকে অবলোকন করিয়া নৃপতি আনন্দ অনুভব করিতেন।১১।

English rendering.—Arrived within the inner apartments, the monarch rejoiced at (the sight of) that spouse (of his) who left her seat with an effort in consequence of the heaviness of her womb filled with portions of the foremost deities, whose hands betrayed a langour in being folded for honouring him, and whose eyes seemed to be very restless.—11.

Grammatical notes, &c., &c.

Sama'sa.—सुरेषु इन्द्राः (श्रेष्ठाः) सुरेन्द्राः (सप्तमीतत्) तेषां मात्राः सुरेन्द्रमात्राः (षष्ठीतत्) ताभिः आश्रितः सुरेन्द्रमात्राश्रितः (तृतीयातत्) तादृशः गर्भः सुरेन्द्रमात्राश्रितगर्भः (कर्मधा) तस्य गौरवं सुरेन्द्रमात्राश्रितगर्भगौरवम् (षष्ठी-

तत्) तस्मात् (2) प्रकृष्टः यत्नः प्रयत्नः (प्रादिः) तेन मुक्तं प्रयत्नमुक्तम् (तृतीया-तत्) प्रयत्नमुक्तम् आसनं यया सा प्रयत्नमुक्तासना (बहु) वा मुक्तम् आसनं यया सा मुक्तासना (बहु) प्रयत्नेन मुक्तासना प्रयत्नमुक्तासना (तृतीयातत्), तया (3) गृहम् आगतः गृहागतः (द्वितीयातत्) (4) उपचारार्थः अञ्जलि उपचाराञ्जलिः (शाकपार्थिवादित्वात् मध्यपदलोपि समासः) वा उपचारस्य अञ्जलिः उपचाराञ्जलिः (अश्वघासादिवत् तादर्थ्ये षष्ठीसमासः) [V. Notes on धर्मपत्नी, Sl. 2, C. II.] उपचाराञ्जलौ वा उपचाराञ्जलिना खिन्नौ उपचारा-ञ्जलिखिन्नौ (सप्तमी वा तृतीया तत्) तादृशौ हस्तौ यस्याः सा उपचाराञ्जलि-खिन्नहस्ता (बहु) तया। (5) परिप्लवमेव पारिप्लवम्—पारिप्लवे नेत्रे यस्याः सा पारिप्लवनेत्रा (बहु) तया पारिप्लवनेत्रा cannot have the alternative form पारिप्लवनेत्री in feminine. The rule is "स्वाङ्गाच्चोप-सर्जनादसंयोगोपधात्" (४।१।५४। पा० ५१० सि०)। [If a स्वाङ्गवाचक word be उपसर्जन, *i. e.*, अप्रधान or secondary, and if its last but one letter be not a संयुक्तवर्ण or conjoint, a compound having such a word as its last component admits ङीष् optionally in its feminine form. The alternative feminine affix is टाप्। *e.g.* अतिकेशी, अतिकेशा ; चन्द्रमुखी, चन्द्रमुखा। संयोगोपधात् तु—सुगुल्फा। उपसर्जनात् किम्—शिखा] नेत्र is, no doubt, a स्वाङ्गवाचक word. It is, here, also an उपसर्जन because it is a component of the बहुव्रीहि compound and as such does not retain its prominence. But its उपधा or last but one letter is संयुक्त। So the compound पारिप्लवनेत्र cannot admit in feminine the affix ङीष्। Such is the case with उपचाराञ्जलिखिन्नहस्ता।

Sutras enjoining ङीष् to बहुव्रीहि compounds ending in स्वाङ्ग components.—"नासिकोदरौष्ठजङ्घादन्तकर्णशृङ्गाच्च" (४।१।५५ पा- ५११ सि०) [ङीष् is optionally added to a बहुव्रीहि compound

ending in नासिका, उदर, ओष्ठ, जङ्घा, दन्त, कर्ण or शृङ्ग। *E.g.* तुङ्गनासिकी, तुङ्गनासिका &c. Though नासिका and उदर consist of more than two vowels yet they do not come under the scope of the prohibitive Sutra "न क्रोडादिबह्वचः"। Though the five words ओष्ठ, जङ्घा, दन्त, कर्ण, and शृङ्ग are संयोगोपध, yet they admit ङीष् optionally. But the prohibition "सहनञ्विद्यमानपूर्वाच्च" is operative here. So we cannot have the form अनासिकी or सहनासिकी।

The Varttikas are.—(1) 'अङ्गगात्रकण्ठेभ्यो वक्तव्यम्' [A बहुव्रीहि compound ending in अङ्ग, गात्र, or कण्ठ admits ङीष् optionally in feminine form; *e.g.* स्वङ्गी, स्वङ्गा; सुगात्री, सुगात्रा; सुकण्ठी, सुकण्ठा।]

(2) 'पुच्छाच्च'—[A बहुव्रीहि compound ending in पुच्छ admits ङीष् optionally in feminine; *e.g.* सुपुच्छी, सुपुच्छा।

The Vartikas which reject option.—स्वाङ्ग—'कबरमणिविषशरेभ्यो नित्यम्'—[बहुव्रीहि compounds made of पुच्छ preceded by कबर, मणि, विष or शर always admits ङीष्। *e.g.* कबरपुच्छी मयूरी]।

"उपमानात् पक्षाच्च पुच्छाच्च"—[बहुव्रीहि compounds made of पक्ष or पुच्छ preceded by its उपमान word always admit ङीष्। *e.g.* उलूकपक्षी शाला। उलूकपुच्छी सेना]।

The following rules enjoin टाप् in feminine.—"न क्रोडादिबह्वचः"—(४।१।५६ पा० ५१२ सि०)—[Words ending in क्रोड or words consisting of many vowels, do not admit ङीष् even if the latter be स्वाङ्गवाचक and उपसर्जन। *E.g.* कल्याणक्रोडा, सुजघना।

"सहनञ्विद्यमानपूर्वाच्च"—(४।१।५७ पा० ५१३ सि०)—[A बहुव्रीहि compound formed by सह, नञ् or विद्यमान, does not admit ङीष् even if it ends in a स्वाङ्गवाचक component. *E.g.* सकेशा, अकेशा, विद्यमाननासिका]।

"नासिकोदरौष्ठजङ्घादन्तकर्णशृङ्गाच्च"... "नखमुखात् संज्ञायाम्"—(४।१।५८ पा० ५१४ सि०)—[A बहुव्रीहि compound, ending in नख, or मुख does not admit ङीष् provided the whole words are संज्ञा (proper names); *e. g.* शूर्पणखा, गौरमुखा। संज्ञायां किम्—ताम्रमुखी कन्या]।

In the following places ङीप् but not ङीष् is added in feminine.—"दिक्पूर्वपदान्ङीप्" (४।१।६०। पा० ५१५ सि०)—[A compound beginning with a word singifying दिश् and ending in a स्वाङ्गवाचक word admits ङीप् instead of ङीष्। *E. g.* प्राङ्मुखी]

(6) नॄन् पातीति नृपः (उपपदसमासः)।

Case-ending.—(1) सुरेन्द्रमात्राश्रितगर्भगौरवात्—हेतौ पञ्चमी पाक्षिकी—The alternative form is सुरेन्द्रमात्राश्रितगर्भगौरवेण—"विभाषा गुणेऽस्त्रियाम्" (V. notes on मौढ्यात्, Sl. 2, C. I.)। (2) तया—इत्थं तृतीया।

Synonyms.—(1) आसन—"पीठमासनम्" (अ०) (2) पारिप्लव—"चलनं कम्पनं कम्प्रं चलं लोलं चलाचलम्।" (Rest V. Sanjivani) (3) नेत्र—"लोचनं नयनं नेत्रमीक्षणं चक्षुरक्षिणी। दृग्दृष्टी च।" (अ०)।

Differents meanings.—(1) मात्रा—"मात्रा कर्णविभूषायां वित्ते माने परिच्छदे। अक्षरावयवे स्वल्पे क्लीबं कार्त्स्न्येऽवधारणे" (मे०) (2) पारिप्लव—"पारिप्लवाकुले स्यात् चञ्चले च" (हे०)।

Derivation.—(1) गौरवम्—गुरु+अण् (भावे) (2) आसनम्—आस्+ल्युट् (अधिकरणवाच्ये) (3) उपचारः—उप+चर्+घञ् (करणे) (4) खिन्नः—खिद्+क्तः (कर्त्तरि) (5) ननन्द—नन्द्+लिट्—णल् (6) पारिप्लवम्—परि+प्लु+अच्=परिप्लव। परिप्लव+अण् (प्रज्ञादित्वात्)।

Conjugation.—(1) नन्द्—(V. I, 57.)

कुमारभृत्याकुशलैरनुष्ठिते
भिषग्भिराप्तैरथ गर्भभर्मणि।

पतिः प्रतीतः प्रसवोन्मुखीं प्रियां
ददर्श काले दिवमभ्रितामिव ॥ १२ ॥

मूलस्य पाठान्तरम् ।

अनुष्ठिते—अधिष्ठिते (चा०)। गर्भभर्मणि—गर्भकर्मणि (दि०) गर्भवेश्मनि (चा० व०) गर्भरक्षणे (चा०)। पतिः प्रतीतः प्रसवोन्मुखीम्—निरत्ययाय प्रसवाय तन्मुखीम् (चा०)।

Prose order.—अथ कुमारभृत्याकुशलैः आप्तैः भिषग्भिः गर्भभर्मणि अनुष्ठिते (सति) पतिः प्रतीतः (सन्) काले प्रसवोन्मुखीं प्रियाम् अभ्रितां दिवमिव ददर्श । Mallinātha places 'पतिः प्रतीतः' after 'दिवमिव'।

Explanation by use of synonyms.—अथ (अनन्तरं) कुमारभृत्याकुशलैः (बालचिकित्सानिपुणैः) आप्तैः (हितैः) भिषग्भिः (वैद्यैः) गर्भभर्मणि (गर्भभरणे) अनुष्ठिते (कृते सति) पतिः (भर्त्ता) प्रतीतः (हृष्टः सन्) काले (अभिषीपक्षे—दशमे मासि, आकाशपक्षे—ग्रीष्मावसाने) प्रसवोन्मुखीम् (आसन्नप्रसवां) प्रियां (भार्य्याम्) अभ्रितां (सञ्जातमेघां) दिवमिव (आकाशमिव) ददर्श (दृष्टवान्)।

Substance.—प्रसवकाले उपस्थिते बालचिकित्सानिपुणा हितकारका वैद्याः चिकित्साशास्त्रविहितान् उपायानाश्रित्य गर्भपोषणमनुष्ठितवन्तः। आजीवनं पोषिताशाधुना फलिष्यतीति नृपतिरानन्दपरिप्लुतचेताः सन् प्रसवोन्मुखीं प्रियां ददर्श। ग्रीष्मावसाने सञ्जातमेघा अतएव वर्षोन्मुखी द्यौर्यथा निदाघतप्तानां लोकानां नयनानन्ददायिनी स्यात् तथा सा आसन्नप्रसवा पत्नी अनपत्यतातप्तस्य तस्य नयनयोरानन्दं व्यधात्।

Change of voice.— ......पत्या प्रतीतेन......प्रसवोन्मुखी प्रिया अभ्रिता द्यौः......ददृशे।

Sanjivani.—कुमारेति। (अथ) कुमारभृत्या, बालचिकित्सा—"संज्ञायां समजनिषद" (३।३।९९। पा० ३२०६ सि०) इत्यादिना क्यप्—तस्यां कुशलैः,

क्षतिभिः [कुमारभृत्याकुशलैः] "कृती कुशल:" इत्यमरः (Cole. p. 259.)—(आर्यैः) हितैः (भिषग्भिः) वैद्यैः—"भिषग्वैद्यौ चिकित्सके" इत्यमरः (Col. p. 152.)—गर्भस्य भर्मणि, भरणे [गर्भभर्मणि]—"भरणे पोषणे भर्म" इति हैमः,—"भृतिर्भर्म" इति शाश्वतः—भृञो मनिन्प्रत्ययः—(अनुदिते) क्रमेण सति (काले) दशमे मासि ; उन्मुखीं [प्रसवोन्मुखीम्] आसन्नप्रसवामित्यर्थः—"स्यादुत्पादे फले पुष्पे प्रसवो गर्भमोचने" इत्यमरः (Cole. p. 360.) (प्रियां) भार्याम्—अभाणि अस्याः सञ्जातानि अभ्रिता ताम् [अभ्रिताम्]—"तदस्य सञ्जातं तारकादिभ्यः इतच्" (५।२।३६ पा० १८३७ सि०) इति इतच्प्रत्ययः—(दिवम् इव) (पतिः) भर्ता (प्रतीतः) हृष्टः सन्—"ख्यातः हृष्टे प्रतीतः" इत्यमरः (Cole. p. 323) (ददर्श) दृष्टवान्। गर्भकर्मणीति पाठे गर्भाधानप्रतीतावौचित्यभङ्गः ॥ ११ ॥

Sanjivani Explained.

गर्भकर्मणि इति * * * * औचित्यभङ्गः—If the reading be गर्भकर्मणि, then the ceremony known as गर्भाधान would be denoted. As this ceremony should take place first of all, *i. e.*, before conception, its mention after the rites of पुंसवन, &c., which take place after conception, would be improper. The reading गर्भभर्म is not open to this objection. It simply means the nourishment of the fœtus which can take place properly after the ceremonies of पुंसवन, &c., have been performed.

कुमारभृत्या—The treatment of children. It is one of the eight topics of which S'us'ruta treats: these are शल्य (extraction of foreign matter from the body, including obstetrics, by means of instruments), शलाका (treatment of the diseases of those limbs of the body which are above the shoulders, *viz.*, ears, eyes, nose, tongue, mouth, lips, &c.), कायचिकित्सा (treatment of fever, diarrhœa, phthisis, insanity, epilepsy, and other diseases affecting the whole body), भूतविद्या

(treatment of diseases due to the influence of the deities, Asuras, Gandharvas, &c., as also of the planets, &c.), कौमारभृत्य (treatment of infants), अगद (treatment of poisons admitted into the body through bites and other causes), रसायनतन्त्र (medicines that prevent the effects of age), and वाजीकरणतन्त्र (aphrodisiacs). Though no child is as yet born, there is no impropriety in employing specialists in the treatment of infants. They can help the development of the fœtus in a proper way.

"कृती कुशलः"—The whole text is—

प्रवीणे निपुणाभिज्ञ-विज्ञ-निष्णात-शिक्षिताः ।
वैज्ञानिकः कृतमुखः कृती कुशल इत्यपि ॥

Each means 'skilful' or 'conversant'.

"भरणं पोषणं भर्म"—भर्म means भरण (maintenance) and पोषण (nourishment).

"स्यादुत्पादे * * * गर्भमोचने"—प्रसव means procreation, fruit, flower, as well 'the act of bringing forth'.

संज्ञायां समजनिषदेत्यादिना क्यप्—The क्यप् which is added to भृ is determined by the Sutra 'संज्ञायाम् * * *'. अज् preceded by सम्, सद् by नि, पत् by नि, मन्, विद्, षु, शीङ्, भृ and इ (ण्) admit क्यप् to mean संज्ञा । So भृ admits क्यप्, because भृत्या is a संज्ञा ।

"तदस्य सञ्जातं तारकादिभ्य इतच्"—The तद्धित affix इतच् is added to तारका &c., to mean 'तारका &c., are born in it'.

Bengali.—অনন্তর বালচিকিৎসানিপুণ হিতকর বৈদ্যগণ কর্তৃক শিশুর পোষণকর্ম্ম সাধন করিলে, স্বামী প্রহৃষ্ট হইয়া কালে আসন্নপ্রসবা মহিষীকে (প্রিয়তমাকে) মেঘাচ্ছন্না ; অতএব বর্ষণোন্মুখী আকাশের ন্যায় দর্শন করিতে লাগিলেন। ১২।

English rendering.—The acts for the protection of the fœtus having been performed by trusted physicians well-skilled in the treatment of infants, the husband, filled with joy, saw, in due season, his beloved (wife) about to bring forth like a cloudy sky (in the season of rains).—12.

Sama'sa.—(1) कुं (पृथिवीं) मारयति (पद्भ्यां ताडयतीति) कुमारः (उपपदसमासः) or, कुत्सितः मारः (कन्दर्पः) यस्य सः कुमारः (बहु—कार्त्तिकपक्षे) [V. R. T. of Amarakos'a, N. S. P. Ed. p. 19.] कुमारस्य भृत्या कुमारभृत्या (षष्ठीतत्) कौ (पृथिव्यां) शलन्ति वृद्धिप्रभावात् or, कौ शलन्ति चालयन्ति राजकार्य्याणि (णिच् is understood in this case), or, कोः पापात् शलन्ति, अपगच्छन्ति वृद्धिविभवात् इति कुशलाः (उपपदसमास)। [V. R. T. of Amarakos'a, N. S. P. Ed. p. p. 407—408.] कुमारभृत्यायां कुशलाः कुमारभृत्याकुशलाः (सप्तमीतत्) तैः (2) गर्भस्य भर्म गर्भभर्म (षष्ठीतत्) तस्मिन् (3) उन्नतं मुखं यस्याः सा उन्मुखी or उन्मुखा (बहु) 'प्राणिभ्या धातुजस्य'—(V. notes on स्वद्वाङ्ग, Sl. 3, C. I.)। For उन्मुखा and उन्मुखी, [V. "स्वाङ्गाच्चोपसर्जनात्—" on कातराक्षी in II., 52.] प्रसवे उन्मुखी प्रसवोन्मुखी (सप्तमीतत्) ताम्।

Case-ending.—(1) भिषग्भिः—अनुक्ते कर्त्तरि तृतीया (2) गर्भभर्मणि—भावाधिकरणे सप्तमी (3) दिवम्—विधेयीयमानकर्मपदम्, 'प्रियाम्' इत्युद्देश्योपमेयकर्मपदस्य।

Synonyms.—(1) प्रतीत—'प्रतीते प्रथितख्यातवित्तविज्ञातविश्रुताः' (अ०) (2) दिव्—(V. Sl. 2, C. III.) (3) भिषज्—'रोगहार्य्यगदङ्कारो भिषग्वैद्यौ चिकित्सके।' (अ०)।

Different meanings.—(1) कुमार—"कुमारः स्यात् शुके स्कन्दे युवराजेऽश्ववारके। बालके वरुणद्रौ ना न स्त्रीजात्यकाञ्चने॥" (मे०) (2) कुशल—'कुशलः शिक्षिते त्रिषु। क्षेमे च सुकृते चापि पर्य्याप्तौ च नपुंसकम्।' (वि० मे०) (3) भर्मन्—(V. Sanjivani.) (4) गर्भ—(V. Sl. 11, C. III.)

Derivation.—(1) कुमारः—कुमार+अच् or कु+मारि+अण् (2) भृत्या—भृत्या+क्यप् (भावे) टाप् (3) भिषग्भिः—भिषज्+यक् (कण्ड्वादिभ्यः) = भिषज्य। भिषज्य+क्विप् = भिषक् (3rd c. p.) "यस्य हलः" (६।४।४९। पा०

२६११ सि०) (4) कुशलैः—कु+शल्+अच् (कर्त्तरि, 3rd c p.) but not कुश+ला+क: (V. Our remark) (5) मर्माणि—(V. Sanjivani) (6) प्रतीत:—प्रति+इ (ण्)+क्तः (कर्मणि) (7) दर्श—दृश्+णिच्+अच् (8) द्विषम् (V. Sl. 2, C. III) (9) अभितास्—अप्+भ+क: (मूलविभुजादित्वात्) = अभ—पृषोदरादित्वात् 'प'कारस्य लोप: or अभ्+अच् or नञ्+भलज्+ड.—"अन्येष्वपि दृश्यते" (V. notes on परिखीकृत—Sl. 30, C. I) न भ्रश्यन्ति आर्या यस्मात् "न भ्रश्यन्ति यतस्तेभ्यो जनास्तस्मात्ततः" इति स्वामिमुकुटौ । अभ is found in शिशुपालवध 'ममभा-चौरवनमदभमराणि' (Sl. 73, C. VI) [V. R. T. of Amarakos'a, N. S. P. Ed. p. 36 and foot notes] अभ+इतच्+टाप् (2nd c. s.) —'तदस्य स तं" ।

Conjugation.—1) इष (V. Sl. 15, C. I.) इ(ण्) (V. Sl. 5—) C. I.)

Force of अथ is आनन्तर्य—'अथाथो संशये स्यातामधिकारे च मङ्गले । विकल्पानन्तरप्रश्नकात्स्न्यारम्भसमुच्चये ।' (म०) ।

आप्त—Mallinatha gives हित as its synonym. It literally means विश्वस्त । In fact those, who are benefactors, must be trust worthy (विश्वस्त) ।

कुमारभृत्या 'कौमारभृत्यं नाम कुमारभरणधात्रीक्षीरदोषसंशोधनार्थं दुष्टस्तन्य-ग्रहसमुत्थानाञ्च व्याधीनामुपशमनार्थम्' (सुश्रुत ।)

[कौमारभृत्य is necessary for the purpose of nourishing both born and unborn children, and purifying the fault of the nurse's milk ; and for allaying infantile diseases born of vitiated milk or of the action of planets, &c.]

पुंसवनादिका: क्रिया:—The rites performed during gestation are पुंसवन held on the first fortnight of the third month, and सीमन्तकरण or सीमन्तोन्नयन held on the fourth, the sixth, or the eighth month. (See Gobhilagrihyasutra, Part II, Chapters 2—7.)

ग्रहैस्ततः पञ्चभिरुच्चसंश्रयै-
रसूर्य्यगैः सूचितभाग्यसम्पदम्।
असूत पुत्रं समये शचीसमा
त्रिसाधना शक्तिरिवार्थमक्षयम् ॥ १३ ॥

मूलस्य पाठान्तरम्।

संश्रयैः—संस्थितैः (चा.)
पुत्रं—तनुम् Nand.—foot notes.
अक्षयम्—अव्ययम् " " "

Prose order.—ततः शचीसमा (सा) त्रिसाधना शक्तिः अक्षयम् अर्थम् इव, समये, उच्चसंश्रयैः असूर्य्यगैः पञ्चभिः ग्रहैः सूचितभाग्यसम्पदं पुत्रम् असूत। Mallinátha places त्रिसाधना......इव, after पुत्रम् and समये after शचीसमा।

Explanation by use of synonyms.—ततः (अनन्तरं) शचीसमा (इन्द्राणीतुल्या) (सा) त्रिसाधना (प्रभावादिसाधनत्रयसम्पन्ना) शक्तिः (नृपतेजः) अक्षयम् (अविनश्वरम्) अर्थमिव (विभवमिव) समये (यथाकाल, दशमे मासीत्यर्थः) उच्चसंश्रये (तुङ्गस्थानगैः) असूर्य्यगैः (अनस्तमितैः) पञ्चभिः (पञ्चसंख्यकैः) ग्रहैः (शुक्रादिभिः ज्योतिर्भिः) सूचितभाग्यसम्पदं (ज्ञापितभाग्यविभवं) पुत्रं (तनयम्) असूत (सुषुवे)।

Substance.—प्रभावमन्त्रोत्साहात्मकसाधनत्रयसम्पन्ना राजशक्तिर्यथा नृपतेरविनश्वरं विभवं जनयति, तथा इन्द्राणीतुल्या सा सुदक्षिणा दशमे मासि समुपस्थिते परमसौभाग्यशालिनं तनयमेकं जनयामास। तस्य जननसमये ग्रहपञ्चकं सूर्य्यात् विप्रकृष्टम् अतएवानस्तमितमुच्चस्थानस्थितञ्चासीत्। तेन तत्पुत्रस्यातुलभाग्यसम्पद् सूचिताभूत्।

Change of voice.—...शचीसमया त्रिसाधनया शक्त्या अक्षयः अर्थः ......सूचितभाग्यसम्पत् पुत्रः असूयत।

Sanjivani.—ग्रहैरिति। (ततः) शच्या, इन्द्राण्या; समा (शचीसमा)—

“शचीन्द्राणी” इत्यमरः (Cole. p. 8.) सा, सुषुविषा (सवित्री) प्रसूतिकाले सति, दशमे मासि इत्यर्थः,— ‘दशमे मासि जायते” इति श्रुतिः—(उच्चसंश्रयैः) तुङ्गस्थानगतैः (असूर्यगैः) अनस्तमितैः—कैश्चित् पञ्चसंख्यैः (पञ्चभिः ग्रहैः) सूचिता भाग्यसम्पत् यस्य तं [सूचितभाग्यसम्पदं] (पुत्रं), त्रीणि प्रभावमन्त्रोत्साहात्मकानि साधनानि उत्पादकानि यस्याः सा त्रिसाधना) (शक्तिः)—“शक्तयस्तिस्रः प्रभावोत्साहमन्त्रजाः” इत्यमरः (Cole. p. 195,—(अक्षयम् अर्थम् इव असूत)। षुङ् प्राणिगर्भविमोचने इत्यात्मनेपदिषु पठ्यते, तस्मात्कर्तरि लङ्। अत्रेदमनुसन्धेयम्—“अजवृषभ-मृगाङ्गनाकुलीरा झषवणिजौ च दिवाकरादितुङ्गाः। दशशिखिमनुयुक्तिथीन्द्रियांशै-स्त्रिनवकविंशतिभिश्च तेऽस्तनीचाः” (वृहज्जातके) इति॥ सूर्यादीनां सप्तानां ग्रहाणां मेषवृषभादयो राशयः श्लोकोक्तक्रमविशिष्टाः उच्चस्थानानि। स्वस्वतुङ्गापेक्षया सप्तमस्थानानि च नीचानि। तत्रोच्चे अपि दशमादयो राशिविंशाः यथाक्रमम् उच्चेषु परमोच्चा नीचेषु परमनीचा इति जातकश्लोकार्थः। अंशास्त्रिंशो भागः। यथाह नारदः—“त्रिंशद्भागात्मकं लग्नम्” इति। सूर्यप्रत्यासत्तिर्ग्रहाणामस्तङ्गो नाम। तदुक्तं लघुजातके—“रविणास्तमयो योगो वियोगस्तूदयो भवेत्” इति। ते च स्वोच्चस्थाः फलन्ति, नास्तगा नापि नीचगाः। तदुक्तं राजमृगाङ्के—“स्वोच्चे पूर्णं स्वर्क्षेऽर्द्धं सुहृदि पादं द्विडर्भेऽल्पं शुभं खेचरेन्द्रः। नीचस्थायी नास्तगो वा न किञ्चित् पादं न्यूनं स्वत्रिकोणे ददाति॥” इति। तदिदमाह कविः—“उच्चसंश्रयैर-सूर्यगैः” इति च। एवं सति यस्य जन्मकाले पञ्चप्रभृतयो ग्रहाः स्वोच्चस्थाः स एव तुङ्गो भवति। तदुक्तं कूटस्थीये—“सुखिनः प्रिलष्टकाय्यां राजप्रतिरूपकाश्च राजानः। एकद्वित्रिचतुर्भिर्जायन्तेऽतः परं दिव्याः॥” इति तदिदमाह पञ्चभि-रिति॥ १३॥

Sanjivani Explained.

The wife of Indra has three names पुलोमजा (as she is born of Puloman), शची, and इन्द्राणी।

शक्तयः * * * प्रभावोत्साहमन्त्रजाः—शक्ति (Power) is threefold, born of might, effort, and counsel.

Royal power depends upon the might of the king, his efforts, and the intelligence of his councillors.

त्रिसाधना शक्तिः—Power born of the three elements of might, &c.

पुङ् प्राणिगर्भविमोचने ... * * कर्मणि लङ्—सू admits लङ् in कर्तृवाच्य । It is, here, transitive and आत्मनेपदी । It means 'to bring forth.' See notes on प्रसूतः in I, 12.

अवेदयन्नुसम्भवम् •–Here the following should be noted.

अजवृषभ * * * तुङ्गाः–The Hindu astronomers have twelve divisions in their zodiac. They are मेष (Aries), वृष (Taurus), मिथुन (Gemini), कर्कट (Cancer), सिंह (Leo), कन्या (Virgo), तुला (Libra), वृश्चिक (Scorpio), धनु (Segitarius), मकर (Capricornus), कुम्भ (Aquaris), and मीन (Pisces). Each of the divisions consists of 2¼ नक्षत्र's (or asteric groups), and is called a राशि । Each राशि is divided into 30 degrees. Each degree is called an अंश ।

When the sun comes in मेषराशि, i.e., when it occupies the space which is occupied by the asteric groups अश्विनी, भरणी and a fourth part of कृत्तिका, it is said to be in ascendancy or is exalted. वृष is the exalted place of सोम, मकर of मङ्गल, कन्या of बुध, कर्कट of बृहस्पति, मीन of शुक्र, and तुला of शनि ।

The seventh राशि from the exalted one is the debilitated house of the particular ग्रह । Thus तुला is the नीच स्थान or the debilitated house of the sun. On the month of Vais'ákha the sun remains in मेष राशि, and on कार्त्तिक it comes in तुला । On वैशाख it is said to be exalted, and on कार्त्तिक debilitated.

दशशिखि * * * तेष नीचाः—दश means दशमांश । शिखिन् means 'fire' which being three, the word here stands for तृतीयांश ।

मनुयुज् means अष्टाविंशतितम अंश for मनु's are fourteen in number and युज् means double. ($14 \times 2 = 28.$)

तिथि's are fifteen in number.

So तिथि stands here for fifteen. Hence it means पञ्चदशांश ।

इन्द्रिय stands for पञ्चमांश as the इन्द्रिय's are five in number.

त्रिनवक means twenty-seven. So it stands for सप्तविंशतितमांश ।

त्रिंशति means त्रिंशांश ।

अस्त means the seventh राशि ।

The tenth degree of Aries is the Particular Exaltation of the Sun, and the tenth degree of Libra is its Particular Debilitation. The third degree of Taurus is the Particular Exaltation of the Moon, and the third degree of Scorpio is its Particular Debilitation. The twenty-eighth degree of Capricornus is the Particular Exaltation of Mars, and the twenty-eighth degree of Cancer is its Particular Debilitation. The fifteenth degree of Virgo is the Particular Exaltation of Mercury and the fifteenth of Pisces is its Particular Debilitation. The fifth degree of Cancer is the Particular Exaltation of Jupiter and the fifth degree of Capriconus is its Particular Debilitation. The twenty-seventh degree of Pisces is the Particular Exaltation of Venus and the twenty-seventh degree of Virgo is its Particular Debilitation. The twentieth degree of Libra is the Particular Exaltation of Saturn, and the twentieth degree of Aries is its Particular Debilitation.

अजांश: * * इति—In the verse quoted from Vrihajjátaka, the word अंश means the 30th part or one degree of a राशि । Nárada says—"A राशि consists of thirty divisions, each called an अंश or degree."

सूर्ययुक्तमितिग्रहाणामस्तमयो नाम—The conjunction of a planet with the Sun is called its अस्त । It is said in Laghujátaka "Combination with the Sun is the अस्त of a ग्रह ; separation from the Sun is its उदय ।"

[N. B. All planets remaining within fifteen degrees of the Sun on both sides are said to be अस्तमित or set].

ते स्वोच्चस्था: * * नीचगा:—Planets yield prosperity when they are in exalted postitions. When they are in debilitated positions, or when they are अस्तमित, they cannot exercise any beneficial influence. They then produce evil effects.

तदुक्तं पाराशरे * * * इति—It is said in पाराशर—"A ग्रह produces its full effect when it is in Particular Exaltation, half in its own house, a quarter in a friendly house, one-eighth in an unfreindly house. When it is in Particular Debilitation, or when it is said to set, it produces no effect. In its Joy house it produces three-fourth of its effects.

We will illustrate it in the case of the Sun. The Sun's own house is the last ten degrees of Leo and the first twenty degrees form its त्रिकोण or Joy house. The freindly houses of the Sun are the houses of his freindly planets. His freindly planets are the Moon, Mars, and Jupiter. Cancer is the house of the Moon. Aries and Scorpio are the houses of Mars. Sagitarius and Pisces are the the houses of Jupiter.

The enemies of the Sun are Venus and Saturn and Mercury provided it is conjoint with the Sun. The houses of Venus are Taurus and Libra. Aquaris and Capricornus are the houses of Saturn. These are the unfreindly houses of the sun.

यस्य जन्मकाले * * * भवति—At the time of whose birth five constellations are in ascendancy or exalted, he is said to be exceedingly influential and prosperous.

तदुक्तं कूटस्थीये * * इति—Indeed, it is said in कूटस्थीय—If one ग्रह be exalted at the time of one's birth one becomes happy ; if two, one achieves marvellous feats ; if three, one becomes as influential as a king ; if four, one becomes a king. If more than four constellations are in ascendancy at one's birth, one is regarded as a celestial.

We are indebted to our freind, the learned astrologer, Atul Krishna Mookerjee, for explanation of this astrological passage.

Bengali.—অনন্তর সাধনত্রয়সম্পন্ন রাজশক্তি যেরূপ অক্ষয় বিভব প্রসব করে সেইরূপ ইন্দ্রাণীতুল্যা (সেই মহিষী) যথাসময়ে একটি পুত্র প্রসব করিলেন। তাঁহার

কাল সময়ে) উচ্চ স্থানস্থ এবং সূর্য্য দ্বারা অনস্তমিত গ্রহপঞ্চক সেই পুত্রের ভাগ্যসম্পৎ সূচিত করিয়াছিল। ১৩।

English rendering.—In due time, she who was like unto S'achi (herself) brought forth a son whose wealth of luck was indicated by five planets occurring in exalted position and not overcast by the Sun, like power acquired by triple means (producing) inexhaustible wealth. 13.

Grammatical notes, &c., &c.,

Sama'sa.—(1) उच्चस्थ: संश्रय: (सुप्सुपा) उच्च: संश्रय:, येषां ते उच्चसंश्रया: (बहु) तै: (2) न सूर्य्यगा: असूर्य्यगा: (नञ्तत्) तै: (3) सम्पद्यते इति सम्पत्, भाग्यस्य सम्पत् भाग्यसम्पत् (षष्ठीतत्) सूचिता भाग्यसम्पत् यस्य स सूचितभाग्यसम्पत् (बहु) तम् (4) शच्या समा शचीसमा (तृतीयातत्) (5) त्रिसाधना—(V. Sanjivani). (6) अविद्यमान: क्षयो यस्य स: अक्षय: or अविद्यमानक्षय: (बहु) तम्—'नञोऽस्त्यर्थानाम्—' (V. notes on अनन्यगुरुमनाम्, Sl. 30, C. I.)

Case-ending.—(1) तत:—'परम्' इत्यध्याहार्य्यकालवाचिशब्दयोगात् पञ्चमी। "तेन संप्रति देशकालवृत्तिना योगेऽपि भवति" (V. Vritti on २।३।२८ पा. ५८५ सि.) See मन: in I, 66. (2) यहै:—अनुक्ते कर्त्तरि तृतीया—'सूचित' इत्यस्य (3) शक्ति:—विधेयोपमानकर्त्तृपदं 'शचीसमा' इत्युद्देश्योपमेयकर्त्तृपदस्य (4) अर्थम्—विधेयोपमानकर्मपदं, 'पुत्रम्' इत्युद्देश्योपमेयकर्मपदस्य।

Synonyms.—(1) शची—'पुलोमजा शचीन्द्राणी' (अ.)

1 2 3 4 5 6

(2) सूर्य्य—'सूरसूर्य्यार्य्यमादित्यद्वादशात्मदिवाकरा:।
भास्कराहस्करब्रध्नप्रभाकरविभाकरा:॥
भास्वद्विवस्वत्सप्ताश्वहरिदश्वोष्णरश्मय:।
विकर्त्तनार्कमार्त्तण्डमिहिरारुणपूषण:॥
द्युमणिस्तरणिर्मित्रश्चित्रभानुर्विरोचन:।
विभावसुर्ग्रहपतिस्त्विषांपतिरहर्पति:।
भानुर्हंस: सहस्रांशुस्तपन: सविता रवि:॥' (अ.)

Different meanings.—(1) ग्रह—'ग्रहोऽनुग्रह[1]निर्बन्ध[2]ग्रहणेषु[3] रणोद्यमे[4]। सूर्यादौ[5] पूतनादौ[6] च सैंहिकेयोपरागयोः।' (वि.) (2) समय—'समयः शपथ[1]आचार[2]सिद्धान्तेषु[3] तथा विधौ। क्रियाकारे च निर्देशे संकेते कालभाषयोः॥' (मे.) (3) शक्ति—'शक्तिरस्त्रान्तरे गौर्य्याम्[1]उत्साहादौ[2] बले स्त्रियाम्।' (मे.) (4) अर्थ—(V. Sl. 1, C. I.)

Derivation.—(1) ग्रहैः—ग्रह् + अप् (कर्मणि, 3rd c. p.)—'ग्रहवृदृनिश्चिगमश्च' (३।३।५८ पा. ३२३४ सि.) [The roots ग्रह्, वृ, दृ, निर् + चि, and गम् take अप् in कर्मवाच्य] or thus,—ग्रह् + अच् (कर्तरि, 3rd c. p.)—"विभाषा ग्रहः" (३।१।१४३ पा. २९०५ सि.) [ग्रह् optionlly takes ण] The form is then ग्राह which means जलचर। By अच् the form becomes ग्रह which means रव्यादि] (2) असूर्य्यगैः—सृ + क्यप्—निपात्यते = सूर्य्यः—"राजसूयसूर्य्यमृषोद्य—" (V. Deri. Sl. 2, C. I.) सूर्य्य + गम् + ड (3rd c. p.) न + सूर्य्यगैः (3) पुत्रम्—V. I, 91. (4) असूत—सू + लङ्-त। (5) सूचिता—सूच + क्त (कर्मणि) + टाप्।

Conjugation.—(1) सू—(V. Sl. 12, C. I.) (2) सूच—(to express) सूचयति (लट्) सूचयामास &c. (लिट्) असूसुचत् (लुङ्) सूचयिता (लुट्) सूचयिष्यति (लृट्) सूचितः (क्तः)।

Parallel passage.—"सा भूधराणामधिपेन तस्यां समाधिमत्यामुदपादि भव्या। सम्यक्प्रयोगादपरिक्षतायां नीताविवोत्साहगुणेन सम्पत्॥" (V. Kumárasambhavam, I, 22).

Remark.—This verse shows that Kalidása was conversant with astronomy and astrology. He might not have been a profound astronomer. Indeed, Jyotirvidábharana, which tradition ascribes to him, does not afford proofs of his solid

knowledge of the science. Jyotirvidábharana is regarded by many modern scholars as a spurious work of some later astronomer. In deference to them we say such verses rather go to support the tradition and disprove their theory.

दिशः प्रसेदुर्मरुतो ववुः सुखाः
प्रदक्षिणार्चिर्हविरग्निराददे ।
बभूव सर्वं शुभशंसि तत्क्षणं
भवो हि लोकाभ्युदयाय तादृशाम् ॥ १४ ॥

मूलस्य पाठान्तरम् ।

हविः—हुतम् (पा०)

Prose order.—तत्क्षणं दिशः प्रसेदुः, सुखाः मरुतः ववुः, अग्निः प्रदक्षिणार्चिः (सन्) हविः आददे—(इत्थं) सर्वं शुभशंसि बभूव । Mallinátha places 'सुखाः' after 'मरुतः'।

Explanation by use of synonyms.—तत्क्षणं (तत्काले) दिशः (ककुभः) प्रसेदुः (प्रसन्ना बभूवुः) सुखाः (मनोहराः) मरुतः (पवनाः) ववुः (प्रवहन्तिस्म) अग्निः (हुताशनः) प्रदक्षिणार्चिः (दक्षिणशिखः सन्) हविः (घृताहुतिम्) आददे (स्वीचकार) इत्थं—सर्वं (निखिलं) शुभशंसि (शुभसूचकं) बभूव (आसीत्) ।

Substance.—कुमारस्य जन्ममात्रेणैव सर्वा दिशो निर्मला बभूवुः । सुखस्पर्शाः पवनाः समन्तात् प्रववुः । हुताशनश्च दक्षिणदिगभिमुखां शिखाग्रं विस्तारयन् घृताहुतिं जग्राह । इत्थं सर्वं शुभसूचकमासीत् । नैतच्चित्रं यतः तादृशानां महापुरुषाणां जन्मना लोकानां सर्वविधमङ्गलं निरतं तत् शुभसूचकं ध्रुवं भवति ।

Change of voice.—...दिग्भिः प्रसेदे, सुखैः मरुद्भिः ववे, अग्निना प्रदक्षिणार्चिषा...सर्वेण शुभशंसिना बभूवे ।

Sanjivani.—दिश इति । (तत्क्षणं) तस्मिन् क्षणे—"कालाध्वनोरत्यन्तसंयोगे" (२।३।५ पा. ५५८ सि.) इति द्वितीया (दिशः) (प्रसेदुः) प्रसन्ना बभूवुः । (मरुतः) वाताः (सुखाः) मनोहराः (ववुः) । (अग्निः प्रदक्षिणार्चिः) सन् (हविः)

(आदद्दे) औषकार—हव्य—(सर्वं) (शुभशंसि) शुभसूचकं (बभूव)। (हि) तथाविध (तादृशां) रघुप्रकाराणां (भव:) जन्म (लोकाभ्युदयाय) भवतीति शेष:। तनी दिया अपि समृद्धा इत्यर्थ: ॥ १४ ॥

Sanjivani Explained.

प्रदक्षिणार्चिम्—With its tongue of flame inclined towards the right side of the priest.

"कालाध्वनीरत्यन्तसंयोगे"—See अवमानम् I, 73.

Bengali.—তনয়ের জন্ম হইবামাত্রই দিক্ সকল নির্মল হইল। সুখস্পর্শ বায়ু প্রবাহিত হইতে লাগিল। অগ্নি (হোতার) দক্ষিণ পার্শ্বাভিমুখে শিখা বিস্তার করিয়া ঘৃতাহুতি গ্রহণ করিতে লাগিলেন—(এইরূপে) সকলই মঙ্গল সূচনা করিতে লাগিল—কারণ, রঘুসদৃশ (মহাপুরুষগণের) জন্ম লোকহিতকরই হইয়া থাকে। ১৪।

English rendering—All the points of the compass became clear (or cloudless); delightful breezes blew; fire, with flames turning towards the right, received libations of clarified butter; at that moment, everything became good-betokening, since the birth of such beings is for the prosperity of the world.—14.

Grammatical notes, &c., &c.

Sama'sa.—(1) प्रगता दक्षिणं प्रदक्षिणम् (अव्ययीभाव:)—निपातनात् समास:—प्रदक्षिणम् अर्चि: यस्य स प्रदक्षिणार्चि: (बहु) (Peculiarity V. प्रदक्षिणीकृत्य, Sl. 71, C. II. ; प्रदक्षिणक्रियाहायाम्, I, 76). (2) शुभं शंसतीति शुभशंसि (उपपदसमास) (3) स एव भव: तद्भव: (कर्मधा) तम् (4) अभिगत: उदय: अभ्युदय: (प्रादि:) लोकानाम् अभ्युदय: लोकाभ्युदय: (षष्ठीतत्) तस्मै।

Case-ending.—(1) तत्क्षणम्—कालाध्वनोरत्यन्तसंयोगे द्वितीया—(V. अवमानम्, I. 73.) (2) लोकाभ्युदयाय—तादर्थ्ये चतुर्थी or 'क्लृपि सम्पद्यमाने च' (१।४।४४ पा. का.) इति चतुर्थी। V. शर्मणे; I, 69. (3) तादृशाम्—शेषे षष्ठी or "कर्तृकर्मणो: कृति" इति सूत्रात् 'भव' इति कृदन्तस्य कर्तरि षष्ठी।

Synonyms.—(1) दिश्—'दिशस्तु ककुभः काष्ठा आशाश्च हरितश्च ताः।' (अ.) (2) मरुत्—(V. II, 10.) (3) अर्चिस्—'वह्नेर्द्वयोर्ज्वालकीलावर्चिर्हेतिः शिखा स्त्रियाम्।' (अ.) (4) अग्नि—(V. Sl. 5—9, C. I.)

Different meanings.—(1) अर्चिस्—'अयार्चिर्मयूखशिखयोर्मता'
1 2 3 4 5 6
(मे.) (2) भव—'क्षेमेशसंसारे सत्तायां प्राप्तिजन्मनोः' (मे.) (3) लोक—'लोकस्तु भुवने जने' (अ.)।

Derivation.—(1) प्रसेदुः—प्र + सद् + लिट्—उस् (2) मरुतः—मृ + उतिः (1st c. p.)—'मृग्रोरुतिः' (उ. १।९४) (3) ववुः—वा + लिट्—उस् (4) सुखाः—सुख (चु. प.) + अच् पचादित्वात् सुखयन्ति ये ते ; or सुख + अच् अर्श आदित्वात् सुखवन्तः इत्यर्थः (1st c. p.) (5) अर्चिः—अर्च् + इसिः—'अर्चिशुचि—' (उ. २।१९८) (6) अग्निः—(V. Sl. 5—9, C. I.) (7) आददे—आ + दा + लिट्—ए (8) शुभशंसि—शुभ + शंस् + णिनिः (1st c. s.) (9) भवः—भू + अप् (भावे—denoting जन्म) and भू + अप् (अपादानवाच्ये—denoting शिव)। (10) तादृशाम्—तद् + दृश् + क्विन् (6th c. p.)—(V. सदृशी, I, 15) "आ सर्वनाम्नः" (६।३।९१ पा. ४३० सि.) [When दृश्, दृश and वतुप् are added to सर्वनाम words, their penultimate अ becomes long.]

Conjugation.—(1) सद्—(V. Sl. 52, C. I.) (2) वा (to blow, to flow) वाति (लट्) अवात्, अवुः—अवाम् (लङ्) ववौ, ववतुः, ववथ, ववाथ (लिट्) अवासीत्, अवासिष्टाम्, अवासिषुः (लुङ्) वाता (लुट्) वास्यति (लृट्) वातः (क्तः) निर् + वा + क्तः = निर्वातः (want of air) ; the alternative form is निर्वाणः (extinguished).—"निर्वाणोऽवाते" (८।२।५० पा. ३०२९ सि.) (3) दा—(V. Sl. 18, C. I.)

Parallel passage.—(1) "प्रसन्नदिक् पांशुविविक्तवातं शङ्खस्वनानन्तर-पुष्पवृष्टिः। शरीरिणां स्थावरजङ्गमानां सुखाय तज्जन्मदिनं बभूव॥" (V. Kumara-sambhavam, Sl. 23, C. I.) (2) 'दिदीपिरेभवन् सर्वास्विद्धिमस्य जगत्।' (V. Raghu, Sl. 72, C. X.)

Remark.—One of the Calcutta editors derives 'भव' in the sense of जन्म as 'भू + अच्' (कर्त्तरि) । It is not correct. In the sense of जन्म, अप् is added to भू in भाववाच्य । भट्टोजि says—"भवो हेवः संसारश्च' । भवतेरचेति काशिका ।" (V. Vritti on ३।१।१४३ पा. २९०५ सि.) In the sense of शिव, the derivative meaning of भव is—भवति अस्मात् सर्वमिति । In this case अच् is used in अपादानवाच्य । But in the sense of संसार, अच् is used in अधिकरणवाच्य—भवन्ति प्राणिनः अस्मिन्निति । भानुजि, however, says that to mean जन्म, अप् is added to भू in भाववाच्य । "जन्मनि तु भावे 'ऋदोरप्' (३।३।५७ पा. ३२३२ सि.) इति अप् । [V. R. T. of Amarakos'a, N. S. P. Ed. p. 499.]

अरिष्टशय्यां परितो विसारिणा
सुजन्मनस्तस्य निजेन तेजसा ।
निशीथदीपाः सहसा हतत्विषो
बभूवुरालेख्यसमर्पिता इव ॥ १५ ॥

Prose-order.—निशीथदीपाः, अरिष्टशय्यां परितः विसारिणा सुजन्मनः तस्य निजेन तेजसा सहसा हतत्विषः (सन्तः) आलेख्यसमर्पिता इव बभूवुः । Mallinátha places 'निशीथदीपाः' after 'हतत्विषः' ।

Explanation by use of synonyms.—निशीथदीपाः (अर्द्धरात्र-प्रदीपाः) अरिष्टशय्यां (सूतिकागृहशयनं) परितः (सर्वतः) विसारिणा (प्रसर्पिणा) सुजन्मनः (शोभनोत्पत्तेः) तस्य (शिशोः) निजेन (नैसर्गिकेण) तेजसा (लावण्येन) सहसा (हठात्) हतत्विषः (क्षीणकान्तयः सन्तः) आलेख्यसमर्पिता इव (चित्रार्पिता इव) बभूवुः (आसन्) ।

Substance.—सुतस्य भाग्यसम्पत् कथिता । अधुना तस्य सौन्दर्यं वर्णयति । नवप्रसूतस्य सुजातस्य तस्य शिशोर्लावण्यं सूतिकागृहशयनस्य समन्तात् प्रसृत-मासीत् । तत्रावस्थानीह प्रभुज्ज्वलं प्रदीपा तेन समधिकोज्ज्वलतां वाताभावात् निष्पन्दा अर्द्ध-

रात्रिप्रदीपाः सहसा निष्प्रभाः सन्तः चित्रलिखिता इव तस्थुः। चित्रलिखिताः प्रदीपा यथा निष्प्रभा निश्चलाश्च भवन्ति तथैव ते बभूवुरित्यर्थः।

Change of voice.—निशीथदीपैः...हतत्विड्भिः आलेख्यसमर्पितैः...बभूवे।

Sanjivani—अरिष्टेति। "अरिष्टं सूतिकागृहम्" इत्यमरः (Cole. p.80) अरिष्टे, सूतिकागृहे, शय्या ताम् [अरिष्टशय्याम्] (परितः) सर्वतः—'अभितःपरितः-समयानिकषाहाप्रतियोगेऽपि' (१।४।४८ पा. वा. ५४४ सि. कौ.) इति द्वितीया—(विसारिणा) (सुजन्मनः) शोभनोत्पत्तेः—"जनुर्जननजन्मानि जनिरुत्पत्तिरुद्भवः" इत्यमरः (Cole. p. 32)—(तस्य) शिशोः (निजेन) नैसर्गिकेण (तेजसा, सहसा) (हतत्विषः) क्षीणकान्तयः (निशीथदीपाः) अर्द्धरात्रप्रदीपाः—"अर्द्धरात्रनिशीथौ द्वौ" इत्यमरः (Cole. p. 25.)—आलेख्ये चित्रे समर्पिताः [आलेख्यसमर्पिताः] (इव बभूवुः)। निशीथशब्दो दीपानां प्रभाधिक्यसूचनार्थः॥ १५॥

Sanjivani Explained.

निशीथशब्दः * * * The word निशीथ is not a useless epithet of the lamps. It indicates that the lamps were exceedingly ablaze. The depth of the nocturnal darkness by contrast enhances the blaze of the lamps. Even highly blazing lamps were cast into the shade by the splendour of Raghu's body.

'अभितः * * आपि'—Even in alliance with अभितः, परितः, समया, निकषा, हा, or प्रति a word admits द्वितीया।

निजेन is explained by Mallinátha as नैसर्गिकेण or natural.

Bengali.—হঠাৎ সেই (শিশুর) সূতিকাগৃহশয্যার চতুর্দিকে প্রসৃত নৈসর্গিক (তেজ) দ্বারা নিশীথ প্রদীপ সকল ক্ষীণকান্তি (হইয়া) যেন চিত্রার্পিতের ন্যায় প্রতীয়মান হইতে লাগিল। ১৫।

English rendering.—The midnight lamps, their splendour suddenly dimmed by the effulgence of that one of blessed birth radiating all around his bed in the lying-in room, became like (lights) committed to painting—15.

Grammatical notes, &c., &c.

Sama'sa—(१) अरिष्टशयनं शिवम् (षष्ठी) अस्य अस्तु अरिष्टम् or अरिष्ट-

मानरिष्टम् (बहु) नास्ति रिष्टमत्र इति मातुक्ति:—'प्रादिभ्यो धातुजस्य—'(V. notes on अनन्यप्रासनाम्, Sl. 30, C. I.) तस्मिन् शय्या अरिष्टशय्या (सप्तमीतत्) ताम् । (2) शोभनं जन्म यस्य स सुजन्मा (बहु) तस्य (3) नि (विशेषेण) शेरते जना अस्मिन् इति निशीथ:, तस्मिन् ये दीपा: निशीथदीपा: (सप्तमीतत्) (4) हता त्विट् येषां ते हतत्विष: (बहु) (5) आ (सम्यक्) लेख्यम् आलेख्यम् (सुपसुपा) सम्यक् अर्पिता समर्पिता (सुपसुपा) आलेख्ये समर्पिता आलेख्यसमर्पिता (सप्तमीतत्)।

Case-ending.—(1) अरिष्टशय्याम्—'परित:' योगे द्वितीया (2) तस्य—शेषे षष्ठी—'तेजसा' इत्यनेन सम्बन्ध: (3) तेजसा—अनुक्तकर्तरि तृतीया—'हत' इत्यस्य (4) सहसा—अव्ययं, क्रियाविशेषणम् ।

Synonyms.—(1) निशीथ—(V. Sanjivani.) (2) अरिष्ट—(V. Sanjivani.) (3) दीप—'दीपस्तु [1] स्नेहाश: [2] कज्जलध्वज: [3] । दशेन्धनो [4] गृहमणि [5] र्दीपा- [6] तितथ [7] इत्यपि । शिखातरु [8] र्दीपवृक्षो [9] ज्योति:स्तम्भोऽथ [10] लोचक: ॥' (वि.) (4) त्विष्—'त्विट्: प्रभारुग्रुचिस्त्विड्भा भाश्छविद्युतिदीप्तय:। रोचि: शोचिरुभे क्लीबे ।' (अ.)

Different meanings.—(1) त्विष्—'कान्तौ [1] वाचि [2] रुचौ [3] त्विट् स्त्री ।' (रभस:) (2) अरिष्ट—'अरिष्टौ लशुने [1] निम्बे [2] फेनिले [3] काककङ्कयो: [4] । अरिष्टमशुभे [5] [1] तक्रे [2] सूतिकागार [3] आसवे [4] । शुभे [5] मरणचिह्ने [6] च ।' (मे.)

Derivation.—(1) अरिष्टम्—रिष् + क्त: (भावे) = रिष्टम् । (न + रिष्टम्) । (2) शय्याम्—शी + क्यप् (अधिकरणवाच्ये) + टाप् (2nd c. s.) (3) विसारिणा—वि + सृ + णिनि: (शीलार्थे, 3rd c. s.) For particulars, V. notes on प्रार्थी, Sl. 3, C. I. (4) निशीथ:—नि + शी + थक्—'निशीथगोपीथावगथा:—'(उ. २।८) (5) दीपा:—दीप् + क: (कर्तरि, 1st c. p.) "इगुपधज्ञा—" (V. notes on ईश, Sl. 5—9, C. I.) or दीप् + घञ् or अच् (V. R. T. of Amarakos'a, N. S. P. Ed. p. 285) (6) बभूवु:—भू + लिट्—उस् (7) आलेख्यम्—आ + लिख् + ण्यत् (कर्मणि) (8) समर्पिता:—सम् + (ऋ + णिच्—) = अर्पि + क्त:

(1st c. p.) "वर्तिष्णुवर्तीरिक्त्वीनाम्यातां पुरुषी" (अ।१६ पा. ११६० सि.) (V. शिशुपालवध, II, 33.)

Conjugation.—(1) भू (to be, to become, &c.) भवति (लट्) बभूव, बभूविथ (लिट्) अभूत्, अभूताम्, अभूवन् (लुङ्) भूयात् (आ. लिङ्) भविता (लुट्) भविष्यति (लृट्) भावयति (णिच्-लट्) अबीभवत् (णिच्-लुङ्) बुभूषति (सन्-लट्) बोभूयते (यङ्-लट्) भूतः (क्तः) भूतिः (क्तिन्)। It is also भ्वा. and चु. आ. in the sense of 'to obtain.' भवते भावयते (लट्)। It is also चु. प. in the sense of 'thinking'—भावयति (लट्)। According to Pánini this root is used as भ्वादि and उभयपदी-सकर्मक in the sense of 'getting'—as 'भवति भवते धनं धीरः।' But Mugdhavodha uses it as भ्वादि and आत्मनेपदी in the sense of 'getting', e.g., 'भवते धनं धीरः'।

(2) शी 'to lie down) शेते, शयाते, शेरते (लट्) अशेत (लङ्) शयीत (वि. लिङ्) शिश्ये शिश्यिषे (लिट्) अशयिष्ट, अशयिषाताम्, अशयिषत (लुङ्) शय्यते (कर्म-लट्) शिशयिषते (सन्-लट्) शाशय्यते (यङ्-लट्) शाययति (णिच्-लट्) अशीशयत् (णिच्-लुङ्) शयिता (लुट्) शयिष्यते (लृट्) शयितः (क्तः)।

Force of इव is उपमा।

Parallel passage.—

"रघुवंशप्रदीपेन तेनाप्रतिमतेजसा।
रक्षागृहगता दीपाः प्रत्यादिष्टा इवाभवन्॥",
(V. Raghu, Sl. 68, C. X.)

जनाय शुद्धान्तचराय शंसते
कुमारजन्माऽमृतसम्मिताक्षरम्।
अदेयमासीत् त्रयमेव भूपतेः
शशिप्रभं छत्रमुभे च चामरे॥ १६॥

Prose order.—भूपतेः, अमृतसम्मिताक्षरं कुमारजन्म शंसते शुद्धान्तचराय जनाय त्रयम् एव अदेयम् आसीत्—शशिप्रभं छत्रम्, उभे चामरे च।

Explanation by use of synonyms.—भूपतेः (राज्ञो दिलीपस्य), अमृतसम्मिताक्षरं (पीयूषसमानवर्णं) कुमारजन्म (पुत्रोत्पत्तिं) शंसते (कथयते) शुद्धान्तचराय (अन्तःपुरचारिणे) जनाय (लोकाय) त्रयमेव (वस्तुत्रयमेव) अदेयं (दानायोग्यम्) आसीत् (अभूत्)—शशिप्रभं (चन्द्रतुल्यमुज्ज्वलं) छत्रम् (आतपत्रम्) उभे (द्वे) चामरे च (प्रकीर्णके च)।

Substance.—राजा अन्तःपुरचारिणो वार्त्तावहस्य मुखात् 'कुमारो जातः' इति वचनमश्रौषीत्। तदस्य श्रवणकुहरेऽमृतं ववर्ष। स तेन एवमानन्दितो बभूव यत् तस्य बहुमूल्यं यत् किञ्चिद्वस्तु आसीत्, तत् सर्वमपि तस्मै ददौ। प्रधानराजचिह्नत्वात् केवलमातपत्रं चामरद्वयञ्च न प्रादात्।

Change of voice.—...त्रयेण...अदेयेन अभूयत—शशिप्रभेण छत्रेण उभाभ्यां चामराभ्याञ्च।

Sanjivani.—जनायेति। (भूपतेः) दिलीपस्य (अमृतसम्मिताक्षरम्) अमृतसमानाक्षरं—"सरूपसमसम्मिताः"—इत्याह दण्डी (V. काव्यादर्शः) (कुमारजन्म) पुत्रोत्पत्तिं (शंसते) कथयते (शुद्धान्तचराय) अन्तःपुरचारिणे (जनाय, त्रयम् एव अदेयम् आसीत्)—किं तत्—(शशिप्रभम्) उज्ज्वलं (छत्रम्, उभे चामरे च)। छत्रादीनां राज्ञः प्रधानाङ्गत्वात् इति भावः॥ १६॥

Sanjivani Explained.

छत्रादीनां * * * * इतिभावः—The king could not give away these things because they were the chief,—indeed, indispensable,—ensigns of royalty.

Bengali.—যে অন্তঃপুরের অমৃততুল্যাক্ষর বচনে কুমারজন্ম সংবাদ রাজার নিকটে আনিয়া বলিল, চন্দ্রসদৃশোজ্জ্বল ছত্র এবং চামরদ্বয় ব্যতীত তাহাকে তাঁহার অদেয় কিছুই ছিল না। ১৬।

English rendering.—Unto the person moving about in the harem, who announced the birth of the prince, in words that were like unto nectar, of that ruler of earth there were only three things that were not to be given away (*viz.*,) the umbrella of lunar resplendance and the two yak-tails.—16.

Grammatical notes, &c., &c.

Sama'sa.—(1) शुद्धाः (उपधाशुद्धाः रक्षकाः) अन्ते (समीपे) यस्य इति शुद्धान्तः 'or शुद्धः अन्तः यस्य स शुद्धान्तः (बहु) [V. R. T. of Amarakos'a, N. S. P. Ed. pp. 136-470.] चरतीति चरः शुद्धान्ते चरः (सप्तमीतत्) or शुद्धान्ते चरतीति शुद्धान्तचरः (उपपदसमास) तस्मै (2) कुमारः—(V. Sl. 12, C. III.) कुमारस्य जन्म कुमारजन्म (षष्ठीतत्) (3) अविद्यमानं मृतं (मरणम्) यत्र अमृतम् or अविद्यमानमृतम् (बहु) तेन or तस्य सम्मितानि अमृतसम्मितानि (तृतीया or षष्ठीतत्) तादृशानि अक्षराणि यस्य तत् अमृतसम्मिताक्षरम् (बहु) (4) न देयम् अदेयम् (नञ्तत्) : (5) भुवः or भुवः पतिः भूपतिः (षष्ठीतत्) (6) प्रकृष्टा भा प्रभा (प्रादिः) अग्निः प्रभा इव प्रभा यस्य तत् अग्निप्रभम् तस्य (उपमानोत्तरपदलोपि बहु) [V. notes on मुनिवृत्तीनाम्, Sl. 5-9, C. I.]

Case-ending.—(1) जनाय—सम्प्रदाने चतुर्थी—"कर्मणा यमभिप्रैति स संप्रदानम्" (१।४।३२। पा. ५६८ सि.) [V. Remark on वनाय, II. 1.] (2) भूपतेः—'यत्' इति कृत्ययोगे अदेयमित्यस्य कर्त्तरि षष्ठी पाक्षिकी। The alternative form is भूपतिना—"कृत्यानां कर्त्तरि वा" (V. notes on मनीषिणाम्, Sl. 11, C. I).

Synonyms.—(1) शुद्धान्त—'स्यागारं भूभुजामन्तःपुरं स्यादवरोधनम्। शुद्धान्तश्चावरोधश्च।' (अ.) (2) चामर—'चामरं तु प्रकीर्णकम्' (अ.) or—'चामरा चामरं बालव्यजनं रोमगुच्छकम्' (रभसः)।

Different meanings.—(1) शुद्धान्त—'शुद्धान्तोऽन्तःपुरे गुह्यकक्षा-भेदे च भूपतेः' (अजयः) (2) कुमार—(V. Sl. 12.) (3) अमृत—'अमृतं यज्ञशेषे[1] स्यात् पीयूषे[2] सलिले[3] घृते[4]। अयाचिते[5] च मोक्षे[6] च ना धन्वन्तरि[7]-देवयोः[8]।' (मे.) When अमृत means a god or धन्वन्तरि, it is masculine.

Derivation.—(1) शुद्धान्तचराय—शुद्धान्त + चर् + ट कर्त्तरि (4th c. s.)

(V. notes on अनुचर, Sl. 4, C. II.) (2) अंसते—अन्स् + शतृ कर्मणि (4th c. s.) (3) कुमारः—(V. Sl. 12. C. III.) (4) जन्म—(V. Sl. 24, C. I.). (4) अवरम्—अर् + अच् = अरम् (न + अरम्) or thus—अश् + सरः—'अशः सरः' (उ. ३।७०।) (6) अदेयम्—दा + यत् (कर्मणि) = देयम् । (न + देयम्) (7) आसीत्—अस् + लङ्—दिप (8) त्रयम्—त्रि + तयप्—"संख्याया अवयवे तयप्" (५।२।४२। पा. १८४३ सि.) [तयप् is the तद्धित affix added to a numeral to signify अवयव । E.g. पञ्चावयवाः अस्य इति पञ्चतयं दारु]। Again by "द्वित्रिभ्यां तयस्यायज्वा" (५।२।४३। पा. १८४४ सि.) अयच् is optionally substituted for तयप् when it is added to द्वि or त्रि । So we get two forms, त्रय and त्रितय, द्वय and द्वितय ।

(9) छत्रम्—(छद + णिच्) = छादि + ष्ट्रन्—'सर्वधातुभ्यः ष्ट्रन्' (उ. ४।१५९।) —"इस्मन्त्रन्क्विपु च" (६।४।९७ पा. ३८८५ सि.) इति सूत्रात् । छादेर्ह्रस्वत्वम् 'छादि' is changed into छदि—(V. notes on परिच्छद, Sl. 19, C. I.) (10) चामरे—चम् + र—'अर्त्तिकमिभ्रमिचमि—' (उ. ३।१३२।) चमरमेव चामरम्—चमर + अण्—(1st c. d.)—"प्रज्ञादिभ्यश्च" (५।४।३८। पा. २१०६ सि.) [अण् is added to the words प्रज्ञा &c. in स्वार्थ । E.g.—प्रज्ञ · प्राज्ञ । For the प्रज्ञादिगण see गणपाठ.] Or चमरस्येदमिति चामरम्यस्यादण् ।

Conjugation.—(1) अस्—(V. I, 10). (2) अन्स्—(V. Sl. 5, C. III.) (3) दा— (V. Sl. 18, C. I.)

Remark.—After this,—Cháritravardhana and others read the following verse,—

समीक्ष्य पुत्रस्य चिरात्मुखं पिता निधानकुम्भस्य युवेव दुर्गतः ।
मुदा शरीरे प्रबभूव नात्मनः पयोधिरिन्दूदयमूर्च्छितो यथा ॥

It is merely a paraphrase of the next verse.

निवातपद्मस्तिमितेन चक्षुषा
नृपस्य कान्तं पिबतः सुताननम्।
महोदधेः पूर इवेन्दुदर्शनाद्
गुरुः प्रहर्षः प्रबभूव नात्मनि ॥ १७ ॥

मूलस्य पाठान्तरम्।

नात्मनि—चात्मनि Nand. foot-notes. It scarcely gives any sense.

Prose-order.—निवातपद्मस्तिमितेन चक्षुषा कान्तं सुताननं पिबतः नृपस्य गुरुःप्रहर्षः इन्दुदर्शनात् महोदधेः पूरः इव, आत्मनि न प्रबभूव।

Explanation by use of synonyms.—निवातपद्मस्तिमितेन (निर्वातस्थलस्थितकमलवन्निष्पन्देन) चक्षुषा (नेत्रेण) कान्तं (सुन्दरं) सुताननं (पुत्रमुखं) पिबतः (तृष्णयात्युत्कटं पश्यतः) नृपस्य (राज्ञः) गुरुः (उत्कटः) प्रहर्षः (आनन्दः) इन्दुदर्शनात् (चन्द्रवीक्षणात्) महोदधेः (महासागरस्य) पूर इव (जलौघ इव) आत्मनि (स्वस्मिन् विषये, शरीरे वा) न प्रबभूव (स्थातुं न शशाक, अन्तर्न मातिस्म इति यावत्)।

Substance.—नृपतिर्निवातकमलवन्निष्पन्देन नयनयुगलेन कान्तं पुत्रमुखमविरतं द्रष्टुमारेभे। महोदधेर्जलौघो यथा चन्द्रदर्शनात् उच्छलितवेगो भवति, तथा तस्यापि पुत्रमुखमवलोक्य परमानन्दराशिः शरीरमध्ये कथमपि स्थातुं न शशाक, अपितु लोकाधारवद् बहिर्निर्जगाम।

Change of voice.—......गुरुणा प्रहर्षेण......पूरेण......प्रबभूवे।

Sanjivani.—निवातेति। निवातः, निर्वातप्रदेशः—"निवातावाश्रयावातौ" इत्यमरः (Cole. p. 324) तत्र यत् पद्मं तद्वत् स्तिमितेन, निष्पन्देन [निवातपद्मस्तिमितेन] (चक्षुषा) नेत्रेण (कान्तं) सुन्दरं (सुताननं) पुत्रमुखं (पिबतः) तृष्णया पश्यतः (नृपस्य) (गुरुः) उत्कटः (प्रहर्षः)—कर्त्ता (इन्दुदर्शनात्), गुरुः,

(सञ्जीदर्शः) (पूरः) अलौघः (इव) (आत्मनि) शरीरे (न प्रबभूव) स्थातुं न शशाक । अन्तर्न मातिस्म इति यावत् । महत्याधारे अधिकं मीयते इति भावः । यद्वा हर्षः आत्मनि स्वस्मिन् विषये न प्रबभूव, आत्मानं नियन्तुं न शशाक । किन्तु बहिर्निर्जगाम ॥ १७ ॥

Sanjivani Explained.

अन्तर्न मातिस्म—could not find room within.

महत्याधारे * इति भावः—The purport is—"A large thing cannot find room in a small receptacle."

यद्वा हर्षः आत्मनि * * * न शशाक—Mallinátha gives an alternative explanation of the expression प्रबभूव नात्मनि । आत्मन् in this case refers not to Dilipa but to हर्ष । The gladness could not prove master over itself. In other words, the joy could not check itself.

किन्तु बहिर्जगाम इत्यर्थः—But it came out.

Bengali.—নিবাতস্থিত কমলের ন্যায় নিস্পন্দ নেত্রযুগলদ্বারা কমনীয় পুত্রমুখ পান করিতে করিতে নৃপতির পরমানন্দরাশি চন্দ্রদর্শনে মহাসমুদ্রের জলপ্রবাহের ন্যায় শরীরে থাকিবার স্থান প্রাপ্ত হইল না। ১৭।

English rendering.—The intense delight of the king who drank the lovely face of his son with eyes as motionless as a lotus in a breezeless spot, could not find room within his body, like the surge of the great receptacle of waters at the sight of the moon. 17.

Grammatical notes, &c., &c.

Sama'sa.—(1) निवृत्तः वातः यस्मिन् स निवातः (बहु)—"प्रादिभ्यो-धातुजस्य—" (V. उदाङ्कु, Sl. 3, C. I.) तस्मिन् पद्मं निवातपद्मम् (सप्तमीतत्) निवातपद्मवत् स्तिमितं निवातपद्मस्तिमितम् (उपमानसमासः) तेन—"उपमानानि समान्यवचनैः" (V. notes on राजेन्दु, Sl. 13, C. I.) (2) नॄन् पातीति नृपः (उपपदसमास) तस्य (3) सुतस्य आननं सुताननम् (षष्ठीतत्) (4) उदकानि धीयन्ते

अव इत्युदधिः (उपपदसमास) महांश्चासौ उदधिश्चेति महोदधिः (कर्मधा) तस्य। (5) इन्दोः दर्शनम् इन्दुदर्शनम् (षष्ठीतत्) तस्मात् (6) प्रकृष्टः हर्षः प्रहर्षः (प्रादिः)।

Case-ending.—(1) चक्षुषा—करणे तृतीया (2) नृपस्य—शेषे षष्ठी—प्रहर्षः इत्यनेन सम्बन्धः (3) आत्मनि—नृपपक्षे आधाराधिकरणे सप्तमी, हर्षपक्षे विषयाधिकरणे सप्तमी (4) पूरः—विधेयोपमानकर्तृपदं, 'प्रहर्षः' इत्युद्देश्योपमेय-कर्तृपदस्य (5) महोदधेः—शेषे षष्ठी 'पूरः' इत्यनेन सम्बन्धः (6) इन्दुदर्शनात्—हेतौ पञ्चमी।

Synonyms.—(1) पद्म—"वा पुंसि पद्मं नलिनमरविन्दं महोत्पलम्। सहस्रपत्रं कमलं शतपत्रं कुशेशयम्॥ पङ्केरुहं तामरसं सारसं सरसीरुहम्। बिसप्रसूनराजीवपुष्कराम्भोरुहाणि च॥" (अ.) (2) इन्दु—(V. शशिन्, III, 2.)

Different meanings.—(1) पूर—'पूरो जलप्रवाहे स्याद् व्रणसंशुद्धि-खाद्ययोः' (मे.) (2) आत्मन्—'आत्मा कलेवरे यत्ने स्वभावे परमात्मनि। चित्ते धृतौ च बुद्धौ च परव्यावर्त्तनेऽपि च॥' (धरणिः)

Derivation.—(1) निवातः—नि + वा + क्त (कर्त्तरि, V. notes on the root वा, Sl. 14, C. III.) (2) स्तिमितम्—स्तिम् + क्त (कर्त्तरि, 3rd c. s.) (4) आननम्—आ + अन् + ल्युट् (करणवाच्ये) (5) पिबतः—पा + शतृ (6th c. s.) (6) महोदधेः—महत् + उदक + धा + कि (अधिकरणवाच्ये, 6th c. s.)—"कर्मण्यधिकरणे च" (३।३।९३ पा. ३२७८ सि.) [The affix कि is added to धा in अधिकरणवाच्य when the root is preceded by its कर्म] Here धा is preceded by its कर्म, उदक।

N. B. उदक is changed into उद in the following places.—"उदकस्योदः संज्ञायाम्" (६।३।५७ पा. ९९५ सि.) [उद is substituted for उदक (in a samása) if a संज्ञा is expressed. E.g. उदमेघ]।

The Várttika is—'उत्तरपदस्य चेति वक्तव्यम्' [It should be said

that even if उदक be the last component उद, shall be substituted for it provided a संज्ञा is expressed. E.g. चीरोदि]।

"पेषंवासवाहनधिषु च" (६।३।५८ पा. ८८६ सि.) [उद is substituted for उदक if it is compounded with and followed by पेषम्, वास, वाहन or धि। E.g., उदपेषम्, उदवास, उदवाहन, उदधि (meaning a घट). When उदधि means समुद्र, it being a proper name comes within the scope of the former Sutra.]

"एकहलादौ पूरयितव्येऽन्यतरस्याम्" (६।३।५९ पा. ८८७ सि.) [उद is optionally substituted for उदक if it is compounded with and followed by a word beginning with one consonant and if this word signifies a receptacle. E.g. कुम्भ is such a word. उदक is, therefore, optionally changed into उद when it is compounded with कुम्भ। उदकुम्भ, उदककुम्भ]।

"मन्थौदनसक्तुबिन्दुवज्रभारहारवीवधगाहेषु च" (६।३।६० पा. ८८८ सि.) [उद is optionally changed into उदक if it is followed by and compounded with मन्थ, ओदन, सक्तु, बिन्दु, वज्र, भार, हार, वीवध or गाह। E.g. उदमन्थ, उदकमन्थ, उदसक्तु, उदकसक्तु &c.]

(7) पूरः—पूर् + अच् (कर्त्तरि) (8) इन्दुः—(V. Sl. 12, C. I.) (9) प्रबभूव—प्र + भू + लिट्—णल् (10) आत्मनि—(V. Sl. 14, C. I.)

Conjugation.—(1) पूर् (to increase, to fill up, to please) पूर्यते (लट्) पुपूरे (लिट्) अपूरि, अपूरिष्ट, अपूरिषाताम्, अपूरिषत (लुङ्) पूरिता (लुट्) पूरिष्यते (लृट्) पूर्णः (क्तः)। This is also चुरादि—पूरयति (लट्) पूरयामास &c. (लिट्) अपूपुरत् (लुङ्) पूरयिता (लुट्) पूरयिष्यति (लृट्) पूर्णः, पूरितः (क्तः) पूर्त्तिः (क्तिन्) (2) पा—(V. Sl. 1, C. I.) (6) भू—(V. Sl. 15, C. III.)

Rhetoric.—The figure of speech is simile. नृप is compared to महोदधि, सुत to इन्दु, निवातपद्म to स्तिमितचक्षु and प्रहर्ष to पूर। As the waves of Ocean heave up at the sight of the moon, so the excessive joy of the king could not find room in his body, but came out of that scanty frame.

चक्षुषा—जात्याख्यायामेकवचनम्। It is singular because it signifies a class. See I, 57.

Parallel passages.—"भवत्सम्भावनोत्थाय परितोषाय मूर्च्छते। अपि व्याप्तदिगन्तानि नाङ्गानि प्रभवन्ति मे॥" (V. Kumárasambhavam, Sl. 54, C. VI.)

"युगान्तनिद्राप्रतिसंहृतात्मनो जगन्ति यस्यां सविकाशमासत।

तनौ ममुस्तत्र न कैटभद्विषस्तपोधनाभ्यागमसम्भवा मुदः॥" (V. S'is'upálabadham, Sl. 23, C. I.)

Remark.—One of the Calcutta editors questions the genuineness of the first foot. He says that if *stillness* were the point of resemblance, Kálidása would have compared the eye not to a lotus but to a steadfast rock. Hence he suggests the reading नियातपद्मप्रमितेन। We are really surprised at such flippancy. That the *stillness* of the eyes is here intended, is beyond doubt. Dilipa looked upon his son's face intently. The more attentively one looks, the more unwinking one's eyes become. Eyes, again, are never compared to mountains by any Sanskrit poet. They are frequently compared to lovely lotuses. Here Dilipa's eyes should naturally be compared with lotuses. The editor admits it when he suggests his emendation. Now Dilipa's eyes were still. Still eyes should be compared with still lotuses. Lotuses cannot be still if they are in a breezy place. So a lotus in a breezeless place is here put forward as the उपमान of the eye.

स जातकर्मण्यखिले तपस्विना
तपोवनादेत्य पुरोधसा कृते।
दिलीपसूनुर्मणिराकरोद्भवः
प्रयुक्तसंस्कार इवाधिकं बभौ॥ १८॥

Prose order.—तपस्विना पुरोधसा तपोवनात् एत्य अखिले जातकर्मणि

क्ृते स दिलीपसूनुः आकरोद्भवः प्रयुक्तसंस्कारः मणिः इव अधिकं बभौ। Mallinátha places 'सः दिलीपसूनुः' before 'तपस्विना', and 'आकरोद्भवः' before 'प्रयुक्तसंस्कारः'।

Explanation by use of synonyms.—तपस्विना (तपोव्रतेन) पुरोधसा (पुरोहितेन वसिष्ठेनेति यावत्) तपोवनात् (आश्रमात्) एत्य (आगम्य) अखिले (सर्वस्मिन्) जातकर्मणि (जातस्य कर्त्तव्यसंस्कारविशेषे) क्ृते (अनुष्ठिते सति) सः (पूर्वोक्तः) दिलीपसूनुः (दिलीपतनयः) आकरोद्भवः (खनिप्रसवः) प्रयुक्तसंस्कारः (क्ृतशाणोल्लिखः) मणिरिव (रत्नमिव) अधिकं (नितराम्, अत्यन्तमिति-यावत्) बभौ (भातिस्म)।

Ssubstance.—अनन्तरं पिता तस्य जातकर्म्माणि सम्पादयामास। पुरोहितो वशिष्ठस्तपोवनादागम्य तानि सर्व्वाणि चकार। स च तनयः संस्कारेण संशोधितः सन् समधिकं शुशुभे। नैतच्चित्रं यदाकरात् समुत्पन्नं रत्नं शाणशोधितं सदधिकतरं शोभते।

Change of voice—...तेन दिलीपसूनुना आकरोद्भवेन प्रयुक्तसंस्कारेण मणिना...बभे।

Sanjivani.—स इति। (स दिलीपसूनुः तपस्विना) (पुरोधसा) पुरोहितेन —"पुरोधास्तु पुरोहितः" इत्यमरः (Cole. p. 192)—वसिष्ठेन—तपस्वित्वात् तदनुष्ठितं कर्म सवीर्य्यं स्यात् इति भावः—(तपोवनात्) (एत्य) आगत्य (अखिले) समग्रे (जातकर्मणि) जातस्य कर्त्तव्यसंस्कारविशेषे (क्ृते) सति—प्रयुक्तः संस्कारः शाणोल्लेखनादिः यस्य सः तथोक्तः [प्रयुक्तसंस्कारः] (आकरोद्भवः) खनिप्रसवः— "खनिः स्त्रियामाकरः स्यात्" इत्यमरः (Cole. p. 85)—(मणिः इव अधिकंबभौ)। वसिष्ठमन्त्रप्रभावात् तेजिष्ठोऽभूदित्यर्थः। अत्र मनुः—"प्राङ्नाभिवर्द्धनात् पुंसो जातकर्म विधीयते" (V. Manusamhitá, II, 29) इति॥ १८॥

Sanjivani Explained.

प्राङ्नाभिवर्द्धनात् * * विधीयते—The natal ceremonies of a male child should be performed before the umbilical cord is cut.

The ceremony consists of 'sucking honey and clarified butter with *mantras*'.

Bengali.—তপস্বী পুরোহিত (বশিষ্ঠ) তপোবন হইতে আগমন করিয়া (তাঁহার) সমগ্র জাতকর্ম সম্পাদন করিলে, সেই দিলীপকুমার আকরোত্থিত শাণযন্ত্র শোধিত মণির ন্যায়, অধিকতর শোভা ধারণ করিলেন।১৮।

English rendering.—The natal rites in their entirety, having been peformed by the family-priest who, endued with penances, had come from the hermiltage, Dilipa's son shone more (brightly) like a gem, mine-born, that receives the polish of a cut.—18.

Grammatical notes, &c., &c.

Sama'sa.—(1) जातस्य कर्म जातकर्म (षष्ठीतत्) तस्मिन् (2) नास्ति खिलं यस्य अखिलम् (बहु) तस्मिन् (3) तपसः वनं तपोवनम् (षष्ठीतत्) तस्मात् (4) पुरः (अग्रे) धीयते (दृष्टादृष्टशुभकर्मसु नियुज्यते) इति पुरोधाः (उपपदसमास) तेन (5) दिलीपस्य सूनुः दिलीपसूनुः (षष्ठीतत्) (5) आकुर्वन्ति अत्र or आकीर्यन्ते धातवः अत्र इत्याकरः—तस्मात् उद्भवः यस्य स आकरोद्भवः (बहु) "अयं हि बहुव्रीहिर्व्यधिकरणोजन्माद्युत्तरपदः" इति वामनसूत्रात् व्यधिकरणबहुव्रीहिरत्र ख्यातः। (V. सायन्तपात्रहस्ता in II, 21). (7) प्रकर्षेण युक्तः प्रयुक्तः (प्रादिः) प्रयुक्तः संस्कारः (जातकर्मरूपा शुद्धिः) यस्य सः प्रयुक्तसंस्कारः (बहु—कुमारपक्षे), प्रयुक्तः संस्कारः (शाणादिशोधनं) यस्य सः—मणिपक्षे।

Case-ending.—(1) जातकर्मणि—भावाधिकरणे सप्तमी (2) पुरोधसा—अनुक्ते कर्त्तरि तृतीया—'कृते' इत्यस्य (3) तपोवनात्—"ध्रुवमपायेऽपादानम्" इति सूत्रादपादाने पञ्चमी (V. notes on वनान्तरात्, Sl. 49, C. I.) (4) मणिः—विधेयोपमान कर्त्तृपदं—'दिलीपसूनुः' इत्युद्देश्योपमेयकर्त्तृपदस्य (5) अधिकम्—क्रियाविशेषणम्।

Synonyms.—(1) मणि—'रत्नं मणिर्द्वयोरश्मजातौ मुक्तादिकेऽपि च।' (अ.) (2) तपस्विन्—'तपस्वी तापसः पारिकाङ्क्षी'। (अ.)

Different meanings.—(1) मणि:—'मणिः स्त्रीपुंसयोरश्मजातौ

3 4 5

मुक्तादिकेऽपि च । कण्ठदेशस्तनेऽजाया लिङ्गाग्रेऽलिञ्जरेऽपि च ॥' (वि.मे.)(2) श्राकर —'श्राकरो निवहे खनौ' (मे.) (3) सूनु—सूनुः 'पुत्रेऽनुजेऽर्के ना' । (मे.)

कण्ठदेशस्तनेऽजाया लिङ्गाग्रे—मणि means the fleshy growth pending from the neck of a goat, the udders, as well as the penis of a goat.

अलिञ्जर—an earthen water jar. निवह = multitude.

Derivation.—(1) तपस्विना—तपस् + विनिः (मत्वर्थे, 3rd c. s.) (2) एत्य—आ + इ(ण्) + ल्यप् (3) पुरोधसा—पुरस् + धा + असिः (औणादिकः, 3rd c. s.)—पुरोधस् is declined like वेधस् । (4) सूनुः—सू + नुः—'सुवः कित्' (उ. ३।३५) (5) आकरः—आ + कृ or कृ + घः—"पुंसि संज्ञायां घः प्रायेण" (३।३।११८ पा. ३२८६ सि.) (6) बभौ—भा + लिट्-णल् (7) संस्कारः—(V. Sl. 20, C. I.)

Conjugation.—(1) भा (to shine)—अभात्, अभान्, अभुः (लङ्) भाता (लुट्) भास्यति (लृट्) अभायि (भावे-लुङ्) बिभासति (सन्-लट्) (Now V. II, 16). (2) इ (ण)—(V. Sl. 5-9, C. I.)

Rhetoric.—The figure of speech is simile. दिलीपसूनु is compared to मणि, मातृगर्भ, which is understood, to आकर । संस्कार as regards दिलीपसूनु is जातकर्म and as regards मणि is शाणयन्त्रशोधनम् ।

Force of तपस्विना—(V. Sanjivani.)

Force of पुरोधस्—It is the duty of the पुरोहित to perform the जातकर्म rites.

सुखश्रवा मङ्गलतूर्यनिस्वनाः
प्रमोदनृत्यैः सह वारयोषिताम् ।
न केवलं सद्मनि मागधीपतेः
पथि व्यजृम्भन्त दिवौकसामपि ॥ १८ ॥

Prose order.—वारयोषितां प्रमोदनृत्यैः सह सुखश्रवाः मङ्गलतूर्यनिस्वनाः

मागधीपते: सद्मनि केवलं न, दिवौकसां पथि अपि व्यजृम्भन्त। Mallinátha places 'वारयोषितां...सह' after 'मङ्गलतूर्य्यनिस्वना:'।

Explanation by use of synonyms.—वारयोषितां (वाराङ्गनानां) प्रमोदनृत्यै: सह (हर्षनर्त्तनै: साकं) सुखश्रवा: (श्रुतिसुखा:) मङ्गलतूर्य्यनिस्वना: (मङ्गलवाद्यध्वनय:) मागधीपते: (दिलीपस्य) सद्मनि (गृहे) केवलम् (एव) न (व्यजृम्भन्त) (न उद्गता:) दिवौकसां (देवानां) पथि अपि (विचरणस्थलेऽपि, आकाशे इत्यर्थ:) व्यजृम्भन्त (प्रादुरासन्)।

Substance.—राजकुमारस्य जन्मोत्सवो महासमरोहा निष्पादित:। वारवनिता: सानन्दं ननृतु:। श्रुतिसुखकरा मङ्गलतूर्य्यध्वनय: समन्तादुदचरन्। न केवलं दिलीपगृहे ते श्रुता: अपित्वाकाशे मधुरं देवदुन्दुभयो नेदु:। कुमारस्य देवांशत्वात् देवोपकारित्वात् अमरा अपि नितरां प्रीता: सन्त: आकाशे श्रुतिसुखं मङ्गलदुन्दुभिनिनादं चक्रु:, सुरगणिकादयश्च सानन्दं तत्र ननृतु:।

Change of Voice.—सुखश्रवै: मङ्गलतूर्य्यनिस्वनै:......व्यजृम्भ्यत।

Sanjivani.—सुखश्रवा इति। सुखा:, सुखकरा:, श्रवा:, श्रवणं, येषां ते (सुखश्रवा:) श्रुतिसुखा: इत्यर्थ: (मङ्गलतूर्य्यनिस्वना:) मङ्गलवाद्यध्वनय: (वारयोषितां) वेश्यानाम्—"वारस्त्री गणिका वेश्या रूपाजीवा" इत्यमर: (Cole.p.141) (प्रमोदनृत्यै:) हर्षनर्त्तनै: (सह) (मागधीपते:) दिलीपस्य (सद्मनि केवलं) गृहे एव (न व्यजृम्भन्त) किन्तु द्यौ: ओक: येषां ते दिवौकस: देवा:—पृषोदरादित्वात् साधु:—तेषां [दिवौकसां] (पथि) आकाशे (अपि) व्यजृम्भन्त। तस्य देवांशत्वात् देवोपकारित्वात् देवदुन्दुभयोऽपि नेदु: ॥ इति भाव: ॥ १९ ॥

Sanjivani Explained.

तस्य देवांशत्वात् * * नेदु:—As Raghu had the parts of the celestials in him and as he would come to their use, they expressed their joy at his brith by striking the celestial drums.

रूपाजीवा means one who lives upon her beauty.

Bengali.—বারাঙ্গনাগণের হর্ষোৎসক নৃত্যের সহিত শ্রুতিসুখকর মঙ্গলবাদ্যধ্বনি

যে কেবল মাগধীপতি দিলীপের গৃহেই সমুত্থিত হইতে লাগিল (এরূপ) নহে, (কিন্তু) দেবগণের আকাশরূপমার্গেও সমুত্থিত হইতে লাগিল। ১৯।

English-rendering.—Auspicious notes of trumpets, delightful to hear, together with the (sound of the) joyous dances of courtezans, swelled up not only in the mansion belonging to the husband of the princess of the Magadhas but also in the path of the denizens of heaven.—19.

Grammatical notes &c. &c.

Sama'sa.—(1) सुखश्रवा:—(V. Sanjivani) (2) नि (विशिष्टा:) स्वना: निस्वना: (प्रादि:) तूर्य्याणां निस्वना: तूर्य्यनिस्वना: (षष्ठीतत्) मङ्गला: (मङ्गलमया:) तूर्य्यनिस्वना: मङ्गलतूर्य्यनिस्वना: (कर्मधा) (3) प्रकृष्ट: मोद: प्रमोद: (प्रादि:) प्रमोदसूचकानि नृत्यानि प्रमोदनृत्यानि (शाकपार्थिवादित्वात् मध्यपदलोपिकर्मधा) (4) वारस्य (जनसमूहस्य) योषित: वारयोषित: (षष्ठीतत्) तासाम् (5) मागध्या: पति: मागधीपति: (षष्ठीतत्) तस्य। (6) दिवौकसाम्—(V. Sanjivani) or दिवम् ओक: (स्थानं) येषां ते दिवौकस: (बहु) तेषाम्। If दिव् and ओकस् be the components, the word दिवौकस् should be admitted as formed irregularly like पृषोदरादि। The form expected is द्यौकस्। अ comes by निपातन after दिव्। If, however, दिव be the component, the difficulty vanishes. Now the question is—Is there any such word as दिव? Yes. Viswakosha has "दिवं स्वर्गेऽन्तरीक्षे च"। See also "द्यो: स्त्री स्वर्गे दिवं क्लीवं तयो: स्मृतम्" (सुभूति)। 'दिवशब्द: ऋक्विषय:' इति क्षीरस्वामी। For the signification of निपातन, see मनीषिन् in I, 11.

Case-ending.—(1) प्रमोदनृत्यै:—सहयोगे तृतीया (2) वारयोषिताम्—शेषे षष्ठी (3) केवलम्—क्रियाविशेषणम् (4) सद्मनि—आधाराधिकरणे सप्तमी (5) मागधीपते:—शेषे षष्ठी (6) पथि—आधाराधिकरणे सप्तमी (7) दिवौकसाम्—शेषे षष्ठी 'पथि' इत्यनेन सम्बन्ध:।

Synonyms.—निस्वन—'शब्दे निनादनिनदध्वनिध्वानरवस्वना: । स्वाननिर्घोषनिर्ह्रादनादनिस्वानसंस्वना:' ॥ (अ.) (2) सद्मन्—"गृहं गेहोदवसितं वेश्म सद्म निकेतनम् । निशान्तवस्त्यसदनं भवनागारमन्दिरम् । गृहा: पुंसि च भूम्न्येव निकाय्यनिलयालया: ॥" (अ.)

1 2 3 7 8 9 10 11 12 13 14 15

(3) दिवौकस्—"अमरा निर्जरा देवास्त्रिदशा विबुधा: सुरा: ।
सुपर्वाण: सुमनसस्त्रिदिवेशा दिवौकस: ॥
आदितेया दिविषदो लेखा अदितिनन्दना: ।
आदित्या ऋभवोऽस्वप्ना अमर्त्या अमृतान्धस: ॥
बर्हिर्मुखा: क्रतुभुजो गीर्वाणा दानवारय: ।
वृन्दारका दैवतानि पुंसि वा देवता: स्त्रियाम् ॥" (अ.)

(5) योषित्—'स्त्री योषिदबला योषा नारी सीमन्तिनी वधू: । प्रतीपदर्शिनी वामा वनिता महिला तथा ॥' (अ.)

Different meanings.—(1) दिवौकस्—'स्याद् दिवौकादिवौकाश्च पुंसि देवे च चातके ।' (रन्तिदेव:) । Bhánuji quotes रन्तिदेव, showing the use of दिवौकस् । It is not formed by निपातन । It also signifies the deities [V. R. T. of Amarakos'a, N. S. P. Ed. p. 6.]

(2) सद्मन्—'सद्म स्यात् मन्दिरे नीरे' (मे.) (3) वार—'वार: सूर्यादिदिवसे वारोऽवसरवृन्दयो: । कुब्जवृक्षे हरे द्वारे वारं मद्यस्य भाजने ॥' (वि.) कुब्जवृक्ष—Small tree.

1 2 3 4 7

Derivation.—(1) सुख:—सुख + अच् (पचादित्वात्, सुखयतीति सुख:) (2) भव:—भू + अप् (भावे) (3) मङ्गला:—मङ्गल + अच् (मङ्गलमस्ति एषामिति) अर्श आदित्वात् अच् । (4) तूर्य:—तूरी + यत् (5) निस्वना:—नि + स्वन् + अप्

(भावे, 1st c. p.). घञ् is also added to it. E.g. निस्वान—"नौ गदनद-पठस्वनः" (३।३।६४। पा. ३२४१ सि.) [घञ् or अप् is optionally added to गद, नद, पठ् or स्वन् when it is connected with the prefix नि]. (6) योषिताम्—युष् + इति: (6th c. p.)—'हसहस्रिपुयिष्य इति:' (उ. १।९७।) The alternative form of योषित् is योषिता in feminine.—'आपं चैव हलन्तानां यथा वाचा निशा दिशा।' इति शासनात्। (7) सद्मनि—सद् + मनिन् (अधिकरणे, 7th c. s.) This word is neuter and is declined like कर्मन् (neuter) (8) मागधी—मगध + अण् + ङीष् (9) व्यजृम्भत—वि + जृम्भ् + अत।

Conjugation.—(1) जृम्भ् (literally to yawn but here to manifest) जृम्भते (लट्) अजृम्भत (लङ्) जृम्भेत (वि. लिङ्) जजृम्भे (लिट्) जृम्भिता (लुट्) अजृम्भिष्ट (लुङ्) जृम्भितः (क्त.)।

Force of अपि is संभावना—'गर्हासमुच्चयप्रश्नशङ्कासंभावनास्वपि।' (अ.) The blare of trumpets not only rose from Dilipa's palace but was heard on the welkin also.

Parallel passage.--"पुत्रजन्मप्रवेश्यानां तूर्याणां तस्य पुंसिणः।
आरम्भं प्रथमं चक्रुर्देवदुन्दुभयो दिवि॥"
(V. Raghu, Sl. 76, C. X.).

न संयतस्तस्य बभूव रक्षितु-
र्विसर्जयेद् यं सुतजन्महर्षितः।
ऋणाभिधानात् स्वयमेव केवलं
तदा पितॄणां मुमुचे स बन्धनात्॥ २०॥

मूलस्य पाठान्तरम्।

विसर्जयेत्—विमोचयेत् (चा.)

Prose order.—सुतजन्महर्षितः (सन्) यं विसर्जयेत्, रक्षितुः तस्य (एवं

-कोऽपि) संयत. न बभूव, स तदा पितॄणाम् ऋणाभिधानात् बन्धनात् केवलं स्वयमेव मुमुचे। Mallnátha places 'रक्षितुः…बभूव' before 'सुतजन्महर्षितः… विसर्जयेत्।'

Explanation by use of Synonyms.—सुतजन्महर्षितः (पुत्रजननाह्लादितः सन्) य (यं कारारुद्धं जनं) विसर्जयेत् (विमोचयेत्) रक्षितुः (सम्यक् पालनशीलस्य) तस्य (दिलीपस्य)—एवं कोऽपि—संयतः (कारारुद्धः) न बभूव (नासीत्)। सः (दिलीपः) तदा (तस्मिन् काले) पितॄणां (पितृलोकानाम्) ऋणाभिधानात् (ऋणसंज्ञकात्) बन्धनात् (रोधनात्) केवलम् (एकं यथा तथा) स्वयमेव (आत्मना एव) मुमुचे (मुक्तो बभूव)।

Substance.—किन्तु पुत्रजननोत्सवे राजा न कमपि चौरं मोचयितुं शशाक। तस्य शासनगुणेन चौराद्यभावात् न कोऽपि कारागारक्लेशं बुभुजे यं पुत्रोत्पत्तिजनितहर्षेण स कारातः विमोचयिष्यति। स तदा केवलं पुत्रमुखदर्शनेन पितॄणामृणबन्धनात् आत्मानमेव मोचयामास।

Change of voice.—सुतजन्महर्षितेन यः विसर्ज्येत…संयतेन…बभूवे। The second-half shall not be changed because मुमुचे is in कर्म कर्तृवाच्य।

Sanjivani.—नेति। (रक्षितुः) सम्यक्पालनशीलस्य (तस्य) दिलीपस्य—अतएव चौराद्यभावात—(संयतः) बद्धः (न बभूव, न अभूत्। किं तेनात आह—विसर्जयेदिति। सुतजन्मना हर्षितः तोषितः सन् [सुतजन्महर्षितः] सः (यं) बद्धं (विसर्जयेत्)। किन्तु (सः) राजा (तदा पितॄणाम् ऋणाभिधानात् बन्धनात्) (केवलम्) एकं यथा तथा (स्वयम् एव) एक एव इत्यर्थः—"केवलः कृत्स्न एकश्च केवलश्चावधीरितः" इति शाश्वतः—(मुमुचे)। कर्मकर्त्तरि लिट्। स्वयमेव मुक्त इत्यर्थः। अस्मिन्नर्थे—"एष वा अनृणो यः पुत्री" इति श्रुतिः प्रमाणम् ॥ २० ॥

Sanjivani Explained.

केवलः * * * अवधीरितः—केवल means कृत्स्न (whole), एक (one) as well as अवधीरित (disregarded).

"एष वा * * * पुत्री"—He is said to be free from debts who has a son.

Bengali.—প্রজাপালক সেই নৃপতির (এরূপ) কেহই (কারাগারে) আবদ্ধ ছিল না যাহাকে পুত্রোৎপত্তি হেতু আনন্দিত হইয়া বিমুক্ত করিবেন। তিনি তখন পিতৃঋণনামক বন্ধন হইতে কেবল আপনাকেই বিমুক্ত করিলেন। ২০।

English rendering.—Of that protector (of the people) there was no prisoner whom, gladdened by the birth of his son, he could liberate : only he released himself from the bondage known as debt to the manes (of his ancestors). 20.

Grammatical notes, &c., &c.

Sama'sa.—(1) सुतस्य जन्म सुतजन्म (षष्ठीतत्) तेन हर्षितः सुतजन्म-हर्षितः (तृतीयातत्) (2) ऋणमिव अभिधानं यस्य तत् ऋणाभिधानम् (बहु) तस्मात्।

Case-ending.—(1) तस्य—शेषे षष्ठी (2) बन्धनात्—"भीत्रार्थानां भयहेतुः" इति सूत्रादपादाने पञ्चमी (3) स्वयम्—अव्ययं, प्रकृत्यादिभ्यस्तृतीया (4) केवलम्—क्रियाविशेषणम् (5) पितॄणाम्—शेषे षष्ठी 'ऋण' इत्यनेन सम्बन्धः (6) तदा—अव्ययं, कालाधिकरणे सप्तमी (7) सः—सर्वनाम, कर्तृकारकम्, 'मुमुचे' इत्यस्य कर्ता।

Synonyms.—(1) ऋण—'ऋणं पर्य्युदञ्चनम्। उद्धारः।' (अ.)

Different meanings.—(1) ऋण—'ऋणं देये जले दुर्गे' (ह.) (2) सुत—'सुतः स्यात् पार्थिवे पुत्रे स्त्र्यपत्ये तु सुता स्मृता' (मे.)

Derivation.—(1) संयतः—सम् + यम् + क्तः (कर्तरि) (2) रक्षितुः—रक्ष् + तृच् (6th c. s.) (3) विसर्जयेत्—वि + सृज् + णिच् + विधिलिङ्-यात्। (4) हर्षितः—हर्ष + इतच् (जातार्थे) or हृष् + णिच् + क्तः (कर्मणि) (5) मुमुचे—मुच् + लिट्-ए (कर्मकर्तरि)।

Conjugation.—(1) सृज्—(V. I, 18). (2) मुच्—(V. Sl. 46, C. 1.)

For कर्मकर्तृवाच्य see notes on मुच्ये in I, 72.

विसर्जयेत्—शक्यार्थे विधिलिङ्—विसर्जयितुं शक्नुयात् —"शकि लिङ् च" (३।३।१७२।पा. २८२३. सि. [विधिलिङ् is used to signify that 'it is capable of being performed.']

Force of एव is इतरव्यावर्तकत्वम् । (V. I, 18).

> श्रुतस्य यायादयमन्तमर्भक-
> स्तथा परेषां युधि चेति पार्थिवः ।
> अवेक्ष्य धातोर्गमनार्थमर्थवि-
> च्चकार नाम्ना रघुमात्मसम्भवम् ॥ २१ ॥

Prose order.—अर्थवित् पार्थिवः, अयम् अर्भकः श्रुतस्य अन्तं यायात्, तथा युधि परेषाम् (अन्तं) च (यायात्) इति, धातोः गमनार्थम् अवेक्ष्य आत्मसम्भवं नाम्ना रघुं चकार ।

Explanation by use of synonyms.—अर्थवित् (शब्दार्थज्ञः) पार्थिवः (पृथिवीपतिः दिलीपः) अयम् (एषः) अर्भकः (बालकः) श्रुतस्य (शास्त्रस्य) अन्तं (पारं) यायात् (गच्छेत्) तथा (किञ्च) युधि (सङ्ग्रामे) परेषां (शत्रूणाम्) अन्तं च यायात्—इति (अतः कारणात्) धातोः (प्रकृतेः) गमनार्थं (गमनाख्यम् अर्थम्) अवेक्ष्य (आलोच्य) आत्मसम्भवं (स्वदेहोत्पन्नं पुत्रं) नाम्ना (आख्यया) रघुं चकार (विहितवान्) ।

Substance.—अथ पुत्रस्य नामकरणमभूत् । पुत्रोऽयं सर्वशास्त्रपारं गमिष्यति—युद्धे सर्वशत्रूणामन्तं च यास्यति—इति हेतोरुभयतस्तस्य गमनार्थतां विविच्य शब्दार्थज्ञः नृपतिस्तस्य लङ्घिधातुनिष्पन्नं रघुरिति नाम ररच ।

Change of voice.—अर्थविदा पार्थिवेन, अनेन अर्भकेण......अन्तः यायेत......(अन्तं यायेत)......आत्मसम्भवः...रघुः चक्रे ।

Sanjivani.—श्रुतस्येति । (अर्थवित्) शब्दार्थज्ञः (पार्थिवः) पृथिवीश्वरः

दिलीपः, (प्रथम्) (अर्भकः) बालकः (श्रुतस्य) शास्त्रस्य (अन्तं) पारं (यायात्) (तथा युधि) (परेषां) शत्रूणाम् अन्तं पारं (च) यायात्, यातुं शक्नुयात् इत्यर्थः—"शकि लिङ् च" (३।३।१७२। पा. २८२३ सि.) इति शक्यार्थे लिङ्—(इति) हेतोः (धातोः)—'अघिरघिलघि गत्यर्थाः' (V. धातुपाठ of Pánini, भ्वादिगण)—इति लघिधातोः—गमनाख्यम् अर्थं [गमनार्थम्]—अर्थवित्त्वात्—(अवेत्य) आलोच्य (आत्मसम्भवं) पुत्रं (नाम्ना रघुं चकार) 'लङ्घिबंह्योर्नलोपश्च' (उ. १।३०।) इति 'उ'-प्रत्यये, 'बालमूललघ्वलमङ्गुलीनां वा लो रत्वमापद्यते' (उ. १।३१।) इति वैकल्पिके रेफादेशे रघुरिति रूपं सिद्धम्। अत्र शङ्खः—"अशौचे तु व्यतिक्रान्ते नामकर्म्म विधीयते" (शङ्खसंहिता) इति ॥ २१ ॥

Sanjivani Explained.

"शकि लिङ् च"—(V. विसर्जयेत् in III, 20.)

अघिरघिलघि गत्यर्थाः—The roots अघि, रघि and लघि mean 'to go'.

अशौचे तु " " विधीयते—After the days of impurity are over, the child should be named. On this point Manu says :—

नामधेयं दशम्यां तु द्वादश्यां वास्य कारयेत्।
पुण्ये तिथौ मुहूर्त्ते वा नक्षत्रे वा गुणान्विते ॥ (III, 30)

कुल्लूक explains दशमी and द्वादशी to mean the tenth and the twelveth day.

लङ्घिबंह्योर्नलोपश्च—उ is added in कर्त्तृवाच्य to लङ्घि or बंहि and the nasal letter of the root elides. So लङ्घि + उ becomes लघु।

बालमूल * * रेफादेशे—र takes the place of ल in लघु by the Sutra 'बालमूल—'। It means—"The ल of the word बाल, मूल, लघु, अलम् or अङ्गुली changes into र optionally.'

The poet shows that the name रघु was not unsuited to Dilipa's son. रघु, literally, means 'one who goes'. Dilipa's son too would cross the ocean of knowledge and would discomfit the foes. रघु was, therefore, no misnomer for him.

Bengali.—এই বালক (বিবিধ) শাস্ত্রের এবং যুদ্ধে শত্রুগণের অন্তে গমন

করিবে, এই হেতু ধাতুর গমনার্থ আলোচনা করিয়া আত্মজকে শব্দার্থজ্ঞ পৃথ্বীশ্বর, রঘুনামে অভিহিত করিলেন। ২১।

English rendering—This child will reach the end of (Vedic) lore, as also (that) of foes in battle : so the king (who was) well-versed in (the) import (of words) made his son Raghu by name, seeing that 'going' is the import of the root (from which 'Raghu' is derived). 21.

Grammatical notes, &c., &c.

Sama'sa.—(1) गमनाख्य: अर्थ: गमनार्थ: (शाकपार्थिवादित्वात् मध्यपदलोपि-समास:) तम् (2) अर्थं वेत्ति इति अर्थवित् (उपपदसमास:) (3) आत्मन: सम्भव: (उत्पत्ति:) यस्य स आत्मसम्भव: (व्यधिकरणबहु) or आत्मा एव सम्भव: यस्य स आत्मसम्भव: (समानाधिकरणबहु)।

Case-ending.—(1) श्रुतस्य—शेषे षष्ठी (2) परेषाम्—शेषे षष्ठी (3) युधि—विषयाधिकरणे सप्तमी (4) धातो:—शेषे षष्ठी—'अर्थम्' इत्यनेन सम्बन्ध: (5) नाम्ना—प्रकृत्यादिभ्यस्तृतीया (6) इति—अव्यय, हेतौ पञ्चमी।

Synonyms.—(1) अर्भक—'पोत: पाकोऽर्भको डिम्भ: पृथुक: शावक: शिशु:।' (अ०)

Different meanings.—(1) अर्भक—'अर्भक: कथितो बाले मूर्खेऽपि च कृशेऽपि च।' (मे०) (2) अन्त—V. II, 19.

Derivation.—(1) श्रुतस्य—श्रु + क्त (भावे, 6th c. s.) (2) यायात्—या + विधिलिङ्—यात् (3) अन्तम्—अम् + तन् or, अति + अच् (2nd c. s.) (4) अर्भक:—ऋध् + वुन्। ध् of the root is changed into भ—भकारश्चान्तादेश:। 'अर्भकपृथुकपाका वयसि' (उ. ५।५३) (5) युधि—युध् + क्विप् भावे (7th c. s.) [This word (युध्) is feminine and is thus declined :—युत् युधौ युध:। युधम्, युधौ युध:। युधा, युद्भ्याम्, युद्भि:। युधे, युद्भ्याम्, युद्भ्य: and so on]. (6) अवेक्ष्य—अव + ईक्ष् + ल्यप् (7) धातो:—धा + तुन् (औणादिक:—6th c. s.) (8) पार्थिव:—पृथिवी + अण् (ईश्वरार्थे) (9) अर्थवित्—अर्थ + विद् + क्विप् (कर्तरि) (10) चकार—कृ + लिट्—णल् (11) नाम्ना—ज्ञा or नम् +

मनिन् (निपात्यते, 3rd c. s.)—'नामन्सीमन्व्योमन्रोमन्लोमन्पाप्मन्ध्यामन्' (उ. ४।१५१) म्नायते (कीर्त्यते) अनेन or नम्यतेऽभिधीयतेऽनेन इति नाम (V. R. T. of Amarakos'a N. S. P. Ed. P. 75.) (2) रघुम्—लङ्घ् + कु: (नलोप: 2nd c. s.) The alternative form is लघु । (3) सम्भवम्—सम् + भू + अप् (अपादाने, 2nd c. s.) ।

Conjugation.—(1) या—(V. Sl. 3, C. III.) (2) क्र—(V. Sl. 15, I.) (3) ईक्ष्—(to see) ईक्षते (लट्) ईक्षताम् (लोट्) ऐक्षत (लङ्) ईक्षेत (वि. लिङ्) ईक्षाञ्चक्रे, ईक्षामास, ईक्षाम्बभूव (लिट्) ईक्षिता (लुट्) ईक्षिष्यते (लृट्) ऐक्षिष्यत (लृङ्) ऐक्षिष्ट, ऐक्षिषाताम्, ऐक्षिषत (लुङ्) ईचिक्षिषते (सन्-लट्) ईक्षयति (णिच्-लट्) ऐचिक्षत (णिच्-लुङ्) ईक्षित: (क्त:) (4) लङ्घ् (to transgress) लङ्घति—ते (लट्) ललङ्घ—ङ्घे (लिट्) अलङ्घीत्, अलङ्घिष्ट (लुङ्) लङ्घिता (लुट्) लङ्घिष्यति —ते (लृट्) लङ्घित: (क्त:) । It is also चुरादि and परस्मैपदी—लङ्घयति (लट्) लङ्घयामास &c. (लिट्) अललङ्घत् (लुङ्) अलङ्घि (कर्मणि-लुङ्) ।

Force of च is समुच्चय ।

Remark.—(1) One of the Calcutta editors changes the voice of this sloka thus—'अमुना अभवेष—&c. 'अयम्', it should be noted that it cannot be changed into 'अमुना', but 'अनेन' ।

(2) रघु:—In उणादिप्रकरण we find that रघु is derived with the affix कु, but in सिद्धान्तकौमुदी we find the affix 'उ' । We think it is a mistake of the copyist.

पितुः प्रयत्नात् स समग्रसम्पदः
शुभैः शरीरावयवैर्दिने दिने ।
पुपोष वृद्धिं हरिदश्वदीधिते-
रनुप्रवेशादिव बालचन्द्रमाः ॥ २२ ॥

Prose-order.—हरिदश्वदीधिते: अनुप्रवेशात् बालचन्द्रमा इव स: समग्रसम्पद: पितु: प्रयत्नात् शुभै: शरीरावयवै:, दिने दिने वृद्धिं पुपोष ।

Explanation by use of synonyms.—सः (रघुः) समयसम्पदः (पूर्णलक्ष्मीकस्य) पितुः (जनकस्य) प्रयत्नात् (प्रकृष्टयत्ननिबन्धनात्) शुभैः (मनोहरैः) शरीरावयवैः (देहाङ्गैः) हरिदश्वदीधितेः (सूर्य्यरश्मेः) अनुप्रवेशात् (प्रतिबिम्बनात्) बालचन्द्रमा इव (शुक्लपक्षीयप्रतिपच्चन्द्र इव) दिने दिने (प्रतिदिनं) वृद्धिं (पुष्टिं) पुपोष (अधिजगाम)।

Substance.—प्रियपुत्रस्य पालने पिता समधिकं यत्नमान् बभूव। पूर्णलक्ष्मीकस्य तस्य कोऽप्यभावो नासीत् यत् यत्नस्य कोऽपि प्रत्यूहः स्यात्। एव पितुर्यत्नात् स बालः पुष्टिमधिजगाम। शरीरं तस्य प्रतिदिनं ववृधे। तत्रोपमामाह। सौरकरात् चन्द्रो यथा प्रतिदिनं वर्द्धते तथा सूर्य्यसदृशप्रखरप्रतापस्य दिलीपस्य प्रयत्नात् चन्द्रसमो रमणीयदर्शनो रघुः प्रतिदिनं वर्द्धितुमारेभे।

Change of voice.—तेन...बालचन्द्रमसा...वृद्धिः पुपुषे।

Sanjivani.—पितुरिति। (सः) रघुः (समयसम्पदः) पूर्णलक्ष्मीकस्य (पितुः) दिलीपस्य (प्रयत्नात्) (शुभैः) मनोहरैः (शरीरावयवैः) (हरिदश्वदीधितेः) सूर्य्यस्य रश्मेः—"भास्वद्विवस्वत्सप्ताश्वहरिदश्वोष्णरश्मयः"—इत्यमरः (Cole p. 22) (अनुप्रवेशात्, बालचन्द्रमा इव) (दिने दिने) प्रतिदिनं—"नित्यवीप्सयोः" (८।१४ गा. २१४० सि.) इति द्विर्वचनम्—(वृद्धिं पुपोष। अत्र वराहसंहितावचनम्—"सलिलमये शशिनि रवेर्दीधितयो मूर्च्छितास्तमो नैशम्। क्षपयन्ति दर्पणोदरनिहिता इव मन्दिरस्यान्तः॥" (वृहत्संहिता ४ अ. २ श्लो.) इति॥ २२॥

Sanjivani Explained.

"नित्यवीप्सयोः"—To signify नित्य (constancy) or वीप्सा (frequency) a word is repeated.

अत्र वराहसंहितावचनम् * * इति—To countenance the statement that the moon's light is borrowed from the sun, Mallinátha quotes from Varáhamihira's, work on Ástronomical Astrology. The work is named 'Vrihatsamhitá'. Some books read it as वराहसंहिता। For the work and the author See *Introduction.*

The quotation from Varáhamihira means that the rays of the sun, reflected from the watery moon, dispel the nocturnal darkness, even as rays reflected from a mirror illuminate a room.

Bengali.—সূর্য্যরশ্মির প্রতিবিম্বনহেতু (শুক্লপক্ষীয়) বালচন্দ্রমা যেরূপ বৃদ্ধিপ্রাপ্ত হয়, সেইরূপ পূর্ণলক্ষীক পিতার প্রযত্নহেতু সেই (রঘু) মনোহর দেহাঙ্গসমূহ দ্বারা দিন দিন বৃদ্ধি পাইতে লাগিলেন। ২২

English rendering.—Through the great care of that one endued with prosperity of all kinds, he (the prince) acquired growth, from day to day, with the handsome limbs of his body, like the young moon through the admittance (into it) of the light of the green-steeded (luminary). 22.

Grammatical notes, &c., &c.,

Sama'sa—(1) सम्यक् अग्रं यस्याः सा समग्रा (बहु) समग्रा सम्पत् यस्य स समग्रसम्पत् (बहु) तस्य (2) प्रकृष्टः यत्नः प्रयत्नः (प्रादिसमासः) तस्मात् (3) शरीरस्य अवयवाः शरीरावयवाः (षष्ठीतत्) तैः (4) हरितः (हरिद्वर्णाः) अश्वाः यस्य स हरिदश्वः (बहु) तस्य दीधितिः हरिदश्वदीधितिः (षष्ठीतत् तस्याः (5) चन्द्रमाः— (V. Sl. 46, C. I.) बालश्चासौ चन्द्रमाश्चेति बालचन्द्रमाः (कर्मधा)।

Case-ending—(1) पितुः—कृद्योगेऽनुक्ते कर्त्तरि षष्ठी "कर्तृकर्मणोः कृति" (V. Sl. 2, C. I.) (2) प्रयत्नात्—हेतौ पञ्चमी—"विभाषेति योगविभागाद्गुणे स्त्रियां च क्वचित्।" (V. notes on मोहात्, Sl. 2, C. I.) (3) शरीरावयवैः—करणे तृतीया (4) दिने दिने—कालाधिकरणे सप्तमी (5) हरिदश्वदीधितेः—कृद्योगेऽनुक्ते कर्त्तरि षष्ठी। (6) अनुप्रवेशात्—हेतौ पञ्चमी (6) बालचन्द्रमाः—विधेयोपमानकर्तृपदम्—'सः' इत्युद्देश्योपमेयकर्तृपदस्य।

Synonyms.—(1) हरिदश्व—(V. सूर्य्य, Sl. 13, C. III).

(2) दीधिति—"किरणास्रमयूखांशुगभस्तिघृणिरश्मयः।

भानुः करो मरीचिः स्त्रीपुंसयोर्दीधितिः स्त्रियाम्॥" (अ.)

Different meanings.—

(1) बाल—"बालो ना कुन्तलेऽश्वस्य गजस्यापि च बालधौ।
(numbers 1, 2 over कुन्तले, बालधौ)

बाच्यलिङ्गोऽर्भके मूर्खे ह्रीबेरे पुंनपुंसकम्॥
(numbers 3, 4, 5 over अर्भके, मूर्खे, ह्रीबेरे)

अवक्षारोगार्ते स्त्री बाली बाला त्रुटिस्त्रियोः।" (मे.)
(numbers 6, 7, 8, 9)

(2) हरित्—"हरिद्दिशि[1] स्त्रियां पुंसि[2] हयवर्णविशेषयोः[3] ।

अस्त्रियां स्यात् तृणे[4] च ।" (मे.)

Derivation.—(1) पितुः (V. Sl. 1, C. I.) (2) शुभ्रैः—शुभ्+र (3rd c. p.) (3) अवयवैः—अव+यु+अच् (कर्त्तरि, 3rd c. p.) (4) पुपोष—पुष्+लिट्—णल् (5) दीधितेः—दीधी+क्तिन् (भावे, 6th c. s.) (6) अनुप्रवेशात्—अनु+प्र+विश्+घञ् (भावे, 5th c. s.) (7) चन्द्रमाः—(V. Sl. 46, C. I.).

Conjugation.—(1) पुष् (to nourish) पोषति, पुष्णाति, पुष्यति (लट्) अपोषत्, अपुष्णात्, अपुष्यत् (लङ्) पुषाण (क्र्या.) पोष (भ्वा.) पुष्य (दि.) (लोट्—हि) पोषेत्, पुष्णीयात्, पुष्येत् (वि. लिङ्) पुपोष (लिट्) अपोषीत् (लुङ्) अपुषत् (दिवा. लुङ्) पोषिता (भ्वा. क्र्या.) पोष्टा (दिवा. लुट्) पोषिष्यति (भ्वा. क्र्या.) पोक्ष्यति (दिवा. लृट्) पोषयति (णिच् लट्) अपूपुषत् (णिच्-लुङ्) पुष्टः (दिवा. क्तः) अन्यत्र पुषितः। This root is also चुरादि—पोषयति (लट्) (2) दीधी (to shine) दीधीते, दीध्याते, दीध्यते (लट्) दीध्यां चक्रे &c. (लिट्) अदीधीष्ट (लुङ्) दीधिता (लुट्) दीधिष्यते (लृट्) दीधितः (क्तः)। This root is आत्मनेपदी, but in the present participle it gets शतृ and not शानच्, as, दीध्यत्। 'दीधीवेव्योश्छन्देऽपि छान्दसत्वात् व्यत्ययेन परस्मैपदम्'। (V. सिद्धान्तकौमुदी)।

Rhetoric.—The figure of speech is उपमा। The limbs of Raghu's body are compared to the digits of the moon. The tender care his father took of him is compared to the falling of the solar light upon the moon. Thus Dilipa is compared to the sun and Raghu to the moon.

Parallel passage.—

"दिने दिने सा परिवर्धमाना लब्धोदया चान्द्रमसीव लेखा ।
पुपोष लावण्यमयान् विशेषान् ज्योत्स्नान्तराणीव कलान्तराणि ॥

(V. Kumárasambhavam, Sl. 25, C. I.)

उमावृषाङ्कौ शरजन्मना यथा
यथा जयन्तेन शचीपुरन्दरौ।
तथा नृपः सा च सुतेन मागधी
ननन्दतुस्तत्सदृशेन तत्समौ॥ २३॥

Prose order.—उमावृषाङ्कौ शरजन्मना यथा, शचीपुरन्दरौ जयन्तेन यथा, तथा तत्समौ सा मागधी नृपश्च तत्सदृशेन सुतेन ननन्दतुः।

Explanation by use of synonyms.—उमावृषाङ्कौ (पार्वतीपरमेश्वरौ) शरजन्मना (कार्त्तिकेयेन) यथा (यादृक्) शचीपुरन्दरौ (इन्द्राणीपुरुहूतौ) जयन्तेन (पाकशासनिना) यथा (यादृक्) तथा (तादृक्) तत्समौ (उमावृषाङ्काभ्यां शचीपुरन्दराभ्यां च समानौ) सा मागधी (सा मगधराजदुहिता) नृपश्च (राजा दिलीपश्च) तत्सदृशेन (कार्त्तिकेयजयन्ताभ्यां तुल्येन) सुतेन (पुत्रेण) ननन्दतुः (अहृष्यतुः)।

Substance.—पुत्रस्तयो पित्रोर्निरतिशयां मुदं वितेने। पार्वतीपरमेश्वरौ यथा कार्त्तिकेयं लब्ध्वा परमानन्दं भेजाते, शचीपुरन्दरौ यथा जयन्तं प्राप्य काम्पि हर्षं लब्धवन्तौ तथा सुदक्षिणादिलीपौ कार्त्तिकेयजयन्तसदृशं दिव्यप्रभावं पुत्रं रघुं प्राप्य कामपि अनिर्वचनीयां प्रीतिमनुबभूवतुः।

Change of voice.—उमावृषाङ्काभ्यां...शचीपुरन्दराभ्यां...तत्समाभ्यां ...तया मागध्या नृपेण...(उभाभ्यां)...ननन्दे।

Sanjivani.—उमेति। (उमावृषाङ्कौ) पार्वतीवृषभध्वजौ (शरजन्मना) कार्त्तिकेयेन—"कार्त्तिकेयो[1] महासेनः[2] शरजन्मा[3] षडाननः[4]"—इत्यमरः (Cole. p. 7.) (यथा) ननन्दतुः (शचीपुरन्दरौ) (जयन्तेन) सुतेन—"जयन्तः[1] पाकशासनिः[2]" इत्यमरः (Cole. p. 8.) (यथा) ननन्दतुः (तथा) (तत्समौ) ताभ्याम् उमावृषाङ्काभ्यां शचीपुरन्दराभ्यां च समौ समानौ (सा मागधी, नृपश्च) तत्सदृशेन (ताभ्यां कार्त्तिकेयजयन्ताभ्यां सदृशेन) (सुतेन ननन्दतुः)। मागधी प्राक् व्याख्याता॥२३॥

Bengali.—পার্বতী এবং পরমেশ্বর যেরূপ শরজন্মা (কার্ত্তি-

কেয়কে) প্রাপ্ত হইয়া আনন্দিত হইয়াছিলেন শচী এবং পুরন্দর যেরূপ জয়ন্তকে লাভ করিয়া আনন্দিত হইয়াছিলেন, পার্বতী ও শচী সদৃশ সেই মগধরাজদুহিতা (সুদক্ষিণা) এবং পরমেশ্বর ও পুরন্দর সদৃশ নৃপতি (দিলীপ) কার্ত্তিকেয় ও জয়ন্ত সদৃশ পুত্র (রঘুকে) প্রাপ্ত হইয়া সেইরূপ আনন্দিত হইলেন। ২৩।

English rendering.—As Umá and the bull-bannered one with him (who was born in a bush of reeds), as S'achi and the destroyer of hostile cities with Jayanta, even so she, the princess of the Magadhas, and the king, who resembled those divine couples, became highly delighted with that son of theirs resembling those celestial children. 23.

Grammatical notes, &c., &c.

Sama'sa.—(1) भौः (शिवस्य) मा (लक्ष्मीः) (षष्ठीतत्) or उ' (शिवं) माति (पतित्वेन मन्यते) इति उमा (उपपदतत्) वृषः अङ्कः (चिह्नं) यस्य स वृषाङ्कः, उमा च वृषाङ्कश्च उमावृषाङ्कौ (द्वन्द्वः) (2) शरे (शरवणे) जन्म यस्य स शरजन्मा (व्यधिकरण बहु) तेन—"सप्तम्युपमान बहुव्रीहिः व्यधिकरणोजन्माद्युत्तरपदः" (का. सू. ५ अधि. २ अ. १९ सू.) [A बहुव्रीहि ending in such words as जन्म &c., is व्यधिकरण। For the Exp. of बहुव्रीहि and its classification see notes under II, 3.] (3) पुरः (अरीणां) दारयतीति पुरन्दरः (उपपदतत्) शची च पुरन्दरश्च शचीपुरन्दरौ (द्वन्द्वः) (4) नॄन् पातीति नृपः (उपपदसमासः) (5) ताभ्यां सदृशः तत्सदृशः (तृतीयातत्) तेन, (6) ताभ्यां समौ तत्समौ (तृतीयातत्)।

Case-ending.—(1) शरजन्मना, जयन्तेन and सुतेन—इत्थं तृतीया (2) यथा and तथा—अव्ययं, क्रियाविशेषणम्।

Synonyms.—(1) शरजन्मन्—

"कार्त्तिकेयो महासेनः शरजन्मा षडाननः।
पार्वतीनन्दनः स्कन्दः सेनानीरग्निभूर्गुहः॥
बाहुलेयस्तारकजिद् विशाखः शिखिवाहनः।
षाण्मातुरः शक्तिधरः कुमारः क्रौञ्चदारणः॥" (अ.)

(2) उमा—

"उमा कात्यायनी गौरी काली हैमवतीश्वरा।
शिवा भवानी रुद्राणी शर्वाणी सर्वमङ्गला।
अपर्णा पार्वती दुर्गा मृडानी चण्डिकाम्बिका (17) ॥" (अ.)

(3) पुरन्दर—(V. मघवन्, Sl. 26, C. I.) (4) जयन्त—(V. Sanjivani.)

Different meanings.—(1) उमा—'उमातसी[1] हैमवती[2] हरिद्रा[3] कीर्त्ति[4]कान्तिषु[5]' (मे.) (2) जयन्त—"जयन्तावेन्द्रिगिरिशौ जयन्तुमापताकयोः जीवन्त्यां सिंहपुच्छ्यां च इन्द्रपुत्र्यां च" (मे.)

Derivation.—(1) उमा—उ + मा + क—"आतोऽनुपसर्गे कः (३।२।३ पा. २९१५ सि.)।

N. B. Words admit of three sorts of sense in शब्दशास्त्र, *viz.*, शाब्दिक, धातुज and पौराणिक। Táránátha Tarkaváchaspati illustrates them by the word 'उमा'। He explains it thus :—

'उ' (शिवं) माति मिमीते वा (पतित्वेन मन्यते) इति उमा (धातुज) or verbal sense. A second sense is ओः (शिवस्य) मा (लक्ष्मीः) (शाब्दिक)। This derivative sense depends upon nouns and has no need for any verb. The third is उ (भोः) मा (मा तपः कुरु) [पौराणिक] "उमेति मात्रा तपसो निषिद्धा पश्चादुमाख्यां सुमुखी जगाम।" (V. Kumárasambhavam, C. I. 26.) (2) शची—शच् + इन् = शचिः। शचि + ङीष् —'कृदिकारादक्तिनः' (V. notes on शैलपत्नी, Sl. 1, C. I.) (3) जयन्त—जि + झच् (3rd c. s.) 'तृभूवहि—' (उ. ३।१२८) इत्यादिना झच्। झ is Pánini's symbol for अन्त। See "झोऽन्तः" (७।१।३ पा. २१६९ सि.) (4) पुरन्दर—पुर् + दॄ + णिच् + खच् (कर्त्तरि, 1st c. d.) [See notes on the word in II, 74.] (5) मागधी—मगध + अण् + ङीप् (6) ममन्दतुः—मन्द् + लिट्-अतुस्।

Conjugation.—(1) मन्द् (V. Sl. 57, C. I.)

Allusion of शरजन्मन्। महादेवस्य रेतो वह्नौ पपात। वह्निस्तत् सोढुमशक्तवन् गङ्गायां निचिक्षेप। गङ्गापि तदैशं तेजः कथमपि धारयितुं न शशाक। ततः सा तत् शरवने निक्षिप्तवती। तत्र कुमारस्य जन्माभूत्। अनन्तरं षट् कृत्तिकास्तद्वनमार्गेण गच्छन्त्यस्तं बालमवलोक्य स्तन्यदानादिना वर्द्धयामासुः। शरवने जन्मग्रहणात् कुमारस्य नामान्तरं शरजन्मेति। कृत्तिकाभिः वर्द्धनाच्च तस्यापरं नाम कार्त्तिकेय इति।

'एतस्मिन्नन्तरे देव्यः कृत्तिकाः षट् सुतेजसः।
ददृशुः स्वेच्छया यान्त्यो बालं शरवने स्थितम्॥
कृपायुक्ताः समाजग्मुर्यत्र स्कन्दः स्थितोऽभवत्।
अहंपूर्वमहंपूर्वं तस्मै स्तन्यं हि चुक्रुशुः॥" (V. Vámanapurána.)

Rhetoric.—The figure of speech is मालोपमा। The king and the queen are once compared with S'iva and Durgá, again with Indra and S'achi. Raghu is compared once with कार्त्तिकेय, again with जयन्त। It suggests that all the qualities of S'iva and Indra were present in Dilipa. The queen had all the qualifications of Durgá and S'achi. Raghu also incorporated into himself the prowess of Kárttikeya and the tact of Jayanta.

रथाङ्गनाम्नोरिव भावबन्धनं
बभूव यत् प्रेम परस्पराश्रयम्।
विभक्तमप्येक सुतेन तत्तयोः
परस्परस्योपरि पर्य्यचीयत॥ २४॥

मूलस्य पाठान्तरम्।

एकसुतेन—एकसुतेन (व.)

पर्य्यचीयत—पर्य्यहीयत (व.)

Prose order.—रथाङ्गनाम्नोः इव तयोः भावबन्धनं परस्पराश्रयं यत् प्रेम बभूव, तत् एकसुतेन विभक्तम् अपि परस्परस्य उपरि पर्य्यचीयत।

Explanation by use of synonyms.—रथाङ्गनाम्नोरिव (चक्रवाकयोरिव) तयोः (दम्पत्योः) भावबन्धनं (हृदयाकर्षकं) परस्पराश्रयम् (अन्योन्यविषयं) यत् प्रेम (यः प्रणयः) बभूव (जातः) तत् (तत्प्रेम) एकसुतेन (एकमात्रेण पुत्रेण), विभक्तमपि (कृतविभागमपि) परस्परस्य (अन्योन्यस्य) उपरि (उपरिष्टात्) पर्य्यचीयत (बवृधे)।

Substance.—चक्रवाकयोर्दाम्पत्यं प्रेम लोके प्रसिद्धमस्ति। तयोर्विहगयोरिव दिलीपसुदक्षिणयोः प्रेम प्रगाढमासीत्। तनयजन्मनः प्राक् सुदक्षिणाप्रेम्णो दिलीपः दिलीपप्रेम्णश्च सुदक्षिणा एक आधारोऽभूत। पुत्रे जाते माता पिता उभावेव तस्मिन्ननुरक्तौ बभूवतुः। तयोः प्रत्येकं रतिर्बालके पपात। एवं रतेरधुना आधारद्वयम् बभूव। सुदक्षिणास्नेहस्य दिलीपस्तनयश्च तथा दिलीपस्नेहस्य सुदक्षिणा तनयश्चाधारः सञ्जातः। एकं वस्तु आधारद्वये विभक्तं सत् क्षीणं दृश्यते। तयोः दम्पत्योः प्रेम तु किमप्यद्भुतमासीत् यत् विभक्तमपि क्षीणं न भूत्वा प्रत्युत प्रत्येकमाधारे वर्द्धितमभूत्।

Change of voice.—भावबन्धनेन परस्पराश्रयेण येन प्रेम्णा बभूवे। (कर्मकर्त्तरि वाच्यपरिवर्त्तनं नास्ति।) The rest cannot be changed.

Sanjivani.—रथाङ्गेति। रथाङ्गनाम्नी च रथाङ्गनामा च रथाङ्गनामानौ चक्रवाकौ—"पुमान् स्त्रिया" (१।२।६७ पा. ९७७ सि.) इत्येकशेषः—तयोः [रथाङ्गनाम्नोः] (इव) (तयोः) दम्पत्योः (भावबन्धनं) हृदयाकर्षकं (परस्पराश्रयम्) अन्योन्यविषयं (यत् प्रेम बभूव तत्) एकेन केवलेन, ताभ्यामन्येन वा—"एके मुख्यान्यकेवलाः" इत्यमरः (Cole. p. 300)—सुतेन [एकसुतेन] (विभक्तम् अपि) कृतविभागम् अपि (परस्परस्योपरि) (पर्य्यचीयत) ववृधे। कर्मकर्त्तरि लङ्—अकृत्रिमत्वात् स्वयमेव उपचितमित्यर्थः। यत् एकाधारं वस्तु तत् आधारद्वये विभज्यमानं क्षीयते, अत्र तु तयोः प्राक् एकैककर्त्तृकम् अन्यैकविषयं प्रेम सम्प्रति द्वितीयविषयलाभेऽपि न व्यहीयत, प्रत्युत उपचितमेव अभूदिति भावः॥ २४॥

Sanjivani Explained.

भावबन्धन—Mallinátha means by it हृदयाकर्षक or 'heart-attracting.'

Cháritravardhana explains it as चित्तग्रन्थिबन्धनं मैत्रीकरणम् । (such friendship as binds the heart).

Bengali.—চক্রবাকমিথুনের ন্যায় সেই দম্পতির হৃদয়াকর্ষক পরস্পরাশ্রয় যে প্রেম জন্মিয়াছিল, তাহা একটী মাত্র পুত্র দ্বারা বিভক্ত হইলেও (ন্যূন না হইয়া) পরস্পরের মধ্যে অধিকতর বৃদ্ধি প্রাপ্ত হইল। ২৪।

English rendering.—That mutual love which the (royal) pair had, binding their hearts like that of a pair of Chakravákas, increased for each other though (it was) shared by a common son. 24.

Grammatical notes, &c., &c.

Sama'sa.—(1) रथस्य अङ्गं रथाङ्गं (चक्रम्) [षष्ठीतत्] रथाङ्गं नाम यस्य स रथाङ्गनामा (बहु) Now V. Sanjivani रथाङ्गनामानौ—(एकशेष द्वन्द्व:) तयो: (2) बध्नाति इति बन्धनं—भावस्य (हृदयस्य) बन्धन भावबन्धनम् (षष्ठीतत्) (3) परस्पर: आश्रय: यस्य तत् परस्पराश्रयम् (बहु) (4) एक: (अद्वितीय:) सुत: एकसुत: (कर्मधारय:) "पूर्वकालैकसर्वजरत्पुराणनवकेवला: समानाधिकरणेन" (२।१।४९। पा. ७२६ सि.) (V. notes on एकपदी, Sl. 30, C. I.).

Cace-ending.—(1) रथाङ्गनाम्नो: - विध्येयोपमानसम्बन्धपदं—'तयो:' इत्युद्देश्योपमेयसम्बन्धपदस्य (2) एकसुतेन—अनुक्तकर्तरि तृतीया —'विभक्तम्' इत्यस्य (3) परस्परस्य —अतसर्थप्रत्ययप्रयोगे षष्ठी—"षष्ठ्यतसर्थप्रत्ययेन" (२।३।३०। पा. ६०८ सि.) [In alliance with words formed by the fifteen affixes अतसुच् अस्ताति &c., which signify दिक्, देश, and काल, other words admit षष्ठी। E.g. ग्रामस्य दक्षिणत:, पुर:, पुरस्तात्, उपरि, उपरिष्टात् वा]।

Synonyms.—(1) 'रथाङ्गनामन्—"कोकश्चक्रश्चक्रवाको रथाङ्गाह्वयनामक:।" (अ)

Different meanings.—(1) रथाङ्ग—'रथाङ्गं न स्त्रीयक्रे ना चक्राङ्गविहङ्गमे' (मे.) (2) भाव—'सत्ताभावाभिप्रायचेष्टात्मजन्मसु। क्रियालीलापदार्थेषु विभूतिबुध (बन्धु) जन्तुषु। रत्यादौ च।' (मे.)

Derivation.—(1) भावः—(भू + णिच्) = भावि + अच् or भू + घञ् (भावे) (2) बन्धनम्—बन्ध् + ल्यु: (कर्त्तरि) (3) बभूव—भू + लिट्—णल् (4) प्रेम—प्रिय + इमनिच्। प्रिय changes into प्र। See ६।४।१५७ पा. २०१६ सि. (5) परस्परः—(V. Sl. 40, C. I.) (6) उपरि—ऊर्द्ध + रिल्—उपादेशश्च (7) पर्य्यचीयत—परि + चि + लङ्—त (कर्मकर्त्तरि) (8) आश्रय—आ + श्रि + अधिकरणे अच्।

Conjugation.—(1) चि, (V. Sl. 2, C. III.) (2) भू—(V. Sl. 15, C. III.).

Remark.—One of the Calcutta editors says that Mallinátha explains the meaning of 'भाव' as 'हृदय', but this sense cannot be found in any lexicon. He, therefore, accuses Mallinátha of a mistake and has said much on 'भाव'। We say, 'भाव' means अभिप्राय ; therefore, by लक्षणा, it may mean हृदय। It means आत्मा as well which stands for हृदय or चित्त। भरत says,—'आत्मा कलेवरे यत्ने स्वभावे परमात्मनि। चित्ते धृतौ च बुद्धौ च पर-व्यावर्त्तनेऽपि च॥' (V. R. T. of Amarakos'a, N. S. P. Ed. p. 479.).

Parallel passage.—'अन्तःकरणतत्त्वस्य दम्पत्योः स्नेहसंश्रयात्।
आनन्दग्रन्थिरेकोऽयमपत्यमिति बध्यते॥'
(V. Uttara-Rámacharitam.)

उवाच धात्र्या प्रथमोदितं वचो
ययौ तदीयामवलम्ब्य चाङ्गुलिम्।
अभूच्च नम्रः प्रणिपातशिक्षया
पितुर्मुदं तेन ततान सोऽर्भकः॥ २५॥

Prose order.—सः अर्भकः धात्र्या प्रथमोदितं वचः उवाच, तदीयाम् अङ्गुलिम् अवलम्ब्य ययौ च, प्रणिपातशिक्षया नम्रः अभूत् च। तेन पितुः मुदं ततान।

Explanation by use of synonyms.—सः (पूर्वकथितः) अर्भकः (शिशुः) धात्र्या (उपमात्रा) प्रथमोदितं (प्रथमोपदिष्टं) वचः (वाक्यम्)

उवाच (उच्चारितवान्), तदीयां (तत्सम्बन्धिनीम्) अङ्गुलिं (करशाखाम्) अवलम्ब्य (आश्रित्य) ययौ च (चलितुमारेभे च), प्रणिपातशिक्षया (प्रणत्युपदेश-पालनेन) नम्रः (अवनतमस्तकः) अभूच्च (आसीच्च)। तेन (तादृशेन कर्मणा) पितुः (जनकस्य) मुदम् (आनन्दं) ततान (अवर्द्धयत्)।

Substance.—स्थाने एव रात्री यत्नो बभूव। स बालः शैशवेऽपि विनयादिगुणग्रामस्य परिचयं ददौ। पितुः समीपे गत्वा धात्र्या प्रथमोपदिष्टं वचनमुच्चारितवान् तस्याः अङ्गुलिं धृत्वा मन्दं मन्दं जगाम। प्रणामोपदिष्टः सन् सः अवनतमस्तकेन प्रणनाम। एतादृशक्रियाभिः स जनकस्यानन्दं वर्द्धयामास।

Change of voice—तेन अर्भकेण...ऊचे...ययेे...नम्रेण अभावि...मुत् तेने।

Sanjivani.—उवाचेति। (सः) (अर्भकः) शिशुः—"पोतः पाकोऽर्भको डिम्भः पृथुकः शावकः शिशुः" इत्यमरः (Cole. p. 135)—(धात्र्या) उपमात्रा—"धात्री जनन्यामलकीवसुमत्युपमातृषु" इति विश्वः—प्रथमम् उदितम् उपदिष्टं [प्रथमोदितं] (वचः उवाच); (तदीयाम् अङ्गुलिम् अवलम्ब्य ययौ च); प्रणिपातस्य शिक्षया उपदेशेन [प्रणिपातशिक्षया] (नम्रः अभूत् च) इति यत् (तेन पितुः मुदं ततान)॥ २५॥

Sanjivani Explained.

पोतः पाकोऽर्भको डिम्भः * * * शिशुः—पोत, पाक, अर्भक, डिम्भ, पृथुक, शावक and शिशु are synonymous.

धात्री * * धात्री means जननी (mother), आमलकी, वसुमती (earth) as well as उपमातृ (nurse).

Bengali.—ধাত্রী প্রথমে যে বাক্য বলিত, সেই শিশু তাহাই উচ্চারণ করিতে লাগিল—তাহার অঙ্গুলি ধারণ করিয়া চলিতে আরম্ভ করিল—প্রণাম করিতে শিক্ষা দিলে অবনতমস্তকে প্রণাম করিত—এই সকল ক্রিয়া দ্বারা সে পিতার আনন্দ বর্দ্ধন করিল। ২৫।

English rendering.—He uttered all words that were first spoken by the nurse, and walked holding her finger,

and proved himself humble by the prostrations he had been taught. By all these the child enhanced the father's joy. 25.

Grammatical notes, &c. &c.

Sama'sa.—(1) प्रथमम् उदितं प्रथमोदितम् (सुप्सुपा) (2) नि (विशेषेण) पातः निपातः (प्रादिः) प्रकर्षेण निपातः प्रणिपातः (प्रादिः) तस्य शिक्षा प्रणिपातशिक्षा (षष्ठीतत्) तया ।

Case-ending.—(1) धात्र्या—अनुक्ते कर्त्तरि तृतीया—'उदितम्' इत्यस्य (2) प्रणिपातशिक्षया—इत्थंभूते तृतीया (3) तेन—करणे तृतीया ।

Synonyms.—(1) अङ्गुलि—'अङ्गुल्यः करशाखाः स्युः' (अ.) (2) अर्भक —(V. Sanjivani.)

Different meanings.—(1) धात्री—(V. Sanjivani.) (2) अङ्गुलि —'अङ्गुलिः करशाखायां कर्णिकायां गजस्य च ।' (हे. वि.)

Derivation.—(1) अर्भकः—(V. Sl. 21, C. III.) (2) धात्र्या—धे (ट्) + ष्ट्रन् (कर्त्तरि) + ङीष् (3rd c. s.) (3) उदितम्—वद् + क्त (कर्मणि) (4) ययौ—या + लिट्—णल् (5) तदीयाम्—तद् + छ + टाप् (2nd c. s). See मदीय in I, 63. (6) अङ्गुलिम्—अङ्ग् + उलि (औणादिकः, 2nd c. s.) The alternative form is अङ्गुली—'कृदिकारादक्तिनः' (V. notes on प्रतिपत्तये, Sl. 1, C. I.). 'अङ्गुरि' is also another form,—"बालमूललघ्वङ्गुलीनां वा लोरः' (८।२।१८ पा. वा. २१६७ सि. वा.) [V. notes on रघु, III, 21.] (7) अभूत्—भू + लुङ्—दिप् (8) मुदम्—मुद् + क्विप् भावे (2nd c. s.). The word मुद् is feminine and declined like आपद् (9) ततान—तन् + लिट्—णल् (11) उवाच—ब्रू or वच् + लिट्—णल् ।

Conjugation.—(1) तन् (to spread out) तनोति, तनुते (लट्) तनोतु, तनुताम् (लोट्) अतनोत्, अतनुत (लङ्) तनुयात्, तन्वीत (विधिलिङ्) ततान, तेनतुः, तेनिथ, तेने (लिट्) अतनीत्, अतानीत्, अतत, अतनिष्ट, अतथाः, अतनिष्ठाः (लुङ्) तनिता (लुट्) तनिष्यति-ते (लृट्) तायते, तन्यते (कर्मणि लट्) अतानि (कर्मणि लुङ्) तितनिषति-ते, तितांसति-ते, तितंसति-ते (सन्-लट्) तम-

तन्यते (यक्-लट्) तानयति (णिच्-लट्) अतीतनत् (णिच्-लुङ्) ततः (क्तः) तनित्वा-तत्वा (क्त्वा) वितत्य (ल्यप्)। This is also चुरादि—तानयति (लट्)

'वितानयति यः कीर्त्तिं वितनत्यमलं यशः ।
वितनोति च यः स्त्रीणां हृदये मन्मथव्यथाम् ॥'
(V. कविरहस्य, Sl. 92.)

(2) या—(V. Sl. 27, C. I.) (3) भू—(V. Sl. 15, C. III.) (4) वच्—(V. I, 1.)

तेन—Here 'तेन' is singular, because the acts of the boy are taken separately. It refers to each of them, *viz.*, speaking, walking and bowing down. Or, it may be taken as a collective noun, and hence singular and neuter by the rule—"सामान्ये नपुंसकम्" (I, 40). Cf. "विपदि धैर्य्यमथाभ्युदये क्षमा सदसि वाक्पटुता युधि विक्रमः । यशसि चाभिरुचिर्व्यसनं श्रुतौ प्रकृतिसिद्धमिदं हि महात्मनाम् ॥" (नीतिशतकम्)

वचः उवाच—This is no tautology. When the speaker wishes to adduce an adjective, the use of a cognate noun is not a fault of composition. So says Sáhityadarpana. The boy lisped. What did he lisp? The word which he learnt from the nurse. So प्रथमोदित is a necessary epithet of वचस्। Kávyaprakás'a is stricter than Viswanátha. It says that if by a क्रियाविशेषण or adverb, the import of an adjective can be expressed, a cognate object should not be used. Here the import of प्रथमोदितं वचस् cannot be expressed adverbially. Hence, it is no fault of composition according to all the authorities.

तमङ्कमारोप्य शरीरयोगजैः
सुखैर्निषिञ्चन्तमिवामृतं त्वचि ।
उपान्तसम्मीलितलोचनो नृप-
श्चिरात् सुतस्पर्शरसज्ञतां ययौ ॥ २६ ॥

Prose order.—नृपः शरीरयोगजैः सुखैः त्वचि अमृतं निषिञ्चन्तम् इव

तम् अङ्कम् आरोप्य उपान्तसम्मीलितलोचनः (सन्) चिरात् सुतस्पर्शरसज्ञतां ययौ।
Mallinátha places 'नृपः' after 'उपान्तसम्मीलितलोचनः'।

Explanation by use of synonyms.—नृपः (राजा) शरीरयोगजैः (गात्रसंस्पर्शजातैः) सुखैः (परमानन्दैः) त्वचि (त्वगिन्द्रिये) अमृतं (पीयूषं) निषिञ्चन्तमिव (वर्षन्तमिव) तं (पुत्रम्) अङ्कं (उत्सङ्गम्) आरोप्य (स्थापयित्वा) उपान्तसम्मीलितलोचनः (मुद्रितनयनापाङ्गः सन्) चिरात् (बहुकालात् परं) सुतस्पर्शरसज्ञतां (पुत्रस्पर्शस्वादज्ञानं) ययौ (अनुबभूव)।

Substance.—बहुयत्नाद्बहुकालादनन्तरमयं सुतो बभूव। दुर्लभं पुत्ररत्नं राजा क्रोडे संस्थाप्य कमप्यानन्दं प्राप। हर्षाधिक्यं हि तस्य जडतामतनोत्। सोऽनुबभूव यत् सुतोऽयं सर्व्वाङ्गेषु मे अमृतं सिञ्चतिस्म। नयनं तस्य सदानन्देन सम्मीलितमासीत्। एवमानन्दविमूढः स चिरं सुतस्पर्शसुखमज्ञासीत्।

Change of voice.—नृपेण......उपान्तसम्मीलितलोचनेन....सुतस्पर्शरसज्ञता यये।

Sanjivani.—तमिति (शरीरयोगजैः सुखैः) (त्वचि) त्वगिन्द्रिये (अमृतं) (निषिञ्चन्तं) वर्षन्तम् (इव) (तं पुत्रम् (अङ्कम् आरोप्य) मुदाविर्भावात् उपान्तयोः, प्रान्तयोः सम्मीलितलोचनः सन् [उपान्तसम्मीलितलोचनः] (नृपः चिरात् सुतस्पर्शरसज्ञतां ययौ)। रसः, स्वादः॥ २६॥

Bengali.—রাজা শিশুকে অঙ্কদেশে স্থাপন করিয়া মুদিতলোচনে পুত্রগাত্রস্পর্শসুখ বহুক্ষণ পর্য্যন্ত অনুভব করিতে লাগিলেন। সেই সুখ যেন তদীয় শরীরে অমৃতবর্ষণ করিতে লাগিল। ২৬।

English rendering.—Placing on his lap the boy who seemed to drench his skin with nectar in consequence of the joy he gave through the touch of his body, the king, with eyes closed from corner to corner, attained to a lasting conversance with the taste (happiness) of filial touch. 26.

Grammatical notes, &c., &c.

Sama'sa.—(1) शरीरयोः (नृपस्य बालस्य च) योगः शरीरयोगः (षष्ठीतत्)

तस्मात् जायन्ते इति शरीरयोगजानि (उपपदतत्) तैः (2) नि (विशेषेण) सिक्तम् निषिक्तम् (प्रादिः) तम् (3) अमृतम्—(V. Sl. 16, C. III.) (4) अन्तम् उपगतौ उपान्तौ (प्रादिः) सम्यक् मीलिते सम्मीलिते (सुप्सुपा) सम्मीलिते लोचने यस्य स सम्मीलितलोचनः (बहु) उपान्तयोः सम्मीलितलोचनः (सप्तमीतत्) or, उपान्तयोः सम्मीलिते उपान्तसम्मीलिते (सप्तमीतत्) तादृशे लोचने यस्य स उपान्तसम्मीलितलोचनः (बहु) (5) सुतस्य स्पर्शः सुतस्पर्शः (षष्ठीतत्) तस्य रसः सुतस्पर्शरसः (षष्ठीतत्) जानातीति ज्ञः सुतस्पर्शरसस्य ज्ञः सुतस्पर्शरसज्ञः (षष्ठीतत्) तस्य भावः सुतस्पर्शरसज्ञता-ताम् ।

Case-ending.—(1) तम्—प्रयोज्यमुख्यकर्म। At the अणिजन्त stage of आरोहण it was कर्तृ and in the णिजन्त stage it becomes प्रयोज्यकर्म। (See II, 1). (2) सुखैः—करणे तृतीया (3) त्वचि—आधाराधिकरणे सप्तमी (4) चिरात्—अव्ययं, used in the 2nd or 5th case. It is a case of अत्यन्तसंयोगे द्वितीया or by the addition of 'परम्' (understood) it gets पञ्चमी । The sense is चिरं व्याप्य or चिरात् परम् ।

Synonyms.—(1) अङ्क—'कलङ्काङ्कौलाञ्छनं च चिह्नं लक्ष्म च लक्षणम्" (अ.)

Different meanings.—(1) "अङ्को रूपकभेदाङ्कचिह्नरेखाजिभूषणे। रूपकांशान्तिकोत्सङ्गस्थानेऽङ्कं पापदुःखयोः ॥" (मे.) रूपकभेद = An Act of a drama, आजि = battle. आगस् = sin. (2) रस—(V. Sl. 18, C. I.)

Derivation.—(1) आरोप्य—आ + (रुह् + णिच् =) रोपि + ल्यप्—the alternative form is आरोह्य—"रुहः पोऽन्यतरस्याम्" (७।३।४३ पा. २५९९ सि.) [The प् is optionally substituted for ह् of रुह् in its णिजन्त form] (2) निषिञ्चन्तम्—नि + सिच् + शतृ (2nd c. s.) (3) सुतस्पर्शरसज्ञताम्—सुतस्पर्शरस + ज्ञा + कः = सुतस्पर्शरसज्ञः तस्य भावः इत्यर्थे तल् (2nd c. s.)—"इगुपधज्ञाप्रीकिरः कः" (V. notes on कृश, I. 5-9.) (4) ययौ—या + लिट्-णल् ।

Conjugation.—(1) रुह् (to grow) रोहति (लट्) रोहतु (लोट्) अरोहत् (लङ्) रोहेत् (वि. लिङ्) रुरोह (लिट्) रोढ़ा (लुट्) रोक्ष्यति (लृट्)

असृपत् (लुङ्) असीहि (भावे-लुङ्) ससृपति (सन्-लट्) रीसृप्यते (यङ्-लट्) रीसृपति, सीपयति (णिच्-लट्) असृसृपत्, असूसृपत् (णिच्-लुङ्) सृप्तः (क्तः) (2) या—(V. Sl. 27, C. I.)

त्वच् is feminine and declined like वाच्।

Force of इव is उत्प्रेक्षा।

For. त्वचि अमृतम् निषिक्तम् we may have the form त्वचममृतेन निषिक्तम्। This difference in form depends upon the difference of the import of the verb सिच्। In the first form सेचन means विकिरण, in the second it means आर्द्रीकरण। See Sanjivani of Meghadutam, पूर्व्वमेघ, Sl. 27.

अमंस्त चानेन परार्द्ध्यजन्मना
स्थितेरभेत्ता स्थितिमन्तमन्वयम्।
स्वमूर्त्तिभेदेन गुणाग्र्यवर्त्तिना
पतिः प्रजानामिव सर्गमात्मनः॥ २७॥

Prose order.—(स्थितेः अभेत्ता) प्रजानां पतिः (ब्रह्मा) परार्द्ध्यजन्मना गुणाग्र्यवर्त्तिना स्वमूर्त्तिभेदेन (विष्णुना आत्मनः) सर्गमिव, स्थितेः अभेत्ता (प्रजानां पतिः स नृपः) परार्द्ध्यजन्मना गुणाग्र्यवर्त्तिना स्वमूर्त्तिभेदेन अनेन (पुत्रेण रघुणा) आत्मनः अन्वयं, स्थितिमन्तम् अमंस्त च।

Explanation by use of synonyms.—स्थितेः अभेत्ता (जगत्-परिपालननियमव्यवस्थापकः) प्रजानां पतिः (निखिलप्राणिस्रष्टा) ब्रह्मा—परार्द्ध्य-जन्मना (जगत्पालकत्वात् श्रेष्ठोत्पत्तिना) गुणाग्र्यवर्त्तिना (सत्त्वगुणावलम्बिना) स्वमूर्त्तिभेदेन (स्वरूपान्तरविशेषेण, विष्णुना इति यावत्) आत्मनः (स्वस्य) सर्गमिव (सृष्टिमिव), स्थितेः अभेत्ता (मर्य्यादापालकः शास्त्रानुसारेण कार्य्यकारी) प्रजानां पतिः (जनेश्वरः) स नृपः—परार्द्ध्यजन्मना (लोकपालांशजननत्वादिगुणैः श्रेष्ठोत्पत्तिना) गुणाग्र्यवर्त्तिना (विद्याविनयादिमुख्यगुणाधारेण) स्वमूर्त्तिभेदेन (स्वरूपान्तरविशेषेण) अनेन (पुत्रेण रघुणा) आत्मनः (स्वस्य) अन्वयं (वंशं), स्थितिमन्तं (प्रतिष्ठावन्तम्) अमंस्त च (मेने च)।

Substance.—गुणान्वितं वंशस्य कर्त्तारं तं पुत्रं प्राप्य दिलीपोऽमन्यत यत् वंशो मेऽधुना स्थितिशीलः जातः । एतावद्देवोपमयाह । यथा नियन्ता प्रजानां नाथो ब्रह्मा स्वस्य रूपभेदेन गुणैरीशा नाभिजातेन विष्णुना, स्वस्य सृष्टिं स्थास्यतीति मेने तथा शास्त्रपालकः प्रकृतीनां पतिः स राजा स्वस्य मूर्त्तिभेदेन सुजन्मना गुणान्वितेन पुत्रेण स्वीयवंशो न पतिष्यतीत्यमन्यत ।

Change of voice—...अभेत्ता...पत्या...सर्गः...अन्वयः स्थितिमान् अमानि... ।

Sanjivani.—अमस्तेति । (स्थितेः अभेत्ता) मर्य्यादापालकः, सः नृपः (पराईग्रजन्मना) अनेन) रघुणा (अन्वय) वंशं (प्रजानां पतिः) ब्रह्मा, गुणाः, सत्वादयः ; तेषु अर्ग्र्येण, मुख्येन ; सत्त्वेन वर्त्तते व्याप्रियते इति गुणाग्रवर्त्ती तेन [गुणाग्रावर्त्तिना] स्वस्य मूर्त्तिभेदेन [स्वमूर्त्तिभेदेन] अवतारविशेषेण विष्णुना (आत्मनः) (सर्गं) सृष्टिम् इव (स्थितिमन्तं) प्रतिष्ठावन्तम् (अमंस्त च) मन्यतेस्म च । मन्यतेः अनुदात्तत्वात् इट्प्रतिषेधः । अत उपमानोपमेययोः इतरेतरविशेषणानि इतरेतरत्र योज्यानि । तत्र रघुपक्षे गुणाः विद्याविनयादयः । "गुणोऽप्रधाने रूपादौ मौर्व्यां सूदे वृकोदरे । शुद्धे सत्त्वादि-सन्ध्यादि-विद्यादि-हरितादिषु ॥" इति विश्वः । शेषं सुगमम् ॥ २७ ॥

Sanjivani Explained.

अत उपमानोपमेययोः * * * योज्यानि—The adjectives of the उपमान are applicable to the उपमेय and those of the उपमेय to the उपमान ।

तत्र रघुपक्षे * * विद्याविनयादयः—गुण in the case of रघु means विद्या (learning), विनय (modesty) &c.

गुणोऽप्रधाने रूपादौ * * * हरितादिषु—गुण means अप्रधान (subsidiary), रूपादि (the five qualities रूप, रस, गन्ध, स्पर्श, शब्द), मौर्वी (bow-string), सूद (cook), वृकोदर (Bhima), शुद्ध (pure), सत्त्वादि (the three qualities सत्व, रजस् and तमस्), सन्ध्यादि (peace, &c.), विद्यादि (learning, &c.), हरितादि (the different colours such as yellow).

Bengali.—বিশ্বনিয়ন্তা নিখিলপ্রাণিস্রষ্টা ব্রহ্মা যেরূপ বিশ্বপালনহেতু শ্রেষ্ঠজন্মা সত্ত্বগুণাবলম্বী স্বকীয়মূর্ত্তিভেদ বিষ্ণু দ্বারা স্বকীয় সৃষ্টিকে প্রতিষ্ঠাশালিনী জ্ঞান করিয়াছিলেন, সেইরূপ, মর্য্যাদাপালক প্রজেশ্বর দিলীপ সুর্জন্মা, বিদ্যাবিনয়াদিগুণসম্পন্ন স্বরূপান্তর পুত্র রঘু দ্বারা আপনার বংশকে প্রতিষ্ঠাশালী জ্ঞান করিলেন। ২৭।

English rendering.—He, who never transgressed the bounds (set by law), regarded his dynasty perpetuated by this child of pre-eminent birth, like the lord of all creatures (regarding) his own creation (perpetuated) by (Vishnu) a form of his own self possessed of foremost attributes. 27.

Grammatical notes &c. &c.

Sama'sa.—(1) परस्मिन् अर्द्धे भवं परार्द्ध्यम् (तत्‌कृष्ट) परार्द्ध्यम् जन्म यस्य स परार्द्ध्यजन्मा (बहु) तेन (2) न भिन्ना अभिन्ना (नञ्‌तत्) (3) स्वस्य मूर्त्तिः स्वमूर्त्तिः (षष्ठीतत्) तस्याः भेदः स्वमूर्त्तिभेदः (षष्ठीतत्) तेन (4) गुणाग्र्यवर्त्तिना—(V. Sanjivani.) सप्तमीतत् and उपपदतत्। (5) प्रकर्षेण जायन्ते इति प्रजाः (उपपदतत्) तासाम्।

Case-ending.—(1) अनेन—रघुणा इत्यस्य विशेषणम्। रघुस्तु इतौ तृतीया उद्देश्योपमेयपदं 'स्वमूर्त्तिभेदेन' इति विधेयोपमानपदस्य। (2) स्थितेः—कृद्योगेऽनुक्ते कर्मणि, षष्ठी—"कर्त्तृकर्मणोः कृति" (V. notes on सागरं तितीर्षुः, Sl. 2, C. I.) (3) प्रजानाम्—कृद्योगेऽनुक्ते कर्मणि षष्ठी (4) गुणाग्र्यवर्त्तिना and परार्द्ध्यजन्मना—Adjectives of अनेन (रघुणा) as well as to स्वमूर्त्तिभेदेन (विष्णुना) (5) अभिन्ना (नृपः)—उद्देश्योपमेयकर्त्तृपदं 'प्रजानां पतिः' इति विधेयोपमानकर्त्तृपदस्य (6) सर्गम्—विधेयोपमानकर्मपदं—'अन्वयम्' इत्युद्देश्योपमेयकर्मपदस्य।

Synonyms.—(1) अन्वय—(V. Sl. 12, C. I.)

Different meanings.—(1) गुण—(V. Sanjivani.) (2) सर्ग—

'सर्गः स्वभाव[1]निर्मोक्ष[2]निश्चया[3]ध्याय[4]सृष्टिषु[5]।' (अ.)

Derivation.—(1) असंसृ—मन् + क्त (2) परार्ध्यम्—पर + अर्ध + यत् (अर्हार्थे) (3) अभेत्ता—भिद् + तृच् (कर्तरि, 1st c. s.) = भेत्ता। (न + भेत्ता) (4) अन्वयम्—अनु + इ (ण्) + अच् (2nd c. s.) (5) गुणाग्र्यवर्तिना—अग्र + यत् (भवार्थे) = अग्र्यम्। गुणाग्र्य + वृत् + णिनि: (3rd c. s.) (6) सर्गम्—सृज् + घञ् (भावे, 2nd c. s.)

Conjugation.—(1) मन्—(V. Sl. 2, C. I.)

The three main forms and actions of the Supreme Being.

'ब्रह्मत्वे सृजते लोकान् विष्णुत्वे पालयत्यपि।
रुद्रत्वे संहरत्येव तिस्रोऽवस्था: स्वयम्भुव: ॥'

The epithets गुणाग्र्यवर्तिना &c. are equally applicable to विष्णु and रघु। स्थितेरभेत्ता and प्रजानां पति: are applicable to Dilipa as well as to ब्रह्मा।

स वृत्तचूलश्चलकाकपक्षकै-
रमात्यपुत्रै: सवयोभिरन्वित: ।
लिपेर्यथावद्ग्रहणेन वाङ्मयं
नदीमुखेनेव समुद्रमाविशत् ॥ २८ ॥

मूलस्य पाठान्तरम्।

वृत्तचूल:—वृत्तचूड (चा.)।

Prose order.—वृत्तचूल: स: चलकाकपक्षकै: सवयोभि: अमात्यपुत्रै: अन्वित: (सन्) लिपे: यथावद् ग्रहणेन वाङ्मयं (समुद्रं), नदीमुखेन समुद्रम् इव, आविशत्।

Explanation by use of synonyms.—वृत्तचूल: (सम्पन्नचूडाकर्मा) स: (रघु:) चलकाकपक्षकै: (चञ्चलशिखण्डकै:) सवयोभि: (स्निग्धै:, समानवयस्कैरित्यर्थ:) अमात्यपुत्रै: (मन्त्रिसुतै:) अन्वित: (मिलित: सन्) लिपे: (पञ्चा-

शब्दवर्णमालायाः) यथावत् ग्रहणेन (सम्यगवबोधेन) वाङ्मयं (शब्दमयं समुद्रं शब्दजातमिति यावत्) नदीमुखेन (नदीद्वारेण) समुद्रमिव (सागरमिव) आविशत् (प्रविवेश)।

Substance.—क्रमात् तस्य चूड़ाकर्मणि संवृत्ते विद्यारम्भः समजनि। तस्य सवयसाममात्यपुत्राणामपि चूड़ाकर्म संघटितम्। चञ्चलशिखास्ते च रघुणा सार्द्धं वर्णज्ञानमधिगन्तुमारेभिरे। वर्णमालामल्पेन कालेनाधिगम्य रघुः समानवयस्कैः सह शब्दशास्त्रशिक्षणपरो बभूव। एतदेवोपमया कविराह। यथा मकरादिजलजन्तुः नदीमुखमाश्रित्य अनन्तं महासमुद्रं प्रविशति तथा निष्पन्नचूड़ाकार्य्यः रघुरपि चञ्चलशिखण्डकैः समानवयस्कैरमात्यपुत्रैः सह मिलित्वा पश्चाच्छब्दवर्णान् सम्यगधिकृत्य महासमुद्रवदनन्तं शब्दशास्त्रं प्रविवेश।

Change of voice.—वृत्तचूलेन तेन...अन्वितेन...समुद्रः...आविश्यत।

Sanjivani—स इति। "चूड़ा कार्य्या द्विजातीनां सर्वेषामेव धर्मतः।
प्रथमेऽब्दे तृतीये वा कर्त्तव्या श्रुतिचोदनात्।"

इति मनुस्मरणात् तृतीये वर्षे वृत्तचूड़ाकर्मा सन् [वृत्तचूलः]—डलयोरभेदः—(सः) रघुः—"प्राप्ते तु पञ्चमे वर्षे विद्यारम्भञ्च कारयेत्" इति वचनात् पञ्चमे वर्षे—(चलकाकपक्षकैः) चञ्चलशिखण्डकैः—"बालानां तु शिखा प्रोक्ता काकपक्षः शिखण्डकः" इति हलायुधः—(सवयोभिः) स्निग्धैः—"स्निग्धोवयस्यः सवयाः" इत्यमरः (Cole. p. 193)—(अमात्यपुत्रैः अन्वितः) सन् (लिपेः) पञ्चाशद्वर्णात्मिकायाः मातृकायाः (यथावद्ग्रहणेन) सम्यक् बोधेन, उपायभूतेन, (वाङ्मयं) शब्दजातं; नद्याः मुखं, द्वारं—"मुखं तु वदने मुख्यारम्भे द्वाराभ्युपाययोः" इति यादवः—तेन [नदीमुखेन]—कश्चित् मकरादिः—समुद्रम् इव, (आविशत्) प्रविष्टः, ज्ञातवान् इत्यर्थः ॥ २८॥

Sanjivani Explained.

चूड़ा कार्य्या * * श्रुतिचोदनात्—The tonsure ceremony of the twice-born castes should be done duly on the first or the third year in obedience to the S'ruti.

इति मनुस्मरणात् तृतीये वर्षे वृत्तचूड़ाकर्म—In consequence of the

above text of Manu, the tonsure of Dilipa's son was done in his third year.

डलयोरभेद:—ड and ल do not differ.

प्राप्ते तु पञ्चमे * * कारयेत्—The son should be initiated in learning in the fifth year.

"बालानां * * शिखण्डक:"—The lock of hair on the crown of a boy's head is called काकपक्ष or शिखण्डक ।

"स्निग्धो वयस्य: सवया:"—स्निग्ध, वयस्य and सवयस् are synonymous, and mean friend.

मुखं तु वदने * * द्वाराभ्युपाययो:"—मुख means वदन (face), मुख्य (principal), आरम्भ (beginning), द्वार (door) as well as अभ्युपाय (means.)

पञ्चाशद्वर्णात्मिकाया: मातृकाया::—The alphabet consisting of fifty letters.

Bengali.—মকরাদি জলজন্তুগণ নদীমুখ দ্বারা যেমন সমুদ্রমধ্যে প্রবেশ করে সেইরূপ নিষ্পন্ন চূড়াকার্য্য সেই (রঘু) চঞ্চলশিখণ্ডক সমান-বয়স্ক অমাত্যপুত্রগণের সহিত মিলিত হইয়া যথাবিধি পঞ্চাশদ্বর্ণমালা শিক্ষানন্তর, (অনন্ত) শব্দশাস্ত্রে প্রবেশ করিলেন। ২৮।

English rendering.—Accompanied by children of equal age and endued with flowing locks, the prince, after having undergone the rite of tonsure, entered the ocean of words by a thorough knowledge of the alphabet like one entering the ocean by the mouth of a river. 28.

Grammatical notes, &c., &c.

Sama'sa.—(1) ढला चूड़ा यस्य स ढलचूल: (बहु)। Here ड is changed into ल । In Sanskrit literature we always find such an interchange of ड and ल, ब and व, ल and र। साहित्य-दर्पण says—"यमकादौ भवेदैक्यं डलोर्बवोर्लरोस्तथा।" Here for the sake of छेकानुप्रास, 'चूड़' is changed into चूल and we get the alliteration 'चूलचल'। चूला is shortened into चूल by the

rule :—"गोस्त्रियोरुपसर्जनस्य" (१।२।४८ पा. ६५६ सि.) V. notes on अलमंदारस्य II, 7. (2) काकस्य पक्षः काकपक्षः (षष्ठीतत्) स इव प्रतिकृतिः इति काकपक्षकः—"इवे प्रतिकृतौ" (५।३।९६ पा. २०५१ सि.) V. notes on तुरगक in I, 70. चलाः काकपक्षकाः येषां ते चलकाकपक्षकाः (बहु) तैः (3) अमात्यानां पुत्राः अमात्यपुत्राः (षष्ठीतत्) तैः (4) समानं वयो येषां ते सवयसः (बहु) तैः। समान is changed into स by the rule.—"ज्योतिर्जनपदरात्रिनाभिनामगोत्ररूपस्थानवर्णवयोवचनबन्धुषु" (६।३।८५ पा. १०१६ सि.) [स is substituted for समान when it is followed by and compounded with ज्योतिस्, जनपद, रात्रि, नाभि, नामन्, गोत्र, रूप, स्थान, वर्ण, वयस्, वचन, or बन्धु] (4) समीचीना उद्राः (जलचरविशेषाः) यस्मिन् इति समुद्रः (बहु) or, सह मुद्रया (मर्यादया) वर्त्तते इति समुद्रः (तुल्ययोग बहु) तम् (5) नद्याः मुखं नदीमुखम् (षष्ठीतत्) तेन।

Case-ending.—(1) अमात्यपुत्रैः—अनुक्ते कर्त्तरि तृतीया 'अन्वितः' इत्यस्य (2) लिपेः—कृद्योगेऽनुक्ते कर्मणि षष्ठी (3) यथावत्—अव्ययं, क्रियाविशेषणम् (4) नदीमुखेन—करणे तृतीया—विधेयोपमानपदं—'ग्रहणेन' इत्युद्देश्योपमेयपदस्य (6) वाङ्मयम्—उद्देश्योपमेयकर्मपदम्—'समुद्रम्' इति विधेयोपमानकर्मपदस्य।

Synonyms.—(1) समुद्र—(V. Sl. 5-9, C. I.)

Derivation.—(1) अमात्यः—अमा (अव्यय) + त्यप् (2) पुत्रैः—(V. I, 91.) (3) अन्वितः—अनु + इ(ण्) + क्तः (कर्मणि) (5) लिपेः—लिप् + इक् (6th c. s.)—'इक् कृष्यादिभ्यः' (३।३।१०८ पा. वा. ३२८५ सि. वा.) [इक् is affixed to the roots कृष् &c.] or thus :—लिप् + इन्—'इगुपधात् कित्' (उ. ४।१२०) The alternative form is लिबिः—'लिपिलिबि—' (See ३।२।२१ पा. २९३५ सि.) इति लिङ्गात् पस्य बो वा। Pánini himself uses two forms लिपि, and लिबि in the above Sutra. So he suggests that प of लिपि should be optionally changed into ब। (5) यथावत्—

यथा + वति (अर्हार्थे) (6) वाङ्मयम्—वाच् + मयट् (अवयवार्थे, and c. s.) वाङ्मय is really adjective. Here it is used as a noun and means all the branches of शब्दशास्त्र। Its formation is guided by the Várttika 'एकाचो नित्यम्' (४।३।१४४ पा. वा. १५२४ सि.) [मयट् should always be added to a word having one vowel in order to signify the sense of विकार (transformation) as well as of अवयव (limbs.)] In secular language the form is वाङ्मय and never वाग्मय। See 'प्रत्यये भाषायां नित्यम्' (८।४।४५ पा. वा. ११६ सि.) (7) आविशत्—आ + विश् + लङ्-दिप्।

Conjugation.—(1) विश् (to enter) विशति (लट्) विशतु (लोट्) अविशत् (लङ्) विशेत् (वि. लिङ्) विवेश (लिट्) अविक्षत् (लुङ्) वेष्टा (लुट्) वेक्ष्यति (लृट्) अवेशि (कर्मणि-लुङ्) विविक्षति (सन्-लट्) वेविश्यते (यङ्-लट्) वेशयति (णिच्-लट्) अवीविशत् (णिच्-लुङ्) विष्टः (क्त:)। नि + विश् adopts आत्मनेपदीय form as निविशते। The Sutra is "नेर्विशः" (१।३।१७ पा. २६८३ सि.)

Remark.—One of the Calcutta editors says गह्वरेण is हेतौ तृतीया। It is incorrect. As नदीमुखेन is करणे तृतीया, its विशेषपद, गह्वरेण, must be so. (The difference between करण and हेतु, V. notes on प्रीत्या Sl. 57, C. I.)

अथोपनीतं विधिवद्विपश्चितो
विनिन्युरेनं गुरवो गुरुप्रियम् ।
अवन्ध्ययत्नाश्च बभूवुरत्र ते
क्रिया हि वस्तूपहिता प्रसीदति ॥ २८ ॥

मूलस्य पाठान्तरम् ।

अत्र ते—अर्थे (वा.)

Prose-order.—अथ विपश्चितः गुरवः विधिवत् उपनीतं गुरुप्रियम् एनं

विनिन्युः, ते च अत्र अवन्ध्ययत्नाः बभूवुः, हि क्रिया वस्तूपहिता प्रसीदति।
Mallinátha places 'विपश्चितः गुरवः' after 'एनम्' and 'च' after 'अवन्ध्ययत्नाः'।

Explanation by use of synonyms.—अथ (अनन्तरं) विपश्चितः (विद्वांसः) गुरवः (आचार्य्याः) विधिवत् (यथाविधि) उपनीतं (विहितोपनयनसंस्कारं) गुरुप्रियम् (आचार्य्यानुरक्तम्) एनं (रघुं) विनिन्युः (शिक्षितवन्तः)। ते (गुरवः) च (निश्चितम्) अत्र (अस्मिन् रघौ: शिक्षाविषये) अवन्ध्ययत्नाः (सफलचेष्टाः, क्रतकार्य्या इत्यर्थः) बभूवुः (आसन्) हि (यतः) क्रिया (शिक्षा) वस्तूपहिता (सुपात्रे प्रयुक्ता) प्रसीदति (फलति)।

Substance.—अनन्तरं गर्भैकादशे वर्षे यथाशास्त्रं रघोरुपनयनकार्य्यं सम्पन्नम्। ततो विद्वांस आचार्य्या गुरुवत्सलमेनं वेदादिशास्त्रमध्यापितवन्तः। तेषां यत्नो रघुरूपाधारे सफलो बभूव। नूनं यत्नः सत्पात्रे क्रतः साधु फलं प्रसूते। रघुर्मेधावी तत्कथं शिक्षा तस्मिन् विफला स्यात्? अचिरमेव स सर्व्वाणि शास्त्राण्यधिगत्य गुरूणां प्रीतिं ततान।

Change of voice.—...विपश्चिद्भिः गुरुभिः...उपनीतः गुरुप्रियः एषः विनिन्ये, तैः...अवन्ध्ययत्नैः बभूवे...क्रियया वस्तूपहितया प्रसद्यते।

Sanjivani.—अथेति। "गर्भाष्टमेऽब्दे कुर्वीत ब्राह्मणस्योपनायनम्। गर्भादेकादशे राज्ञो गर्भात्तु द्वादशे विशः॥ (मनुसंहिता २य अ० ३६ श्लो.) इति मनुस्मरणात्—(अथ) गर्भैकादशे अब्दे (विधिवत् उपनीतं गुरुप्रियम्) (एनं) रघुं (विपश्चितः) विद्वांसः (गुरवः) (विनिन्युः) शिक्षितवन्तः। (ते) गुरवः (अत्र) अस्मिन् रघौ (अवन्ध्ययत्नाश्च बभूवुः)। तथा (हि) (क्रिया) शिक्षा—"क्रिया तु निष्कृतौ शिक्षा चिकित्सोपायकर्मसु" इति यादवः—वस्तुनि पात्रभूते उपहिता प्रयुक्ता [वस्तूपहिता] (प्रसीदति) फलति। "क्रिया हि द्रव्यं विनयति नाऽद्रव्यम्" इति कौटिल्यः॥ २९॥

Sanjivani Explained.

गर्भाष्टमेऽब्दे * * * द्वादशे विशः—The उपनयन of a ब्राह्मण should be held on the eighth year enumerated from the days of

conception, that of a Kshatriya on the 11th year and that of a Vais'ya on the twelfth thus counted.

"क्रिया तु निष्कृतौ * * "—क्रिया means निष्कृति (performance), शिक्षा (education), चिकित्सा (treatment), उपाय (means), as well as कर्म्म (act).

क्रिया हि * * माद्रव्यम्—Education makes a really qualified object humble, and has no effect upon an unqualified person.

Bengali.—অনন্তর বিজ্ঞ আচার্য্যগণ যথাবিধি উপনীত গুরুপ্রিয় রঘুকে (বেদাদিশাস্ত্র) শিক্ষাদিতে লাগিলেন। তাঁহারা রঘু বিষয়ে সফল-প্রয়াস হইলেন—যেহেতু শিক্ষা সৎপাত্রে নিহিতা হইলেই ফলবতী হইয়া থাকে। ২৯।

English rendering.—Him duly invested with sacred thread, and dearly loved by them, learned tutors began to instruct. And in this matter theirs were not fruitless efforts : since action succeeds when addressed to a proper object. 29.

Grammatical notes, &c., &c.

Sama'sa.—(1) विप्रकृष्टं (दूरेस्थं, अप्रत्यक्षविषयं) चिन्वन्ति, चिन्वन्ति, चिन्तयन्ति वा (शास्त्रज्ञानेन लभन्ते) इति विपश्चितः (उपपदतत्) [V. R. T. of Amarkos'a, N. S. P. Ed. p. 288.] or, विप्रकृष्टं चेतन्ति (प्रत्यक्षवत् जानन्ति) इति विपश्चितः (इति वाचस्पत्ये) or, प्रकर्षेण चिन्वन्ति विद्यामिति प्रचितः, विशिष्टाः प्रचिताः विपश्चितः (प्रादिः) सर्व्वत्रैव 'पृषोदरादित्वात् साधुः।' The र् of प्र drops and सुट् comes before the root चि। Then by "ह्रस्वस्य पिति कृति तुक्", त् comes after the root चि। (2) प्रियाः गुरवः यस्य स प्रियगुरुः or गुरुप्रियः (बहु) तम्—"वा प्रियस्य" (२।२।३५ पा. वा. ८९८ सि. वा.) [The component प्रिय of a बहुव्रीहि compound optionally comes last.] or प्रीणाति इति प्रियः, गुरूणां प्रियः गुरुप्रियः (षष्ठीतत्) (3) न वन्ध्याः अवन्ध्याः (नञ्तत्) अवन्ध्याः यत्नाः येषां ते अवन्ध्ययत्नाः (बहु) (4) वस्तुनि उपहिता वस्तूपहिता (सप्तमीतत्) (5) उप (समीपे) नीतः (प्रापितः) उपनीतः (सप्तमीतत्) तम्।

Case-ending.—(1) विधिवत्—क्रियाविशेषणम् (2) अत्र—अव्ययं, विषयाधिकरणे or आधाराधिकरणे सप्तमी।

Synonyms.—विपश्चित्—(V. मनीषिन्, I. 11.)

Different meanings.—(1) क्रिया (V. Sanjivani.) (2) विधि—
"विधिर्विधाने नियतौ काले विधाने परमेष्ठिनि।" (मे.) (3) गुरु—(V. I, 64).

Derivation.—(1) क्रिया—कृ + श + टाप् (2) उपहिता—उप + धा + क्त (कर्मणि) + टाप् (3) प्रसीदति—प्र + सद् + लट्—तिप् (4) अत्र—एतद् + त्रल् (5) उपनीतम्—उप + नी + क्त (कर्मणि, 2nd c. s.) (6) विधिवत्—विधि + वति (अर्हार्थे) (7) विपश्चितः—विप्रकृष्ट + चित् or चि or चिन्त् + क्विप् (कर्त्तरि, 1st c. p.)—V. Samása. (8) विनिन्युः—वि + नी + लिट्—उस्। For places where the root नी adopts आत्मनेपदीय form See I, 17. (9) अवन्ध्यः—(V. Sl. 70, C. I.)

Conjugation.—(1) सद्—(V. I. 52). (2) नी—(V. Sl. 95, C. I.).

Parallel passages of the fourth foot of the verse.—

(1) "माऽद्रव्ये निहिता काचित् क्रिया फलवती भवेत्।
न व्यापारशतेनापि शुकवत् पाठ्यते बकः॥" (हितोपदेशः)

(2) "दीयते वालिशस्यापि सत्क्षेत्रपतिता कृषिः।
न शालेः स्तम्बकरिता वप्तुर्गुणमपेक्षते॥" (मुद्राराक्षसम् १म अङ्क)

(3) "प्रभवति शुचिर्बिम्बोद्ग्राहे मणिर्न मृदां चयः।"
(उत्तरामचरिते, २य अङ्क, विष्कम्भक)

Force of च is निश्चय। 'चः पादपूरणे पक्षान्तरे हेतौ विनिश्चये'
(त्रिकाण्डशेषः)

Rhetoric.—The figure of speech is अर्थान्तरन्यास। The special fact that Raghu of keen intelligence could learn quickly is supported by the general fact that instruction proves very

efficacious on an intelligent boy. (See II, 4). This figure is an impossiblity unless हि means हेतु। Mallinātha is right in taking हि to mean हेतु। A Calcutta editor takes the word to mean अवधारण here. Not only will the beauty of the verse be lost, but the fourth foot will, remain unconnected if we take the sense of अवधारण।

धियः समग्रैः स गुणैरुदारधीः
क्रमाच्चतस्रश्चतुरर्णवोपमाः।
ततार विद्याः पवनातिपातिभि-
र्दिशो हरिद्भिर्हरितामिवेश्वरः ॥ ३० ॥

मूलस्य पाठान्तरम्।

पवनातिपातिभिः—पवनातिपातिभिः Ms. 1.

Prose order.—उदारधीः सः समग्रैः धियः गुणैः चतुरर्णवोपमाः चतस्रः विद्याः, हरिताम् ईश्वरः पवनातिपातिभिः हरिद्भिः (चतस्रः) दिशः इव, क्रमात् ततार।

Explanation by use of synonyms.—उदारधीः (उत्कृष्टबुद्धिः) सः (रघुः) समग्रैः (निखिलैः) धियः (बुद्धेः) गुणैः (उत्कर्षैः) चतुरर्णवोपमाः (समुद्रचतुष्टयतुल्याः) चतस्रः (चतुःसंख्यकाः) विद्याः (शास्त्रज्ञानानि) हरितां (दिशाम्) ईश्वरः (प्रभुः सूर्य्य इति यावत्) पवनातिपातिभिः (पवनाधिकवेगगामिभिः) हरिद्भिः (अश्वैः) चतस्रः, दिशः (आशाः) इव (यथा), क्रमात् (क्रमेण) ततार (अतिचक्राम)।

Substance.—तस्य बाल्ये ऽपि वयसि शुश्रूषादिका धियो गुणाः आसन्। तैश्च स मेधावी चतुःसमुद्रसदृशाश्चतुर्विधा विद्याः क्रमादधिजगाम। एतदेवोपमया प्रकटयति। खेचरेन्द्रः सूर्य्यो यथा पवनादपि शीघ्रगैः हयैः चतस्रो दिशः दिवसैरेकैकमाक्रमति तथा स रघुः चतस्रो विद्याः शुश्रूषादिभिर्गुणैरतीयाय।

Change of voice.—उदारधिया तेन...ईश्वरेण...तेरिरे।

Sanjivani.—धिय इति। अत्र कामन्दकः—"शुश्रूषा श्रवणं चैव ग्रहणं धारणं तथा। ऊहोऽपोहार्थविज्ञानं तत्त्वज्ञानं च धीगुणाः॥" (V. नीतिसारे) इति "आन्वीक्षिकी त्रयी वार्त्ता दण्डनीतिश्च शाश्वती। एता विद्याश्चतस्रस्तु लोकसंस्थितिहेतवः॥" (V. नीतिसारे) इति च। (उदारधीः) उत्कृष्टबुद्धिः (सः) रघुः (समग्रैः धियः गुणैः)—चत्वारः अर्णवाः उपमा यासां ताः [चतुरर्णवोपमाः]—"तद्धितार्थोत्तरपदसमाहारे च" (२।१।५१ पा. ७२८ सि.) इति उत्तरपदसमासः—(चतस्रः विद्याः) (हरितां) दिशाम् (ईश्वरः) सूर्यः (पवनातिपातिभिः) (हरिद्भिः) निजाश्वैः—"हरित्, ककुभि वर्णे च तृणवाजिविशेषयोः" इति विश्वः—चतस्रः (दिशः इव क्रमात् ततार)। चतुरर्णवोपमत्वं दिशामपि द्रष्टव्यम्॥ ३०॥

Sanjivani Explained.

शुश्रूषा श्रवणञ्चैव * * * धीगुणाः—The attributes of intelligence are (1) Desire to listen to the teachings, (2) Hearing the teachings (3) Receiving the instructions, (4) Retaining them, (5) (Acquisition of) knowledge by doubts and their removal by reasoning faculty and (6) the knowledge of the true One (the Supreme Brahman).

हरित् * * * तृणवाजिविशेषयोः—हरित् means direction, colour, grass and the horses of the sun.

चतुरर्णवोपमत्व * * * द्रष्टव्यम्—The adjective चतुरर्णवोपम should be attributed to दिश् as well.

आन्वीक्षिकी * * * लोकसंस्थितिहेतवः—The four branches of learning are (1) आन्वीक्षिकी (logic), (2) त्रयी (the three Vedas, *viz.*, Rich, Sáman and Yajus), (3) वार्त्ता (trade, business), (4) दण्डनीति (the principle of administration). They are the sources of the protection of civil order.

"तद्धितार्थोत्तरपदसमाहारे च"—A word expressive of दिश् or संख्या shall form a तत्पुरुष compound with another if the sense of तद्धित be the subject (विषय) of the compound, or if a third word follows it or if समाहार (collection) be meant. E.g. पूर्वस्यां शालायां भवः पौर्वशालः। The word पूर्व, expressive of direction, is com-

pounded with शाला because it conveys the import of तद्धित affix. पौर्वशाल does not mean 'the eastern hall' but rather means 'something growing there'. पूर्व्वा शाला प्रिया यस्य स पूर्व्वशालाप्रिय। पूर्व्व and शाला have formed a तत्पुरुष compound because a third word प्रिय follows. (Consult सिद्धान्तकौमुदी)। In the present case, *i.e.*, चतुरर्णवोपमा, चतुर् and अर्णव form a द्विगु which is a kind of तत्पुरुष compound because a third word उपमा follows it. The whole is an instance of त्रिपद बहुव्रीहि।

Bengali.—দিগীশ্বর (সূর্য্যদেব) যেরূপ পবন অপেক্ষায় বেগসম্পন্ন নিজাশ্বসমূহের দ্বারা দিক্‌চতুষ্টয় অতিক্রম করেন, তদ্রূপ উদারবুদ্ধি সেই রঘু বুদ্ধির সমগ্রোৎকর্ষপ্রভাবে অর্ণবচতুষ্টয়সদৃশ বিদ্যাচতুষ্টয় যথাক্রমে অতিক্রম করিলেন।৩০।

English rendering.—That prince of liberal intellect, aided by all the faculties of intellect, crossed, one after another, the four sciences resembling four oceans, like the lords of the points of the compass (the sun) crossing the quarters with steeds surpassing the wind in speed. 30.

Grammatical notes, &c., &c.

Sama'sa.—(1) समग्रैः—(V. Sl. 22. and 2, C. III). (2) उत् (उत्क्रष्टम्) आ (समन्तात्) राति (अधिगच्छति) इति उदारा। उदारा धीः यस्य उदारधीः (बहु) (3) चतुरर्णवोपमाः—(V. Sanjivani) (4) पवनातिपातिभिः—पवनम् अतिक्रम्य पतन्ति इति पवनातिपातिनः (उपपदसमासः) तैः।

Case-ending.—(1) धियः—शेषे षष्ठी 'गुणैः' इत्यनेन सम्बन्धः (2) गुणैः and हरिद्भिः—करणे तृतीया (3) हरिताम्—शेषे षष्ठी 'ईश्वरः' इत्यनेन सम्बन्धः (4) क्रमात्—ल्यब्लोपे पञ्चमी—क्रमं प्राप्य इत्यर्थः—'ल्यब्लोपे कर्मण्यधिकरणे च' (१।४।३१ पा. वा. ५९४ सि.) (See अभ्यंतः in H, 4) (5) विद्याः—उद्देश्योपमेयकर्मपदं—'दिशः' इति विधेयोपमानकर्मपदस्य (6) हरिद्भिः—विधेयोपमानपदं—'गुणैः' इत्युद्देश्योपमेयपदस्य (7) ईश्वरः—विधेयोपमानकर्तृपदं—'सः' इत्युद्देश्योपमेयकर्तृपदस्य।

Synonyms.—(1) अर्णव—(V. Sl. 5-9, C. I.) (2) दिश्—(V. III, 14.) (3) धी—'बुद्धिर्मनीषा धिषणा धीः प्रज्ञा शेमुषी मतिः । प्रेक्षोपलब्धिश्चित् संवित्प्रतिपज्ज्ञप्तिचेतनाः ॥' (अ.)

Different meanings.—(1) गुण—(V. Sl. 27, C. III.) (2) हरित्—'हरिद्दिशि स्त्रियां पुंसि हयवर्णविशेषयोः । अस्त्रियां स्यात् तृणे च' (मे). (3) ईश्वर—(V. I, 1.)

Derivation.—(1) धिय. ध्यै+क्विप् (करणे, 6th c. s.) 'ध्यायतेः संप्रसारणञ्च' (३।२।१७८ पा. वा. ३१५८ सि. का.) [And संप्रसारण takes effect of the root ध्यै when क्विप् is added to it. In other words, इ is substituted for य् । सम्प्रसारण means the substitution of इ, उ, ऋ or ऌ for य, व, र or ल ।] "हलः" (६।४।२ पा. ४५५८ सि.) इति दीर्घः [When a संप्रसारण takes effect after a हल् which is the अङ्ग (limb) of a root, the last vowel of the root as transformed by संप्रसारण is lengthened. So the इ of ध्यै becomes ई] (2) ततार—तॄ+लिट्—णल् (3) विद्याः—विद्+क्यप्+टाप् (2nd c. p.) (4) पवनातिपातिभिः—पवन+अति+पत्+णिनिः (3rd c. p.) (5) ईश्वर.—(V. Sl. 1, C. I.) (6) हरिद्भिः—हृ+इतिः (औणादिकः 3rd c. p.) हरन्ति नयन्ति देशान्तरमिति हरितः (घोटकाः) इति भानुजिः ।

Conjugation.—(1) तॄ—(V. Sl. 2, C. I).

Rhetoric.—The figure of speech is उपमा । There are two sets of simile. The four branches of learning are compared to four oceans. Raghu mastering these branches with the help of his keen intelligence is compared to the sun travelling the four quarters with the help of his swift horses. His intellect is compared to the horses; and learning to the directions or the points of the compass.

हरितामीश्वर suggests that Raghu would as well be the one master of the ten points of compass.

त्वचं स मेध्यां परिधाय रौरवी-
मशिक्षतास्त्रं पितुरेव मन्त्रवत् ।
न केवलं तद्गुरुरेकपार्थिवः
क्षितावभूदेकधनुर्धरोऽपि सः ॥ ३१ ॥

मूलस्य पाठान्तरम् ।

मन्त्रवत्—मन्त्रविन् Nand. foot-notes.

Prose order.—सः मेध्यां रौरवीं त्वचं परिधाय मन्त्रवत् अस्त्रं पितुः एव अशिक्षत । तद्गुरुः एकपार्थिवः केवलं न, (किन्तु) क्षितौ सः एकधनुर्धरः अपि अभूत् ।

Explanation by use of Synonyms.—सः (रघुः) मेध्यां (शुद्धां) रौरवीं (महाकृष्णसारसम्बन्धिनीं) त्वचं (चर्म) परिधाय (वसित्वा) मन्त्रवत् (समन्त्रकम्) अस्त्रम् (आग्नेयादिकमायुधं) पितुरेव (स्वजनकादेव) अशिक्षत (अभ्यस्तवान्) । तद्गुरुः (तस्य पिता) एकपार्थिवः (अद्वितीयपृथ्वीश्वरः) केवलं (मात्रं) न (नाभूत्)—किन्तु—क्षितौ (भूतले) सः (रघुजनकः) एकधनुर्धरः (अद्वितीयधानुष्कः) अपि (पक्षान्तरे) अभूत् (आसीत्) ।

Substance.—अथ स धनुर्वेदमशिक्षत । अत्र तस्य पितैव गुरुरासीत् । क्षितिमण्डले स न केवलम् अद्वितीयो नृपतिर्बभूव । धनुर्धरोऽपि तत्सदृशः कोऽपि भुवि न समजनि । अतस्तस्मादेव रघुः पवित्रं महाकृष्णसारचर्म परिधाय पूतभावेन समन्त्रकमाग्नेयाद्यस्त्रजातं यथाविधि जग्राह ।

Change of voice.—तेन...अशिक्ष्यत, तद्गुरुणा एकपार्थिवेन...तेन एकधनुर्धरेण...अभावि ।

Sanjivani.—त्वचमिति । (सः) रघुः—"कार्ष्णरौरववास्तानि चर्माणि ब्रह्मचारिणः । वसीरन्नानुपूर्व्येण शाणक्षौमाविकानि च ॥" (मनुसंहितायाम् २य अध्याये ४१ श्लोकः) इति मनुस्मरणात्—(मेध्यां) शुद्धां (रौरवीं) रुरुसम्बन्धिनीम्—"रुरुर्महाकृष्णसारः" इति यादवः—(त्वचं) चर्म (परिधाय) वसित्वा

(मन्त्रवत्) समन्त्रकम् (अस्त्रम्) आर्षं वाहिकं (पितुः एव) उपाध्यायात् (अशिक्षत) अत्र—"आख्यातोपयोगे" (१।४।२९। पा. ५८९ सि.) इत्यपादानसंज्ञा—पितुरेव इत्यवधारणम् उपपादयति—नेति—(तद्गुरुः) एकः अद्वितीयः पार्थिवः [एकपार्थिवः] (केवलं) पृथिवीश्वर एव (न) अभूत्—किन्तु (क्षितौ सः) एकः धनुर्धरः [एकधनुर्धरः] (अपि अभूत्) ॥ ३१ ॥

Sanjivani Explained.

"कार्ष्णरौरववास्तानि ॥ ॥ ॥ च"—A ब्रह्मचारिन् (one newly invested with the sacred thread) of the Bráhmana, the Kshatriya, or the Vais'ya caste should wear the hide of an antelope, cloths of flax, or a sheep skin.

रुरुमहाकृष्णसारः—रुरु and महाकृष्णसार are synonymous.

पितुरेवेत्यवधारणमुपपादयति—The force of एव is अवधारण। He learnt from his father alone and from none else.

"आख्यातोपयोगे"—The speaker should be called सम्प्रदान to signify 'the due acceptance of learning from a preceptor'. The preceptor gives instructions, the pupil accepts them. So the preceptor receives the appellation of सम्प्रदान।

Bengali.—সেই (রঘু) পবিত্র মহাকৃষ্ণসার মৃগচর্ম্ম পরিধান করিয়া সমন্ত্রক অস্ত্র সকল পিতারই, নিকট হইতে শিক্ষা ,করিলেন। তাঁহার পিতা কেবল অদ্বিতীয় নৃপতি ছিলেন (এরূপ নহে, কিন্তু) তিনি ক্ষিতি-মণ্ডলে অদ্বিতীয় ধনুর্ধরও ছিলেন। ৩১।

English rendering.—Wearing the holy skin of a Ruru deer, he learnt from only his sire all the weapons along with their respective *mantras* : (For) his father was not only the one ruler of earth but also had become the one bow-man in the world. 31.

Grammatical notes, &c. &c.

Sama'sa.—(1) तस्य गुरुः तद्गुरुः (षष्ठीतत्) (2) एकः (अद्वितीयः) पार्थिवः एकपार्थिवः (कर्मधा) "पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेन"

(*V.* notes on एकपुरीम्, Sl. 30, C. I.) (3) धरतीति धरः, धनुषः धरः धनुर्धरः (षष्ठीतत्) एकः (अद्वितीयः) धनुर्धरः एकधनुर्धरः (कर्मधा)। If धनुर्धरति be the विग्रहवाक्य, the form should be धनुर्धारः। "कर्मण्यण्" would then be applicable. [When the उपपद is an accusative, the root admits अण् in कर्तृवाच्य]। But here अच् is added to the root धृ। The कर्म in धनुः is, therefore, changed into सम्बन्ध षष्ठी, and hence the समासवाक्य is धनुर्धर.।

Case-ending.—(1) पितुः—'आख्यातोपयोगे' इति सूत्रादपादाने पञ्चमी (2) केवलम्—क्रियाविशेषणम् (3) क्षितौ—आधाराधिकरणे सप्तमी।

Synonyms.—(1) क्षिति—(V. I, 56.

Different meanings.—(1 क्षिति—'क्षितिर्गेहे भुवि क्षये' (हे.)
1 2 3
(2) धनुस्—(V. II, 11). (3) त्वच्—'त्वक् स्त्री चर्मणि वल्के च गुडत्वचि विशेषतः।' (मे०)

Derivation.—(1) मेध्याम्—मेध् + यत् कर्तरि, टाप् (2nd c.)
(2) त्वचम्—त्वच् + क्विप् (2nd c.s.) or, तन् + चिक 'तनोतरनश्च व' (उ. २।६३) There is also the अदन्त word त्वच धरणि sa — 'त्वक्त्वचोचस्त्रद्वाः स्युर्वल्के चर्मणि पद्मके।" The अदन्त त्वच is thus derived—त्वच् + घ। "पुंसि संज्ञायां घ प्रायेण' (३।३।११८ पा., ३२८६ सि) (V. R. T. of Amarakos'a, N. S. P. Ed P 255) (3) परिधाय—परि + धा + ल्यप् (4) तैरवीम्—तन् + अण् (तस्येदमित्यर्थे) ङाप् (2 nd c. s) 5) अशिक्षत—शिक्ष् + लङ् त (6) अस्त्रम्—अस् + ष्ट्रन् (कर्मणि 2nd c. s) (7) पितुः—(V. Sl. 1, C. I.) (8) पार्थिव.—पृथिवी + अण् (तस्येश्वर इत्यर्थे) 9. क्षितौ—क्षि + क्तिन् (7th c. s.) The alternative form क्षित्याम् (10) अभूत्—भू + लुङ्—तिप् (11) धनुर्धर—धनुस् + धृ + अच (कर्तरि)।

Conjugation.—(1) धा—V. Sl. 24, C. I.) (2) शिक्ष् (to learn) शिक्षते (लट्) शिक्षताम् (लोट्) अशिक्षत (लङ्) शिक्षेत (वि. लिङ्) शिशिक्षे (लिट्)

अशिश्रियिष्ट (लुङ्) अशिश्रायि (कर्मणि-लुङ्) श्रयिता (लुट्) श्रयिष्यते (लृट्) श्राय-यति (णिच्-लट्) अशिश्रियत् (णिच्-लङ्) श्रितः (क्तः) ।

Force of अपि is संभावना । "गर्हासमुच्चयप्रश्नशङ्कासंभावनास्वपि" । (अ.)

Force of एव is अवधारण (Mallinátha). The first foot of the śloka indicates the stage of ब्रह्मचर्य ।

एक in एकवायित्व and एकधनुर्धर indicates प्रधान । "एके मुख्यान्य-केवलाः" (अ.) ।

महोक्षतां वत्सतरः स्पृशन्निव
द्विपेन्द्रभावं कलभः श्रयन्निव ।
रघुः क्रमाद्यौवनभिन्नशैशवः
पुपोष गाम्भीर्यमनोहरं वपुः ॥ ३२ ॥

मूलस्य पाठान्तरम् ।

गाम्भीर्यमनोहरम्—गम्भीरमनोहरम् (मु. *appui* Nand.)

Prose order.—रघुः क्रमात् यौवनभिन्नशैशवः (सन्) महोक्षतां स्पृशन् वत्सतर इव, द्विपेन्द्रभावं श्रयन् कलभ इव, गाम्भीर्यमनोहरं वपुः पुपोष ।

Explanation by use of synonyms.—रघुः, क्रमात् (क्रमप्राप्य) यौवनभिन्नशैशवः (यौवनेन निरस्तशिशुभावः सन्) महोक्षतां (महर्षभत्वं) स्पृशन् (गच्छन्, प्राप्नुवन्नित्यर्थः) वत्सतर इव (दम्य इव) द्विपेन्द्रभावं (महागजत्वं) श्रयन् (व्रजन्, अधिगच्छन्निति यावत्) कलभ इव (करिशावक इव) गाम्भीर्यमनोहरं (अचापल्यमनोज्ञं) वपुः (शरीरं) पुपोष (धारयामास) ।

Substance.—एवं कालेन रघुः यौवने पदं निदधे । तदेवोपमया ब्रूते । वत्सतरो यथा क्रमेण शैशवं विहाय पुंस्त्वमासाद्य च महर्षभत्वं प्राप्नोति, करिशावको यथा क्रमेण यौवनमासाद्य महागजत्वमाश्रयति, तथा रघुरपि क्रमेण शैशवं विहाय पूर्णयौवनं प्राप्य गाम्भीर्यहेतुना विशालं मनोहरं च शरीरं भेजे । स यौवनेऽपि महापुरुषाकृतिं प्रपेदे ।

Change of voice.—रघुणा...यौवनभिन्नशैशवेन...वत्सतरेण स्पृशतेव ...श्रयता कलभेन...पुपुषे ।

Sanjivani.—महोक्षतामिति। (रघुः क्रमात्) यौवनेन भिन्नशैशवः निरस्त-शिशुभावः सन् [यौवनभिन्नशैशवः] महान् उक्षा महोक्षः, कर्मधा:—"अचतुर—" (५।४।७७ पा. ९४५ सि.) इत्यादिसूत्रेण निपातनात् अकारान्तत्वम्—तस्य भावः तत्ता तां [महोक्षतां] (स्पृशन्) (वत्सतरः) दम्यः (इव)—"दम्यवत्सतरौ समौ" इत्यमरः (Cole. p. 236) ; (द्विपेन्द्रभावं) महागजत्वं (श्रयन्) भजन् (कलभः) करिपोतः (इव) ; गाम्भीर्येण अचापलेन मनोहरं [गाम्भीर्यमनोहरं] (वपुः पुपोष) ॥ ३२ ॥

Sanjivani Explained.

"दम्यवत्सतरौ समौ"—दम्य and वत्सतर are synonymous.

"अचतुर * * " इति निपातनात् अकारान्तत्वम्—उक्षन् becomes उक्ष by the Sutra "अचतुरविचतुर" &c. For the Explanation of the Sutra see पुरुषायुष in I, 63.

Bengali.—রঘু ক্রমে যৌবনসমাগমে শৈশবকাল অতিক্রম করিয়া মহাবৃষভত্বপ্রাপ্ত বৎসতরের ন্যায় এবং মহাগজত্বাশ্রিত করিশাবকের ন্যায় গাম্ভীর্য্যহেতু মনোহর শরীর ধারণ করিলেন। ৩২।

English rendering.—Like a bovine calf attaining the status of a mighty bull, like an elephant-cub reaching the state of a leader of a herd, Raghu—his childhood gradually chased away by youth—developed a physical frame exceedingly charming for gravity (of deportment). 32.

Grammatical notes, &c., &c.

Sama'sa.—(1) महान् उक्षा महोक्षः (कर्मधा) तस्य भावः महोक्षता—ताम् । (2) द्वाभ्यां (मुखशुण्डाभ्यां) पिबति जलमिति द्विपाः (उपपदतत्) तेषु इन्द्रः (श्रेष्ठः) द्विपेन्द्रः (सप्तमीतत्) or द्विपानाम् इन्द्रः द्विपेन्द्रः (षष्ठीतत्) / (See II, 7.) The विग्रहवाक्य—द्विप इन्द्र इव—is not preferable, because it does not bear good sense. तस्य भावः द्विपेन्द्रभावः (षष्ठीतत्) तम् (3) यौवनेनभिन्नं

यौवनभिन्नम् (तृतीयातत्पु). शाद्धलं शैशवं यस्य सः (बहु) Or भिन्नं शैशवं यस्य स भिन्नशैशवः (बहु) यौवनेन भिन्नशैशवः यौवनभिन्नशैशवः (तृतीयातत्पु) (4) मनः हरति इति मनोहरम् (उपपद तत्पु) गाम्भीर्येण मनोहरं गाम्भीर्यमनोहरम् (तृतीयातत्पु)
N.B.—Here the affix अण् must not be added to the root हृ although the कर्म, मनः, is the उपपद। अच् is added to it by—"हरतेरनुद्यमनेऽच्" (३ २।९ पा. १८५४ सि.) [V. notes on मन्मथहर in III, 66].
(5) कलं भाषते इति कलभः (कर्मधारय). [V. R. T. of Amarakos'a, N. S. P. Ed. P. 137].

Case-ending.—(1) क्रमात्—ल्यब्लोपे पञ्चमी—क्रमं प्राप्य इत्यर्थः।
(2)कलभः and वत्सतरः—विधेयोपमानकर्तृपदं—'रघुः' इत्युद्देश्योपमेयकर्तृपदस्य।

Synonyms.—(1) द्विप—(V. I, 71) (अ.) (1) कलभ—'कलभः करिशावकः' (अ.) (3) उक्षन्—"उक्षा भद्रो बलीवर्द ऋषभो वृषभो वृषः । अनड्वान् सौरभेयो गौः ।" (अ.) (4) वत्सतर—(V. Sanjivani.)

Different meanings.—(1) वपुस्—'वपुः क्लीबं तनौ शस्ताकृत्यां वपि ।' (मे.)

Derivation.—(1) महोक्षताम्—उक्ष् + कनिः=उक्षन्—'श्वन्नुक्षन्'—(उ. १।१५९) महत् + उक्षन् = महोक्ष । महोक्ष + तल् (भावे) (2nd c. s.) (2) वत्सतरः—वत्स + ष्टरच् (तनुत्वे) (3) द्विपः—द्वि + पा + कः (कर्तरि) (4) कलभः—कल + अभच्—'ऋतृशृकलिकर्दिगर्दिभ्योऽभच्' (उ. ३।१२२) or, कल + भाष् + ड—"अन्येष्वपि दृश्यते" (३।२।१०१ पा. ३०११ सि.) (V. notes on परिवीक्षक-Sl. 30, C.I.) (5) यौवनम्—युवन् + अण् (भावकर्मणोः) (6) शैशवम्—शिशु + अण् (भावकर्मणोः (7) पुपोष—(V. Sl. 22, C. III.) (8) गाम्भीर्यम्—गम्भीर + ष्यञ् (भावे) (9) मनोहरम्—मनस् + हृ + अच् (कर्तरि, 2nd c. s.)

Conjugation.—(1) पुष्—(V. Sl. 22, C. III).

कलभ is a young elephant five year old according to सुश्रुत and thirty year old according to वैजयन्ती।

Rhetoric.—The figure of speech is मालोपमा। (See II, 75). Raghu is compared to a calf attaining the status of a bovine bull, as well as to the young one of an elephant growing into a leader of a herd. The might of the bull and the elephant is attrituted to him.

अथास्य गोदानविधेरनन्तरं
विवाहदीक्षां निरवर्तयद्गुरुः ।
नरेन्द्रकन्यास्तमवाप्य सत्पतिं
तमोनुदं दक्षसुता इवाबभुः ॥ ३३ ॥

मूलस्य पाठान्तरम् ।

तमोनुदम्—तमोपहम् (वा)

Prose order—अथ गुरुः अस्य गोदानविधेः अनन्तरं विवाहदीक्षां निरवर्तयत । दक्षसुताः तमोनुदम् इव नरेन्द्रकन्याः तं सत्पतिम् अवाप्य आबभुः ।

Explanation by use of synonyms.—अथ (अनन्तरं) गुरुः (पिता) अस्य (रघोः) गोदानविधेः (केशान्ताख्यकर्मणः) अनन्तरं (परं) विवाहदीक्षां (पाणिग्रहणसंस्कारं) निरवर्तयत (विदधे) नरेन्द्रकन्याः (नृपदुहितरः) तं (रघुं), दक्षसुताः (दक्षकन्याः, रोहिण्यादयः) तमोनुदमिव (चन्द्रमिव) सत्पतिं (प्रशस्तस्वामिनम्) अवाप्य (अधिगम्य) आबभुः (शुशुभिरे)।

Substance.—अनन्तरं दाविंशवर्षे केशान्तसंस्कारं सम्पाद्य दिलीपो रघो-र्विवाहं विदधे। रोहिण्यादयो दक्षकन्याः यथा जगद्ध्वान्तहरं चन्द्रमसं पतिमवाप्य विरेजिरे, तथा राजकन्यकाः नववध्वः सर्वलोकाह्लादनं रघुं पतिमवाप्य शुशुभिरे।

Change of voice.—...गुरुणा...विवाहदीक्षा निरवर्त्यत, नरेन्द्र-कन्याभिः...दक्षसुताभिः...आबभे।

Sanjivani.—अथेति। "गौर्नादित्ये बलीवर्दे क्रतुभेदर्षिभेदयोः। स्त्री तु स्याद्दिशि भारत्यां भूमौ च सुरभावपि। पुंस्त्रियोः स्वर्गवज्राम्बुरश्मिदृग्बाण-लोमसु॥" इति केशवः—गावः, लोमानि, केशाः ; दीयन्ते खण्ड्यन्ते अस्मिन् इति व्युत्पत्त्या गोदानं नाम ब्राह्मणादीनां षोडशादिषु वर्षेषु कर्तव्यं केशान्ताख्यं कर्म

उच्यते । तदुक्तं मनुना—'केशान्तः षोडशे वर्षे ब्राह्मणस्य विधीयते । राजन्यबन्धोर्द्वाविंशे वैश्यस्य द्व्यधिके ततः ॥" (मनुसंहितायाम् २य अध्याये ६५ श्लो.) इति ॥ (अथ) (गुरुः) पिता—"गुरुर्गीष्पतिपित्रादौ" इत्यमरः (Cole. p. 346) (अस्य गोदानविधेः अनन्तरं विवाहदीक्षां) (निरवर्तयत्) कृतवान् इत्यर्थः;—अथ—(नरेन्द्रकन्याः) (तं) रघुं, दक्षस्य सुताः [दक्षसुताः] रोहिण्यादयः (तमोनुदं) चन्द्रम् (इव)—"तमोनुदोऽग्नीन्दुर्केषु" इति विश्वः—(सत्पतिम् अवाप्य प्राप्य:) । रघुरपि तमोनुत् । अत्र मनुः—"वेदानधीत्य वेदौ वा वेदं वापि यथाक्रमम् । अविप्लुतब्रह्मचर्यो गृहस्थाश्रममाविशेत् ॥" (मनुसंहितायाम् तृतीय अध्याये १म श्लोकः) इति ॥ ३३ ॥

सञ्जीवन्याः पाठान्तरम् ।

"तमोनुदोऽग्नीन्द्वर्केषु"—तमोनुदोऽग्निचन्द्रार्काः:—So the Bengali editions. It is a mistake.

Sanjivani Explained.

"गौर्नादित्ये * * * वाणलोमसु"—गो means आदित्य (sun), बलीवर्द (ox), क्रतुभेद (a particular sacrifice), as well as ऋषिभेद (a particular Rishi) when it is masculine. When it is feminine, it means दिश् (direction), भारती (word), भूमि (Earth), as well as सुरभि (the celestial cow). In the sense of स्वर्ग (heavens), वज्र (thunder bolt), अम्बु (water), रश्मि (ray), दृश (perception), बाण (shaft) as well as लोमन् (hair) it is both feminine and masculine.

गावः लोमानि दीयन्ते * * * कर्म उच्यते—Mallinatha explains गोदान। He derives दान from the root दा to cut. By गो he understands hair, and by दान cutting. So by गोदान he means the ceremony in which hair is to be cut. It is otherwise known as केशान्तकर्म। Of a Bráhmana, this ceremony is celebrated in the sixteenth year.

तदुक्तं मनुना—"केशान्तः * * * ततः" It is said by Manu—"Of a Bráhmana the केशान्त ceremony should be done in the sixteenth year; of a Kshatriya in the twenty-second; of a Vais'ya, within two years after the twenty-fourth.

"गुरुर्गीष्पतिपित्राद्यो"—गुरु means गीष्पति i.e., बृहस्पति, the priest of the deites. It stands also for father, &c.

तमोनुदोऽग्नीन्द्वर्काः"—तमोनुद् means अग्नि, इन्दु, as well as अर्क (sun).

रघुरपि तमोनुद्—Raghu being pure or सात्त्विक is certainly a dispeller of तमस् (passion).

अत्र मनुः—"वेदानधीत्य * * आविशेत्"—Raghu acted in accordance with S'ástra. After investiture with the sacred thread he received instructions in the Vedas. Having outgrown the first stage or that of Brahmachárin, he married and entered the stage of a house-holder. To show that he conducted him self not against the S'ástra, Mallinátha quotes Manu. "Studying all the Vedas or two of them and without swerving from the practices of a Brahmachárin, one should enter next into the stage of a house-holder.

Bengali.—অনন্তর পিতা রঘুর গোদানসংস্কারবিধান করতঃ বিবাহ-দীক্ষা সম্পাদন করিলেন। ধ্বান্তহারি-চন্দ্রমাকে পতিলাভ করিয়া দক্ষ-কন্যাগণ যেরূপ শোভা পাইয়াছিলেন, রাজকন্যাগণ সেই প্রকার রঘুকে লাভ করিয়া তদ্রূপ শোভা পাইতে লাগিলেন। ৩৩।

English rendering.—After (observance of) the ordinance about the shave, his sire caused the rites of wedding to be gone through : The princesses, obtaining in him an excellent husband, blazed forth in splendour, like the daughters of Daksha (the twenty-seven asterisms) after having obtained (the moon) the destroyer of darkness (for their lord). 33.

Grammatical notes, &c. &c.

Sama'sa.—(1) गवां (केशानां) दानं यस्मिन् तत् गोदानम् (बहु) or, V. Mallinátha. तदेव विधिः गोदानविधिः (रूपककर्मधा) तस्य or, तस्मात् or,—गवां (सम्प्रदानभूतानां) दानं यस्मिन् तत् गोदानम्—इति कैश्चित् ! In this case गोदान means the distribution of kine (before the nuptials). (2) अविद्यमानम् अन्तरं यस्मिन् यद्वा नास्ति अन्तरम् अनन्तरम् or, अविद्यमानान्तरं

नान्तरम् (बहु) (3) विवाह एव दीक्षा विवाहदीक्षा (रूपककर्मधा) ताम् (4) नराणां or नरेषु इन्द्राः नरेन्द्राः (षष्ठी or सप्तमीतत्) तेषां कन्याः नरेन्द्रकन्याः (षष्ठीतत्) (5) सन् पतिः सत्पतिः (कर्मधा) तम् (6) तमः नुदति इति तमोनुत् (उपपदतत्) तम् (7) दक्षस्य सुताः (दक्षसुताः) (षष्ठीतत्) ।

Case-ending.—(1) कस्य—शेषे षष्ठी (2) गोदानविधेः—आरा-द्वार्थकान्तरयोगे पञ्चमी । (V. I, 66). It may be षष्ठी as well. A word takes षष्ठी as well पञ्चमी, when it is allied with अनन्तर which denotes distance. "दूरान्तिकार्थैः षष्ठ्यन्यतरस्याम्" (२।३।३४। पा. ६२२ सि.) [In alliance with a word expressive of दूर (distance) or अन्तिक (adjacency), another word admits षष्ठी optionally.] (3) अनन्तरम्—क्रियाविशेषणम् (4) दक्षसुताः—विधेयोपमानकर्तृपदं—'नरेन्द्रकन्याः' इत्युद्देश्योपमेयकर्तृपदस्य (5) तमोनुदम्—विधेयोपमानकर्मपदं—'सत्पतिम्' इत्यु-द्देश्योपमेयकर्मपदस्य (6) तम्—सत्पतिम् इत्यस्य विशेषणम् ।

Different meanings.—(1) विधि—(V. Sl. 29, C. III.) (2) गुरु—(V. Sl. 65, C. I.) (3) तमोनुत्—(V. Sanjivani).

Derivation.—(1) गोदानम्—गो + दा + ल्युट् (अधिकरणे) (2) विवाहः—वि + वह् + घञ्(करणे) (3) दीक्षाम्—दीक्ष् + अ (भावे 2nd c. s.)—"गुरोश्च हलः" (३।३।१०३ पा. ३२८०) (4) निरवर्तयत्—निर् + (वृत् + णिच् =) वर्ति + लङ्—तिप् (5) अवाप्य—अव + आप् + ल्यप् । When णिच् is added to it, the forms are अवाप्य and अवापय्य—"विभाषापः" (६।४।५७। पा. ३३२७ सि.) [अय् optionally takes the place of णिच् of the causative root आपि when ल्यप् is added to it]. (6) तमोनुदम्—तमस् + नुद् + क्विप् (कर्तरि, 2nd c. s.). The word तमोनुद् is declined like सुहृद्—तमोनुत्, तमोनुदौ, तमोनुदः । In the neuter it is declined as तमोनुत्, तमोनुदी, तमोनुन्दि &c. In the feminine its declension is the same as in the masculine. The word तमोनुद् receives all

the genders when it is a भाषितपुंस्क, *i.e.*, when it becomes an adjective. When it means the moon it is only masculine.
(7) आबभुः—आ + भा + लिट् + उस् ।

Conjugation.—(1) आप्—(V. Sl. 48, C. I.) (2) भा—(V. Sl. 16, C. II.)

Remark.—Here is a trace of polygamy. Kálidása uses the plural form नरेन्द्रकन्या आबभुः । Polygamy was so much rife in those days, especially among persons of royal descant, that one wife is never mentioned of a king.

Cf. अवरोधे महत्यपि (I, 32).

परिग्रहबहुत्वेऽपि द्वे प्रतिष्ठे कुलस्य मे ।
समुद्ररसना चोर्वी सखी च युवयोरियम् ॥

अभिज्ञानशकुन्तलम् ३य अङ्क ।

युवा युगव्यायतबाहुरंसलः
कपाटवक्षाः परिणद्धकन्धरः ।
वपुःप्रकर्षादजयद् गुरुं रघु-
स्तथापि नीचैर्विनयाददृश्यत ॥ ३४ ॥

मूलस्य पाठान्तरम् ।

Prose order.—युवा युगव्यायतबाहुः अंसलः कपाटवक्षाः परिणद्धकन्धरः रघुः वपुःप्रकर्षात् गुरुम् अजयत्, तथापि विनयात् नीचैः अदृश्यत ।

Explanation by use of synonyms.—युवा (तरुणवयाः) युगव्यायतबाहुः (युगवद्दीर्घभुजः) अंसलः (बलवान्) कपाटवक्षाः (कपाटवद्विशालोरस्कः) परिणद्धकन्धरः (विशालग्रीवः) रघुः (दिलीपसुतः) प्रकर्षात् (देहाधिक्यात्) गुरुम् (पितरम्) अजयत् (पराजिग्ये) तथापि (एवं देहोत्कर्षे सत्यपि) विनयात् (नम्रत्वेन) नीचैः (अल्पकः) अदृश्यत (अलक्ष्यत) ।

Substance.—[illegible] शरीरं वर्णयति ।

बाहू तस्य युगवद्दीर्घौ। स्कन्धः पीनोन्नतः। वक्षः कपाटवद्विस्तीर्णम्। ग्रीवापि विपुला। किं बहुना शरीरप्रकर्षेण स पितरमपि जिगाय। पितुरपि तस्य वपुः प्रकृष्टमासीत् तथापि विनयोत्तरं नादृश्यत। सर्वैरङ्गैरधिकत्वात् स पितुरोऽल्पक इव बभौ।

Change of voice.—यूना युगव्यायतबाहुना च अंसलेन कपाटवक्षसा परिणद्धकन्धरेण रघुणा—गुरुः अजीयत...(नमाः तम्) अपश्यन्।

Sanjivani.—सम्प्रति यौवराज्ययोग्यतामाह—युवेति। (युवा) युगो नाम धुर्यस्कन्धगः सच्छिद्रप्रान्तो यानाङ्गभूतो दारुविशेषः—"यानाद्यङ्गे युगः पुंसि युगं युग्मकृतादिषु" इत्यमरः (Cole. p. 306)—युगवत् व्यायतौ दीर्घौ बाहू यस्य सः [युगव्यायतबाहुः] अंसौ अस्य स्तः इति (अंसलः) बलवान्—मांसलमिति शनिकारः—"बलवान् मांसलोंऽसलः" इत्यमरः (Cole. p. 148, "वत्सांसाभ्यां कामबले" (५।२।९८। पा. १९०५ सि.) इति लच्प्रत्ययः—(कपाटवक्षाः) (परिणद्धकन्धरः) विशालग्रीवः—"परिणाहो विशालता" इत्यमरः (Cole. p. 868) (रघुः) वपुषः प्रकर्षात्, अतिशयात् यौवनकृतात् [वपुःप्रकर्षात्] (गुरुं) पितरम् (अजयत्) (तथापि) (विनयात्) नम्रत्वेन (नीचैः) अल्पकः (अदृश्यत)। अनौद्धत्यं च विवक्षितम्॥ ३४॥

Sanjivani Explained.

सम्प्रति * * आह—Now the poet shows Raghu's capacity of assuming the status of a युवराज (heir-apparent).

युगो नाम * * दारुविशेषः—युग means yoke or that wooden limb of a vehicle which rests on the shoulders of the team and which has holes in its exremities.

यानाद्यङ्गे * * * कृतादिषु—युग, when masculine, means a particular limb of a vehicle. When neuter, it means couple or the four ages, कृत, &c.

बलवान् * अंसलः—बलवत, मांसल and अंसल are synonyms.

"वत्सांसाभ्यां कामबले"—The तद्धित affix लच् is added to वत्स and

ऊर्ज to signify affection and strength respectively. ऊर्जस्वल means affectionate and ऊर्जस्वल means strong. वलच् is a मत्वर्थीय affix.

Bengali.—যুবা যুগব্যায়তবাহু কপাটবক্ষাঃ বিশালগ্রীব রঘু দেহোৎকর্ষে পিতাকেও পরাভূত করিলেন। তথাপি নম্রতাগুণে (তাঁহাকেই) ক্ষুদ্র বলিয়া বোধ হইত। ৩৪।

English rendering.—With arms as large as plough-staves, shoulders of uncommon breadth, chest as wide as the planks of a door, and a neck of great thickness, Raghu, in prime of youth, surpassed his sire in excellence of physical frame though from modesty he looked little (in his presence). 34.

Grammatical notes, &c., &c.

Sama'sa.—(1) विशेषेण आयती व्यायती (प्रादि:) युगवत् व्यायती युगव्यायतौ (उपमानसमास:) The rest of युगव्यायतबाहु: V. Sanjivani. (2) कं (वातं) पाटयति (निवारयति) इति कपाटं कपाटी वा (उपपदसमास:, N. R. T. of Amarakos'a, N. S. P. Ed. 139.) कपाट इव वक्ष: यस्य स कपाटवक्षा: (बहु) (3) कं (शिर:) धारयति इति कन्धर: (उपपदतत्)—"संज्ञायां भृतृवृजिधारिसहितपिदम:" (३।२।४६ पा. २९६३ सि). इति खच् [The roots भृ, तॄ, वृ, जि, धारि, सहि, तपि and दम् admit खच् in कर्तृवाच्य when the whole words signify proper names.] मुमागमश्च। (V, पुरन्दर in II, 74.) Another derivation may be कं (शिरस:) धर: कन्धर: (षष्ठीतत्)। In this case 'कम्' is an अव्यय (V. K. T. of Amarakos'a, N. S. P. Ed. P. 266.) परिणद्ध: कन्धर: यस्य स परिणद्धकन्धर: (बहु) (4) वपुष: प्रकर्ष: (षष्ठीतत्) तस्मात् (5) विशिष्ट: नय: विनय: (प्रादि:) तस्मात्।

Case-ending.—(1) वपु:प्रकर्षात्—हेतौ पञ्चमी (2) तथापि—अव्यय, used in seventh case, भावाधिकरणे सप्तमी (3) नीचै:—अव्ययं, उक्ते कर्मणि प्रथमा (4) विनयात्—हेतौ पञ्चमी पाक्षिकी—"विभाषागुणेऽस्त्रियाम् (२।३।२५ पा. ६०२ सि.) (V. notes on मोहात् in I, 2).

Synonyms.—(१) वपुस्—"अथ कलेवरम् । गात्रं वपुः संहननं शरीरं वर्ष्म विग्रहः । कायो देहः क्लीबपुंसोः स्त्रियां मूर्तिस्तनुस्तनूः ।" (अ.) (२) कपाट—"कपाटमररं तुल्ये" (अ.)

Different meanings.—(1) वपुस्—(V. Sl. 32, C. III).

Derivation.—(1) अंसलः—अंस + लच् (2) कपाटम्—क + पाटि + अच् (3) परिघगुरुकन्धरः—परि + हन् + अप् = परिघः । परिघगुरु + क + धारि + खच् (4) अजयत्—जि + लङ् – तिप् (5) नीचैः—नि + चि + डैसि.—'नौ दीर्घश्च' (उ. ५।१३) (6) विनयात्—वि + नी + अच् (5th c. s.)—'श्रिणी-भुवोऽनुपसर्गे' (V. notes on अनुभाव, Sl. 37, C. I.) (7) अदृश्यत—दृश् + लङ्-त कर्मणि ।

Conjugation.—(1) दृश् (V. Sl. 15, C. I). (2) जि (to conquer) जयति (लट्) जयतु (लोट्) अजयत् (लङ्) जयेत् (वि. लिङ्) जिगाय, जिग्यतुः, जिगयिथ, जिगेथ (लिट्) अजैषीत् (लुङ्) जेता (लुट्) जेष्यति (लृट्) अजेष्यत् (लृङ्) जापयति (णिच्-लट्) अजीजपत् (णिच्-लुङ्) जीयात् (आ. लिङ्) जिगीषति (सन्-लट्) जेजीयते (यङ्-लट्) अजायि (कर्मणि-लुङ्) जीयते (कर्मणि-लट्) जितः (क्तः) ।

N.B.—"विपराभ्यां जेः" (१।३।१९। पा. २६८५ सि.) [The root जि adopts आत्मनेपद form when it is allied with the prefixes वि and परा] In 'सेना परा जयति' and 'वनं बहुवि जयति', परा and वि are not connected with the root जि। परा is the adjective of सेना and बहुवि of वनम् । बहवः वयः (पक्षिणः) यत्र तत् बहुवि । This is the विग्रहवाक्य (V. Kalápa Vyákarana).

Remark.—(1) अंस has the sense of shoulder. But it means बल when लच् meaning अस्ति is added to it । So अंसल means बलवत् । Tattwavodhini says:—कुशवत्सांसलब्दौ वयोविशेषे मात्स्यंगविशेषे च

वत्सौ च कामवत्सयोः तत् कथं गाथां वजन्ताभ्यां कामवान् उपवासौ... इति चेदयाह: तद्विषिये वत्सोसशब्दो ... इति।

If मतुप् be added to वत्स, the word वत्सवत् would mean 'having a calf.'

ततः प्रजानां चिरमात्मना धृतां
नितान्तगुर्वीं लघयिष्यता धुरम् ।
निसर्गसंस्कारविनीत इत्यसौ
नृपेण चक्रे युवराजशब्दभाक् ॥ ३५ ॥

Prose-order.--ततः आत्मना चिरं धृतां नितान्तगुर्वीं प्रजानां धुरं लघयिष्यता नृपेण असौ निसर्गसंस्कारविनीतः इति युवराजशब्दभाक् चक्रे।

Explanation by use of synonyms.—ततः (तदनन्तरम्) आत्मना (स्वयं) चिरं (बहुकालं व्याप्य) धृताम् (अवलम्बितां) नितान्तगुर्वीम् (अति भारयुक्तां) प्रजानां (स्वराज्यस्थितानां जनानां) धुरं (भारं,पालनक्लेशमिति यावत्) लघयिष्यता (लघु करिष्यता) नृपेण (राज्ञा दिलीपेन) असौ (रघुः) निसर्गसंस्कार-विनीतः (स्वभावेन शास्त्राभ्यासजनितवासनया च नम्रः) इति (अस्माद्धेतोः) युवराज-शब्दभाक् (युवराजनामधेयः) चक्रे (विदधे)।

Substance.—किं बहुना रघुः सर्वगुणानामाधारो बभूव। स्वभावेन शास्त्राभ्यासेन च नितरां विनीतमवलोक्य दिलीपस्तं यौवराज्येऽभ्यषिञ्चत्। एवं सहायं प्राप्य बहुकालधृतं नितान्तदुर्वहं स्वकीयं प्रजापालनभारं स लघूचकार।

Change of voice—...लघयिष्यन् नृपः रघुं......युवराजशब्दभाजं चकार।

Sanjivani.—सम्प्रति तस्य यौवराज्यमाह- ततः इति। (ततः आत्मना चिरं धृतां नितान्तगुर्वीम्)—"वोतो गुणवचनात्" (४।१।४४ प्र० ५०२ सि.) इति ङीष्—(प्रजानां) (धुरं) पालनप्रयासं (लघयिष्यता) लघुं करिष्यता—'तत् करोति तदाचष्टे' (ग. २०४ See २५७२ सि.) इति लघुशब्दात् णिच्—ततः—

"लृटः सद्वा" (३।३।१४पा. ३१०० सि) इति शतृप्रत्ययः—(नृपेण) द्वितीयेन (कर्त्रा) रघुः निसर्गेण, स्वभावेन, संस्कारेण, शास्त्राभ्यासजनितवासनया ; च विनीतः, नम्रः [निसर्गसंस्कारविनीतः] (इति) हेतोः—युवराज इति शब्दं भजतीति यौवराज्य. [युवराजशब्दभाक्]—"भजो ण्विः" (३।२।६२ पा. २९७६ सि,) इति ण्विप्रत्ययः—(कर्त्रे) कृतः । "द्विविधो विनयः—स्वाभाविकः, कृत्रिमश्च"—इति कौटिल्यः । तदुभयसम्पन्नत्वात् पुत्रं युवराजं चकार इत्यर्थः । अत्र कामन्दकः—"विनयोपपन्नान् भृत्यै कुर्वीत नृपतिः सुतान् । अविनीतकुमारं हि कुलमाशु विशीर्य्यते । विनीतमौरसं पुत्रं यौवराज्येऽभिषेचयेत् ॥" (नीतिसारे) इति ॥ ३५ ॥

Sanjivani Explained.

द्विविधो विनयः * * कृत्रिमश्च—Chánakya says—Modesty is of two sorts—natural and brought by education.

तदुभयसम्पन्नत्वात् * * चकार—Dilipa made Raghu a युवराज because he had both the aforesaid sorts of modesty.

अत्र कामन्दकः;—On this point Kámandaka may be quoted.

"विनयोपपन्नान् * * * अभिषेचयेत्"—The king should, for the welfare (of all), make only those sons of his, heir-apparents, that are endued with modesty. If he burdens an uneducated son with that charge, his race quickly perishes. He should install in यौवराज्य an educated son born of his own loins.

"वोतो गुणवचनात्"—A गुणवाचक word ending in उ admits ङीष् optionally in its feminine form. गुरु, in feminine, becomes गुर्व्वी or गुरु ।

'तत्करोति तदाचष्टे'—णिच् is added to a substantive to mean 'it does it' or 'it speaks of it'. लघु is a substantive. णिच् is added to it to mean लघु करोति (lessens). The resultant लघि is a धातु ।

"लृटः सद्वा"—सत् (शतृ or शानच्) is optionally added to a root in लृट् (its future tense).

This विभाषा (optionality) is व्यवस्थिता (limited). Hence, when the सुबन्त word is not an epithet of the subject (of the sentence), or when an affix is added to the सुबन्त word, or when another word follows and is compounded with it, or in case of address, or to signify लक्षण or हेतु, सत् is obligatory. E. g. करिष्यन्तं करिष्यमाणं वा पश्य । करिष्यतोऽपत्यम् कारिष्यत: । कारिष्यद्भक्ति: । हे करिष्यन् । अर्जयन् वसति ।

"भजो ण्वि:"—भज् admits ण्वि in कर्तृवाच्य when it is preceded by a सुबन्त word, or an उपसर्ग ।

Bengali.—অনন্তর বহুকাল স্বয়ং ধৃত নিতান্ত দুর্বহ প্রজাপালন-ভার লঘু করিবার ইচ্ছায় নৃপতি (দিলীপ) রঘুকে স্বভাব এবং শাস্ত্রাভ্যাসজনিত গুণহেতু বিনীত দেখিয়া যুবরাজপদে অভিষিক্ত করিলেন ।৩৫।

English rendering—Desirous of lessening the load, exceedingly heavy, of (ruling) his subjects, so long borne by himself, the monarch made him bearer of the title of *Yuvarája* (heir-apparent). 35.

Grammatical notes, &c., &c

Sama'sa.—(1) नितान्तंगर्वी नितान्तगर्वी (सुप्सुपा) ताम् (2) निसर्गश्च संस्कारश्च निसर्गसंस्कारौ (द्वन्द्व:) ताभ्यां विनीत: निसर्गसंस्कारविनीत: (तृतीयातत्) (3) नॄन् पातीति नृप: (उपपदतत्) तेन (4) युवराजशब्दभाक्—युवा राजा युवराज: (कर्मधा)—"राजाह:सखिभ्यष्टच्" (V. notes on महिषीसख, Sl. 48, C. I.) युवराज इति शब्द: युवराजशब्द: (मध्यपदलोपी कर्मधा) तं भजते इति युवराजशब्दभाक् (उपपदतत्) ।

Case-ending.—(I) तत:—अव्ययं, आनन्तर्ये पञ्चमी (2) प्रजानाम्—शेषे षष्ठी—'धुरम्' इत्यनेन सम्बन्ध: (3) चिरम्—अव्ययं, कालस्यात्यन्तसंयोगे द्वितीया—"कालाध्वनोरत्यन्तसंयोगे" (२।३।५ पा., ५६८ सि.) (V. कुमारसम्भव, I, 73). (5) आत्मना—प्रकृत्यादिभ्यस्तृतीया (5) निसर्गसंस्कारविनीत:—इति वीप्सि प्रथमा । (6) धर्मे—अधि कर्मणि प्रथमा (7) नृपेण—अनुक्ते कर्तरि तृतीया (8) इति—अव्ययं, हेतौ पञ्चमी ।

Synonyms.—(1) "युवराजस्तु कुमारो भर्तृदारकः" (अ.)

(2) 'धूः स्त्री क्लीबे यानमुखम्' (अ.)

Different meanings.—(1) 'धूर्यानमुखभारयोः' (हे.)

(2) निसर्ग—'निसर्गः सृष्टौ स्वभावे च' (हे).

Derivation.—(1) चक्रे—कृ + लिट्-ए (कर्मणि) (2) युवराजशब्दभाक्—युवराजशब्द + भज् + ण्विः (कर्तरि)। This word is declined like वणिज्। In feminine it is declined as in masculine. In neuter it is declined thus :—युवराजशब्दभाक्,...भाजी,—भाञ्जि and so on. (3) गुर्वीम्—गुरु + ङीष् (2nd c. s.). The alternative form is गुरुम्। (4) लघयिष्यता—लघुशब्दात् णिच्=लघि (नामधातुः)। लघि + शतृ (स्यतृ) =लघयिष्यत् (3rd c. s.) (5) संस्कार—(I, 20).

Conjugation.—(1) कृ—(V. Sl. 8, C. III).

नरेन्द्रमूलायतनादनन्तरं
तदास्पदं श्रीर्युवराजसंज्ञितम्।
अगच्छदंशेन गुणाभिलाषिणी
नवावतारं कमलादिवोत्पलम् ॥ ३६ ॥

Prose order.—गुणाभिलाषिणी श्रीः नरेन्द्रमूलायतनात् अनन्तरं युवराजसंज्ञितं तदास्पदं, कमलात् नवावतारं उत्पलम् इव, अंशेन अगच्छत्।

Explanation by use of synonyms.—गुणाभिलाषिणी (गुणलोलुपा) श्रीः (राजलक्ष्मीः, पद्माश्रया च) नरेन्द्रमूलायतनात् (दिलीपरूपप्रधानस्थानात्) अनन्तरं (अविच्छिन्नं) युवराजसंज्ञितं (युवराजपदाख्यं) तदास्पदं (रघुरूपस्थानं) कमलात् (सितेतरपद्मात् पद्मात्) नवावताराम् (अचिरोत्पन्नम्) उत्पलमिव (कमलमिव) अंशेन (विभागेन) अगच्छत् (प्राप, गिजी इत्यर्थः)

Substance.—गौणवराभ्यामिलाषिणी भूत्वा रघुः संनियिक मध्ये। राजश्रीरपि दिलीपादभिन् समक्रमे। सा हि गुणज्ञा। रघुर्गुणवान्। अतस्तस्या

रघौ मदादनुरागीऽभ्यस्त। तत् किं सा दिलीपं अपि तत्याज। पूर्वं दिलीपे पूर्णासीत्। अधुनांशेन रघावाजगाम, अंशेन च दिलीपे तस्थौ। किमीदृशं कुत्रापि दृष्टम्? तत्राह। पुरातनात् कमलात् यथा श्रीर्भा नवे कमले गच्छत्यपि पुरातनं कात्स्न्येन न जहाति तथात्र समजनि। पूर्वं दिलीप एक एव राजश्री-दीपित: आसीदधुना रघुरपि पितृवत् राजश्रिया बभौ इति निष्पीड़ितार्थ:।

Change of voice.—गुणाभिलाषिण्या श्रिया......अगम्यत।

Sanjivani.—नरेन्द्रेति। गुणान् विनयादीन् सौरभ्यादीन् च अभिलषतीति (गुणाभिलाषिणी) (श्री:) राजलक्ष्मी:, पद्माश्रया च—नरेन्द्र: दिलीप: एव मूलायतनं प्रधानस्थानं तस्मात्, अपादानात् [नरेन्द्रमूलायतनात्] (अनन्तरं) सन्निहितं—युव-राज इति संज्ञा अस्य सञ्जाता (युवराजसंज्ञितम्)—तारकादित्वात् इतच्प्रत्यय: (See ५।२।३६ पा. १८३७ सि.) आत्मन: पदं स्थानम् आस्पदम्—"आस्पदं प्रति-ष्ठायाम्" (६।१।१४६ पा. १०६१ सि.) इति निपात:—स: रघु: इति आस्पदं (तदा-स्पदं) (कमलात्) विरोत्पन्नात् (नवावतारम्) अचिरोत्पन्नम् (कमलम् इव अंशेन अगच्छत्)। श्रियौऽपि यूनि रज्यन्ते इति भाव: ॥ ३६ ॥

Sanjivani Explained.

तारकादित्वात् इतच्प्रत्यय:—संज्ञा being included in the group beginning with तारक admits इतच् in the sense of तदस्य सञ्जातम्। संज्ञास्य जाता इत् संज्ञितम्। (V. notes on कुसुमित in III, 12).

"आस्पदम् प्रतिष्ठायाम्"—To mean प्रतिष्ठा the form should be आस्पद। सुट् comes and आ is substituted for आत्मन् by anomaly.

Here श्री, by pun, admits of two senses. One is the goddess of prosperity. The other is beauty. As beauty passes from the old to the young lotus, so the goddess of prosperity passed from the old king to the young heir-apparent.

Bengali.—লক্ষ্মী (শোভা) যেরূপ (পুরাতন) কমল হইতে নব-বিকশিত কমলে গমন করে তদ্রূপ রাজলক্ষ্মী দিলীপরূপমূলস্থান হইতে অভিহিত যুবরাজ পদবাচ্য সেই রঘুরূপাধারে আংশিকভাবে গমন করিলেন। ৩৬।

English rendering.—Then S´ree (the goddess of prosperity) ever fond of merit, migrated, in part, from the king, her original home, to the abode known as *Yuvarája*, even as beauty migrates from the full-blown to a budding lotus. 36.

Grammatical notes, &c. &c.

Sama´sa.—(1) नराणाम् इन्द्रः or नरेषु इन्द्रः or, नर इन्द्र इव नरेन्द्रः (षष्ठी वा सप्तमीतत् or उपमित समासः) मूलम् आयतनं मूलायतनम् (कर्मधा) नरेन्द्र एव मूलायतनं नरेन्द्रमूलायतनम् (रूपककर्मधा) तस्मात् (2) अविद्यमानम् अन्तरं यस्य तत् अविद्यमानान्तरम् or अनन्तरम्—‘नञोऽस्त्यर्थानाम्—’ (V. notes on अनन्यशासनाम्, Sl. 30, C. I.) (3) स एव आस्पदं तदास्पदम् (रूपककर्मधा) (4) नवः अवतारः (विकासः) यस्य तत् (बहु-कमलपक्षे) नवः अवतारः (अभ्युदयः) यस्य तत् नवावतारम् (बहु-रघुपक्षे) (4) गुणाभिलाषिणी (V. Sanjivani).

Case-ending.—(1) नरेन्द्रमूलायतनात्—“ध्रुवमपायेऽपादानम्” इति सूत्रादपादाने पञ्चमी (2) अनन्तरम्—विशेषणं, ‘तदास्पदम्’ इत्यस्य (3) अंशेन—प्रकृत्यादिभ्यस्तृतीया (4) कमलात्—“ध्रुवमपायेऽपादानम्” इत्यपादाने पञ्चमी (5) उत्पलम्—विधेयोपमानकर्मपदं—‘तदास्पदम्’ इत्युद्देश्योपमेयकर्मपदस्य (6) कमलात्—विधेयोपमानापादानं—‘नरेन्द्रमूलायतनात्’ इत्युद्देश्योपमेयापादानस्य।

Synonyms.—(1) कमल—‘वा पुंसि पद्मं[1] नलिनमरविन्दं महोत्पलम्। सहस्रपत्रं कमलं शतपत्रं कुशेशयम्॥ पङ्केरुहं तामरसं सारसं सरसीरुहम्। बिसप्रसूनराजीवपुष्कराम्भोरुहाणि च॥’[16] (अ.) पद्म is optionally masculine according to Amara.

Different meanings.—(1) श्री—‘श्रीर्वेष[1]रचना[2]शोभा[3] भारती[4]सरलद्रुमे[5]। लक्ष्म्यां[6] त्रिवर्ग[7]सम्पत्ति[8]विधो[9]पकरणेषु[10] च। विभूतौ[9] च मतौ[10] च स्त्री॥ (मे.)

(2) कमल—'कमलं क्लोम्नि भेषजे । पङ्कजे सलिले ताम्रे कमलस्तु मृगान्तरे । कमला श्रीवरनार्योः ।' (है.) (3) आस्पद—'आस्पदं पदकृत्ययोः' (मे.) त्रिवर्ग = The three objects of life collectively, *viz.*, धर्मार्थकाम । When masculine, कमल means a kind of deer. कमला means लक्ष्मी and a fine species of woman. पद = status.

Derivation.—(1) आयतनात्—आ + तन् + ल्युट् (अधिकरणे, 5th c. s.) (2) आस्पदम्—आत्मन् + पद + अप् (अधिकरणे. सुडागमः निपातनात्) । (3) श्रीः—श्रि + क्विप् (कर्मणि) श्रयति हरिमिति—'क्विब्वचिप्रच्छि—' (V. notes on वाक्, Sl. 1, C. I.) (4) युवराजशब्दितम्—युवराजशब्द + इतच् आताथे, 2nd c. s.) (V. Sanjivani Explained). (5) अगच्छत्—गम् + लङ्—दिप् (6) (6) गुणाभिलाषिणी—गुण + अभि + लष् + णिनि = गुणाभिलाषिन्—ततः ङीप् । (7) उत्पलम्—उद + पल् + अच् (पचादित्वात्) ।

Conjugation.—(1) गम्—(V. I, 3.)

Rhetoric.—The figure of speech is simile. दिलीप is compared to कमल and रघु to उत्पल । श्री as regards the king, is राजलक्ष्मी and as regards कमल, is beauty. गुण, as regards the king, is विनयादि and as regards कमल, is सौरभ्यादि (fragrance &c.) । नवावतार, as regards रघु, is prosperity and as regards कमल, is new blooming.

Remark.—One of the Calcutta editors takes exception to Mallinátha's derivation of गुणाभिलाषिणी । He says that लष् cannot admit णिनि by the Sutra "नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः" (३।१।१३४ पा. २८९६ सि.) because it is not found in the list ग्रहादि । Neither does "सुप्यजातौ णिनिस्ताच्छील्ये" (३।२।७८ पा. २९८८ सि. See notes on प्रार्थी in I, 3), says the editor, enjoin णिनि to लष् for the special Sutra "लषपतपदस्थाभूवृषहनकमगमशॄभ्य: उकञ्" (३।२।१५४ पा. ३११४ सि.) bars its scope according to the maxim of the Bháshya "एतद्'

ज्ञापकत्वाचार्थः ताच्छीलिकेषु ताच्छीलिका वाऽसरूपेण न भवन्तीति ।" Plainly speaking the editor means to say that both णिनि and उकञ् are शीलार्थ affixes. णिनि is applicable to all roots, while उकञ् to a limited number of them. वाऽसरूपविधि means that different affixes can be added to the same root. But that maxim does not hold good of शीलार्थ affixes. If one शीलार्थ affix is applicable to a root, it cannot admit another. This is suggested by Pánini, says Bháshya. But we say that as this is a ज्ञापकसूत्र, it does not apply everywhere. The editor also admits that मनोरमा takes the maxim of the Bháshya as प्रायिक and not obligatory. So मनोरमा defends the form गन्ता । उकञ् is enjoined to गम् by the same Sutra "लषपत—" । Had the maxim of Bháshya been obligatory, तृच् could not have been added to it. Thus it is plain that even sometimes two शीलार्थ affixes may be applicable. So why should not णिनि be admitted to लष् though उकञ् is applicable to it? The group ग्रहादि may include लष् as well, for आदि means प्रकारवचन (V. notes on आदि under साधारणपावकस्ता in II, 21).

विभावसुः सारथिनेव वायुना
घनव्यपायेन गभस्तिमानिव ।
बभूव तेनातितरां सुदुःसहः
कटप्रभेदेन करीव पार्थिवः ॥ ३७ ॥

मूलस्य पाठान्तरम् ।

सुदुःसह—दुरासदः । Nand., foot notes.

Prose order.—सारथिना वायुना विभावसुः इव, (सारथिना) घनव्यपायेन गभस्तिमान् इव, (सारथिना) कटप्रभेदेन करी इव, पार्थिवः (सारथिना) तेन अतितरां सुदुःसहः बभूव ।

Explanation by use of synonyms.—सारथिना (सहायभूतेन) वायुना (पवनेन) विभावसुः इव (वह्निरिव) (सारथिना) घनव्यपायेन (मेघापगमेन,

शरत्समयेनेति टीकाकारः) गभस्तिमान् इव (सूर्य्य इव) सारथिना कटप्रभेदेन (मदोदयेन) करी इव (हस्ती इव) पार्थिवः (पृथ्वीश्वरो दिलीपः) (सारथिना) तेन (रघुणा) अतितराम् (अत्यन्तं) सुदुःसहः (सुष्टु असह्यः) बभूव (आसीत्) ।

Substance.—रघुसहायवशेन ईदृशः प्रतापशाली बभूव यत्दिलीपोऽपि शेषाणाम प्रबलं मेने । मालोपमयैतदाह । वायुसाहाय्येन अग्निर्यथा दुःसहतरो भवति, शरत्कालस्य साहाय्येन भानुर्यथा अतिदुःसहो जायते—गण्डोद्भिन्नदानवारि-साहाय्येन वारणो यथानिवार्य्यो भवति, तथा स राजा दिलीपो रघुसाहाय्येन पृथिव्यां प्रबलतरो जातः ।

Change of voice.—...विभावसुना ...गभस्तिमता...करिणा...पार्थिवेन...सुदुःसहेन बभूवे ।

Sanjivani—विभावसुरिति । (सारथिना) सहायभूतेन—एतत् विशेषणम् उत्तरवाक्येष्वपि अनुषञ्जनीयम्—(वायुना) (विभावसुः) वह्निः (इव)—"सूर्य्यवह्नी विभावसू" इत्यमरः (Cole. p. 366) (घनव्यपायेन) शरत्समयेन—सारथिना (गभस्तिमान्) सूर्य्यः (इव)—कटः, गण्डः,—"गण्डः कटो, मदो दानम्" इत्यमरः (Cole. p. 200,—तस्य प्रभेदः, स्फुटन, मदोदयः इत्यर्थः—तेन [कटप्रभेदेन] (करी इव) (पार्थिवः) दिलीपः (तेन) रघुणा (अतितराम्) अत्यन्त (सुदुःसहः) सुष्टु असह्यः (बभूव) ॥ ३७ ॥

Sanjivani Explained.

"एतत् विशेषणम् * * * अनुषञ्जनीयम्"—This epithet should be applied to the other sentences. It is an adjective not only of वायु but of घनव्यपाय and कटप्रभेद ।

"सूर्य्यवह्नी विभावसू"—विभावसु means सूर्य्य as well as वह्नि ।

"गण्डः कटो मदो दानम्"—गण्ड and कट are synonymous, मद and दान are also synonyms.

Bengali.—বহ্নি যেরূপ সহায়ভূত বায়ু হেতু, সূর্য্য যেরূপ (সহায়ভূত) শরৎকাল হেতু এবং করী যেরূপ (সহায়ভূত) গণ্ডোদ্ভিন্নমদজলহেতু অতীব দুঃসহ হইয়া উঠে, সেইরূপ মহারাজ (দিলীপ, সহায়ভূত) রঘু হেতু অতীব দুঃসহ হইয়া উঠিলেন । ৩৭ ।

English rendering.—Like the deity of Fire aided by the wind, his attendant, like he of infinite rays (*viz.*, the sun) through dispersion of clouds, like the elephant by the rending of its temples, he became, aided by his son, exceedingly difficult to resist 37.

Grammatical notes, &c., &c.

Sama'sa.—(1) विभा एव वसु (धन) यस्य स विभावसुः (बहु) (2) विशेषेण अपायः व्यपायः (प्रादिः) घनानां व्यपायः (नाशः) घनव्यपायः (षष्ठीतत्) or घनानां व्यपायो यस्मिन् समये स घनव्यपायः (बहु) तस्मिन् (3) दुःखेन सह्यते असौ इति दुःसहः (उपपदतत) सु (अतिशयेन) दुःसहः सुदुःसहः (सुप्सुपा) (4) प्रकर्षेण भेदः प्रभेदः (प्रादि) कटस्य प्रभेद. कटप्रभेदः (षष्ठीतत) तेन (5) गः (ज्ञेयवर्गः or गगनम्) तं बभस्ति (दीपयति) इति गभस्तिः (उपपदतत्, V. R. T. of Amarakosha, N. S. P. Ed. P. 48.)

Case-ending.—(1) वायुना, घनव्यपायेन, तेन and कटप्रभेदेन—इत्ती तृतीया (2) अत्यन्तम्—क्रियाविशेषणम् (3) पार्थिवः—उद्देश्योपमेय कर्तृपदम्—विभावसुकरिप्रभृतीनां कर्तृपदानाम्।

Synonyms.—(1) करिन्—(V. द्विप, Sl. 71, C. I.)

Different meanings.—(1) गभस्ति—"किरणे[1] सूर्ये[2] ना स्वाहायां तु योषिति" (मे.) (2) कट—"कटः[1] श्रोणी[2] क्रियाकारे[3] कलिञ्जेऽ[4]तिशये[5] शवे[6]। समये[7] गजगण्डेऽ[8]पि पिप्पल्यां च कटी मता॥" (वि.) (3) घन—"घनो[1] मेघे[2] घनं सान्द्रं[3] कांस्यतालादिकं घनम्। घनं[4] मध्ये[5] घनं नृत्यं[6] घनः स्याद् लोहमुद्गरः॥" (अ. ध्व. म.)

Derivation.—(1) सारथिना—स + रथिन् (अनर्थाविशेषः, 3rd c. s.)—'सर्वेर्णिच' (उ. ४।८९) or, सरथस्य अपत्यं पुमान् इति, सारथिः—सरथ + इञ् (2) वायुना—वा + उण् (औणादिकः, 3rd c. s.) (3) व्यपायेन—वि + अप + इ (अय्) + घञ (भावे, 3rd c. s.) (4) गभस्तिमान्—गम् + ड = गः। ग +

अस् (अदादि:) + क्तिन् = अभक्ति:। अभक्ति + मतुप् (1st c. s.) (5) अतितराम्— अति + तरप् + आमु:—"किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे" (५।४।११ पा. २०० सि.) See notes on मुद्रितमत्तर in I, 12. (6) सुदु:सह:—सु + दुर् + सह् + खल् (कर्मणि) (7) करी—कर + इनि: (1st c. s.) (8) बभूव—भू + लिट् + णल् (9) पार्थिव:—पृथिवी + अञ् (ईश्वरार्थे)।

Conjugation.—(1) भू—(V. Sl. 15, C. III.)

Rhetoric.—The figure of speech is मालोपमा (a series of उपमा)। The comparison of one object with many constitutes this figure of speech.

> नियुज्य तं होमतुरङ्गरक्षणे
> धनुर्धरं राजसुतैरनुद्रुतम्।
> अपूर्णमेकेन शतक्रतूपमः
> शतं क्रतूनामपविघ्नमाप स:॥ ३८॥

Prose order.—शतक्रतूपम: स: राजसुतै: अनुद्रुतं धनुर्धरं तं होमतुरङ्गरक्षणे नियुज्य एकेन अपूर्णं क्रतूनां शतम् अपविघ्नम् आप।

Explanation by use of synonyms.—शतक्रतूपम: (इन्द्रसदृश:) स: (दिलीप:) राजसुतै: (राजपुत्रै:) अनुद्रुतम् (अनुगत.) धनुर्धरं (कार्मुकधारिणं) तं (रघुं) होमतुरङ्गरक्षणे (यज्ञीयाश्वरक्षणे) नियुज्य (नियुक्तं कृत्वा) एकेन अपूर्णम् (एकोनं) क्रतूनां शतं (शतसंख्यकमश्वमेधयज्ञम्) अपविघ्नं (निर्विघ्नं यथा-तथा) आप (सम्पादयामास)।

Substance.—दिग्विजयेऽपि सुतो मे शक्त इति कृत्स्न पुरन्दरसदृशो राजा दिलीप: अपरराजकुमारैरनुगतं धनुर्धरं तं रघुं यज्ञीयाश्वरक्षणे नियुज्य क्रमेण नवनवतिसंख्यकान् अश्वमेधयज्ञान् निर्विघ्नं सम्पादयामास।

Change of voice.—शतक्रतूपमेन तेन...आपे।

Sanjivani.—नियुज्येति। शतक्रतुः इन्द्रः उपमा यस्य सः (शतक्रतूपमः) (सः) दिलीपः—"शतं वै तल्पा राजपुत्रा देवा आशापालाः" इत्यादिश्रुत्या—(राजसुतैः) अनुद्रुतम् (अनुगतं) (धनुर्धरं) (तं) रघुं, होमतुरङ्गाणां रक्षणे [होमतुरङ्गरक्षणे] (नियुज्य) एकेन क्रतुना अपूर्णम् (एकोनं) (क्रतूनाम्) अश्वमेधानां (शतम्) अपविघ्नम्) अपगतविघ्नं यथा तथा (आप) ॥ ३८ ॥

Sanjivani Explained.

शतं वै तल्पाः * * * इत्यादिश्रुत्या—The poet says that Raghu had many a prince to follow him in his task of protecting the horse.

Mallinátha adduces the authority of S'ruti—'A century of strong god-like princes protects the quarters.'

Bengali.—শতক্রতুসদৃশ দিলীপ (অপর) রাজকুমারগণকর্ত্তৃক অনুগত ধনুর্ধর সেই রঘুকে যজ্ঞীয়াশ্বরক্ষণে নিযুক্ত করিয়া একোনশত অশ্বমেধ যজ্ঞ নির্ব্বিঘ্নে সম্পাদন করিলেন। ৩৮।

English rendering.—Appointing that wielder of the bow, who was followed by many princes, in the task of protecting the sacrificial horse, he (the king) resembling him of a hundred sacrifices, got through, without impediment, a century of sacrifices less by one. 38.

Grammatical notes, &c., &c.

Sama'sa.—(1) तुरेण (त्वरया) गच्छतीति तुरङ्गः (उपपदतत्) होमस्य तुरङ्गः होमतुरङ्गः (अश्वघासादिवत् तादर्थ्ये षष्ठीसमासः) [V. notes on धर्मपत्नी, Sl. 2, C. II.] तस्य रक्षणं होमतुरङ्गरक्षणम् (षष्ठीतत्) तस्मिन् (2) धरतीति धरः—धनुषः धरः धनुर्धरः (षष्ठीतत्) तम् (3) राज्ञां सुताः राजसुताः (षष्ठीतत्) तैः (4) न पूर्णम् अपूर्णम् (नञ्तत्) (5) शतं क्रतवः यस्य सः शतक्रतुः (बहु) Now V. Sanjivani (6) अपगतः विघ्नः यस्मिन् कर्मणि तत् यथा तथा अपविघ्नम् (बहु)।

Case-ending.—(1) होमतुरङ्गरक्षणे—विषयाधिकरणे सप्तमी (2) राजसुतैः—अनुक्तकर्तरि तृतीया—'अनुद्रुतम्' इत्यस्य (3) एकेन—अनुक्तकर्तरि तृतीया—'अपूर्णम्' इत्यस्य (4) क्रतूनाम्—शतमित्यस्य शेषे षष्ठी (5) अपविघ्नम्—क्रियाविशेषणम्।

1 2 3 4 5 6 7
Synonyms.—(1) तुरङ्ग—'घोटके पीतितुरगतुरङ्गाश्वतुरङ्गमाः। वाजि-
8 9 10 11 12 13 1 2 3 4 5 6
वाहार्वगन्धर्वहयसैन्धवसप्तयः॥' (अ.) (2) क्रतु—'यज्ञः सवोऽध्वरो यागः सप्ततन्तु-
7 8
र्मखः क्रतुः।' (अ.)

1 2
Different meanings.—(1) क्रतु—'क्रतुर्यज्ञे मुनौ पुंसि' (मे.)

Derivation.—(1) नियुज्य—नि + युज् + ल्यप् (2) होम—हु + मन्—'अर्तिस्तुसुहु—' (उ. १।१४०) (3) तुरङ्गः—तुर् + घञर्थे कः or तुर् + घञ्—संज्ञापूर्वकत्वात् न गुणः (V. R. T. of Amarakos'a, N. S. P. Ed. p. 321). तुर + गम् + खच्—"गमश्च" (३।२।४७ पा. २९६४ सि.) इति खच्।—'खच्च डिद्वाच्यः' (३।२।३८ पा. वा. २९५२ सि. वा.) इति खचः डित्वात् गमेष्टिलोपः। "अरुर्द्विषद्—" (६।३।६७ पा. २९४२ सि.) इति मुम्—(V. notes on विहङ्गानाम्, Sl. 51, C. I). The alternative form is तुरङ्गमः। (4) धनुर्धरम्—धनुष् + धृ + अच् (कर्तरि, 2nd c. s.) (5) अनुद्रुतम्—अनु + द्रु + क्त (कर्मणि, 2nd c. s.) (6) आप—आप् + लिट्-णल्।

Conjugation.—(1) युज्—(to employ) युज्यते (दि. लट्) युनक्ति, युङ्क्ते (रु. लट्) योजयति-ते (चु. लट्) अयुज्यत (दि. लङ्) अयुनक्, अयुङ्क्त (रु. लङ्) अयोजयत्—त (चु. लङ्) युयोज, युयुजे, योजयामास, योजयाञ्चकार (लिट्) योक्ता (दि. रु. लुट्) योक्ष्यते (दि. रु. लृट्) अयुजत्, अयौक्षीत् (रु. लुङ्) अयुक्त (रु. दि. लुङ्) अयूयुजत्—त (चु. लुङ्) अयोजि (भावकर्मणोर्लुङ्) युक्तः (दि. रु. क्तः) योजितः (चु. क्तः) (2) आप्—(V. Sl. 48, C. I.)

ततः परं तेन मखाय यज्वना
तुरंगमुत्सृष्टमनर्गलं पुनः ।
धनुर्भृतामग्रत एव रक्षिणां
जहार शक्रः किल गूढविग्रहः ॥ ३९ ॥

मूलस्य पाठान्तरम् ।

रक्षिणाम्—पश्यताम् Nand. foot-notes.

Prose order.—ततः परं यज्वना तेन पुनः मखाय उत्सृष्टम् अनर्गलं तुरङ्गं धनुर्भृतां रक्षिणाम् अग्रत एव शक्रः गूढविग्रहः (सन्) जहार किल ।

Explanation by use of synonyms.—ततः परम् (एकोनशतक्रतुसमाप्त्यनन्तरं) यज्वना (विधिना इष्टवता) तेन (दिलीपेन) पुनः (भूयः) मखाय (यज्ञं कर्तुम्) उत्सृष्टं (मुक्तम्) अनर्गलम् (अप्रतिबन्धम्, अव्याहतस्वैरगतिमिति यावत्) तुरङ्गम् (अश्वं) धनुर्भृतां (कार्मुकधारिणां) रक्षिणां (रक्षकाणाम्) अग्रत एव (सम्मुखमेव) शक्रः (इन्द्रः) गूढविग्रहः (अदृश्यशरीरः सन्) जहार (अपहृतवान्) । किल (वार्तायाम्, ऐतिह्ये इति मल्लिनाथः) ।

Substance.—एकोनशतक्रतुसमाप्त्यनन्तरं शततमम् अश्वमेधं साधयितुं राजा दिलीपः भूयोऽपि तुरङ्गं मुमोच । स चाश्वः अव्याहतगतिकः सन् यत्र तत्र पर्यटन्नास । शतैरश्वमेधैर्यजेत् यदि स राजा शतक्रतुरिति मे नाम विफलं स्यादिति चिन्तयन् यज्ञविघातार्थं पुरन्दरः रक्षता धनुर्भृता राजकुमाराणामग्रत एव अदृश्यवेशेन तमश्वमपहृत्य आकाशवर्त्मना प्रस्थातुमारेभे ।

Change of voice.—......उत्सृष्टः अनर्गलः तुरङ्गः...शक्रेण गूढविग्रहेण जह्रे ... ।

Sanjivani.—तत इति । (ततः परम्) एकोनशतक्रत्वनन्तरं (यज्वना) विधिनेष्टवता (तेन) दिलीपेन (पुनः) भूयोऽपि (मखाय) मखं कर्तुम्—"क्रियार्थोपपदस्य—" (२।३।१४ पा. ५८१ सि.) इत्यादिना चतुर्थी—(उत्सृष्टं) मुक्तम् (अनर्गलम्) अव्याहतम्, अव्याहतस्वैरगतिम्, इत्यर्थः—"[illegible]-

चरन्ति" इति आपस्तम्बस्मरणात्—(तुरङ्ग, धनुर्भृतां) (रक्षितॄणां) रक्ष्यकाणाम् (अग्रत एव शक्रः गूढ़विग्रहः) जहार (जहार किल)। किल इति ऐतिह्ये ॥ ३९ ॥

Sanjivani Explained.

"क्रियार्थोपपदस्य—" (V. notes on आपप्लाय in I, 5).

"अपर्य्यावर्त्तयन्तोऽश्वमनुचरन्ति" इति आपस्तम्बस्मरणात्—A'pastamba enjoins that the protectors of horses intended for अश्वमेध should follow the animals and never return home without them.

किल इति ऐतिह्ये—किल means rumour.

Bengali.—এইরূপ প্রবাদ যে তাহার পর, বিধিপূর্ব্বক যজ্ঞকারী দিলীপ কর্ত্তৃক পুনরায় যজ্ঞসাধন জন্য মুক্ত ও অব্যাহতগতি অশ্বকে ধনুর্দ্ধর রক্ষকগণের অগ্রেই অদৃশ্যদেহ হইয়া শক্র হরণ করিলেন। ৩৯।

English rendering.—After this, it is said, S'akra, in an invisible form, stole, before the very eyes of the guards armed with bows, the horse that had been repeatedly let loose for completion of the sacrificial rite, by the king duly installed in sacrifice. 39.

Grammatical notes, &c., &c.

Sama'sa.—(1) अविद्यमानम् अर्गलं यस्य सः अनर्गलः or अविद्यमानार्गलः (बहु) तम् (2) धनुर्बिभ्रति इति धनुर्भृतः (उपपदतत्) तेषाम् (3) विविधं मुखादि-व्यापारं इति विग्रहः or विविधैः व्याधिभिः गृह्यते इति विग्रहः (V. R. T. of Amarakos'a, N. S. P. Ed. p. p. 259). [उपपदतत्] (4) गूढः विग्रहः यस्य सः गूढ़विग्रहः (बहु)।

Case-ending.—ततः—कालमात्रि'परम्'शब्दयोगे पञ्चमी—'तेन धुंरति देशकालयोरपि न वीनिरपि भवति' (V. Vritti on २।३।२८ पा. १८१ सि.) (2) परम्—क्रियाविशेषणम् (3) तेन—अनुक्ते कर्तरि 'अनुक्तम्' [illegible] (4) मखाय—"क्रियार्थोपपदस्य च कर्मणि स्थानिनः" इति सूत्रात् चतुर्थी (5) पुनः—अव्ययं, क्रियाविशेषणम् (6) रक्षिताम्—शेषे षष्ठी (7) अग्रतः—अव्ययं, तस् is used in 7th or 5th case. (8) गूढ़म्—[illegible] क्रियाविशेषणम्

Synonyms.—(1) मख—(V. अध्वरम्, Sl. 26, C. I). (2) अर्गल—"तद्विष्कम्भोऽर्गलं ना" (अ.)

Different meanings.—(1) विग्रह—'विग्रहः कायविस्तारे विभागे ना रणेऽस्त्रियाम्'। (मे.) (2) अर्गल—'स्यादर्गलं तु कल्लोले परिघेऽपि' (हे).

Derivation.—अर्गलम्—अर्ज् + कलच्—न्यङ्क्वादित्वात् कुत्वम् (2) यज्वना—यज + ङ्वनिप् (सुयजो, 3rd c. s.) (3) मखाय—मख + घञ्—संज्ञापूर्वकत्वात् न वृद्धिः—(4th c. s.)—"हलश्च" (३।३।१२१। पा. ३३०० सि). [A root ending in a consonant admits घञ्] or, 'क्वचिदपवादविषयेऽपि उत्सर्गोऽभिनिविशते' इति घञ्विषयेऽपि "पुंसि संज्ञायां घः प्रायेण" (३।३।११८ पा. ३२९९ सि). इति घः (V. R. T. of Amarakosha, N. S. P. Ed. p. 291). (4) उत्सृष्टम्—उत् + सृज + क्तः (कर्मणि, 2nd c. s). (5) धनुर्भृताम्—धनुस् + भृ + क्विप् (6th c. s). "ह्रस्वस्य पिति कृति तुक्" (V. notes on जगतः, Sl. 1, C. I.) (6) गूढः—गुह् + क्तः (कर्मणि) (7) विग्रहः—वि + ग्रह् + अच् (कर्तरि) or (कर्मणि) अप् (8) अग्रतः—अग्र + तसिल् (in 7th or 5th c). (9) जहार—हृ + लिट् + णल्।

Conjugation.—(1) हृ (to take away) हरति-ते (लट्) हरतु, हरताम् (लोट्) अहरत्-त (लङ्) हरेत्-त (वि. लिङ्) जहार, जहर्थ, जह्रिव, जह्रे (लिट्) अहार्षीत्, अहार्ष्टाम्, अहार्षुः, अहृत, अहृषाताम्, अहृषत (लुङ्) ह्रियते (कर्मणि-लट्) अहारि (कर्मणि-लुङ्) हर्ता (लुट्) हरिष्यति-ते (लृट्) अहरिष्यत्-त (लृङ्) हारयति-ते (णिच्-लट्) अजीहरत्-त (णिच्-लुङ्) जिहीर्षति-ते (सन्-लट्) जेह्रीयते (यङ्-लट्) हृतः (क्तः)।

Force of एव—इतरव्यवच्छेदकत्वम् (V. notes under I, 18).

Force of किल—वार्तायाम्—Mallinatha says ऐतिह्ये ('The story is heard that Indra stole the horse of the horse sacrifice of Dilipa). "किलशब्दस्तु वार्तायां संभाव्यानुनयार्थयोः" (विश्वः)।

अमर says:—"वार्तासंभाव्ययोः किल"।

विषाददुप्तप्रतिपत्ति विस्मितं

कुमारसैन्यं सपदि स्थितं च तत्।

वसिष्ठधेनुश्च यदृच्छयागता

श्रुतप्रभावा ददृशेऽथ नन्दिनी ॥ ४० ॥

Prose-order.—तत्कुमारसैन्यं सपदि विषादलुप्तप्रतिपत्ति विस्मितं (सत्) स्थितं च, अथ श्रुतप्रभावा यदृच्छया आगता नन्दिनी (नाम) वसिष्ठधेनुः ददृशे च। Mallinatha places 'च' after 'वसिष्ठधेनु.'।

Explanation by use of synonyms.—तत् (पूर्वकथितं) कुमारसैन्यं (कुमारबलं) सपदि (सद्यः) विषादलुप्तप्रतिपत्ति (इष्टनाशजनितमनोभङ्गेन विनष्टकार्यज्ञानं) विस्मितम् (अकस्मादस्त्रनाशेनाश्चर्याविष्टं सत्) स्थितं च (तस्थौ च)। अथ (अनन्तरं) श्रुतप्रभावा (आकर्णितमाहात्म्या, वा सर्वत्रविख्यातशक्तिका) यदृच्छया (स्वैरगत्या) आगता (उपस्थिता) नन्दिनीनामवसिष्ठधेनुः (नन्दिन्याख्या वसिष्ठगवी) ददृशे च (अवलोकिता च)।

Substance.—यदा रघुसैन्यमकस्मादस्त्रविलोपमवलोकयामास, तदा विषादेन विस्मितं किंकर्तव्यविमूढं च जातम्। अस्मिन्नवसरे ख्यातप्रतापा नन्दिनी यदृच्छया परिभ्रमणव्याजेन तत्रागता।

Change of voice.—तेन कुमारसैन्येन...विषादलुप्तप्रतिपत्तिना विस्मितेन... श्रुतप्रभावां...आगतां नन्दिनीं वसिष्ठधेनुं ददर्श...।

Sanjivani.—विषादेति। (तत् कुमारसैन्यं) सेना (सपदि) विषादः इष्टनाशजनः मनोभङ्गः—तदुक्तम्—"विषादश्चेतसो भङ्ग उपायाभावनाशयोः" इति—तेन लुप्ता प्रतिपत्तिः कर्तव्यज्ञानं यस्य तत् तथोक्तं—[विषाददुप्तप्रतिपत्ति] (विस्मितम्) [illegible] आश्चर्याविष्टं सत् (स्थितं च) तस्थौ (अथ श्रुतप्रभावा) (यदृच्छया) स्वेच्छया (आगता) [illegible] [illegible] इति भावः—(नन्दिनी) नाम (वसिष्ठधेनुश्च ददृशे)। [illegible] ॥४०॥

Sanjivani Explained.

"विषादलुप्तप्रतिपत्ति सैन्यम् * * " इति—विषाद means broken-heartedness due to the absence and loss of means.

द्वौ चकारौ अविलम्बसूचकौ—Two च's indicate simultaneity. They mean that as soon as the one fact happened, the other came to pass.

Bengali.—সেই কুমারের সৈন্য তৎক্ষণাৎ বিষাদ হেতু কর্তব্য জ্ঞান রহিত এবং বিস্মিত হইয়া গমনবিরত হইল। এবং সেইক্ষণেই খ্যাতপ্রভাবা স্বেচ্ছাক্রমে আগতা নন্দিনীনাম্নী বশিষ্ঠধেনু দৃষ্টিপথবর্ত্তিনী হইলেন। ৪০।

English rendering.—Their power of action suspended by grief, and themselves filled with amazement, the prince's troops suddenly came to a halt; just then Vas'ishtha's cow, Nandini, of widely famed puissance, was seen there, arrived of her own will. 40.

Grammatical notes, &c., &c.

Samása.—(1) विषादेन लुप्ता विषादलुप्ता (तृतीयातत्) लुप्ता प्रतिपत्तिः यस्य तत् विषादलुप्तप्रतिपत्ति (बहु) (2) कुमारः—(V. Sl. 12, C. III.) कुमारस्य इदं कुमारसैन्यम् (षष्ठीतत्) (3) वशिष्ठस्य धेनुः वशिष्ठधेनुः (षष्ठीतत्) (4) या अन्यथा (अवि:) बहुच्छा (कर्मधा), (V. R. T. of Amarakos'a, N. S. P. Ed. P. 446.) बच तु या इच्छा इति मयूरव्यंसकादित्वात् समासः। स्वेच्छयाअत् इच्छायाः आगमयाइत्यः। (5) प्रकर्षःभाव: (प्रादि:) गुण: (रघुणा आकर्षिता:) (निर्वरद्वारूप:) प्रभाव: यस्याः सा अत्र तत्प्रभावा (बहु) or, स्तु तः (निष्ठातः) प्रभावी यस्याः सा।

Synonyms.—(1) सैन्य—I, 19.

Different meanings.—(1) प्रतिपत्ति—(V. Sl. 1, C. I.) (2) कुमार—(V. Sl. 12, C. III.)

Derivation.—(1) कुमारः—(V. Sl. 12, C. III.) (2) सैन्यम्—सेना + ष्यञ् (चातुर्वर्ण्यादित्वात् (3) विस्मितम्—वि + स्मि + क्तः (कर्तरि) (4) विषादम्

—स्था + क्त: (कर्तरि) (5) [illegible]—(V. Sl. 19, C. II.) (6) धेनु:—(V. Sl. 1, C. II.) (7) प्रभाव:—प्र + भू + घञ् (भावे) भाव: । [illegible]: [illegible] प्रभाव: (V. notes on अनुभाव, Sl. 37, C. I.) (8) ददृशे—दृश् + लिट्-ए (कर्मणि) (9) नन्दिनी—नन्द् + णिनि: + ङीप् ।

Conjugation.—(1) दृश् (V. Sl. 15, C. I.) (2) स्था—(V. Sl. 45, C. I.)

Force of the च's (V. Sanjivani). As soon as the army of the prince halted struck with wonder, they saw Nandini arrived at that spot.

> तदङ्गनिस्यन्दजलेन लोचने
> प्रमृज्य पुण्येन पुरस्कृत: सताम् ।
> अतीन्द्रियेष्वप्युपपन्नदर्शनो
> बभूव भावेषु दिलीपनन्दन: ॥ ४१ ॥

Prose order.—सतां (साधूनां) पुरस्कृत: दिलीपनन्दन: (रघु:) पुण्येन तदङ्गनिस्यन्दजलेन लोचने प्रमृज्य अतीन्द्रियेषु अपि उपपन्नदर्शन: बभूव ।

Explanation by use of synonyms.—सतां (साधूनां) पुरस्कृत: (पूजित:) दिलीपनन्दन: (रघु:) पुण्येन (पवित्रेण) तदङ्गनिस्यन्दजलेन (नन्दिनी-शरीरनि:सृतसलिलेन, तदङ्गनिर्गतमूत्रेण इत्यर्थ:) लोचने (नयनद्वयं) प्रमृज्य (शोधयित्वा) अतीन्द्रियेषु (दर्शनागोचरेषु) भावेषु (वस्तुषु) अपि उपपन्नदर्शन: (उप-[illegible]:) बभूव (आसीत्) ।

Substance.—दृक्पथातीते वस्तुनि रघोर्दृक्प्रसारं कारयितुं सा धेनुरुपा-जगाम । अद्भुतप्रभावा सा इति जानन् भक्त्या सतां पूजित: स दिलीपसूनु-[illegible] तदङ्गविनि:सृतपवित्रमूत्रेण लोचनद्वयं [illegible] । [illegible] स इन्द्रियवहिर्भूतानि वस्तून्यप्यवलीलया द्रष्टुं शशाक ।

Change of Voice.—...पुरस्कृतेन दिलीपनन्दनेन ... उपपन्नदर्शनेन [illegible] ।

Sanjivani.—तदिति। (सतां) (पुरस्कृतः) पूजितः (दिलीपनन्दनः) रघुः (पुण्येन)—पुण्या: पवित्राः, तस्याः अङ्गं तस्य निस्यन्दः द्रवः स एव जलं मूत्रम् इत्यर्थः तेन [तदङ्गनिस्यन्दजलेन] (लोचने) (प्रमृज्य) शोधयित्वा (अतीन्द्रियेषु) इन्द्रियाणि अतिक्रान्तेषु—'अत्यादयः क्रान्ताद्यर्थे द्वितीयया' (२।२।१८ पा. वा. ७८० सि. वा.) इति समासः—'द्विगुप्राप्तापन्नालंपूर्वगतिसमासेषु' (२।४।२६ पा. वा. ८१९ सि. वा.)—इति परवल्लिङ्गताप्रतिषेधात् विशेष्यलिङ्गत्वम्—(भावेषु अपि) वस्तुषु (उपपन्नदर्शनः) सम्पन्नसाक्षात्कारशक्तिः (बभूव) ॥ ४१ ॥

Sanjivani Explained.

'अत्यादयः क्रान्ताद्यर्थे द्वितीया'—The उपसर्ग's अति, &c., are compounded with words ending in द्वितीया to signify 'it transcends.' Thus to mean 'transcending the senses', अति is compounded with इन्द्रियाणि।

'द्विगुप्राप्तापन्नालंपूर्वगतिसमासेषु' * * लिङ्गत्वम्।

The compound, अतीन्द्रिय, does not receive the gender of its last component इन्द्रिय to become always neuter. It is, on the other hand, an adjective and so follows the gender of its substantive. This Várttika is attached to the Sutra, "परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः," which means that 'in द्वन्द्व and तत्पुरुष compounds the whole words get the gender of the last components.' E.g., मयूरीकुक्कुटौ, गङ्गाप्रवाहः। The Várttika enjoins that in द्विगु which is a variety of तत्पुरुष, in a compound beginning with the component प्राप्त, आपन्न, or अलम्, as well as in गतिसमास, the whole word does not follow the gender of the last component. अतीन्द्रिय being a case of गतिसमास falls under the scope of the Várttika.

Bengali.—সাধুগণপূজিত দিলীপনন্দন (রঘু) নন্দিনীর শরীরনিঃসৃত জলে (অর্থাৎ মূত্রে) লোচনদ্বয় মার্জিত করিয়া ইন্দ্রিয়ের বহির্ভূত বস্তু সকলও দেখিতে সমর্থ হইলেন। ৪১।

English rendering.—Washing (his) eyes with the holy water that issued out of her body, the delighter of Dilipa,

placed by the wise at their fore-front, became endued with power of vision in respect of things beyond the ken of the senses. 41.

Grammatical notes, &c., &c.

Sama'sa.—तस्याः यज्ञ तदङ्गम् (षष्ठीतत्०) तत्र निस्यन्दः तदङ्गनिस्यन्दः (षष्ठीतत्) स एव जलं तदङ्गनिस्यन्दजलम् (रूपककर्मधा) तेन (2) पुरः (अव्य) कृतः—अतएव पूजितः पुरस्कृतः (सप्तमीतत्) (3) अतिक्रान्ताः इन्द्रियाणि अतीन्द्रियाः (गतिसमासः) तेषु—(V. Sanj. Expl.) (4) उपपन्नं दर्शनं यस्य स उपपन्नदर्शनः (बहु) (5) नन्दयतीति नन्दनः, दिलीपस्य नन्दनः दिलीपनन्दनः (षष्ठीतत्)।

Case-ending.—(1) तदङ्गनिस्यन्दजलेन—करणे तृतीया (2) पुरः न—विशेषणं—'कृतेन' इत्यस्य (3) सताम्—'पुरस्कृतः' इति वर्तमानविहित 'क्त' प्रत्ययोगे अनुक्ते कर्तरि षष्ठी (V. notes on सताम्, Sl. 16, C. II.) (4) अर्थेषु—विषयाधिकरणे सप्तमी।

Sanjivani.—(1) लोचन—'लोचनं नयनं नेत्रमीक्षणं चक्षुरक्षिणी। दृग्-दृष्टी च।' (अ.)

Different meanings.—(1) अर्थ—'अर्थः स्यात्सलक्षणाभिप्रायप्रयोजनवस्तुषु। निवृत्तौ विषये शब्दार्थेषु विभूतिधनयोरपि' (मे.)

Derivation.—(1) निस्यन्दः—नि+स्यन्द्+घञ्। The स् of स्यन्द् is not changed into ष् though it is preceded by नि because the subject of स्यन्द् is inanimate. See "अनुविपर्यभिनिभ्यः स्यन्दतेरप्राणिषु" (८।३।७२ पा. २११८ सि.) (2) लोचन—लोच्+ल्युट् (करणे) (3) प्रसन्न—प्र+सद्+क्त (4) पुरः—पृ (पुर्)+असि (पूर्वाधरावराणामसि पुरधवश्चैषाम्) 'पूर्वे वस् पुरस्त्वम्' (उ. ५।३९) or, पुर्+कः—"इगुपधज्ञाप्रीकिरः कः" (३।१।१३५। पा. २८९७ सि.) पुरः। पुरि भवः इति अत्—"तत्र भवः" (४।३।५३। पा. १४३० सि.) [V. R. T. of Amarakos'a, N. S. P. Ed. P. 489.] (5) पुरस्कृत—पुरस्+कृ+क्तः (वर्तमाने कर्मणि) (6) सताम्—अस्+शतृ (6th c. p.) (7) अर्थ-

अपहृतम्—अप + हृ + क्तः (कर्मणि) (8) बभूव—भू + लिट् + णल् (9) आसेदुः—सद् + लिट् (भावे, 7th c. p.) (10) नन्दनः—नन्द् + णिच् + ल्युः (कर्तरि) ।

Conjugation.—(1) भू—(V. Sl. 15, C. III.) (2) मृज् (to purify) मार्ष्टि, मृष्टः, मृजन्ति, मार्जन्ति (लट्) मृड्ढि (लोट्—हि) अमार्ट्, अमृष्टाम्, अमृजन्—अमार्जन् (लङ्) मृज्यात् (वि. लिङ्) ममार्ज, ममृजतुः, ममार्जतुः, ममृजुः, ममार्जुः, ममार्जिथ, ममार्ष्ठ (लिट्) मार्जिता, मार्ष्टा (लुट्) मार्जिष्यति, मार्क्ष्यति (लृट्) अमार्जीत्, अमार्क्षीत्, अमार्जिष्टाम्, अमार्ष्टाम्, अमार्जिषुः, अमार्क्षुः (लुङ्) अमार्जि (कर्मणि-लुङ्) मिमार्जिषति, मिमृक्षति (सन्—लट्) । Some say.—मिमार्क्षति । मरीमृज्यते (यङ्-लट्) मार्जयति (णिच्-लट्) अममार्जत्, अमीमृजत् (णिच्-लुङ्) मृष्टः (क्तः) । It is also चुरादि—मार्जयति (लट्) ।

Force of अपि is समुच्चय । It means the same thing as 'च' ।

> स पूर्वतः पर्वतपक्षशातनं
> ददर्श देवं नरदेवसम्भवः ।
> पुनः पुनः सूतनिषिद्धचापलं
> हरन्तमश्वं रथरश्मिसंयतम् ॥ ४२ ॥

Prose order.—नरदेवसम्भवः स पुनः पुनः सूतनिषिद्धचापलं रथरश्मिसंयतम् अश्वं हरन्तं पर्वतपक्षशातनं देवं पूर्वतः ददर्श ।

Explanation by use of synonyms.—नरदेवसम्भवः (राजसुतः) सः (रघुः) पुनःपुनः (वारंवारं) सूतनिषिद्धचापलं (सारथिना निवारितौद्धत्यं) रथरश्मिसंयतं (स्यन्दनप्रग्रहबद्धम्) अश्वं (वाजिनं) हरन्तम् (अपहृत्य पलायमानं) पर्वतपक्षशातनं (महीधरपक्षच्छेदकं) देवम् (इन्द्रं) पूर्वतः (पूर्वस्यां दिशि) ददर्श (अवलोकयामास) ।

Substance.—अथ किं स ददर्श इत्याह । [illegible] पूर्वस्यां स ददर्श यत् [illegible] इन्द्रः [illegible] वाजिनं हरन् गच्छति । तस्य रथरश्मिषु बद्धो [illegible] । स च इतस्ततः [illegible] वारंवारं [illegible] ।

वाहयित्र यस्य वाजवन्तं मङ्मुं निवारयति। एवं देवो हि य: कदाचन पक्षिच्छद् पुरन्दरोऽस्ति।

Change of voice.—नरदेवसुभवेन तेन......हरन् पर्वतपक्षशातन: देवो ददृशे।

Sanjivani.—स इति। (नरदेवसम्भव:) (स:) रघु: (मुन: पुन:) सुहिन नियन्त्रणारम्भं निवारितोज्ज्वलं [मृतनिर्विग्नवापलम्] रथस्य रश्मिभि: प्रयते:—"विरल प्रवहीतरश्मी" इत्यमर: (Cole. p. 340)—हयतं वर्ष [रथरश्मिसंयतम्] (वयं हरन्तं) पर्वतपचामां शातनं इदक्षं [पर्वतपक्षशातनम्] (देवम्) मन्द (पूर्वत:) पूर्वस्यां दिशि (ददर्श) ॥ ४२ ॥

Sanjivani Explained.

पुन पुन: सुतनिर्विग्नचापलम्—The idea is that the horse stolen was very restless. It wished to be free and struggled to break the cords with which it was tied to Indra's car. The driver had not only to manage the steeds of the car but had also to curb the new unbroken animal. It is a graphic picture. We see, as it were, the steed puffing and snorting in restlessness, and Mátali checking it again and again.

Bengali.—(তথন) সেই নৃপাত্মজ (রঘু) বারংবার সারথি কর্তৃক নিবারিতোদ্ধত্য রথরশ্মি দ্বারা আবদ্ধ অশ্বকে অপহরণ করিয়া পলায়নপর পর্বতপক্ষচ্ছেদক দেব (ইন্দ্রকে) পূর্বদিকে দেখিতে পাইলেন।৪২।

English rendering.—He, who was born of a god among men, beheld before him the deity who had clipped the wings of mountains, taking away the horse, tied with the cords of his car—its restlessness repeatedly curbed by the driver. 42.

Grammatical notes, &c., &c.

Sama'sa.—(1) शातयति इति शातन:, पर्वतानां पक्षा: पर्वतपक्षा: (षष्ठी-तत्) तेषां शातन: पर्वतपक्षशातन: (षष्ठीतत्) तम् (2) नर: देव इव नरदेव: (उपमितसमास:) or, नरेषु देव: नरदेव:, (सप्तमीतत्) तस्मात् सम्भव: (तत्पुरुष:) यस्य स नरदेवसम्भव: (बहु) or, सम्भवतीति सम्भव:, नरदेव: सम्भव: यस्य स:

(3) [illegible] लिखितं सूतनिर्मितम् (तृतीयातत्) सूतनिर्मितं चाकचं यस्य स सूतनिर्मित-चापचः (बहु) तम् (4) रश्मि [illegible] रश्मयः (षष्ठीतत्) सम्यक् यतः संयतः (सुप्सुपा) रश्मिभिः संयतः रश्मिसंयतः (तृतीयातत्) तम् ।

Case-ending.—(1)पूर्वतः—अव्ययं, आधाराधिकरणे सप्तमी (2) पुनः पुनः—अव्ययं, क्रियाविशेषणम्,—वीप्सायां द्विरुक्तिः—"नित्यवीप्सयोः" (८।१।४ पा. २१४० सि.) [To mean नित्य (permanency) and वीप्सा (repetition) a word is repeated.]

Synonyms.—(1) पर्वत—(V. अचल in I, 68.) (2) सूत—(V. नियन्तृ Sl. 17, C. I.) (3) अश्व—(V. तुरग, Sl. 38, C. III.)

Different meanings.—(1) पर्वत—'पर्वतः पादपे पुंसि [illegible] प्रभेदयोः । देवमुन्यन्तरे शैले ।' (मे.) देवमुन्यन्तर—A देवर्षि known by the name of पर्वत । (2) सूत—'सूतस्तु सारथौ तष्टि [illegible] वन्दिपारदयोः पुंसि प्रसूते प्रेरिते त्रिषु ॥' (वि. मे.) (4) रश्मि—'रश्मिः पुमान् दीधितौ स्यात् पक्ष्मप्रग्रहयोरपि ।' (मे.) पक्ष्म=eyelash.

Derivation.—(1) अश्वम्—अश् (धा) + क्वन् (औणादिकः, and c. s.) (2) पूर्वतः—पूर्व + तसिल् (7th c. s.) (3) पर्वतः—पर्वन् + तप् मत्वर्थे । 'तप् पर्वमरुद्भ्याम्' (५।२।१२२ पा. वा. १९४८ सि.) [तप् is the nominal affix bearing the sense of मतुप् which is added to पर्व and मरुत् । e. g. पर्वत, मरुत] (4) [illegible]:—अद + [illegible] + [illegible]:—"[illegible]" (७।२। [illegible] वा. [illegible] सि.) [[illegible] is the substitute of the द of अद when [illegible] is added to it provided it does not mean 'to go'. Here it means 'to kill']. In वा. [illegible] means [illegible] । (5) [illegible] [illegible] (6) [illegible] (7) [illegible] (and c. s.) (8) [illegible]:—[illegible] ([illegible]) + [illegible] [illegible]

Conjugation.—(1) [illegible]—(V. Sl. 15, C. I.) (2) [illegible]—(V. Sl. 39, C. III.) (3) शॄ (to cleave, to kill &c.) [illegible] (लट्) [illegible] (लोट्) [illegible] (लङ्) [illegible] (वि. लिङ्) [illegible] (लिट्) [illegible] (लुङ्) [illegible] (लुट्) [illegible] (लृट्) [illegible] (सन्-लट्) [illegible] [यङ्-लट्] [illegible] (णिच्-लट्)। In the sense of 'going' the form is [illegible]। [illegible] (क्त:)'

'**Allusion** in पर्वतपक्षशातन:—In days of yore the mountains had wings. They flew hither and thither. Men were much oppressed thereby. Indra cut off their wings. Hence Indra came to be called गोत्रभित्। The mountain, Mainâka only, escaped the humiliation by plunging into the ocean. पुरा किल पर्वता [illegible] पक्षा: सन्त: उड्डीय यत्र तत्र पतित्वा लोकान् बाधितुमारेभिरे। इन्द्रस्तदसहमान: सर्वेषां तेषां पक्षान् छित्त्वा तान् यथास्थानं स्थापयामास। मैनाकस्तु सिन्धुसलिले निमज्य पुरन्दरवज्रात् परित्राणं लेभे। (V. हरिवंश)।

> शतैस्तमक्ष्णामनिमेषवृत्तिभि-
> र्हरिं विदित्वा हरिभिश्च वाजिभि:।
> अवोचदेनं गगनस्पृशा रघु:
> स्वरेण धीरेण निवर्तयन्निव ॥ ४२ ॥

Prose order.—रघु: अनिमेषवृत्तिभि: अक्ष्णां शतै: हरिभि: वाजिभि: च तं हरिं विदित्वा गगनस्पृशा धीरेण स्वरेण एनं निवर्तयन् इव अवोचत्। Mallinâtha places 'तम्' after 'रघु:' and 'एनम्' after 'विदित्वा'।

Explanation by use of synonyms.—रघु: (दिलीपनन्दन:) अनिमेषवृत्तिभि: ([illegible]) अक्ष्णां शतै: ([illegible], [illegible]) हरिभि: ([illegible]) वाजिभिश्च ([illegible]) तम् ([illegible]) हरिम् ([illegible]) विदित्वा ([illegible]) गगनस्पृशा ([illegible]) धीरेण ([illegible]) स्वरेण

(ध्वनिना इव) एनम् (इन्द्रं) निवर्तयन् इव (गमनान्निवर्तयन्निव) अवोचत् (अवादीत्)।

Substance.—रघुरनिमेषनयनानाम् यत् सहस्रसंख्यकनयनैः निर्निमेष, वाजिभिश्च हरिवर्णैः इति। अतएवायं पुरन्दर एवेत्य सन्देहाभावः—इति विचार्य तं व्योमव्यापिना गम्भीरस्वरेण गमनात् विरमयन् इव वक्ष्यमाणवचनं समुदाजहार।

Change of voice.—रघुणा...निवर्तयता...अवाचि।

Sanjivani.—शतैरिति। (रघुः) (तम्) अक्ष्णाम् (अनिमेषवृत्तिभिः) निमेषव्यापारशून्यैः (अक्ष्णां शतैः) (हरिभिः) हरिद्वर्णैः—"हरिर्वाच्यवदाख्यातः हरित्कपिलवर्णयोः" इति विश्वः—(वाजिभिः) अश्वैः (च) (हरिम्) इन्द्रं (विदित्वा)—"हरिर्वातार्कचन्द्रेन्द्रयमोपेन्द्रमरीचिषु" इति विश्वः—(एनम्) इन्द्रं (गगनस्पृशा) व्योमव्यापिना (धीरेण) गम्भीरेण (स्वरेण) ध्वनिना एव (निवर्तयन् इव अवोचत्) ॥४३॥

Sanjivani Explained.

हरिर्वाच्यवत् * * वर्णयोः—हरि is said to be an adjective when it means the verdant or the tawny colour.

हरिर्वातार्क &c.—हरि means वात (the god of wind), अर्क (the sun god), चन्द्र, इन्द्र, यम, उपेन्द्र (Vishnu) as well as मरीचि (rays).

Bengali.—নিমেষশূন্য শত শত নয়ন এবং হরিদ্বর্ণ অশ্ব সমূহ দ্বারা তাঁহাকে ইন্দ্র জানিতে পারিয়া রঘু গগনব্যাপি গম্ভীর স্বরে যেন তাঁহাকে নিবৃত্ত করিয়াই বলিতে লাগিলেন। ৪৩।

English rendering.—Recognising him as Indra by his centuries of winkless eyes as also by his green steeds, Raghu, as if arresting him therewith, said unto him in a calm voice reaching the very heavens, 43.

Grammatical notes, &c., &c.

Sama'sa.—(१) निमेषे वृत्तिः निमेषवृत्तिः (षष्ठीतत्) अविद्यमाना निमेषवृत्तिः येषां तानि अनिमेषवृत्तीनि (बहु) तैः। The alternative form

is अभिधानचिन्तामणिव्याख्या—'नभोऽन्तरीक्षं गगनम्—' (V. notes on अनभ्रभाखराम्, Sl. 30, C. I.) (2) गगनं गमयतीति गगनगमम् (उपपदतत्) तेन ।

Case-ending.—(1) हरिः—इत्थंभूतलक्षणे तृतीया (V. वर्णैः in II,8) (2) हरिम्—कारणे तृतीया (3) अभ्याम्—द्विवि षष्ठी (4) भाभिःविवर्णतोभिः—विशेषणं—'हरिः' इत्यस्य ।

Synonyms.—(1) गगन—'द्योदिवौ [1] द्वे [2] स्त्रियामभ्रं [3] व्योम [4] पुष्करमम्बरम् [5] [6] । नभोऽन्तरीक्षं [7] गगनमनन्तं [8] [9] [10] सुरवर्त्म [11] खम् [12] वियद्विष्णुपदं [13] वा [14] तु पुंस्याकाशविहायसी [15] [16] ॥" (अ.) आकाश and विहायस् are optionally masculine.

Different meanings.—(1) हरि—हरिरिन्द्रोहरिर्यमो हरिर्विष्णुर्हरिर्मरुत् । हरिः सिंहो हरिर्भेकोहरिर्वाजी हरिः कपिः ॥ हरिर्यम हरिर्मीन हरिःसोमोहरिर्यमः । हरिः शुको हरिः सर्पः स्वर्णवर्णोहरिः स्मृतः ॥ (अ.भ.स.)

(also V. Sanjivani.) (2) वाजिन्—'वाजीवाणाश्वपक्षिषु' [1] [2] [3] (मे.)

Derivation.—(1) हरिम्—हृ + इः—'अच इः' (उ. ४।१३८) (2) विदित्वा—विद् + क्त्वा (3) वाजिभिः—वाजः (वेगः) विद्यते एषामिति वाज + इनिः (3rd c. p.) (4) अवोचत्—ब्रू or वच् + लुङ्-तिप् (5) गगनगमा—गम् + युच्—गमेर्गश्च: (म् of गम् is changed into ग)—'गमेर्गश्च' (उ. २।७०) गगनम् । गगन + गम् + क्विप् (कर्तरि, 3rd c.s.) (6) निवर्त्तयन्—नि + वृत् + णिच् + शतृ (1st c.s.)

Conjugation.—(1) विद्—(V. Sl. 43, C. II.) (2) गम्—(V. Sl. 85, C. V.)

Remark.—The peculiar use of एनम्—By the Sutra 'द्वितीयाटौस्स्वेनः' (२।४।३४ पा. ५१६ सि.) in all the numbers of द्वितीया, in the singular of तृतीया, and in the dual of षष्ठी and सप्तमी, एन is used for इदम् or एतद् when the latter has already been used. Here the form एनम् was not expected since एतद् or इदम् has not been

used before. But similar use of एन without the previous use of एतद् or इदम् is not rare. Cf. "विद्यामथैनं विजयां जयाञ्च रक्षोविघ्नं विघ्नमविघ्नतात्मा।" (V. भट्टिकाव्य, Sl. 21, C. II). "अथास्तु नैनं कथमर्थसिद्धिः संशय्य कर्णादिषु तिष्ठते यः।" (V. किरातार्जुनीयम्, Sl. 14, C. III). It is to be noted how skilfully Bharatamallika, in his commentary on the verse of भट्टिकाव्य, avoids the difficulty. He remarks—'एनमिति इदमः समानार्थकस्य एनशब्दस्य रूपम्'। Thus he admits the existence of a word, एन, of the same sense as इदम्। एनम् is the form, in the 2nd case singular, of that word and not the optional form of एतद् or इदम्। Bháshyakára, however, uses the form एन whenever the object is referred to for the second time, be it referred to or not, in the first time, by इदम् or एतद्। In other words, एतद् or इदम् need not be used previously to admit the secondary form एन। Such a case as 'यावदनीरसी— एनं पश्य' is correct according to Bháshya. But according to Vopadeva, such a form is not admissible.

One of the Calcutta editors, misunderstanding the use of एनम् in this verse, regards it as a fault of the poet. He hazards the untenable emendation ममीषदेवम् in which case there would be no object for two transitive verbs in succession.

मखांशभाजां प्रथमो मनीषिभि-
स्त्वमेव देवेन्द्र सदा निगद्यसे।
अजस्रदीक्षाप्रयतस्य मद्गुरोः
क्रियाविघाताय कथं प्रवर्तसे॥ ४४॥

मूलस्य पाठान्तरम्।
सदा—यतः (चाः)

Prose order.—(हे) देवेन्द्र! मनीषिभिः त्वम् एव मखांशभाजां प्रथमः सदा निगद्यसे (तथापि) अजस्रदीक्षाप्रयतस्य मद्गुरोः क्रियाविघाताय कथं प्रवर्तसे?

Force of एव in [illegible]। You alone are superior to all who receive shares of sacrificial offerings, i.e., you are the foremost of the deities.

Peculiarity. कथं प्रवर्तते ?—In alliance with कथं denoting गर्हा (censure) both लट् and लिङ् may be used. Here कथम् is used in the sense of 'censure'. It is a reproach to you that you thus hinder the performance of the sacrifice by my father. "विभाषा कथमि लिङ् च" (३।३।१४३ पा. २८०० सि.) [लिङ् is optionally used for the past, the present, as well as the future tense, when the verb is allied with कथम् signifying censure].

त्रिलोकनाथेन सदा मखद्विष-
स्त्वया नियम्या ननु दिव्यचक्षुषा।
स चेत् स्वयं कर्मसु धर्मचारिणां
त्वमन्तरायो भवसि च्युतो विधिः॥ ४५॥

मूलस्य पाठान्तरम्।

सदा—सता (पा.)

Prose order.—त्रिलोकनाथेन दिव्यचक्षुषा त्वया मखद्विषः सदा नियम्याः ननु, स त्वं चेत् धर्मचारिणां कर्मसु स्वयम् अन्तरायः भवसि (तदा) विधिः च्युतः। Mallinatha places 'चेत्' after 'भवसि'।

Explanation by use of synonyms.—त्रिलोकनाथेन ([illegible]) दिव्यचक्षुषा (अतीन्द्रियार्थदर्शिना) त्वया (भवता) मखद्विषः ([illegible]) सदा (नित्यकालं) नियम्याः (निरस्याः) ननु (खलु) स त्वं ([illegible]) चेत् (यदि) धर्मचारिणां (धर्मकार्यविधायिनां) कर्मसु (क्रतुषु) स्वयम् (आत्मनैव) अन्तरायः (विघ्नः) भवसि (जायसे) तदा विधिः ([illegible]) च्युतः ([illegible]) ।

Substance.—[illegible] कोऽपि धार्मिकाणां धर्मकार्येषु [illegible]

विघातकः । त्वं धार्मिकाणां धर्मरक्षकः सन् चेत् स्वयं धर्म्यकार्ये व्याघातात् तद्र
तस्य भवसि तो धर्ममनुविहेत् ? नूनं धर्मानुष्ठानं विलुप्तप्रायं भवेत् । अत एवं
मा कृथा ।

Change of voice.—त्रिलोकनाथः दिव्यचक्षुः त्वं......नियच्छेः—तेन त्वया...अन्तरायेण भूयते, विधिना च्युतम् ।

Sanjivani.—त्रिलोकेति । त्रयाणां लोकानां नाथः त्रिलोकनाथः— "तद्धितार्थ—" (२।१।५१ पा. ६१८ सि.) इत्यादिना उत्तरपदसमासः—तेन [त्रिलोकनाथेन] त्रैलोक्यनियामकेन (दिव्यचक्षुषा) अतीन्द्रियार्थदर्शिना (त्वया) (मखद्विषः) क्रतुविघातकाः (सदा) (नियम्या ननु) शिक्ष्याः खलु (स त्वं धर्मचारिणां) (कर्मसु) क्रतुषु (स्वयम्) (अन्तरायः) विघ्नः (भवसि चेत्) (विधिः) अनुष्ठानम् (च्युतः) नष्टः । लोके सत्कर्मकथैवास्तमियात् इत्यर्थः ॥ ४५ ॥

Sanjivani Explained.

लोके सत्कर्मकथैवास्तमियात्—Even the talk of good acts would then cease in the world.

Grammar.

"तद्धितार्थ—" (Explained in Sl. 30, C. III).

Bengali.—ত্রৈলোক্যনিয়ামক এবং অতীন্দ্রিয়ার্থদর্শী আপনারই যজ্ঞবিঘাতকগণকে সর্ব্বদা দমন করা কর্ত্তব্য। সেই আপনিই যদি স্বয়ং ধর্ম্মচারিগণের ধর্ম্মকার্য্যে বিঘ্ন উৎপাদন করেন, তবে ধর্ম্মানুষ্ঠান বিলুপ্ত হইতে চলিল। ৪৫।

English rendering.—By thee that art the lord of the three worlds and that art endued with celestial vision should the enemies of sacrifice be chastised! Shouldst thou thyself be an obstacle to the rites of the righteous, the ordinances would then be impaired. 45.

Grammatical notes, &c., &c.

Sama'sa.—(1) त्र्यवयवः लोकः त्रिलोकः (शाकपार्थिवादित्वात् मध्यपदलोपि-समासः) तस्य नाथः त्रिलोकनाथः (षष्ठीतत्) तेन—अथवा: लोकाः त्रिलोकाः

(अवमंघा) तेषां नाथः निवीकनाथः षष्ठीतत् says Mallinátha. (See our Remark.) (2) मखे विचक्षि इति मखविदः (उपपदतत्) (3) दिव्यं चक्षुः (ज्ञानं) यस्य स दिव्यचक्षुः (बहु) तेन (4) धर्मं चरन्तीति धर्मचारिणः (उपपदतत्) तेषाम् (5) अन्तः (मध्ये) अथवा अन्तरस्य (अवकाशस्य) आयः (उपस्थितिः) इत्यन्तरायः (सप्तमी or षष्ठी तत्) ।

Case-ending.—(1) त्वया—अनुक्ते कर्त्तरि तृतीया (2) मखविदः—उक्ते कर्त्तरि प्रथमा (3) दिव्यचक्षुषा and निवीकनाथेन—विशेषणम्, 'त्वया' इत्यस्य (4) अयम्—अव्ययं प्रकृत्यादिभ्यस्तृतीया (5) कर्मसु—क्रियाधिकरणे सप्तमी (6) धर्मचारिणाम्—शेषे षष्ठी (7) अन्तरायः—विधेय कर्त्तृपदं, 'त्वम्' इत्युद्देश्य-कर्त्तृपदस्य ।

Synonyms.—(1) अन्तराय—'विघ्नोऽन्तरायः प्रत्यूहः' (अ०)

Different meanings.—(1) विधि—(V. Sl. 29, C. III.)
(2) धर्म—(I, 221,)

Derivation.—(1) मखविदः—मख + विद् + क्विप् (कर्त्तरि, 1st c. p.)
(2) नियम्याः—नि + यम् + यत् (कर्मणि, 1st c. p.)

N. B. By the rule "गदमदचरयमश्चानुपसर्गे" (३।१।१०० पा. २८४८ सि.) the root यम् shall have the affix ण्यत् and not यत् when it is allied with an उपसर्ग । The form would, therefore, be नियाम्य । How is then नियम्य to be defended ?. Bhattoji says that when यम् is prefixed by the उपसर्ग नि, the affix should be यत् । Else it should be ण्यत् । He shows that Várttikakára uses the form अविनियम्य । cf. 'तेन यत् अवेक्षितानियम्यम्, (१६६० वा.) । So he remarks एतेना-नियम्यस्य नायुक्तिः, 'त्वया नियम्या ननु दिव्यचक्षुषा इत्यादि व्याख्यातम् । He gives the तद्धित derivation in the alternative. नियम + यत् नियमे साधुः इत्यर्थः । He quotes this very passage in support. ज्ञानेन्द्र remarks—'If नियम्य, here, admit the तद्धित derivation, त्वया shall be passed as कर्त्तृत्व-विवक्षया तृतीया ।' Jnánedra meets the difficulty in another way. He first derives यम्य and then adds नि to it. In that case, यम् is no longer preceded by any उपसर्ग so as to admit ण्यत् ।

A third explanation adduced by him is संज्ञापूर्व्वकविधेरनित्यत्वात् ख्यता इद्धिर्नप्रवृत्ता । It means that though the affix ख्यत् has ख for इत्, it does not elongate the उपधा अ of यम् into आ । The Sutra which would have determined वृद्धि in the case, *viz.*, "अत उपधायाः" does not sometimes take effect because it is a विधि which sanctions something positive by a technical term. See परिभाषेन्दुशेखर, 93 परिभाषा । (3) धर्मचारिणाम्—धर्म + चर् + णिनिः (ताच्छिल्ये, 6th c. p.) (4) अन्तरायः—अन्तर + इ(ण्) + घञ् (भावे) (5) च्युतः—च्यु + क्तः (कर्त्तरि) (6) विधिः + वि + धा + किः—"उपसर्गे घोः किः" (३।३।९२ पा. ३२७० सि.) ।

N. B. Words formed by कि are used as masculine, except ओषधि, which is always feminine.

Conjugation.—(1) यम् (to tie)—यच्छति (लट्) यच्छतु (लोट्) अयच्छत् (लङ्) यच्छेत् (वि. लिङ्) ययाम, येमतुः, येमिथ, ययन्थ (लिट्) अयंसीत्, अयंसिष्टाम्, अयंसिषुः (लुङ्) अयमि, अयामि (कर्मणि-लुङ्) यियंसति (सन्-लट्) यंयम्यते (यङ्-लट्) यतः (क्तः) । This is also चुरादि—यमयति (लट्) when it means 'परिवेषणम्,' (to serve dishes), and 'वेष्टनम्' (to surround). This root is आत्मनेपदी in the following places—"आङो यमहनः" (१।३।२८ पा. २६९५ सि.) (V. II, 5). (2) च्यु (to fall off)—च्यवते (लट्) च्यवताम् (लोट्) अच्यवत (लङ्) च्यवेत (वि. लिङ्) चुच्युवे (लिट्) अच्योष्ट अच्योषाताम्, अच्योषत (लुङ्) च्योता (लुट्) च्योष्यते (लट्) अच्योष्यत (लङ्) चुच्यूषते (सन्-लट्) चोच्यूयते (यङ्-लट्) च्यावयति (णिच्-लट्) अचिच्यवत्, अचुच्यवत् (णिच्-लुङ्) च्युतः (क्तः) । It is also चुरादि, when it means 'to laugh' or 'to suffer.'—च्यावयति (लट्) ।

Remark.—Mallinátha expounds त्रिलोकनाथ as त्रयाणां लोकानां नाथः । He takes it to be an instance of त्रिपदतत्पुरुष । Manoramá and Tattwabodhini, however, object to this Samása. Their view is that त्रि and लोक cannot be compounded

into त्रिलोक by "दिक्संख्ये संज्ञायाम्" (२।१।५० पा. ७२७ सि.) because त्रिलोक is no संज्ञा। "त्रिपदतत्पुरुष is not also possible here. Nor can the Samása be समाहारद्विगु because the form would then be त्रिलोकी by "द्विगोः" (४।१।२१ पा. ४७६ सि.)। त्रिलोक is not in the list of पात्रादि that ङीप् would elide. Jnánendra solves the difficulty thus :—'लोकशब्दः अत्र लोकसमुदायपरः' and expounds it as त्र्यवयवी 'लोकस्त्रिलोकः (शाकपार्थिवादित्वात् समासः) (*V.* तत्त्व-बोधिनी on २।१।५०। पा. ७२७ सि.)। त्रिलोक, here, stands collectively. But the question is what harm is there to take त्रिलोक as a संज्ञा? Does त्रिलोक mean any three of the fourteen regions that it should not be a संज्ञा? त्रिलोक means three particular regions, (1) स्वर्ग, (2) मर्त्त्य, (3) पाताल।

The second point is that unless it is shown that त्रिपदतत्पुरुष is not recognised by Pánini, we cannot say Mallinátha is wrong for resorting to that Samása. Rather the Várttika 'द्वन्द्व-तत्पुरुषयोरुत्तरपदे नित्यसमासवचनम्' (२।१।५१ पा. वा. ७२८ सि.) hints that त्रिपदतत्पुरुष is possible. The Várttika means if a third word bearing connection follows, the द्वन्द्व or तत्पुरुषसमास which is possible between the previous two is obligatory and not optional. Thus the Samása between त्रि and लोक cannot be optional. "दिक्संख्ये संज्ञायाम्" means 'A दिग्वाचक as well as a संख्यावाचक word forms with another a तत्पुरुष compound if the whole word means a संज्ञा।. E.g. सप्तर्षयः।' "द्विगोः" means 'ङीप् shall be added to a द्विगु compound ending in अकार।' E. g. त्रिलोकी। Várttikakára says that a द्विगु compound ending in अ is always feminine. 'अकारान्तोत्तरपदो द्विगुः स्त्रियामिष्टः' (२।४।१७ पा. वा ८२१ सि.)। But there are exceptions. Kátyáyana himself enjoins 'पात्राद्यन्तस्य न'। A द्विगु compound ending in अ does not become feminine if the last component be पात्र, भुवन, युग &c. E. g. पञ्चपात्रम्, त्रिभुवनम्, चतुर्युगम् &c. समाहारद्वन्द्व's, समाहारद्विगु's that are not अदन्त are always neuter. See "स नपुंसकम्" (२।४।१७ पा. ८२१ सि.)।

तदङ्गमग्र्यं मघवन् महाक्रतो-
रमुं तुरङ्गं प्रतिमोक्तुमर्हसि।
पथः श्रुतेर्दर्शयितार ईश्वरा
मलीमसामाददते न पद्धतिम्॥ ४६॥

मूलस्य पाठान्तरम्।

श्रुतेः—श्रुतेः (चा.)।

Prose order.—हे मघवन्! तत् महाक्रतोः अग्र्यं अङ्गम् अमुं तुरङ्गं प्रतिमोक्तुम् अर्हसि, श्रुतेः पथः दर्शयितारः ईश्वराः मलीमसां पद्धतिं न आददते।

Explanation by use of synonyms.—हे भगवन् (हे देवेन्द्र) तत् (तस्मात् कारणात्) महाक्रतोः (अश्वमेधनामकमहायज्ञस्य) अग्र्यं (श्रेष्ठम्) अङ्गं (साधनम्) अमुं (त्वद्गृहीतं) तुरङ्गं (घोटकं) प्रतिमोक्तुं (प्रत्यर्पयितुम्) अर्हसि (युज्यसे)। श्रुतेः (वेदस्य) पथः (मार्गान्) दर्शयितारः (उपदेष्टारः) ईश्वराः (महान्तः) मलीमसां (मलिनां) पद्धतिं (मार्गं) न आददते (नावलम्बन्ते)।

Substance.—तस्मात् हे देवेन्द्र! अमुमश्वं कृपया प्रतियच्छ। असौ मत्पितुरश्वमेधयज्ञस्य श्रेष्ठं साधनम्—अमुं तुरङ्गं विना यज्ञकार्य्यं विफलं भवेत्। भवादृशा एव वेदमार्गप्रदर्शकाः। एवम्भूता महान्तोजनाः कदापि मलिनमधर्ममार्गं नाश्रयन्ति।

Change of voice.—...अर्ह्यते (त्वया)...दर्शयितृभिः ईश्वरैः मलीमसा पद्धतिः...आदीयते।

Sanjivani.—तदिति। हे (मघवन्) (तत्) तस्मात् कारणात् (महाक्रतोः) अश्वमेधस्य (अग्र्यं) श्रेष्ठम् (अङ्गं) साधनम् (अमुं तुरङ्गं), (प्रतिमोक्तुं) प्रतिदातुम् (अर्हसि)—तथाहि—(श्रुतेः) (पथः दर्शयितारः) सन्मार्गप्रदर्शकाः (ईश्वराः) महान्तः (मलीमसां) मलिनां (पद्धतिं) मार्गं (न आददते) न स्वीकुर्वते—असन्मार्गं नावलम्बन्त इत्यर्थः। "मलीमसं तु मलिनं कच्चरं मलदूषितम्" इत्यमरः (Cole. p. 272)॥ ४६॥

Bengali.—হে দেবরাজ! সেই জন্য মহাযজ্ঞের শ্রেষ্ঠ সাধন ঐ অশ্বটীকে প্রত্যর্পণ করা (আপনার) কর্ত্তব্য। বেদমার্গপ্রদর্শক মহাজনগণ মলিন পদ্ধতি অবলম্বন করেন না। ৪৬।

English rendering.—It behoveth thee, therefore, O Maghavan, to release the steed which is the foremost element of the great sacrifice. The lords of the universe that should point out the paths laid down in the Vedas should not themselves adopt foul ways! 46.

Grammatical notes, &c. &c.

Sama'sa.—(1) महांश्चासौ क्रतुश्चेति महाक्रतुः (कर्मधा) तस्य (2) तुरङ्गम —(V. Sl. 38, C. III.).

Case-ending.—(1) तत्—अव्ययं, हेतौ पञ्चमी (2) महाक्रतोः—शेषे षष्ठी (3) पथः—'दर्शयितारः' इति शीलार्थतृन्प्रत्ययान्तशब्दयोगे द्वितीया—"न लोकाव्ययनिष्ठाखलर्थतृनाम्" (V. notes on सागरम्, Sl. 2, C. I.) (4) श्रुतेः—शेषे षष्ठी।

Synonyms.—(1) श्रुति—(II, 2.) (2) मघवन्—(V. Sl. 26, C. (3) मलीमस—(V. Sanjivani.).

Different meanings.—श्रुति—(II, 2.) (2) पद्धतिः—'पद्धतिः पथि पङ्क्तौ च' (हे.) (3) ईश्वर—(V. Sl. 1, C. I.).

Derivation.—(1) पद्धतिम्—पाद+हन्+क्तिन्। पाद is changed into पद् by the rule "हिमकाषिहतिषु च" (६।३।५४। पा. ९९२ सि.) [पाद is changed into पद् if it be followed by such words as हिम, काषिन् or हति। E.g. पद्धिम पत्काषिन्, पद्धति। (2) अयाम्—अय+यत् (भवार्थे, 2nd c. s.) (3) मघवन्—(V. Sl. 26, C. I.) (4) दर्शयितारः—दृश्+णिच्+तृन् (शीलार्थे, 1st c. p.) (5) मलीमसाम्—मल्+ईमसच् (मत्वर्थे निपात्यते)+टाप् (2nd c. s.)—"ज्योत्स्नातमिस्राशृङ्गिणोर्जस्विन्नूर्जस्वलगोमिन्-

मलिनमलीमसाः" (५।२।११४ पा. १९२१ सि.) (V. notes on ऊर्जस्वल in II, 5.) (6) आददते—आ + दा + लट्—अन्ते (7) ईश्वर—(V. Sl. 1, C. I.) (8) प्रतिमोक्तुम्—प्रति + मुच् + तुमुन् (9) अर्ह् + लट्—सिप्।

Conjugation.—(1) दा—(V. Sl. 18, C. I.) (2) मुच्—(V. Sl. 46, C. I.).

Rhetoric.—The figure of speech is अर्थान्तरन्यास।

इति प्रगल्भं रघुणा समीरितं
वचो निशम्याधिपतिर्दिवौकसाम्।
निवर्त्तयामास रथं सविस्मयः
प्रचक्रमे च प्रतिवक्तुमुत्तरम् ॥ ४७ ॥

Prose order.—दिवौकसाम् अधिपतिः इति रघुणा समीरितं प्रगल्भं वचः निशम्य सविस्मयः (सन्) रथं निवर्त्तयामास—उत्तरं प्रतिवक्तुं प्रचक्रमे च। Mallinátha places 'दिवौकसाम् अधिपतिः' after 'निशम्य'।

Explanation by use of synonyms.—दिवौकसाम् (देवानाम्) अधिपतिः (प्रभुः) इति (इत्थं) रघुणा (दिलीपनन्दनेन) समीरितं (व्याहृतं) प्रगल्भं (निर्भीकं) वचः (वाक्यं) निशम्य (आकर्ण्य) सविस्मयः (आश्चर्याविष्टः सन्) रथं (स्यन्दनं) निवर्त्तयामास (विरमयामास), उत्तरं (प्रतिवचनं) प्रतिवक्तुं (दातुं) प्रचक्रमे च (आरब्धवांश्च)।

Substance.—रघुरेवं निर्भीकमुवाच।, देवेन्द्रस्तन्निशम्य साश्चर्यो जातः रथगतिं च निवार्य तदुत्तरं दातुमुपचक्रमे।

Change of voice.—अधिपतिना...सविस्मयेन रथः निवर्त्तयामासे।

Sanjivani.—इतीति। (इति रघुणा समीरितं प्रगल्भं वचः) (निशम्य) आकर्ण्य—दिवौकसः, स्वर्गौकसः—"दिवं स्वर्गेऽन्तरीक्षे च" इति विश्वः—तेषाम् [दिवौकसाम्] (अधिपतिः) देवेन्द्रः—रघुप्रभावात्—(सविस्मयः) सन् (रथं निवर्त्तयामास, उत्तरं प्रतिवक्तुं प्रचक्रमे च) ॥ ४७ ॥

Sanjivani Explained.

"दिवं स्वर्गेऽन्तरीक्षे च"—दिव means स्वर्ग and अन्तरीक्ष। Thus Mallinátha takes the word to be दिव and not दिव्। In this case दिवौकस् is not anomalous. If the word be दिव्, it must admit the augment अ by anomaly to form दिवौकस्, otherwise we would have दिवोकस्।

Bengali.—দেবরাজ এইরূপ রঘুবাক্যত নির্ভীক বচন শ্রবণানন্তর বিস্মিত হইয়া রথ (গতি) নিবৃত্ত করিলেন এবং উত্তর দান করিতে প্রবৃত্ত হইলেন । ৪৭ ।

English rendering.—Having heard these proud words uttered by Raghu, the ruler of the denizens of heaven stopped his car with amazement and commenced to address him in reply. 47.

Grammatical notes, &c., &c.

Sama'sa.—(1) सम्यक् ईरितं समीरितम् (सुपसुपा) (2) अधिकः पतिः अधिपतिः (कर्मधा) (3) दिवौकसाम्—(V. Sl. 19, C. III.) (4) विस्मयेन सह वर्त्तमानः सविस्मयः (तुल्ययोगबहु) See सार्गलम् in I, 79.

Case-ending.—(1) इति—अव्ययं, क्रियाविशेषणम् (2) रघुणा—अनुक्ते कर्त्तरि तृतीया 'समीरितम्' इत्यस्य (3) दिवौकसाम्—शेषे षष्ठी।

Synonyms.—(1) दिवौकस्—(V. Sl. 19, C. III.) (2) रथ—'याने चक्रिणि युद्धार्थे शताङ्गः स्यन्दनो रथः' (अ.) (3) उत्तर—'प्रतिवाक्योत्तरे समे।' (अ.)

Different meanings.—(1) उत्तर—'उत्तरं प्रवरोर्द्ध्वयोः उदीच्यप्रतिवचसोरुत्तरस्तु विराटजे' (मे.) (2) दिवौकस्—(V. Sl. 19, C. III.) (3) रथ—'रथः पुमानवयवे स्यन्दने वेतसेऽपि च।' (मे.)

Derivation.—(1) प्रगल्भम्—प्र+गल्भ्+अच् (2nd c. s.) (2) समीरितम्—सम्+ईर्+क्तः (कर्मणि, 2nd c. s.) (3) निवर्त्य—नि+वृत्+

ल्यप् (4) निवर्त्तयामास—नि + वृत् + णिच् + लिट्—णल् (5) प्रचक्रमे—प्र + क्रम् + लिट्-ए (6) प्रतिवक्तुम्—प्रति + वच् + तुमुन् (7) उत्तरम्—उत् + तृ + अच् (कर्त्तरि, 2nd c. s.) or, उद् + तरप्—अतिशयिनीद्गतः—द्रव्यप्रकर्षत्वाभावात्: (V. K. T. of Amarokos'a, N. S. P. Ed. P. 496.)

Conjugation.—(1) भ्रम्—(V. Sl. 14, C. II.) (2) वृत्—(V. Sl. 43, C. III.) (3) क्रम्—(V. Sl. 15, C. II.)

PECULIARITIES.

दिवौकसाम्—(Its peculiarities, V. Sl. 19, C. III.)

प्रचक्रमे—आरम्भार्थत्वात् "प्रोपाभ्यां समर्थाभ्याम्" (१।३।४२ पा. २७१५ सि.) (V. II. 15) इति आत्मनेपदम्।

Force of च is समुच्चय।

यदात्थ राजन्यकुमार तत् तथा
यशस्तु रक्ष्यं परतो यशोधनैः।
जगत्प्रकाशं तदशेषमिज्यया
भवद्गुरुर्लङ्घयितुं ममोद्यतः॥ ४८॥

Prose-order.—(हे) राजन्यकुमार ! यत् आत्थ तत् तथा, तु यशोधनैः परतः यशः रक्ष्यं, भवद्गुरुः जगत्प्रकाशम् अशेषं मम तत् (यशः) इज्यया लङ्घयितुम् उद्यतः।

Explanation by use of synonyms.—हे राजन्यकुमार ! (हे क्षत्रियतनय !) यत् (यद्वचनम्) आत्थ (ब्रवीषि) तत् (तद्वचनं) तथा (सत्यमेव); तु (किन्तु) यशोधनैः (अस्मादृशैः यशःसर्वस्वैः) परतः (शत्रुतः) यशः (कीर्त्तिः) रक्ष्यं (पालनीया)। भवद्गुरुः (त्वज्जनकः) जगत्प्रकाशं (लोकप्रसिद्धम्) अशेषं (निखिलं) मम (मे) तत् (यशः) इज्यया (यागेन) लङ्घयितुं (तिरस्कर्त्तुं, निराकर्त्तुमिति यावत्) उद्यतः (उद्युक्तः, प्रवृत्त इति यावत्)।

Substance.—भोः क्षत्रियकुमार ! त्वदुक्तं वचः सत्यमेव, किन्तु आदृशानां

यशसां यश एव सर्व्वस्वं । यदि कोऽपि प्रभुतदयशः क्षुंमिच्छति तदा केनचिदुपायेन तदवश्यं रक्षणीयम् । त्वज्जनकः शतावश्वमेधानमुतिष्ठति चेत् शतावमेधी मां विना कोऽपि नासीति मे यशः मलिनं स्यात्, मम अनन्तप्रसिद्धा शतक्रतुरित्याख्या लुप्ता स्यात् । अतएव यथा तस्य यागः निष्पन्नो न स्यात् मम च लोकप्रसिद्धा शतक्रतुसंज्ञा नावनियात् तदर्थं मया त्वत्पितुरश्वमेधयज्ञस्य प्रधानाङ्गभूतोऽयमश्वः अपहृतः ।

Chnge of voice.—उच्यते...तेन...(भूयते) यशोधनः....रक्ष्येयुः or यशसा रक्ष्यं च (भूयते)...भवद्गुरुणा...उद्यतम् ।

Sanjivani.—यदिति । हे (राजन्यकुमार !) क्षत्रियकुमार !—"मूर्द्धाभिषिक्तो राजन्यो बाहुजः क्षत्रियो विराट्" इत्यमरः (Cole. p. 191)—(यत्) वाक्यम् (आत्थ) ब्रवीषि—"ब्रुवः पञ्चानाम्—" (३।४।८४ पा. २४५० सि.) इत्यादिना आहादेशः—(तत्) (तथा) सत्यं (तु) किन्तु (यशोधनैः) अस्माद्दृशैः (परतः) शत्रुतः (यशः) रक्ष्यम् ततः किमत आह—भवद्गुरुः (त्वत्पिता) (जगत्प्रकाशं) लोकप्रसिद्धम् (अशेषं) सर्व्वं (मम) (तत्) यशः (इज्यया) यागेन (लङ्घयितुं) तिरस्कर्त्तुम् (उद्यतः) उद्युक्तः ॥ ४८ ॥

Sanjivani Explained.

"ब्रुवः पञ्चानाम्"—(V. Remark on Sl. 63, C. III.).

"मूर्द्धाभिषिक्तो राजन्यः * * * विराट्"—These five words are synonyms.

Bengali.—হে ক্ষত্রিয়কুমার ! (তুমি) যাহা বলিলে তাহা সত্য, কিন্তু যশঃসর্ব্বস্বজনগণের শত্রু হইতে যশঃ রক্ষা করা উচিত। তোমার পিতা জগৎপ্রসিদ্ধ আমার সেই অশেষ যশঃ যজ্ঞ দ্বারা নিরাকৃত করিবার জন্য উদ্যত হইয়াছেন। ৪৭।

English rendering.—It is even so as thou sayest, O Khatriya youth ! But fame should be protected from foes by those with whom fame is wealth. Thy sire is prepared to eclipse by his sacrifice that measureless fame of mine which illumines the universe. 47.

Grammatical notes, &c., &c.

Sama'sa.—(1) राजन्यस्य कुमारः राजन्यकुमारः (षष्ठीतत्) (2) यश एव धनं येषां ते यशोधनाः (बहु) तैः (3) प्रकाशते इति प्रकाशम्—जगति प्रकाशं जगत्प्रकाशम् (सप्तमीतत्) (4) अविद्यमानः शेषः यस्य तत्—अविद्यमानशेषम् or अशेषम् (बहु) 'नञोऽस्त्यर्थानाम्—' (V. notes on अनन्यशासनाम् Sl. 30, C. I.) (5) भवतः गुरुः भवद्गुरुः (षष्ठीतत्)।

Case-ending.—(1) तथा—अव्ययं, विशेषणं 'तत्' इत्यस्य, भवति इत्युक्तक्रियायाः वा (2) यशः—उक्ते कर्मणि प्रथमा (3) यशोधनैः—अनुक्ते कर्त्तरि तृतीया पाक्षिकी षष्ठी भवेत्—"कृत्यानां कर्त्तरि वा" (V. मनीषिणाम्, Sl. 11, C. I.) (4) परतः— अव्ययं, "भीत्रार्थानां भयहेतुः" इति सूत्रादपादाने पञ्चमी—(V. notes on अन्यतः in II, 4). (5) इज्यया—करणे तृतीया (6) मम—शेषे षष्ठी।

Synonyms.—(1) यशस्—'यशः कीर्त्तिः समज्ञा च' (अ.)।

Different meanings.—(1) कुमार—(V. Sl. 12, C. III.) (2) जगत्—(V. Sl. 1, C. I.).

Derivation.—(1) आत्थ—ब्रू + लट्—सिप्—the alternative form is ब्रवीषि।—आह is substituted for ब्रू and थल् takes the place of सिप्। ~~The ह~~ of आह is changed into थ् by the Sutra "आहस्थः" (८।२।३५। पा. २४५१ सि.)। The थ्, by Sandhi, becomes त्। Thus we get the final form आत्थ। (2) राजन्यः—राजन् + यत् (जातौ, राज्ञः अपत्यं पुमान्) "राजश्वशुराद्यत्" (४।१।१३७। पा. ११५३ सि.) [यत् is added to the words राजन् and श्वशुर to signify their descendants. E. g. श्वशुरस्य अपत्यम् पुमान् श्वशुर्यः] The Várttika remarks that 'राज्ञो जातावेवेति वक्तव्यम्'—यत् is added to राजन् to mean it is the king's caste or राज + अन्यः—'राजेरन्यः' (उ, ४।१००।) राजते शोभते इति राजन्यः (V. R. T. of Amarkos'a, N. S. p. Ed. p. 306) (3) रक्ष्यम्—रक्ष् +

यजन् (4) इज्यया—यज् + क्यप् (भावे) + टाप् (3rd c. s.) (5) लङ्घयितुम्—लङ्घ् + तुमुन्।

Conjugation.—(1) ब्रू (to speak) ब्रवीति, आह। ब्रूतः, आहतुः। ब्रुवन्ति, आहुः। ब्रवीषि, आत्थ। ब्रूथः, आहथुः। ब्रूते, ब्रुवाते &c. (लट्) ब्रवीतु, ब्रूताम् (लोट्) अब्रवीत्, अब्रूत (लङ्) ब्रूयात्, ब्रुवीत (वि. लिङ्) उवाच, ऊचथुः, उवचिथ, उवक्थ। ऊचे, ऊचाते, &c. (लिट्) अवोचत्, अवोचत (लुङ्) अवाचि (कर्मणि-लुङ्) वक्ता (लुट्) वक्ष्यति-ते (लृट्) अवक्ष्यत्—त (लृङ्) वाचयति (णिच्-लट्) अवीवचत् (णिच्-लुङ्) विवक्षति-ते (सन्-लट्) वावच्यते (यङ्-लट्) उक्तः (क्तः) (2) लङ्घ्—(V. Sl. 21, C. III.).

हरिर्यथैकः पुरुषोत्तमः स्मृतो
महेश्वरस्त्र्यम्बक एव नापरः।
तथा विदुर्मां मुनयः शतक्रतुं
द्वितीयगामी न हि शब्द एष नः॥ ४९॥

Prose order.—यथा हरिः एकः पुरुषोत्तमः स्मृतः, (यथा च) त्र्यम्बकः एव महेश्वरः (स्मृतः), न अपरः, तथा मुनयः मां शतक्रतुं विदुः। नः एषः शब्दः द्वितीयगामी न हि। Mallinátha places 'मुनयः' after 'माम्'।

Explanation by use of synonyms.—यथा (यादृक्) हरिः (विष्णुः) एकः (केवलः) पुरुषोत्तमः (पुरुषोत्तम इत्याख्यया) स्मृतः (जगति प्रसिद्धः) —यथा च त्र्यम्बकः एव (शिवः एव) महेश्वरः (महेश्वर इत्याख्यया)—स्मृतः—न अपरः (नान्यः कोऽपि) तथा (तादृक्) मुनयः (ऋषयः) मां शतक्रतुं (शतक्रतुसंज्ञं) विदुः (जानन्ति)। नः (अस्माकं, हरिहरयोर्मम च) एषः (अयं, त्रितयः) शब्दः (संज्ञा) द्वितीयगामी (अपरवर्त्ती) न हि (नैव भवति)।

Substance.—पुरुषोत्तम इति नाम्ना यथा विष्णुरेव कथ्यते, अपरो न—त्र्यम्बक इत्याख्यया यथा महेश्वरं विना नान्यः कोऽपि मन्यते—तथा शतक्रतुनाम्ना अहमेव मुनिभिरुच्ये। मां विना नान्यः कोऽपि शतक्रतुनामधेयः जगति विद्यते।

किं बहुना अस्मात्वं हरिहरपुरन्दराणां पुरुषोत्तममहेश्वरशतक्रतुरूपा आख्या अस्मान् विना अपरः कोऽपि अधिकर्तुं नार्हति। तव जनकः शताश्वमेधसाधनेन मम तां शतक्रतुसंज्ञां लब्धुमुद्यतः। अतएव यथा तस्य यज्ञनिष्पत्तिर्न स्यात् शतक्रतुसंज्ञाञ्च स नाधिकर्तुं शक्नुयात् तदर्थं मयाश्वमपहृत्य तद्यज्ञसाधने प्रत्यूहः समुत्पादितः।

Change of voice.—हरिम् एक पुरुषोत्तमं स्मरन्ति, त्र्यम्बकम्... ...महेश्वरं (स्मरन्ति)...मुनिभिः अहं शतक्रतुः विद्ये...एतेन शब्देन द्वितीयगामिना ...(श्रूयते)।

Sanjivani—किं तत् यश इत्याह—हरिरिति। पुरुषेषु उत्तमः इति सप्तमीसमासः—"न निर्द्धारणे" (२।२।१०। पा. ७०४ सि.) इति षष्ठीसमासनिषेधात् —कर्मधारये तु—"सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः" (२।१।६१। पा. पा. ७४० सि.) इत्युत्तमपुरुष इति स्यात्—(यथा) (हरिः) विष्णुः (एकः) एव (पुरुषोत्तमः स्मृतः) यथा च—(त्र्यम्बकः) शिवः एव (महेश्वरः) स्मृतः (न अपरः) अपरः पुमान् न (तथा मां मुनयः शतक्रतुं) (विदुः) विदन्ति—"विदो लटो वा" (३।४।८३। पा. २४६४ सि.) इति जुसादेशः—(नः) अस्माकं, हरिहरयोर्मम च (एषः) वितयः (शब्दः) (द्वितीयगामी न हि)। द्वितीयाप्रकरणे गमिगाम्यादीनामुपसंख्यानात् समासः (See २।१।२४। पा. वा. ६८६ सि. वा.) ॥ ४९ ॥

Sanjivani Explained.

पुरुषेषु उत्तमः * * इति षष्ठीसमासनिषेधात्—पुरुषोत्तम is a सप्तमीतत्पुरुष compound. It cannot be a षष्ठीतत्पुरुष because then पुरुष would be a निर्द्धारषष्ठी which cannot be compounded. The Sutra prohibiting the compound is "न निर्द्धारणे" (V. notes on द्विपेन्द्र in II, 7).

"कर्मधारये तु * * * उत्तमपुरुष इति स्यात्—We cannot even say that it is a कर्मधारय compound. If it be a कर्मधारय the Sutra which would possibly cover the case is "सन्महत् &c. It means [सत्, महत्, परम, उत्तम and उत्कृष्ट are compounded with words in the same case, number and gender, which stand for objects worthy of honour.] Now, if उत्तम be compounded with पुरुष, the form would be उत्तमपुरुष and not पुरुषोत्तम।

"विदो लटो वा"—(V. II, 43.) So भुस्, the लिट् affix in the third person plural, is optionally substituted for झि or अन्ति of लट्। Thus we shall have the form विदु: as alternative of विदन्ति।

द्वितीयगामी * * * समास:—The समास in द्वितीयगामी is द्वितीयातत्पुरुष। It is sanctioned by the Várttika "गम्यादीनामुपसङ्ख्यानम्" which occurs in the section of द्वितीयातत्पुरुष compound. It means 'a word in the second case may be compounded with the words गमिन्, &c.' Some read the Várttika as 'गाम्यादीनामुपसंख्यानम्।' Here द्वितीयम्, a word in the second case, is compounded with गामिन्। Other examples are अन्नबुभुक्षु:, मधुपिपासु:।

Bengali.—যেমন বিষ্ণুই কেবল পুরুষোত্তম বলিয়া (জগতে) বিদিত, ত্র্যম্বকই (কেবল) মহেশ্বর (বলিয়া কীর্ত্তিত হন,) আর কেহই নহেন, সেইরূপ মুনিগণ আমাকেই শতক্রতু বলিয়া জানেন—আমাদের এই আখ্যা অপর ব্যক্তিতে সংক্রান্ত হইতে পারে না। ৪৯।

English rendering—As Hari alone is regarded as 'the highest of all beings,' as Mahes'wara (alone) is 'the three-eyed' and none else, even so the Munis know me only to be 'he of a hundred sacrifices'. Indeed, these names of each of us are incapable of applying to a second person. 49.

Grammatical notes, &c., &c.

Sáma'sa.—(1) पुरुषाणाम् उत्तम: पुरुषोत्तम: (षष्ठी समास:—इति कैयट); पुरुषेषु उत्तम: (सप्तमीतत् इति मल्लीनाथ:); पुरुषाणां, पुरुषेषु or पुरुषेभ्य: उत्तम: (षष्ठी or सप्तमी or पञ्चमीतत्—इति भानुजि. V. Rámás'rami Tiká of Amarakosha). ज्ञानेन्द्र says—'पुरुषेषु उत्तम: इति व्यपदविग्रह: असङ्गत इत्यवोचम्।' (पुरुष and उत्तम cannot be compounded, because पुरुषोत्तम is a संज्ञा or proper name). So Raghunátha in अमरटीका says आत्मनाम् उत्तम: पुरुषोत्तम: (नित्यसमास:)। (2) महांश्चासौ ईश्वरश्चेति महेश्वर: (कर्मधा) (3) त्र्यम्बक:

—(V. Sl. 42, C. II.) (4) न परः (तत्पुरुषः) अपरः (नञ्तत्) (5) शतं क्रतवो यस्य स शतक्रतुः (बहु) तम् (6) द्वितीयंगामी द्वितीयगामी (द्वितीयातत्) (V. Sanj. Expl.).

Case-ending.—(1) यथा and तथा—अव्ययं, क्रियाविशेषणम् (2) पुरुषोत्तमः—विधेयकर्मपदं—'हरिः' इत्युद्देश्यकर्मपदस्य (3) त्र्यम्बकः—उद्देश्यकर्मपदं,—'महेश्वरः' इति विधेयकर्मपदस्य (4) त्र्यम्बकः,' हरिः, अपरः—उक्ते कर्मणि प्रथमा, स्मृतः इत्यस्य। (5) नः—शेषे षष्ठी।

Synonyms.—(1) पुरुषोत्तम—"देवकीनन्दनः शौरिः श्रीपतिः पुरुषोत्तमः। वनमाली बलिध्वंसी कंसारातिरधोक्षजः। विश्वम्भरः कैटभजिद्विधुः श्रीवत्सलाञ्छनः॥" (अ.). (2) त्र्यम्बक—'हरः स्मरहरो भर्गस्त्र्यम्बकस्त्रिपुरान्तकः गङ्गाधरोऽन्धकरिपुः क्रतुध्वंसी वृषध्वजः। व्योमकेशो भवो भीमः स्थाणू रुद्र उमापतिः॥' (अ.) (3) महेश्वर—"शम्भुरीशः पशुपतिः शिवः शूली महेश्वरः। ईश्वरः शर्व ईशानःशङ्करश्चन्द्रशेखरः॥" (अ.)

Different meanings.—(1) हरि—(V. Sl. 43, C. III.) (2) महेश्वर—'महेश्वरो महादेवे कथितोऽधीश्वरेऽपि च' (हे)

Derivation.—(1) हरिः—(V. Sl. 43, C. III.) (2) पुरुषः—पुर् + कुषन् (उ. ४।७४।)—By "अन्येषामपि दृश्यते" (६।३।१३७ पा. ३५३८ सि.) the उ of पुर is optionally lengthened. So, we get two forms—पुरुष and पूरुष। Or पुरी + कुषन् (बाहुलकात्) (3) स्मृतः—स्मृ + क्तः—(वर्त्तमाने कर्मणि)—मुनीनाम् is अनुवर्त्त्य understood. We use the sixth case. See "क्तस्य च वर्त्तमाने" and "मतिबुद्धिपूजार्थेभ्यश्च" in Sl. 16, C. II. (4) विदुः—विद + लट्—अन्ति—the alternative form is विदन्ति (5) द्वितीयगामी—द्वितीय + गम् + णिनिः (भविष्यति)।

Conjugation.—(1) स्मृ—(V. II, 3). (2) विद (to know) वेत्ति वेद। वित्तः, विदतुः। विदन्ति, विदुः। वेत्सि, वेत्थ। वित्थः, विदथुः। वित्थ, विद। वेद्मि, वेद। विद्वः, विद्व। विद्मः, विद्म। (लट्) For the rest

see III, 43. शब्द is used here as singular, because it denotes each name differently.

Remark.—The difficulty in admitting सप्तमीसमास in पुरुषोत्तम is that then it should be determined by the Sutra "संज्ञायाम्" (२।१।४४ पा. ७२१ सि.) and the form would be पुरुषेषूत्तमः। The विभक्ति after पुरुष would not elide. "संज्ञायाम्" is thus explained by Bhattoji—सप्तम्यन्तं सुपा प्राग्वत् संज्ञायाम्। वाक्येन संज्ञानवगमात् नित्यसमासोऽयम्। अरण्येतिलकाः। वनेकसेरुका।। "हलन्तात् सप्तम्याः संज्ञायाम्" इति सप्तम्या अलुक्। [To signify a proper name, a सप्तम्यन्त is compounded with another सुबन्त word Bhattoji remarks 'It is not सप्तमीतत्पुरुष but rather a नित्यसमास inasmuch as the वाक्य (explanatory phrase) cannot express a proper name. The word is अरण्येतिलक and not अरण्यतिलक because the latter cannot mean what the former means.] We cannot but call पुरुषोत्तम a संज्ञा। It is a name of Hari. So the seventh case-ending should not drop. Kaiyata, therefore, takes it as षष्ठीतत्पुरुष। In that case no difficulty arises. The षष्ठी विभक्ति need not be retained. It will elide. But it may be said that as पुरुषाणाम् in that case would be षष्ठी in निर्धार, how then would the two words be compounded? For the answer, see notes on द्विपेन्द्र in II, 7. Even in this case it would not be a proper name; hence, modern grammarians reject even Kaiyata. They call it a नित्यसमास with the विग्रहवाक्य "आत्मनाम्..."

अतोऽयमश्वः कपिलानुकारिणा
पितुस्त्वदीयस्य मयापहारितः।
अलं प्रयत्नेन तवात्र मा निधाः
पदं पदव्यां सगरस्य सन्ततेः ॥ ५० ॥

मूलस्य पाठान्तरम्।

कपिलानुकारिणा—कपिलानुसारिणा।

मा निधाः—मा कृथाः ; मागुगाः। Nand. foot-notes.

पदव्याम्—पदव्याः (पा.).

Prose order.—अतः त्वदीयस्य पितुः अयम् अश्वः कपिलानुकारिणा मया अपहारितः, तव अत्र प्रयत्नेन अलं, सगरस्य सन्ततेः पदव्यां पदं मा निधाः।

Explanation by use of synonyms.—अतः (अस्मात् कारणात् यतः अहमेव शतक्रतुः) त्वदीयस्य (तव) पितुः (जनकस्य) अयम् (एषः) अश्वः (तुरङ्गमः) कपिलानुकारिणा (कपिलमुनितुल्येन) मया—अपहारितः (चोरितः) तव (भवतः) अत्र (अस्मिन्नश्वे) प्रयत्नेन (आयासेन) अलं (प्रयोजनं नास्ति) सगरस्य सन्ततेः (सगरसन्तानस्य) पदव्यां (मार्गे) पदं (चरणं) मा निधाः (न स्थापय)।

Substance.—अश्वमिममुद्धर्त्तुं मा यतस्व। नास्ति ते तादृशी शक्तिः। अतः त्वया कपिलहस्तान्तः। यथा स सगरराजस्य अश्वमेधाश्वमपहृतवान्, अहमपि तथा तव जनकस्य अश्वमपजहार। षष्टिसहस्रसंख्यकाः सगरतनया यथा निरुद्देशमश्वमन्विष्यन्तः चितितलं विदार्य्य पातालं गत्वा कपिलान्तिकस्थमश्वमवलोक्य स तं चौर इति मत्वा अवमन्तुमुद्यताः सन्तः तन्मुनिशापेन भस्मीकृता जाता-स्तथाऽपि एतस्याश्वस्य मोचनाय कृतयत्नस्य तथैव गतिर्भवेत्। मदीयकोपवह्निना तव मरणं ध्रुवमिति जानीहि। अत एतदर्थं प्रयासेनालम्। सगरतनयानां पन्थानं मावलम्बस्व।

Change of voice.—...इमम् अश्वं कपिलानुकारी अहम् अपहारितवान्...मा निधायि।

Sanjivani.—अत इति। यतः अहम् एव शतक्रतुः—(अतः त्वदीयस्य पितुः) (अयं) शततमः (अश्वः) (कपिलानुकारिणा) कपिलमुनितुल्येन (मया) (अपहारितः) अपहृतः—अपहारित इति स्वार्थे णिच्—(तव) (अत्र) अश्वे (प्रयत्नेन अलं) प्रयत्नो मा कारि इत्यर्थः—निषेध्यस्य निषेधं प्रति करणत्वात् तृतीया—(सगरस्य) राज्ञः (सन्ततेः) सन्तानस्य (पदव्यां पदं) (मा निधाः) न निधेहि। निपूर्वाद् दधातेर्लुङ्—"न माङ्योगे" (६।४।७४। पा. २२२८ सि.) इत्यडागमप्रतिषेधः। मद्दाक्रन्दनं ते विनाशमूलं भवेदिति भावः॥ ५०॥

Sanjivani Explained.

"न माङ्योगे" इत्यडागमप्रतिषेधः—In the लुङ् form of धा: of मा निधाः, अट् does not precede the root because of the Sutra "न माङ्योगे" (V. I, 37.).

महदाक्रन्दनं * * भवेत् इति भावः—The sum and substance of Jndra's words are that a terrible fight will ensue that will be for your destruction.

निषेध्यस्यनिषेधं प्रति करणत्वात् तृतीया—प्रयत्न admits of करणे तृतीया। प्रयत्न is निषेध्य or prohibited. अलम् signifies निषेध or prohibition. The prohibited is the करण of prohibition. प्रयत्नेन अलम् means प्रयत्नेन साध्यं नास्ति। See notes on अलं श्रमेण in II, 34.

Bengali.—এই জন্য আমি কপিলানুকারী হইয়া ত্বদীয় জনকের এই অশ্ব অপহরণ করিয়াছি। তোমার এই বিষয়ে বৃথা আয়াস স্বীকারের প্রয়োজন নাই। (তুমি) সগর সন্ততিগণের মার্গে পদ নিক্ষেপ করিও না। ৫০।

English rendering.—Hence, has this horse of thy father been stolen by me after the manner of Kapila. A truce to thy exertions in respect of this matter. Do not set thy foot on the foot-prints of Sagara's sons. 50.

Grammatical notes, &c., &c.

Sama'sa.—(1) कपिलम् अनुकरोतीति कपिलानुकारी (उपपदतत्) तेन (2) प्रकृष्टः यत्नः प्रयत्नः (प्रादिः) तेन (3) गरेण (विषेण गर्भस्थ-मातुर्दत्तेन) सह वर्त्तमानः इति सगरः (तुल्ययोग बहु) तेन (5) सम्यक् ततिः (वंशविस्तृतिः) भवत्यस्याः इति सन्ततिः (बहु) तस्याः।

Case-ending.—(1) अतः—अव्ययं हेतौ पञ्चमी (2) अश्वः—उक्ते-कर्मणि प्रथमा (3) मया—अनुक्ते कर्त्तरि तृतीया (4) पितुः—शेषे षष्ठी (5) प्रयत्नेन—गम्यमानसाधनक्रियापेक्षया प्रयत्नस्य करणत्वात् तृतीया—(V. notes on श्रमेण, Sl. 34, C. II.) (6) अत्र—विषयाधिकरणे सप्तमी (7) तव and सन्ततेः—शेषे षष्ठी (8) वर्त्मने—कृद्योगेऽनुक्ते कर्मणि षष्ठी। Here क्तिन् is a कृदन्त affix in सन्तति। (9) पदभ्याम्—आधाराधिकरणे सप्तमी।

Synonyms.—(1) पद्धति—'अयनं वर्त्म मार्गाध्वपन्थानः पदवी सृतिः। सरणिः पद्धतिः पद्या वर्त्मन्येकपदीति च॥' मार्ग, अध्वन्, पथिन्। वर्त्मनी, एकपदी। (2) सन्तति—(V. I, 69.)

Different meanings.—(1) सन्तति—(I, 69.) (2) कपिल—'कपिला रेणुकायाञ्च शिंशपागोविशेषयोः। पुण्डरीककरिण्यां स्त्री वर्णभेदे विशिष्टकम्। नामले वासुदेवे च मुनिभेदे च कुक्कुरे॥' (मे)

Derivation.—(1) अतः—एतद्+तसिल् (in 5th case.) (2) अश्वः—(V. Sl. 40, C. III.) (3) कपिलानुकारिणा—कब्+इलच्—ब is changed into प—'कवेः पश्च' (उ. १।५५) पकारश्चान्त्यादेशः = कपिलः। कपिल+अनु+कृ+णिनिः कर्तरि 3rd c. s.) (4) त्वदीयस्य - युष्मद्+छः (एकत्वे, 6th c. s.) In द्वित्व and बहुत्व the form is युष्मदीयस्य (5) निधाः—नि+धा+लुङ्—सिप्—माङ्योगे अडागमनिषेधः—(V. माभूत्, Sl. 37, C. I) (6) पदव्याम्—पद्+अविः (औणादिक, 7th c. s.) 'कृदिकारादक्तिनः' इति गणसूत्रात् ङीष्वा। So we get the alternative form पदवी (V. प्रतिपत्तये, Sl. 1, C. I.) (7) सन्ततेः—सम्+तन्+क्तिन् (6th c. s.) The alternative form is सन्तत्याः। सन्तति is feminine and is declined like मति। (8) अपहारितः—अप+[हृ+णिच् (स्वार्थे) =] हारि+क्तः (कर्मणि)।

Conjugation.—(1) धा—(V. Sl. 24, C. I.). (2) हृ (V. Sl. 39, C. III.)

Allusion in the sloka—(V. सागर, Sl. 2, C. I.)

Kapila, the reputed author of the Sánkhya system of philosophy, was a sage of great puissance. He is regarded as an incarnation of Vishnu.

ततः प्रहस्यापभयः पुरन्दरं
पुनर्बभाषे तुरगस्य रक्षिता।
गृहाण शस्त्रं यदि सर्ग एष ते
न खल्वनिर्जित्य रघुं कृती भवान्॥५१॥

मूलस्य पाठान्तरम्।

1 अपभयः—आह पुनः Nand., foot-notes.

For the second line, Cháritravardhana reads व्यपेतभीर्भूमिपुरन्दरात्मजः।

Prose order.—ततः तुरगस्य रक्षिता प्रहस्य अपभयः (सन्) पुनः पुरन्दरं बभाषे—यदि ते एषः सर्गः, अस्त्रं गृहाण, भवान् रघुम् अनिर्जित्य कृती न खलु। Mallinátha places 'यदि' after 'सर्गः'; and 'एषः' before 'ते'।

Explanation by use of Synonyms.—ततः (तदनन्तरं) तुरगस्य (अश्वस्य) रक्षिता (रक्षकः) प्रहस्य (प्रकर्षेण हास्यं कृत्वा) अपभयः (निर्भीकः सन्) पुनः (भयः, पुरन्दरं (देवेन्द्रं) बभाषे (कथयामास,—यदि (चेत्) ते (तव) एषः (अश्वमोचनरूपः सगरसन्ततिपथावलम्बनरूपो वा) सर्गः (निश्चयः)—तर्हि—अस्त्रम् (आयुधं) गृहाण (धारय), भवान् (त्वं) रघुं (दिलीपनन्दनम् मां) अनिर्जित्य (अनभिभूय) कृती (कृतकृत्य, सफलकर्मा इति यावत्) न वै (भविष्यति)।

Substance.—इत्थं देवेन्द्रस्य वचनपरम्परामाकर्ण्य रघोर्भयलेशोऽपि नाभूत्। निर्भीकः सन् स जहास, किं च तं भूयो जगाद—हे देवराज! अश्वप्रत्यर्पणेऽनभिलाषस्ते वर्तते इति चित्रम्। एवमधर्मपथमलम्बसे चेत् तर्हि युद्धार्थमस्त्रं धारय। रघुरहं क्षत्रियः। विना युद्धेन नाहमश्वं ददामि। नूनं जानीहि यत् यावत् मां न जेष्यसि, तावत् त्वं कृतकृत्यो न भवेरिति।

Change of voice.—...रक्षित्रा...अपभयेन...पुरन्दरः...एतेन सर्गेण (भूयते)...गृह्यतां भवता...कृतिना...(भूयेत)।

Sanjivani—तत इति। (ततः तुरगस्य) (रक्षिता) रघुः (प्रहस्य) प्रहासं कृत्वा (अपभयः) निर्भीकः सन् (पुनः पुरन्दरं बभाषे) किमिति—हे देवेन्द्र! (एषः) अश्वमोचनरूपः (ते) तव (सर्गः) निश्चयः (यदि)—"सर्गः स्वभावनिर्मोक्षनिश्चयाध्यायसृष्टिषु" इत्यमरः (Cole. p. 305)—तर्हि—(अस्त्रं गृहाण) (भवान्) (रघुं) माम् (अनिर्जित्य)—कृतमनेनेति—(कृती) कृतकृत्यः (न खलु)—"इष्टादिभ्यश्च" (५।२।८८ पा. १८८८ सि.) इति इनिप्रत्ययः। रघुग्रहणादात्मनो दुर्जयत्वं सूचयति॥ ५१॥

Sanjivani Explained.

"सर्गः स्वभावनिर्मोक्ष—" सर्ग means स्वभाव (nature), निर्मोक्ष (emancipation), निश्चय (resolution), अध्याय (chapter or lesson) as well as सृष्टि (creation).

इष्टादिभ्यश्च—To mean 'इष्टम् &c. अनेन' (the sacrifice, &c., are celebrated by him), इष्ट &c., admit the nominal affix इनि।

N. B. The group, इष्ट &c, does not not cover कृत though it has निराकृत, उपकृत, उपाकृत। Yet Mallinátha takes the help of this Sutra because he thinks that आदि meaning प्रकार can cover कृत as well. But Jayamangala and Bharatamallika, the commentators of Bhattikávya, do not take the help of this Sutra in deriving कृती। They take कृत as a verbal noun derived from कृ + क्त in भाववाच्य; and then add the अस्त्यर्थ इनि to it. Thus कृती means कृतमस्यास्ति or one having (a successful) feat to his credit.

रघुमहत्वात् न चयति— Raghu does not speak of himself in the first person. He names himself. Mallinátha finds a meaning in this use of the third person. It suggests, he says, his invincibility.

Bengali.—তদনন্তর নির্ভীক (সেই) অশ্বরক্ষক (রঘু) হাস্য করিয়া পুনরায় পুরন্দরকে কহিলেন, যদি আপনার এই সংকল্প হইয়া থাকে, (তবে) অস্ত্র গ্রহণ করুন। আপনি রঘুকে জয় না করিয়া (কখনই) কৃতকার্য্য হইতে পারিবেন না। ৫১।

English rendering.—Then that fearless protector of the steed, laughing aloud, once more said unto *Purandara*—'Take up weapons if this be thy resolve. Verily, without vanquishing Raghu success cannot be thine.' 51.

Grammatical notes, &c., &c.

Sama'sa.—(1) अपगतं भयं यस्मात् सः अपभयः (बहु) (2) पुरः (असुराणां) दारयति इति पुरन्दरः (उपपदतत्) तम् (3) तुरेण (त्वरया) गच्छतीति तुरगः (उपपदतत्) तस्य।

Case-ending.—(1) ततः—अव्ययं, आनन्तर्य्ये पञ्चमी (2) पुनः—अव्ययं क्रियाविशेषणम् (3) तुरगस्य—कर्तृकर्मणोः कृति कर्मणि षष्ठी (4) ते—शेषे षष्ठी, or, क्तस्य च वर्त्तमाने कर्त्तरि षष्ठी।

Synonyms.—(1) पुरन्दर—(V. मघवन्, Sl. 26, C. I.) ।

Derivation.—(1) प्रहस्य—प्र + हस + ल्यप् (2) पुरन्दरम्—पुर + (दृ + णिच् =) दारि + खच् (कर्त्तरि, 2nd c.s.) (3) रचिता—रच् + तृच् (1st c.s.) (4) गृहाण—ग्रह + लोट्—हि (5) सर्गः—सृज + घञ् (भावे) (6) अनिर्जित्य—निर् + जि + ल्यप् = निर्जित्य । न + निर्जित्य = अनिर्जित्य । तुक् (त्) comes after जि by —"ह्रस्वस्य पिति कृति तुक्" (V. जगतः, Sl. 1, C. I.) (7) क्रती—क्रतमनेन—क्रत + इनि (1st c. s.) "इष्टादिभ्यश्च" इति मल्लिनाथः भावक्तान्तात् क्रतशब्दात् अस्त्यर्थे इनिः इति जयमङ्गलभरतमल्लिकौ । (V. भट्टिकाव्य ३य अध्याय ५२ श्लो०) (8) भवान्—भा + डवतु: (औणादिकः, 1st c. s.)

Conjugation.—(1) जि—(V. Sl. 5-9, C. I.) (2) भाष्—(V. Sl. 46, C. II.) (3) ग्रह—(V. Sl. 18, C. I.) (4) हस् (to laugh)—हसति (लट्) हसतु (लोट्) अहसत् (लङ्) हसेत् (वि. लिङ्) जहास (लिट्) अहसीत् (लुङ्) हासयति (णिच्-लट्) अजीहसत् (णिच्-लुङ्) हसिता (लुट्) हसिष्यति (लृट्) जिहसिषति (सन्-लट्) जाहस्यते (यङ्-लट्) अहासि (भावे-लुङ्) हसितः (क्तः) N. B. In the sense of ridicule, this root is सकर्मक—'हसन्ति लाघवशौरम्'—दुर्गादासः ।

Remark.—One of the Calcutta editors derives पुरन्दर—as पुर + दृ + खच् । It is incorrect.

स एवमुक्त्वा मघवन्तमुन्मुखः
करिष्यमाणः सशरं शरासनम् ।
अतिष्ठदालीढविशेषशोभिना
वपुःप्रकर्षेण विडम्बितेश्वरः ॥ ५२ ॥

Prose order.—सः उन्मुखः (सन्) मघवन्तम् एवम् उक्त्वा शरासनं सशरं करिष्यमाणः आलीढविशेषशोभिना वपुःप्रकर्षेण विडम्बितेश्वरः (सन्) अतिष्ठत् ।

Explanation by use of synonyms.—सः (रघुः) उन्मुखः (ऊर्ध्ववदनः सन्) मघवन्तम् (इन्द्रम्) एवं (पूर्वोक्तरूपम्) उक्त्वा (गदित्वा) शरासनं (चापं) सशरं (सबाणं) करिष्यमाणः (कर्तुमुद्यतः) आलीढविशेषशोभिना (आलीढाख्यस्थानभेदेनातिविलसता) वपुःप्रकर्षेण (देहोन्नत्येन) विडम्बितेश्वरः (अनुसृतपिनाकी सन्) अतिष्ठत् (तस्थौ)।

Substance.—एवं देवराजं निर्भयमुक्त्वा स वीरपीतो विरराम। अलं वागाडम्बरेण, वीर्यं मे दर्शयामीति निश्चित्य स धनुषि शरं सन्धातुमारेभे। रणाय च दक्षिणपदं प्रसार्य, वाममाकुञ्च्योर्ध्वमुखः सन् संहितशरस्तस्थौ। धन्विनां पञ्च स्थानानि सन्ति। तेषामालीढाख्यं रघुस्तदाधिचकार। एतदेव स्थानं त्रिपुरदाहे त्र्यम्बकोऽवलम्बे। अतस्तदा रघुस्त्र्यम्बक इवादृश्यत।

Change of voice.—तेन उन्मुखेन...करिष्यमाणेन...विडम्बितेश्वरेण अस्थीयत।

Sanjivani.—स इति। (सः) रघुः (उन्मुखः) सन्—(मघवन्तम्) इन्द्रम् (एवम् उक्त्वा) (शरासनं) चापं (सशरं करिष्यमाणः) आलीढेन, आलीढाख्येन स्थानभेदेन; विशेषशोभिना, अतिशयशोभिना [आलीढविशेषशोभिना] (वपुःप्रकर्षेण) देहोन्नत्येन (विडम्बितेश्वरः) अनुसृतपिनाकी सन् (अतिष्ठत्)। आलीढलक्षणमाह यादवः "स्थानानि धन्विनां पञ्च तत्र वैशाखमस्त्रियाम्। वितितस्त्यन्तरौ पादौ मण्डलं तोरणाकृति। अन्वर्थं स्यात् समपदम् आलीढं तु ततोऽग्रतः। दक्षिणे वाममाकुञ्च्य प्रत्यालीढं विपर्ययः॥" इति॥ ५२॥

Sanjivani Explained.

आलीढलक्षणम् * * * इति। The lexicographer, Yádava, thus defines the posture, आलीढ। Indian archers had five postures while shooting. One is called वैशाख, which is masculine as well as neuter. It means that the distance between the two feet is a cubit and a half, the archer standing erect. The second is known as मण्डल। It resembles in shape an arch. The man stands slightly little bending forward. The third, समपद, means that the feet are in the same line. आलीढ,

the fourth, is that posture in which the right foot is stretched forward while the left is slightly contracted. The reverse of this is प्रत्यालीढ़। In other words, when the left foot is streched forward and the right slightly contracted, the posture is प्रत्यालीढ़।

N. B. Rabhasa adds a sixth attitude which he names वैष्णव।

The favourite attitude of the ancient English archer is thus spoken of.—"The archer should plant his feet upon the ground ; so that the body's weight may bear equally and firmly upon both. His heels ought to be about six or eight inches apart, and anciently the left foot was a little in advance of the right. * * * The side only is to be presented to the target, with which your eyes will be brought exactly parallel,—remember to keep both eyes wide open—by turning the face over the left shoulder, until your chin rests just above it. Don't stand bolt upright ; but incline the head and neck slightly forward."

(See *The Book of Archery* by C. N. Hansard.)

Bengali.—ঊর্দ্ধমুখে ইন্দ্রকে এইরূপ বলিয়া তিনি শরাসনে শর-যোজনা করিতে উদ্যত হইলেন। সেই সময়ে (তাঁহার) আলীঢ়নামক অবস্থান হেতুক শোভমান দেহের প্রকর্ষবশতঃ (বোধ হইল যেন) তিনি (ত্রিপুরদহনপ্রবৃত্ত) মহাদেবের ন্যায় দণ্ডায়মান হইলেন। ৫২।

English rendering.—Having said so unto Maghavat, with upturned face, the prince, with a view to fit the bow with an arrow, stood imitating the Lord Siva—his person possessed of commanding stature being rendered particularly graceful by the *A'lida* posture. 52.

Grammatical notes, &c., &c.

Sama'sa.—(1) उन्मुखः—(V. Sl. 39. C. I.) (2) शरैः सह वर्त्तमानं सशरम् (तुल्ययोगबहु) तत्। The alternative form is सहशरम् (3) शराः अस्यन्ते (क्षिप्यन्ते) अनेन इति शरासनम् (उपपदतत्) तत् (4) विशेषेण शोभी विशेषशोभी (तृतीयातत्) आलीढेन विशेषशोभी आलीढविशेषशोभी (तृतीयातत्)

तेन (5) वपुषः प्रकर्षः वपुःप्रकर्षः (षष्ठीतत्) तेन (6) विडम्बितः ईश्वरः येन स विडम्बितेश्वरः (बहु)।

Case-ending.—(1) एवम्—अव्ययं, कर्म—अनुक्ते मुख्ये कर्मणि द्वितीया (2) मघवन्तम्—कर्म,—अनुक्ते गौणे कर्मणि द्वितीया (3) वपुःप्रकर्षेण—हेतौ वा करणे तृतीया।

Synonyms.—(1) मघवन्—(V. Sl. 26, C. I.) (2) शरासन—"अथास्त्रियौ। धनुश्चापौ धन्वशरासनकोदण्डकार्मुकम्। इष्वासोऽपि।" (अ.) (3) आलीढ़—'स्यात् प्रत्यालीढ़मालीढ़मित्यादिस्थानपञ्चकम्।' (अ.) आदिना समपदविशाखमण्डलग्रहः। रभसस्त्वाह—'वैष्णवं समपादञ्च वैशाखं मण्डलं तथा। प्रत्यालीढ़मथालीढ़ं स्थानान्येतानि षट् नृणाम्॥'

Different meanings.—(1) आलीढ़—'आलीढ़ं पादन्यासे क्षिते चिषु।' (वि. मे.) (2) शर—'शरस्तु तेजने वाणे दध्यग्रे ना शरं जले।' (वि. मे.) (3) वपुस्—(V. Sl. 34, C. III.)

Derivation.—(1) उक्ता—ब्रू or वच्+क्तःच (2) मघवन्तम्—मघ मतुप् (2nd c. s.). The alternative form is मघवानम्। In that case the word is मघवन् and it is derived thus.—मह्+कनिन्—हस्य घः वुगागमश्च (निपात्यते)—'श्वन्नुक्षन्—' (उ. १।१५९) [Its declension, &c., V. Sl. 26, C. I.] (3) करिष्यमाणः—कृ+लृट्—शानच् (स्यमानः) (4) शरासनम्—शर+अस्+ल्युट् (करणे) (5) अतिष्ठत्—स्था+लङ्—तिप् (6) आलीढ़म्—आ+लिह्+क्तः (भावे) (7) विडम्बितः—वि+डम्ब्+क्तः (कर्मणि)।

Conjugation.—(1) स्था—(V. Sl. 45, C. I.) (2) कृ—(V. Sl. 8, C. III.)

Cháritravardhana quotes the following definition of आलीढ़:—"नामिता पूर्वजङ्घा च पश्चिमा प्रगुणा भवेत्। असमौ मध्यकायः स्यादालीढ़स्य तु लक्षणम्॥"

Allusion.—पराऽसुरा देवैर्निर्जिताः सन्तो मायिनां परमाचार्यस्य मयस्य

अरत्वम् वपुः । स च चतुष्मसमारो दुर्वितर्क्यपरिच्छदा हैमरौप्यायोमयास्तिस्रः पुरो निर्माय तेभ्यो ददौ । तेऽसुरास्ताभिः पुरीभिरलक्षिताः पूर्ववैरमनुस्मरन्तः सदेवान् त्रीन् लोकान् पीडयाञ्चक्रुः । ततः सर्वे देवाः आगाय हरमुपतस्थिरे । हरोऽपि 'माभैष्ट' इति सुरान् आश्वास्य धनुषि शरान् सन्धाय च त्रिपुरदिधक्षया दिव्यं वर्षशत-मालीढाख्येनावस्थानभेदेन ऊर्द्धमुखः सन् तस्थौ । ततः मध्याह्नकाले त्रिपुरं ददाह । इति भागवतीया वार्त्ता ।

Parallel passage.—"स दक्षिणापाङ्गनिविष्टमुष्टिं नतांसमाकुञ्चित-सव्यपादम् । ददर्श चक्रीकृतचारुचापं प्रहर्त्तुमभ्युद्यतमात्मयोनिम् ॥" (V. Kumára-samvhavam, III, 70).

Rema'rk.—Mallinátha gives दैर्घ्यमत्वेन as a synonym of वपुः-प्रकर्षेण । It does not mean tallnes but firmness or excellence of the body.

रघोरवष्टम्भमयेन पत्त्रिणा
हृदि क्षतो गोत्रभिदप्यमर्षणः ।
नवाम्बुदानीकमुहूर्त्तलाञ्छने
धनुष्यमोघं समधत्त सायकम् ॥ ५३ ॥

Prose order.—रघोः अवष्टम्भमयेन पत्त्रिणा हृदि क्षतः (अतएव) अमर्षणः गोत्रभित् अपि नवाम्बुदानीकमुहूर्त्तलाञ्छने धनुषि अमोघं सायकं समधत्त ।

Explanation by use of synonyms.—रघोः (दिलीपकुमारस्य) अवष्टम्भमयेन (स्तम्भरूपेण सुवर्णमयेन वा) पत्त्रिणा (वाणेन) हृदि (वक्षसि) क्षतः (विद्धः)—अतएव—अमर्षणः (असहनः) गोत्रभित् अपि (इन्द्रोऽपि) नवाम्बुदानीक-मुहूर्त्तलाञ्छने (नवमेघपटलस्य क्षणमात्रचिह्नभूते) धनुषि (दिव्यचापे) अमोघम् (अवन्ध्यं) सायकं (वाणं) समधत्त (संदधौ) ।

Substance.—ततो रघुः स्तम्भवत् स्थूलेन शरेण देवराजं वक्षसि जघान । पुरन्दरोऽपि स्वकीये दिव्ये धनुषि अव्यर्थं वाणं योजयामास । तद्दिव्यं धनुर्नवमेघपटली-चाक्चिक्यशोभां संवर्द्धयदुदितमिति विबुधैः दृष्टम् ।

Change of voice.—...अतेन अमर्षणेन गोत्रभिदा...अमोघः सायकः समधीयत।

Sanjivani.—रघोरिति। (रघोः) (अवष्टम्भमयेन) स्वम्भरूपेण—"अवष्टम्भः सुवर्णे च स्तम्भारम्भयोरपि" इति विश्वः—(पत्रिणा) वाणेन (हृदि) हृदये (अतः) विद्धः—अतएव—(अमर्षणः) असहनः, क्रुद्ध इत्यर्थः (गोत्रभित्) इन्द्रः (अपि)—"सम्भावनीयबोधेऽपि गोत्रः क्षोणीधरे मतः" इति विश्वः—नवाम्बुदानाम्; अनीकस्य, वृन्दस्य; मुहूर्त्तं, क्षणमात्रं; लाञ्छने, चिह्नभूते; [नवाम्बुदानीकमुहूर्त्तलाञ्छने] (धनुषि) दिव्ये धनुषि इत्यर्थः—(अमोघम्) अवन्ध्यं (सायकं) वाणं (समधत्त) संहितवान् ॥ ५३ ॥

Sanjivani Explained.

नवाम्बुदानीकमुहूर्त्तलाञ्छने—The rain-bow is known even to this day, as the bow of Indra. It is the momentary mark of the newly risen piles of clouds.

"अवष्टम्भः सुवर्णे च * * अपि"—अवष्टम्भ means gold, column, as well as begining.

सम्भावनीय * * * मतः—गोत्र means knowledge of what is possible, as well as a mountam.

Bengali.—রঘুর স্তম্ভবৎস্থ বাণ দ্বারা হৃদয়ে বিদ্ধ হওয়ায় ক্রুদ্ধ হইয়া ইন্দ্রও যে ধনু নবজলধরপটলে মুহূর্ত্তকাল শোভাবর্দ্ধন করে সেই নিজ ধনুতে অব্যর্থ শরসন্ধান করিলেন। ৫৩।

English rendering.—Hit on the breast by Raghu's golden shaft, the splitter of mountains, highly enraged, placed an irresistible shaft on his bow—that fleeting reflection of masses of newly risen clouds. 53.

Grammatical notes, &c., &c.

Sama'sa.—(1) गोत्रान् भिनत्ति इति गोत्रभित् (उपपदतत्) (2) मर्षयतीति मर्षणः (सहिष्णुः) न मर्षणः अमर्षणः (नञ्तत्) (3) अम्बुनि ददति इति अम्बुदाः (उपपदतत्) नवाः अम्बुदाः नवाम्बुदाः (कर्मधा) तेषाम् अनीकः नवाम्बुदा-

नीक: (षष्ठीतत्) मुहूर्त्तं लाञ्छनं मुहूर्त्तलाञ्छनम् (द्वितीयातत्) "कालाध्वनोरत्यन्तसंयोगे" (V. तत्प्रथम्, in III, 14.) नवाम्बुदानीकस्य मुहूर्त्तलाञ्छनं नवाम्बुदानीकमुहूर्त्तलाञ्छनम् (षष्ठीतत्) तस्मिन् (4) न मोघ: अमोघ: (नञ्तत्) तम् ।

Case-ending.—(1) रघो:—शेषे षष्ठी (2) हृदि—अवच्छेदाधिकरणे सप्तमी ।

N. B.—[अवच्छेद is a well known technicality of Nyáya. Its general sense is 'limitation'. So अवच्छेद सप्तमी means सप्तमी that is applicable when limitation is signified. This is used when a part of the body is expressed. हृदय or heart is a part of the body. हृदि हत: means struck in the chest and not in the whole body. हृदय is, here, a limited आधार । So सप्तमी is added to it.] (3) धनुषि—आधाराधिकरणे सप्तमी (4) नवाम्बुदानीकमुहूर्त्तलाञ्छने—विशेषणम्,—'धनुषि' इत्यर्थ: ।

Synonyms.—(1) पत्रिन्—(I, 61.) (2) गोत्रभिद्—(V. मघवन्, Sl. 26, C. I.)

Different meanings.—(1) पत्रिन्—"पत्री काण्डे खगे द्रुमे । रथेऽद्रौ रथिके श्येने ।" (हे.) (2) गोत्र—"गोत्रा भूगव्ययोर्गोत्र: शैले गोत्रं कुलाख्ययो: । संभावनीयबोधे च कानने क्षेत्रवर्त्मनो: ॥" (मे.) (4) लाञ्छन—"लाञ्छनं लक्ष्मसंज्ञयो:" (हे.) रथिक—one who is on a car. आख्या—appellation.

Derivation.—(1) अवष्टम्भमयेन—अव + स्तम्भ + घञ् (कर्मणि) = अवष्टम्भ: । The स् of स्तम्भ् is changed into ष् by—"अवाच्चालम्बनाविदूर्य्ययो:" (८।३।६८ पा, २२७३ सि.) [स् of स्तम्भ् is changed into ष्, when it follows the उपसर्ग, अव, and when the idea of आलम्बन (mainstay) or अविदूर्य्य (absence of distance) is meant.] अवष्टम्भ + मयट् (अवयवार्थे, 3rd c. s.) (2) पत्रिणा—पत्र + इनि (अस्त्यर्थे, 3rd c. s.) (3) गोत्रभिद्—गु + त्रन् or, गो + त्रै + क = गोत्र: । गोत्र + भिद् + क्विप् (कर्त्तरि) (4) अमोघ:—मुघ् (चुरादि:) + घञ् कर्त्तरि = मोघ: (न + मोघ:) (5) मुहूर्त्त:

—दुग्ध + क्तः—मुडागमश्च—"राल्लोपः" (६।४।२१ पा. ३६५५ सि.) इति छलोपः। "ढ्लि च" (८।२।७७ पा. ३५४ सि.) इति दीर्घः। (6) समधत्त—सम्+धा+लङ्—त (7) सायकम्—सो+ण्वुल् (कर्त्तरि)।

Conjugation.—(1) धा—(V. Sl. 24, C. I.)

अवष्टम्भमयेन—वल्लभ explains it as अभिमानमयेन। चारित्रवर्द्धन says स्थैर्य्यरूपेण, काञ्चनमयेन वा। Some take it to mean स्पर्द्धापूर्व्वेण and some as आरम्भरूपेण।

दिलीपसूनोः स बृहद्भुजान्तरं
प्रविश्य भीमासुरशोणितोचितः।
पपावनास्वादितपूर्व्वमाशुगः
कुतूहलेनेव मनुष्यशोणितम् ॥ ५४ ॥

मूलस्य पाठान्तरम्।

दिलीपसूनोः—नरेन्द्रसूनोः Nand. foot notes.

Prose order.—भीमासुरशोणितोचितः सः आशुगः दिलीपसूनोः बृहत् भुजान्तरं प्रविश्य अनास्वादितपूर्व्वं मनुष्यशोणितं कुतूहलेन इव पपौ।

Explanation by use of synonyms.—भीमासुरशोणितोचितः (भीषणदानवरुधिरपानशीलः) सः (पूर्व्वोक्तः) आशुगः (बाणः) दिलीपसूनोः (रघोः) बृहत् (विशाल') भुजान्तरं (वक्षः) प्रविश्य (विभिद्य) अनास्वादितपूर्व्वं (पूर्व्वमपीतं) मनुष्यशोणितं (नररुधिरं) कुतूहलेन इव (सकौतुकं सानन्दमितियावत्) पपौ (पीतवान्)।

Substance.—स च देवराजस्य शरः रघोर्व्विशालं वक्षो विभेदयामास। शरता क्षतजेन स युवराजः फुल्लः किंशुक इवाशोभत। पुरा पुरन्दरेण सह मनुष्याणां युद्धं न कदापि बभूव। भीषणा असुराः एव तस्य प्रतिद्वन्द्विनः आसन्, न तु क्षीणबला मानवाः। तस्य शराः सततं भीषणानामसुराणां शोणितं पिबन्तिस्म। मनुष्यशोणितास्वादनं कर्त्तुमिच्छन्ति ते मानुषभुवः। अतः कविरुत्प्रेक्षते साम्प्रतं स इन्द्रशरः रघोः शरीरं प्रविश्य सकौतुकं नररुधिरं पपौ।

Change of voice.—भीमासुरशोणितोचितेन तेन आशुगेन...पपे ।

Sanjivani.--दिलीपेति । भीमानां भयङ्कराणाम् असुराणां शोणिते रुधिरे उचितः परिचितः [भीमासुरशोणितोचितः] (सः) इन्द्रमुक्तः (आशुगः) सायकः (दिलीपसूनोः) रघोः (सम्बन्धि) विशालं (भुजान्तरं) वक्षः (प्रविश्य) (अनास्वादितपूर्वं) पूर्वमनास्वादितम्—सुप्सुपेति समासः—(मनुष्यशोणितं कुतूहलेन इव पपौ) ॥५४॥

Bengali.—ভীষণদানবশোণিতপানাভ্যস্ত সেই বাণ দিলীপপুত্রের বিশালবক্ষঃস্থলে প্রবিষ্ট হইয়া (ইতঃ) পূর্ব্বে অননুভূতাস্বাদন নরশোণিত যেন কুতূহলের সহিত পান করিতে লাগিল । ৫৪ ।

English rendering.—Piercing the broad chest of Dilipa's son, that shaft, endued with great speed and familiar with the blood of terrible *Asuras*, drank, as if with curiosity, human blood untasted before. 54.

Grammatical notes, &c., &c.

Sama'sa.—(1) दिलीपस्य सूनुः दिलीपसूनुः (षष्ठीतत्) तस्य (2) भुजयोः अन्तरं भुजान्तरम् (षष्ठीतत्) (3) सुरविरोधिनः असुराः (नञ्तत्) असुषु रमन्ते इति वा (उपपदतत्) भीमाः असुराः भीमासुराः (कर्मधा) तेषां शोणितं भीमासुरशोणितम् (षष्ठीतत्) तस्मिन् उचितः भीमासुरशोणितोचितः (सप्तमीतत्) (4) न आस्वादितम् अनास्वादितम् (नञ्तत्) पूर्वम् अनास्वादितम् अनास्वादितपूर्वम् (सुप् सुपा) (See I, 1). (5) आशु गच्छतीति आशुगः (उपपदतत्) (6) मनुष्यस्य शोणितं मनुष्यशोणितम् (षष्ठीतत्) (7) कुत् (धर्मनिर्मितक्रिपार्थं) हलति (विलिखति) इति कुतूहलम् (उपपदतत्) or, कुत्वाः हलम् (षष्ठीतत्) तेन । It is a योगरूढशब्द meaning आश्चर्य ।

Case-ending.—(1) दिलीपसूनोः—शेषे षष्ठी (2) कुतूहलेन—प्रकृत्यादिभ्यस्तृतीया ।

Synonyms.—(1) आशुग—(V. पत्रिन्, Sl. 51, C. III.) (2) शोणित—"रुधिरेऽसृग्लोहितास्ररक्तक्षतजशोणितम्" (अ.) (3) मनुष्य—'मनुष्या

मानुषा मर्त्या मनुजा मानवा नराः। स्युः पुमांसः पञ्चजनाः पुरुषाः पूरुषा नरः॥' (अ.)

Different meanings.—(1) आशुग—'आशुगौऽर्कें शरे वायौ।' (हे.) (2) असुर—'असुरः सूर्यदैत्ययोः। असुरा रजनीराश्योः।' (हे.) (3) अन्तर—'अन्तरमवकाशावधिपरिधानान्तर्धिभेदतादर्थ्ये। छिद्रात्मीय विनाबहिरवसरमध्येऽन्तरात्मनि च॥''(अ.)

Derivation.—(1) भुजः—See महाभुज in I, 13. (2) प्रविश्य—प्र + विश् + ल्यप् (3) भीमः—भी + मक् (अपादानवाच्ये) बिभेति अस्मात्। "भीमादयोऽपादाने" (३।४।७४ पा. ३१०३ सि.) [The words भीम, &c., are of अपादानवाच्य। भीम भीष्म, प्रस्कन्दन &c.] When षुक् is added to the root, the form is भीष्म। (4) शोणितम्—शोण् + क्तः (कर्त्तरि) (6) उचितः—वच् + कितच् (औणादिकः) (6) पपौ—पा + लिट्—णल् (7) आशुगः—आशु + गम् + ड (8) कुतूहलेन—कुत् + हल् + कः (मूलविभुजादित्वात् कः 3rd c. s.) (9) मनुष्यः—मनु + यत्—पुक् च—See II, 2.

Conjugation.—(1) पा—(V. Sl. 1, C. I.) (2) विश्—(V. Sl. 28, C. III.).

Force of इव is उत्प्रेक्षा।

Remark.—One of the Calcutta editors says that कुतूहलेन is करणे तृतीया or तृतीया by "सहयुक्तेऽप्रधाने"। We say that it cannot be करण, for तृतीया expresses the condition and not the instrument of the action of drinking. Neither is it a case of सहयुक्ते अप्रधाने तृतीया। There is no सह, and even if it be said that सह is understood, कुतूहल is not an अप्रधान or subsidiary nominative of drinking. In पुत्रेण सहागतः पिता, both पितृ and पुत्र are nominatives of आगत though the coming of the father is represented as the principal act while that of the son as subsidiary. Is कुतूहल here the अप्रधान कर्तृ of पपौ?

हरेः कुमारोऽपि कुमारविक्रमः
सुरद्विपास्फालनकर्कशाङ्गुलौ।
भुजे शचीपत्त्रविशेषकाङ्किते
स्वनामचिह्नं निचखान सायकम्॥५५॥

मूलस्य पाठान्तरम्।

शचीपत्त्रविशेषकाङ्किते—शचिपत्त्रलताक्रियोचिते (चा.)

Prose order.—कुमारविक्रमः कुमारः अपि सुरद्विपास्फालनकर्कशाङ्गुलौ शचीपत्त्रविशेषकाङ्किते हरेः भुजे स्वनामचिह्नं सायकं निचखान।

Explanation by use of synonyms.—कुमारविक्रमः (कार्त्तिकेयतुल्यपराक्रमः) कुमारः अपि (युवराजः रघुः अपि) सुरद्विपास्फालनकर्कशाङ्गुलौ (ऐरावतप्रोत्साहनेन कठिनकरशाखे) शचीपत्त्रविशेषकाङ्किते (पुलोमजया पत्त्राकाररचनाभिर्चिते) हरेः (इन्द्रस्य) भुजे (पाणौ) स्वनामचिह्नं (आत्मनामाङ्कितं) सायकं (शरं) निचखान (निखातवान्)।

Substance.—एवं शरेण भृशं ताडितः रघुरपि देवेन्द्राय चुकोप। आहुतिविघाते तत्प्रहारस्तस्य तं वर्द्धयामास। स हि कुमारः निखिलानां देवानामाश्रयभूतः कार्त्तिकेय इवाप्रतिहतशक्तिरभूत्। कोपस्फुरितः सन् स स्वनामाङ्कितं शरमेकमुज्जहार शत्रुभुजं लक्ष्यीकृत्य तं निचिक्षेप च। वासवः तं वारयितुं न शशाक। स बाणोऽवलीलया वासवस्य भुजं बिभेद। रघोर्नाम च तत्राङ्कितं बभूव। आश्चर्यं यस्याङ्गुलयः सुरगजैरावतप्रोत्साहनेन कठिनाः जाताः सुरेश्वरस्य स भुजः मनुष्यशरभिन्नोऽभूत्। किञ्च यो भुजः सादरं पुलोमजया पत्त्रावलिमाङ्कितः तस्मिन् रघोर्नाम शतशेनाङ्कितं दिदीपे।

Change of voice.—कुमारविक्रमेण कुमारेण...स्वनामचिह्नः सायकः निचख्ने।

Sanjivani.—हरेरिति। कुमारस्य स्कन्दस्य विक्रम इव विक्रमः यस्य सः तथोक्तः [कुमारविक्रमः]—'सप्तम्युपमानपूर्वस्य—' (V. मुनित्रयीणाम्, I, 5-9)

इत्यादिना समासः—(कुमारः) रघुः (अपि) सुरद्विपस्य ऐरावतस्य आस्फालनेन कर्कशाः अङ्गुलयः यस्य सः तस्मिन् (सुरद्विपास्फालनकर्कशाङ्गुलौ] यस्याः पत्र-विशेषकैः अङ्किते (शचीपत्रविशेषकाङ्किते) (हरेः) इन्द्रस्य (भुजे) (स्वनामचिह्नं) (स्वनामाङ्कितं) (सायकं) (निचखान) निखातवान्। निष्कण्टकराज्ये तस्याऽयं महानभिभव इति भावः॥ ५५॥

Sanjivani Explained.

सुरद्विपास्फालनकर्कशाङ्गुलौ—This arm has fingers which are hardened by goading the celestial elephant ऐरावत।

निष्कण्टकराज्ये * * इति भावः—The purport is that this was an instance of great discomfiture or humiliation in his undisputed sway.

'सप्तम्युपमानपूर्वस्य—'—See वृषस्कन्ध in I, 13.

Bengali.—কার্ত্তিক তুল্য বিক্রমশালী কুমারও ঐরাবতচালনজনিত (করতলপ্রহার জন্য) কঠিনাঙ্গুলিযুক্ত (এবং) শচীর পত্রাকার রচনাদি দ্বারা অঙ্কিত ইন্দ্রের বাহুতে স্বনামাঙ্কিত শর নিখাত করিলেন। ৫৫।

English rendering.—The prince, too, with prowess resembling that of Kumára himself, planted a shaft inscribed with his own name on Indra's arm which was painted with dotted figures of diverse kinds by S'achi herself, and whose fingers had been hardened by constantly urging the celestial elephant. 55.

Grammatical notes, &c., &c.

Sama'sa.—(1) कुमारः—(V. Sl. 12, C. III.) कुमारविक्रमः—(V. Sanjivani.)—'सप्तम्युपमान—' (3) द्वाभ्यां—(मुखशुण्डाभ्यां) पिबतीति द्विपः (उपपदतत्) सुरस्य द्विपः सुरद्विपः (षष्ठीतत्)। Here सुर refers to इन्द्र। तस्य आस्फालनं सुरद्विपास्फालनम् (षष्ठीतत्) तेन कर्कशाः सुरद्विपास्फालन-कर्कशाः (तृतीयातत्) तादृशाः अङ्गुलयः यस्य स सुरद्विपास्फालनकर्कशाङ्गुलिः

(बहु) तस्मिन् (4) पत्राकाराणि विशेषकाणि पत्रविशेषकाणि (शाकपार्थिवादित्वात् मध्यपदलोपि-समासः) अथवा: पत्रविशेषकाणि अवीपत्रविशेषकाणि (षष्ठीतत्) तैः अङ्कितः अवीपत्रविशेषकाङ्कितः (तृतीयातत्) तस्मिन् (5) स्वस्य नाम स्वनाम (षष्ठी-तत्) स्वनाम एव चिह्नं यस्य स्वनामचिह्नः (बहु) ।

Case-ending.—(1) हरे.—शेषे षष्ठी (2) भुजे—आधाराधिकरणे सप्तमी (3) सुरद्विप and अवीपत्र—विशेषणं 'भुजे' इत्यस्य ।

Synonyms.—(1) द्विप—(V. Sl. 7, C. II) अङ्गुलिः—'अङ्गुल्यः करशाखाः स्युः ।' (अ.)

Different meanings.—(1) अङ्गुलि—'अङ्गुलिः करशाखायां कर्णिकायां गजस्य च ।' (हे. वि.) (2) विशेषक—'विशेषकोऽस्त्री तिलके विशेषयितरि त्रिषु ।' (मे.) (3) सायक—'शरखड्गयोः' (वि. मे,) (4) हरि—(V. Sl. 43, C. III.).

गजकर्णिका = the tree. विशेषयितृ = distinctive feature.

Derivation.—(1) कुमार—V. Sl. 12, C. III.) (2) विक्रमः—वि + क्रम् + घञ् (करणे) (3) द्विपः—द्वि + पा + क: (4) आस्फालनम्—आ + (स्फल् + णिच् =)स्फालि + ल्युट् (भावे) (5) विशेषकम्—वि + शिष् + ण्वुल् (कर्तरि) (6) निचखान—नि + खन् + लिट्—णल् (7) सायकम्—सो + ण्वुल् (कर्तरि, 2nd c. s.)

Conjugation.—(1) खन् (to dig)—खनति—ते (लट्) खनतु, खनताम् (लोट्) अखनत्—त (लङ्). खनेत्, खनेत (वि. लिङ्) चखान, चख्नतुः, चख्नुः (लिट्) अखनीत्, अखानीत्, अखनिष्ट (लुङ्) अखानि (कर्मणि लुङ्) खायते, खन्यते (कर्मणि-लट्) खायात्, खन्यात्, खनिषीष्ट (आ. लिङ्) खनिता (लुट्) खनिष्यति—ते (लृट्) खानयति (णिच्-लट्) अचीखनत् (णिच्-लुङ्) खनित्वा, खात्वा (क्त्वा) खातः (क्तः) ।

Force of अपि is पक्षान्तर ।

Remark.—One of the Calcutta editors gives only one form of खन् in लुङ्, as 'अखनीत्', । This root gets two forms in लुङ्, viz., अखनीत् and अखानीत् ।

> अहार चान्येन मयूरपत्रिणा
> शरेण शक्रस्य महाशनिध्वजम् ।
> चुकोप तस्मै स भृशं सुरश्रियः
> प्रसह्य केशव्यपरोपणादिव ॥ ५६ ॥

Prose order.—अन्येन मयूरपत्रिणा शरेण शक्रस्य महाशनिध्वजं अहार च, सुरश्रियः प्रसह्य केशव्यपरोपणात् इव सः तस्मै भृशं चुकोप ।

Explanation by use of synonyms—अन्येन (अपरेण) मयूरपत्रिणा (मयूरपत्रवता) शरेण (बाणेन) शक्रस्य (इन्द्रस्य) महाशनिध्वजं (भीषणवज्रसदृशीं पताकां) अहार च (चिच्छेद च) सः (इन्द्रः) सुरश्रियः (देवलक्ष्म्याः) प्रसह्य (बलात्कृत्य) केशव्यपरोपणात् इव (शिरोरुहच्छेदनादिव) तस्मै (रघवे) भृशम् (अत्यर्थं) चुकोप (चुक्रोध, तं हन्तुमियेष इत्यर्थः) ।

Substance.—देवेन्द्रस्य भुजं विभिद्य रघुर्न विरतोऽभूत् । श्रेयसि अत्रबुद्धिर्न कर्तव्या इति चिन्तयन् पुनरपरेण मयूरपत्रशोभिना शरेण शक्रस्य रथध्वजं चिच्छेद । स च ध्वजो वज्रवद्भीषणः शत्रूणां हृदयानि दारयतिस्म । तदवलोकनं दुष्करं किमुत तस्य छेदनम् । छिन्ने च तस्मिन् वज्री रघवेऽतिशयं कुद्धोऽभूत् । तद्ध्वजकर्तनं हि तत्समयं बलात् सुरलक्ष्म्याः केशमुण्डनमिव तस्यावमाननकरं स मेने ।

Change of voice.—(रघुणा)...अहारि ...तेन...चुकुपे ।

Sanjivani.—अहारीति । (अन्येन) (मयूरपत्रिणा) मयूरपत्रवता (शरेण) (शक्रस्य) इन्द्रस्य (महाशनिध्वजं) महाशनिम् अशनिरूपं ध्वजं (अहार) चिच्छेद (च) (सः) शक्रः (सुरश्रियः) (प्रसह्य) बलात्कृत्य, केशानां ; व्यपरोपणात् अवतारणात् छेदनात् [केशव्यपरोपणात्] (इव) (तस्मै) रघवे (भृशम्) अत्यर्थं (चुकोप) तं

केतुमिवेत्यर्थः । "क्रुधद्रुह—" (१।४।३७ पा. ५७५ सि.) इत्यादिना सम्प्रदानाच्चतुर्थी ॥ ५६ ॥

Sanjivani Explained.

"क्रुधद्रुह—" इत्यादिना सम्प्रदानात् चतुर्थी—The चतुर्थी in तस्मै is in सम्प्रदान ; because तत् is सम्प्रदान by the Sutra 'क्रुधद्रुह—&c.' The Sutra, in full, is क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः" । It means 'when a verb having the sense of क्रोध (ange/), द्रोह (malice), ईर्ष्या (envy), or असूया (desire to accuse) is used, in alliance with it the person with whom the subject becomes angry, &c., receives the appellation सम्प्रदान । क्रोध is paraphrased as अमर्ष (incapacity to tolerate), द्रोह as अपकार (infliction of injury through malice), ईर्ष्या as अक्षमा (want of forgiveness), and असूया as गुणेषु दोषाविष्करणम् (finding fault with the merits of a foe). Though the Sutra has only यं प्रति कोपः, the sense is यंप्रति कोपः द्रोहः, ईर्ष्या, असूया च । Bhattoji remarks that as द्रोह, ईर्ष्या and असूया are the result of anger, कोप is common to all and, therefore, Pánini mentions only कोप । Cf. द्रोहादयोऽपि कोपप्रभवा एव गृह्यन्ते । अतो विशेषणं सामान्येन 'यं प्रतिकोपः' इति ।

Bengali.—(রঘু) ময়ূরপক্ষযুক্ত আর একটী বাণ দ্বারা ইন্দ্রের ভীষণ বজ্র সদৃশ (রথ) ধ্বজ ছেদন করিলেন। বলপূর্ব্বক সুরশ্রীর কেশ ছেদন করিলে ইন্দ্র যেরূপ ক্রুদ্ধ হইতেন তদ্রূপ এই ধ্বজ ছেদন করায় তিনি রঘুর উপরি অত্যন্ত ক্রুদ্ধ হইলেন। ৫৬।

English rendering—And with another arrow winged with peacock plumes, he cut off S'akra's enormous banner (that was as) awe-inspiring as the thunder-bolt itself. (At this) Indra became incensed with him as if he had cut off the very locks of the goddess representing the prosperity of the celestials, laying violent hands on her. 56.

Grammaticāl notes, &c., &c.

Sama'sa.—(1) मयूरस्य पत्रं मयूरपत्रम् (षष्ठीतत्) तदस्ति अस्य इति मयूरपत्री, तेन (2) अशनिः एव अस्त्रः अशनिरस्त्रम् (रूपककर्मधा) भयङ्करी

चाशनिध्वजश्चेति महाशनिध्वजः (कर्मधा) तम् (3) सुराणां श्रीः सुरश्रीः (षष्ठीतत्) तस्याः (4) विशेषेण अपरोपणं व्यपरोपणम् (प्रादिः) केशानां व्यपरोपणं केशव्यपरोपणम् (षष्ठीतत्) तस्मात्।

Case-ending.—(1) शरेण—करणे तृतीया (2) शक्रस्य—शेषे षष्ठी 'ध्वजः' इत्यनेन सम्बन्धः (3) तस्मै—कुप्धातुयोगे सम्प्रदानचतुर्थी—(4) भृशम्—अव्ययं, क्रियाविशेषणम् (5) सुरश्रियः—शेषे षष्ठी 'केश' इत्यनेन सम्बन्धः (6) प्रसह्य—अव्ययं। It bears the sense of the fifth case, for it means बलात्, बलमाश्रित्येत्यर्थः—ल्यब्लोपे पञ्चमी। (V. notes on अन्यतः, Sl. 4, C. II.) (7) केशव्यपरोपणात्—हेतौ पञ्चमी (V. notes on आपीनभारोद्वहनप्रयत्नात्, Sl. 18, C. II.)

Synonyms.—(1) मयूर—(V. II, 17.) (2) ध्वज—(V. II, 74) (3) अशनि—'ह्रादिनी वज्रमस्त्री स्यात् कुलिशं भिदुरं पविः। शतकोटिः स्वरुः शम्बो दम्भोलिरशनिर्द्वयोः॥' (अ.) (4) केश—'चिकुरः कुन्तलो बालः कचः केशः शिरोरुहः।' (अ.)

N. B. वज्र and अशनि are अस्त्री।

Different meanings.—(1) केश—'केशः स्यात् पुंसि वरुणे ह्रीवेरे कुन्तलेऽपि च।' (मे.) (2) पत्त्रिन्—(V. Sl. 53, C. III.) (3) ध्वज—'ध्वजः पूर्वदिशो गृहे। शिश्ने चिह्ने पताकायां खट्वाङ्गे शौण्डिकेऽपि च॥' (हे.)

Derivatino.—(1) जहार—हृ + लिट्—णल् (2) मयूरः—मय् + ऊरः 'खर्जिपिञ्जादिभ्य ऊरोलचौ' (उ.४।९०) or, मही + रु + डः—पृषोदरादित्वात् साधुः—मह्यां रौतीति मयूरः (V. R. T. of Amarakos'a, N. S. P. 226.) (3) अशनिः—अश् + अनिः (कर्त्तरि) 'अर्तिसृ—' (उ. २।१०२) (4) ध्वजः—ध्वज् + अच् (5) चुकोप—कुप् + लिट्-णल् (6) केशः—क्लिश् + अच्—ल of the root elides, or, क + शी + डः—के (शिरसि) शेते or क + ईश् + कः—कस्य (शिरसः) ईशः (V. R. T. of Amorakos'a, N. S. P. Ed. P. 270) (7) व्यपरोपणात्—वि + अप + (रुह् + णिच्—) रोपि + ल्युट् (अपादाने, 5th c. s.)

The alternative form is व्यपरोहयात् See "रुहः पोऽन्यतरस्याम्" (७।३।४३। पा. २५९९ सि.) V. II, 26.

Conjugation.—(1) ह—V. Sl. 39, C, III.) (2) कुप् (to be angry at)—कुप्यति (लट्) कुप्यतु (लोट्) अकुप्यत् (लङ्) कुप्येत् (वि. लिङ्) चुकोप, चुकोपिथ (लिट्) अकुपत्, अकुपताम्, अकुपन् (लुङ्) अकोपि (भावे-लुङ्) कोपिता (लुट्) कोपिष्यति (लृट्) कोपयति (णिच्-लट्) अचूकुपत् (णिच्-लुङ्) चुकोपिषति, चुकुपिषति (सन्-लट्) चोकुप्यते यङ्-लट्) This is also चुरादि meaning 'to shine' कोपयति (लट्) कुपित (क्तः)।—"उदुपधाद्भावादिकर्मणोरन्यतरस्याम्" (१।२।२१। पा. ३०५६ सि.) [The क्त in the भाव or the आदिकर्म वाच्य does not optionally become कित् when इट् is the augment and the root to which it is added has an उ for its penultimate letter, e.g., मुदित, मोदित]. कुप् is an उदुपध root, the उ being its last but one letter. In आदिकर्म or भाव वाच्य we would have got the double forms, कोपित and कुपित। But the Vārttika 'शब्विकरणेभ्य एवेष्यते' does not sanction the form कोपित inasmuch as it is a दिवादिगणीय root and, as such, does not admit शप्।

तयोरुपान्तस्थितसिद्धसैनिकं
गरुत्मदाशीविषभीमदर्शनैः ।
बभूव युद्धं तुमुलं जयैषिणो-
रधोमुखैरूर्द्ध्वमुखैश्च पत्रिभिः ॥ ५७ ॥

Prose order.—जयैषिणोः तयोः गरुत्मदाशीविषभीमदर्शनैः अधोमुखैः ऊर्द्ध्वमुखैः च पत्रिभिः उपान्तस्थितसिद्धसैनिकं तुमुलं युद्धं बभूव ।

Explanation by use of synonyms.—जयैषिणोः (अन्योन्यजयाकाङ्क्षिणोः) तयोः (इन्द्ररघ्वोः) गरुत्मदाशीविषभीमदर्शनैः (सपर्णसर्पवद्भया-

वर्षैः) अधोमुखैः (अधोगामिभिः) ऊर्द्धमुखैश्च (ऊर्द्धगामिभिश्च) पत्रिभिः (बाणैः) उपान्तस्थितसिद्धसैनिकं (समीपस्थदेवसैनिकं) तुमुलं (सङ्कुलं) युद्धं (संग्रामः) बभूव (अघटे)।

Substance.—परस्परं जयाभिलाषुकयोस्तयोर्मनुजदेवेन्द्रयोरेवं भीषणः संग्रामो बभूव। एकः सपक्षान् सर्पवद्भयावहान् शरानधो विससर्ज। अपरस्तादृशान् बाणानधो निचिक्षेप। किमधिकमीदृगधोगोर्द्धगैः शरैराकाशभूदेशस्थितयोर्वीरयोर्युद्धं न भूतम्। अलौकिकं तद्रणं दिदृक्षवः सिद्धास्तत्रागमन्। रघोश्च सैनिकाः सविस्मयं स्वेषां स्वामिनो रणचातुरीं ददृशुः।

Change of voice.—...उपान्तस्थितसिद्धसैनिकेन * * * तुमुलेन युद्धेन बभूवे।

Sanjivani—(१) तयोरिति। (जयैषिणोः) अन्योन्यजयाकाङ्क्षिणोः (तयोः) इन्द्ररघ्वोः—गरुत्मन्तः पक्षवन्तः—"गरुत् पक्षच्छदाः पत्रम्" इत्यमरः (Cole. p. 134)—आशीविषाः—आशिषि दंष्ट्रायां विषं येषां ते आशीविषाः, सर्पाः—पृषोदरादित्वात् साधुः, "स्त्रीलाशीर्हिताशंसाहिदंष्ट्रयोः" इत्यमरः (Cole. 367)--ते इव भीमदर्शनाः—सपक्षाः सर्पा इव द्रष्टूणां भयावहाः इत्यर्थः—तैः [गरुत्मदाशीविषभीमदर्शनैः] (अधोमुखैः ऊर्द्धमुखैश्च)—धन्विनोरुपर्य्यधोदेशावस्थितत्वादिति भावः—(पत्रिभिः) बाणैः; उपान्तस्थिताः, तटस्थाः सिद्धाः, देवाः; इन्द्रस्य, सैनिकाश्च रघोः, यस्मिन् तत् तथोक्तम् [उपान्तस्थितसिद्धसैनिकं] (तुमुलं) सङ्कुलं (युद्धं बभूव)॥५७॥

Sanjivani Explained.

तटस्थाः—Apathetic, neutral. The *Siddhas* and the soldiers were mere spectators of the fight between the deity and the prince.

गरुत्पक्षच्छदाः पत्रम्—गरुत्, पक्ष, छद and पत्रम् are synonymous.

स्त्रीलाशीर्हिताशंसाहिदंष्ट्रयोः—आशिस् is feminine. It means हिताशंसा (good-wishes, blessings) as well as अहिदंष्ट्रा (a particular fang of the snake, *viz.*, that in which lies the bag of poison).

Bengali.—পক্ষযুক্ত এবং সর্পবৎ ভীমদর্শন অধোমুখ এবং ঊর্দ্ধমুখ বাণনিকর দ্বারা (পরস্পর) জয়েচ্ছুক তাঁহাদিগের তুমুল যুদ্ধ আরব্ধ হইল। সিদ্ধ এবং সৈনিকগণ সমীপে অবস্থিত (হইয়া উহা দর্শন করিতে লাগিলেন)। ৫৭।

English rendering.—Then with the *Siddhas* and the combatants standing beside them, there occurred a furious fight between the two, each desirous of vanquishing the other, with arrows of aspect as frightful as winged snakes of venomous fangs, coming down and going up. 57.

Grammatical notes, &c., &c.

Sama'sa.—(1) अन्तस्य समीपम् उपान्तम् (अव्ययीभावः) सिद्धाश्च सैनिकाश्च सिद्धसैनिकाः (द्वन्द्वः) उपान्ते स्थिताः उपान्तस्थिताः (सुप्सुपा) तादृशाः सिद्धसैनिकाः यस्मिन् तत् उपान्तस्थितसिद्धसैनिकम् (बहु) (2) आशिषि विषं येषां ते आशीविषाः—'आशीस्तालुगता दंष्ट्रा तया विद्धो न जीवति'। The स् of आशिस् is dropped and इ is lengthened by पृषोदरादि। भानुजि says "दीर्घसलोपौ पृषोदरादित्वात्"। Some say that there is a word 'आशी' which bears the same sense as आशिस्, so आश्यां विषं येषां ते आशीविषाः। In this case, there is no anomaly. "आशीर्मिव कलामिन्दोः—" इति राजशेखरः—[V. V. R. T. of Amarakos'a, N. S. p. Ed. p. 101.] गरुत्मन्तः आशीविषाः गरुत्मदाशीविषाः (कर्मधा) भीमं दर्शनं येषां ते भीमदर्शनाः (बहु) गरुत्मदाशीविषा इव भीमदर्शनाः गरुत्मदाशीविषभीमदर्शनाः (उपमानसमासः) तैः "उपमानानि सामान्यवचनैः" (V. Sl. 12, C. I.) (3) अयम् इच्छतः इति जयैषिणौ (उपपदतत्) तयोः (4) अधोगतं मुखं येषां अधोमुखाः (मध्यपदलोपि बहु) तैः (5) ऊर्द्ध्वगतं मुखं येषां ते ऊर्द्ध्वमुखाः (मध्यपदलोपि-बहु) तैः।

Synonyms.—(1) आशीविष—(V. भुजङ्ग in I, 24).

Different meanings.—(1) सिद्ध—'सिद्धो व्यासादिके देवयोनौ निष्पन्नमुक्तयोः। नित्ये प्रसिद्धे।', (मे.)

Derivation.—(1) सैनिकः—सेना + ठक् (2) मरुत्वान्:—मरुत् + मतुप् (1st c.p.) Here the म of मतुप् is not changed into व, because the word मरुत् is included in the group यवादि। See notes on ककुद्मान्:, Sl. 22, C. IV. (3) जयैषिणीः—जय + इष् + णिनि: (शीलार्थे, 6th c. d.) (4) बभूव—भू + लिट्—णल् (5) तुमुलम्—तु (सौत्रधातुः) + मुलक् (औणादिकः) ।

Conjugation.—(1) भू—(V. Sl. 15, C. III.) (2) इष्—(V. II, 30).

अतिप्रबन्धप्रहितास्त्रवृष्टिभि-

स्तमाश्रयं दुष्प्रसहस्य तेजसः ।

शशाक निर्वापयितुं न वासवः

स्वतश्च्युतं वह्निमिवाद्भिरम्बुदः ॥ ५८ ॥

Prose-order.—वासवः अतिप्रबन्धप्रहितास्त्रवृष्टिभिः दुष्प्रसहस्य तेजसः आश्रयं तम्, अम्बुदः अद्भिः स्वतः च्युतं वह्निम् इव, निर्वापयितुं न शशाक। Mallinātha places अम्बुदः अद्भिः स्वतः च्युतं वह्निम् इव before वासवः।

Explanation by use of synonyms.—वासवः (इन्द्रः) अति-प्रबन्धप्रहितास्त्रवृष्टिभिः (अविरतप्रयुक्तास्त्रवर्षणैः) दुष्प्रसहस्य (दुःखेनाप्यसह्यस्य) तेजसः (प्रतापस्य) आश्रयम् (आधारं) तं (रघुम्), अम्बुदः (मेघः) अद्भिः (जलैः) स्वतः (आत्मनः) च्युतं (निर्गतं) वह्निमिव (अग्निमिव) निर्वापयितुं (प्रशमयितुं) न शशाक (न शक्तोऽभूत्) ।

Substance.—कोपज्वलितः सन् स देवराजोऽविरलं शरं ववर्ष। अथात् शरजालैर्दिङ्मात्रमभूत्। रघुरवलीलया ताः शरवृष्टीर्निवारयामास। पुरन्दरः सर्वथा यतमानोऽपि तं कुमारं जेतुं न शशाक। स हि मनुजोऽपि सर्वेषां लोकपालानां तेजसामाधारः आसीत्। वासवस्यैकस्य तेजः कथं तस्मिन् तेजसि प्रसरेत्? ननु लोकपालानां प्रधानं हि वासवः। तस्य तेजसा रघुतेजोलीनम्, चेत् कथं

वासवतेजः स्वोत्पादितं तेजः शमयितुं न शशाक रघवसाद कविः आश्चर्यं निवक्ता यत् प्रबलात् प्रभूतः सर्व्वत्र क्षीणः स्यात् । पश्चाग्निर्मेघजभूतोऽपि मेघेनानिर्वाप्यः एव ।

Change of voice.—वासवेन...अम्बुदेन...क्रेषि ।

Sanjivani.—अतीति । (वासवः) अतिप्रबन्धेन, अतिसातत्येन; प्रहिताभिः, प्रयुक्ताभिः ; अस्त्रवृष्टिभिः [अतिप्रबन्धप्रहितास्त्रवृष्टिभिः] (दुष्प्रसहस्य) दुःखेन प्रसह्यते इति दुष्प्रसहं तस्य—दुःखेनाप्यसह्यस्य इत्यर्थः—(तेजसः) प्रतापस्य (आश्रयं) (तं) रघुम् (अम्बुदः अद्भिः स्वतः) (च्युतं) निर्गतं (वह्निम् इव निर्वापयितुं न शशाक) —रघोरपि लोकपालात्मकत्वेन्द्रांशसम्भवत्वादिति भावः ॥ ५८ ॥

Sanjivani Explained.

रघोरपि * * * इति भाव.—The purport is that Indra could not check him because Raghu too had the parts of Indra in him, formed as he was of the parts of the eight Regents of the universe. (See II, 75).

Bengali.—মেঘ যেরূপ জলবর্ষণ দ্বারা আত্মনিঃসৃত বহ্নিকে নির্বাণ করিতে সমর্থ হয় না, তদ্রূপ, বাসব অবিরল অস্ত্রবর্ষণ দ্বারা অতি-দুঃসহ তেজের আশ্রয় রঘুকে নিস্তেজ করিতে সমর্থ হইলেন না। ৫৮।

English rendering.—With showers of arrows incessantly poured, Vásava could not check (Raghu), that refuge of irresistible energy, even as clouds, with their downpours, (cannot quench) fires emitted from themselves. 58.

Grammatical notes, &c., &c.

Sama'sa.—(1) अतिशयितः प्रबन्धः अतिप्रबन्धः (प्रादिः) अस्त्राण्येव वृष्टयः अस्त्रवृष्टयः (रूपकसमासः) अत्र उपमानोपमेययोः भिन्नलिङ्गत्वे मयूरव्यंसकादित्वात् समास इति केचित् । When the उपमान and the उपमेय are of different gender, some say the Samása is anomalous like मयूरव्यंसक । (See notes on वनान्तर in I, 49) अतिप्रबन्धेन प्रहिताः अतिबन्धप्रहिताः (तृतीयातत्) ताश्च्याः अस्त्रवृष्टयः अतिप्रबन्धप्रहितास्त्रवृष्टयः (कर्मधा) ताभिः (2) अम्बूनि ददाति इत्यम्बुदः (उपपदतत्) ।

Case-ending.—(1) अतिप्रबन्ध...हृष्टिभिः—करणे तृतीया (2) तेजसः—शेषे षष्ठी आश्रय इत्यनेन सम्बन्धः (3) स्वतः—"ध्रुवमपायेऽपादानम्" इति सूत्रादपादाने पञ्चमी—(V. notes on वनान्तरात्, Sl. 40, C. I.) (4) अद्रिः—करणे तृतीया ।

Synonyms.—(1) अग्र—(V. I, 89.) (अ.) (2) वह्नि—(V. अग्नि, Sl. 5-9, C. I.) (3) वासव—(V. मघवन्, 26, C. I.).

Derivation.—(1) प्रबन्धः—प्र + बन्ध् + घञ् (करणे) (2) प्रहिता:—प्र + हि + क्तः (कर्मणि) + टाप् (1st c. p.) (3) हृष्टिभिः—हृष् + क्तिन् (भावे, 3rd c. p.) (4) आश्रयम्—आ + श्रि + अप् (कर्मणि, 2nd c. s.) (5) दुष्प्रसहस्य—दुर् + प्र + सह् + खल् (कर्मणि, 6th c. s.) (6) शशाक—शक् + लिट्—णल् (7) निर्वापयितुम्—निर् + (वा + णिच् -) वापि + तुमुन्—पुक् (प्) comes by the rule—"अर्त्तिह्रीव्लीरीक्नूय्याक्ष्माय्यातां पुग्णौ" (७।३।३६ पा. २५७० सि.) See Sanjivani Explained under विस्मापयन् in II, 33. (8) वासवः—वसु + अण्—'वसवः (देवाः), वसूनि (रत्नानि) वास्य सन्ति' इत्यर्थः । 'ज्योत्स्नादिभ्य उपसंख्यानम्' (५।२।१०३। पा. वा. १९१० सि.) [अण् is the nominal affix bearing the sense of मतुप् which is added to such words as ज्योत्स्ना e.g. ज्योत्स्ना अस्यास्ति इति ज्यौत्स्नः, एवं तामिस्रः] वसोरपत्यम् इति वा वसु + अण् (अपत्यार्थे) or वस्.+ वा + कः—दैत्यानां वासं वाति (प्राप्नोति) पराक्रमेण (V. R. T. of Amarakos'a, N. S. P. Ed. pp. 20-21.) (9) स्वतः—स्व + तसिल् (in 5th case.) (10) च्युतम्—च्यु + क्तः (कर्तरि, 2nd c. s.) (11) वह्निम्—वह् + निः— 'वहिश्रिश्रुयुद्रुग्लाहात्वरिभ्यो नित्' (उ. ४।५१।) (12) अम्बुदः—अम्बु + दा + कः ।

Conjugation.—(1) शक् (to be able)—(V. II, 40) (2) वा—(V. Sl. 14, C. III.)

Simile.—वासव is compared to a peice of thunder-cloud, रघु to the fire that comes out of it, *i.e.*, the thunder, and the weapons showered by Indra to downpours of rain. Raghu is made

of the parts of the eight Regents of the universe, and इन्द्र is one of them. As the thunder, born of clouds, cannot be quenched by them with even incessant downpours, so Raghu, born of Indra, could not be checked by Indra with even incessant showers of weapons. The simile is apt and fine.

The word अप् is always used as feminine plural. The following are always feminine plural.—"शाक्लयः[1] पुरि वरणाः[2] स्त्रियामुभे वारिणि तु गावः[3] । पुष्पे च सुमनसो[4] वा च जलौकोऽ[5]प्सरः[6] समा[7] । आपो[8] वस्त्रस्य तु दशाः[9] सिकता[10] वर्षा[11] मघा[12] धानाः[13] ॥" (इति कातन्त्रपरिशिष्टे श्रीपतिदत्तः) । जलौकस् = leech. दशा of a वस्त्र means its fringe. धाना = fried paddy. सिकता = sands. मघा = an asteric group of that name. शाक्लि is plural when it means a city. वरणा, a river running by the north of Benares, is plural. गो is plural when it means waters. सुमनस्, to mean flower, is optionally so.

तत: प्रकोष्ठे हरिचन्दनाङ्किते
प्रमथ्यमानार्णवधीरनादिनीम् ।
रघु: शशाङ्कार्धमुखेन पत्रिणा
शरासनज्यामलुनाद् बिडौजस: ॥ ५९ ॥

मूलस्य पाठान्तरम् ।
धीर—घोर (पा.)

Prose order.—ततः रघुः हरिचन्दनाङ्किते प्रकोष्ठे प्रमथ्यमानार्णवधीरनादिनीं बिडौजसः शरासनज्यां शशाङ्कार्धमुखेन पत्रिणा अलुनात् ।

Explanation by use of synonyms.—ततः (तदनन्तरं) रघुः (दिलीपकुमारः) हरिचन्दनाङ्किते (हरिचन्दनचर्चिते) प्रकोष्ठे (मणिबन्धकूर्परयो-

स्तेरागे) प्रमथ्यमानार्णवधीरनादिनीम् (आलोड्यमानसमुद्रवद् गम्भीरस्वरां) विड़ौजसः (इन्द्रस्य) शरासनज्यां (धनुर्गुणं) शशाङ्कार्द्धमुखेन (शशाङ्कखण्डवत्फलकयुतेन) पत्रिणा (बाणेन) अलुनात् (चिच्छेद)।

Substance.—रघुं वासवो जेतुं न शशाक इति किं वक्तव्यम् प्रत्युत सः रघुणा पराभूतः इत्याह। रघुस्तद् ध्वजच्छेदनात् परमर्द्धचन्द्राकृतिशरेण वासवस्य धनुर्ज्यां द्विधाकरोत्। न हि सामान्यैषा ज्या। पुरन्दरस्य प्रकोष्ठचुम्बनपरायाः अस्यास्तलाघातध्वनिः क्षुब्धार्णवघोषणा।

Change of voice.—...रघुणा...प्रमथ्यमानार्णवधीरनादिनी...शरासनज्या...अलूयत।

Sanjivani.—तत इति। (ततः रघुः हरिचन्दनाङ्किते) (प्रकोष्ठे) मणिबन्धे —प्रमथ्यमानार्णव इव धीरं गम्भीरं नदतीति तां तथोक्तां [प्रमथ्यमानार्णवधीरनादिनीं]; वेवेष्टि व्याप्नोतीति विट्, व्यापकम्, ओजः यस्य सः तस्य (विड़ौजसः) इन्द्रस्य—पृषोदरादित्वात् साधुः—(शरासनज्यां) धनुर्मौर्वीं; शशाङ्कस्य; अर्द्धः, खण्डः; इव मुखं, फलं; यस्य तेन [शशाङ्कार्द्धमुखेन] (पत्रिणा) बाणेन (अलुनात्) अच्छिनत्॥ ५९॥

Sanjivani Explained.

वेवेष्टि * * सः—Mallinátha gives the derivation of विट्। It comes from विष् (षृ) meaning 'to cover'. So it means 'that which covers'. Indra is called विड़ौजस् because his energy is all-pervading.

प्रमथ्यमानार्णव इव * * तथोक्ताम्—Here Mallinátha merely explains the ideas in the expression प्रमथ्यमानार्णवधीरनादिनी। He does not give the समासवाक्य। A Calcutta editor is led to believe that Mallinátha takes the final Samása to be an उपपद-तत्पुरुष।

Bengali.—তদনন্তর রঘু ইন্দ্রের হরিচন্দনচর্চ্চিত প্রকোষ্ঠভাগে আলোড্যমানসমুদ্রের ন্যায় ঘোরশব্দোৎপাদিনী ধনুর্গুণ চন্দ্রখণ্ডসদৃশ-ফলকযুক্ত বাণ দ্বারা ছেদন করিলেন। ৫৯॥

English rendering.—Then with an arrow of crescent-shaped head, Raghu severed in twain the bow-string of his antagonist of all pervading energy, the twang of which, as it struck his wrist decked with celestial sandal, resembled the deep roar of the ocean (when) churned (in days of yore). 59.

Grammatical notes, &c., &c.

Sama'sa.—(1) चन्दयति इति चन्दनः (आह्लादकः) हरेः (विष्णोः) चन्दनः (प्रीतिदायकः) इति हरिचन्दनः (षष्ठीतत्) तेन अङ्कितः हरिचन्दनाङ्कितः (तृतीयातत्) तस्मिन् (2) प्रकर्षेण मथ्यमानः प्रमथ्यमानः (प्रादिः) प्रमथ्यमानश्चासौ अर्णवश्चेति प्रमथ्यमानार्णवः (कर्मधा) घोरं नदतीति घोरनादिनी (उपपदतत्) प्रमथ्यमानार्णव इव घोरनादिनी प्रमथ्यमानार्णवघोरनादिनी (उपमानसमासः) ताम् (3) शशः अङ्कः (चिह्नं) यस्य स शशाङ्कः (बहु) तस्य अर्धः (खण्डः) शशाङ्कार्धः (षष्ठीतत्) शशाङ्कार्धं इव मुखं यस्य स शशाङ्कार्धमुखः (बहु) तेन, शराः अस्यन्ते (क्षिप्यन्ते) अनेन इति शरासनम् (उपपदतत्) तस्य ज्या शरासनज्या (षष्ठीतत्) ताम् (5) विडं (भेदकम्) ओजः (तेजः) अस्ति अस्य विडौजाः (बहु) तस्य or विट्सु प्रजासु मनुष्येषु वा ओजः अस्ति अस्य इति विडौजाः (बहु) In the first case it is formed properly; in the second it is formed by पृषोदरादि (निपातन) [V. R. T. of Amarakosha, N. S. p. Ed. p. 20.] The second case is thus analyzable—विट् + ओजस्, by *sandhi*, should form विड़ोजस् । Unless we admit a वर्णविकार *i.e.* ड for ट् we cannot have the form विड़ौजस् । (V. notes on दिवौकसाम् Sl. 19, III.).

Case-ending.—(1) विड़ौजसः—शेषे षष्ठी (2) प्रकोष्ठे—आधाराधिकरणे सप्तमी (3) पत्रिणा—करणे तृतीया ।

Synonyms.—(1) विड़ौजस्—(V मघवन्, Sl. 26, C. I.) (2) अर्णव—(V. समुद्र, Sl. 5-9, C. I.)

Different meanings.—(1) हरिचन्दन—'हरिचन्दनमस्त्री स्यात्

विदग्धानां मनीषकृते। नपुंसकं तु गोशीर्षं ज्योत्स्नाकुङ्कुमयोरपि॥' गोशीर्ष — a kind of sandal. (2) प्रकोष्ठ—'प्रकोष्ठो मणिबन्धस्य कूर्परस्यान्तरेऽपि च। भूपकक्षान्तरेऽपि स्यात्।' (मे.)

Derivation.—(1) हरिचन्दनः—हरि + (चन्द् + णिच् —) चन्दि + ल्युः (कर्तरि) This word is both neuter and masculine (2) प्रमथ्यमानः—प्र + मन्थ् + शानच् (कर्मणि) (3) अर्णवः—(V. I, 16.) (4) धीरनादिनीम्—धीर + नद + णिनि (शीलार्थे) + ङीप् (2nd c. s.) (5) ज्याम्—ज्या + डः + टाप् (2nd c. s.) (6) अलुनात्—लू + लङ्—तिप्।

Conjugation.—(1) लू (to cut)—लुनाति, लुनीते (लट्) लुनातु, लुनीताम् (लोट्) अलुनात्, अलुनीत (लङ्) लुनीयात्, लुनीत (वि. लिङ्) लुलाव, लुलविथ, लुलुवे (लिट्) लविता (लुट्) लविष्यति ते (लृट्) लूयात्, लविषीष्ट (आ. लिङ्) अलावीत्, अलविष्ट (लुङ्) लूयते (कर्मणि—लट्) अलावि (कर्मणि-लुङ्) लुलूषति-ते (सन्-लट्) लोलूयते (यङ्-लट्) लावयति (णिच्-लट्) अलीलवत् (णिच्-लुङ्) लून: (क्तः)।

हरिचन्दनम्—'पञ्चैते देवतरवो मन्दारः पारिजातकः। सन्तानः कल्पवृक्षश्च पुंसि वा हरिचन्दनम्॥' (अ.) These are the five heavenly trees.

Definition of प्रकोष्ठ—"प्रकोष्ठो मणिबन्धस्य कूर्परस्यान्तरेऽपि च" (मे.) or 'प्रकोष्ठमन्तरं विद्यादरत्निमणिबन्धयोः' इति [प्रकोष्ठ is that part of the arm which lies between the wrist and the elbow.

शशाङ्कार्धः—'पुंस्यर्द्धोऽर्द्धं समेंऽशके' (अ.) अर्द्ध is masculine, when it means a part. To mean half it is neuter. शशाङ्कार्द्ध means a segment of the moon, because अर्द्ध is masculine. Had अर्द्ध been neuter, it would have preceded शशाङ्क, *i.e.*, the form would have been अर्द्धशशाङ्क by the rule "अर्द्धं नपुंसकम्" (२।२।२ पा. ७१३ सि.) [अर्द्ध which means 'exact half', and which is neuter, forms an एकदेशिसमास with a word expressive of अवयवि or a whole.] अर्द्धशशाङ्क

means an exact half of the moon. So to translate अर्द्धाचन्द्र into अर्धचन्द्र, as a Calcutta editor does, is not correct.

N. B. The difference between एकदेशीसमास and षष्ठीतत्पुरुष ।

In both, a षष्ठ्यन्त word is compounded with a प्रथमान्त । But in एकदेशीसमास, the षष्ठ्यन्त word becomes the last, while in षष्ठीसमास it becomes the first component in the compound ; e.g., पूर्व्वकायम् (कायस्य पूर्व्वम्), and राजपुरुष: (राज्ञ: पुरुष:) । Morever, षष्ठीसमास is unlimited, whereas एकदेशीसमास is limited. Any षष्ठ्यन्त word may form with another प्रथमान्त a षष्ठीतत्पुरुष । Only a few प्रथमान्त words expressing the idea of a part, such as पूर्व्व, अपर, अधर, उत्तर, अर्द्ध, form एकदेशिसमास with words expressing the sense of a whole. The words द्वितीय, तृतीय, चतुर्थ and तुर्य्य optionally form एकदेशिसमास with words expressive of a whole unit. See (२।२।१ पा. ७१२ सि., २।२।२ पा. ७१३ सि., २।२।३ पा. ७१४ सि.)

स चापमुत्सृज्य विवृद्धमत्सर:
प्रणाशनाय प्रबलस्य विद्विष:
महीध्रपक्षव्यपरोपणोचितं
स्फुरत्प्रभामण्डलमस्त्रमाददे ॥ ६० ॥

मूलस्य पाठान्तरम् ।

व्यपरोपणोचितम्—व्यपरोपणोद्यतम् । (पा.)

Prose order.—स विवृद्धमत्सर: (सन्) चापम् उत्सृज्य: प्रबलस्य विद्विष: प्रणाशनाय महीध्रपक्षव्यपरोपणोचितं स्फुरत्प्रभामण्डलम् अस्त्रम् आददे । Mallinátha places 'विवृद्धमत्सर:' in the beginning.

Explanation by use of synonyms.—सः (इन्द्रः) विरूढमत्सरः (प्ररूढवैरः सन्) चापं (शरासनम्) उत्सृज्य (विहाय) प्रबलस्य (पराक्रमिणः) विद्विषः (शत्रोः) प्रणाशनाय (वधाय) महीध्रपक्षव्यपरोपणोचितं (गिरिपक्षच्छेदनाभ्यस्तं) स्फुरत्प्रभामण्डलं (दीप्यमानज्योतिर्मण्डलपरिव्याप्तम्) अस्त्रं (वज्रायुधम्) आददे (जग्राह)।

Substance.—गुणे तु छिन्ने धिक् शरासनमिति विचिन्त्य देवराजः शरासनं जहौ। नासौ रघुः प्राकृतमानुषः। देवांशसम्भवाद्दुर्जयोऽसौ। दैविकादस्त्रेण शस्त्रेण नासौ जेतुं शक्य इति मत्वा स दिव्यं शस्त्राणां वरं प्रभामण्डलभासुरं भीषणं वज्रं जग्राह। तेन स पर्व्वतानाम् पक्षान् चिच्छेद। कठिनतमे पर्व्वतेऽपि यदेतद् प्रतिहतं मनुष्ये न कुण्ठितं भविष्यतीति चामन्यत।

Change of voice.—तेन विरूढमत्सरेण......।

Sanjivani.—स इति। (विरूढमत्सरः) प्ररूढवैरः (सः) इन्द्रः (चापम् उत्सृज्य प्रबलस्य) (विद्विषः) शत्रोः (प्रणाशनाय) वधाय—महीं धारयन्तीति महीध्राः, पर्वताः—मूलविभुजादित्वात् कप्रत्ययः (See ३।२।५। पा. वा. २९१९ सि. का.)—तेषां पक्षव्यपरोपणे, पक्षच्छेदे; उचितं [महीध्रपक्षव्यपरोपणोचितं] स्फुरत्प्रभामण्डलम्) (अस्त्रं) वज्रायुधम् (आददे) जग्राह ॥ ६० ॥

Sanjivani Explained.

मूलविभुजादित्वात् कप्रत्ययः—महीध्र is thus derived—मही + धृ + कर्त्तरि कः। It admits the कृत् affix क inasmuch as it belongs to the group मूलविभुज। The Várttika referred to is 'कप्रकरणे मूलविभुजादिभ्य उपसंख्यानम्'। मूलविभुज is derived as मूल + वि + भुज् + कर्त्तरि कः।

Bengali.—তিনি (ইন্দ্র) প্রকুপিত হইয়া শরাসন পরিহারপূর্ব্বক প্রবলশত্রুর বিনাশ নিমিত্ত পর্ব্বতপক্ষচ্ছেদনাভ্যস্ত দীপ্যমানজ্যোতির্ম্মণ্ডলপরিব্যাপ্ত বজ্রায়ুধ গ্রহণ করিলেন। ৬০।

English rendering.—Casting off the bow, his resolution to wreak vengeance strengthened, he, for the destruction of his mighty foe, took up a weapon endued with a halo of

dazzling effulgence, and accustomed to cut off the wings of mountains. 60.

Grammatical notes, &c., &c.

Sama'sa.—(1) विशेषेण अङ्गः विहङ्गः (प्रादि.) विहङ्ग. मत्सरः यस्य सः विहङ्गमत्सरः (बहु) (2) प्रकर्षेण नाशनं प्रणाशनम् (प्रादि) तस्मै (3) प्रकृष्टं बलं यस्य स प्रबलः (बहु) तस्य (4) द्वेष्टि इति द्विट्, विशिष्टः द्विट् विद्विट् (प्रादि.) तस्य (5) महीं धरन्ति or धारयन्तीति महीध्रा (उपपदतत्) तेषां पक्षाः महीध्रपक्षाः (षष्ठीतत्) विशेषेण अपरोपणं व्यपरोपणम् (प्रादि.) महीध्रपक्षाणां व्यपरोपणं महीध्रपक्षव्यपरोपणम् (षष्ठीतत्) तस्मिन् उचितं महीध्रपक्षव्यपरोपणोचितम् (सप्तमीतत्) (6) प्रभाणां मण्डलं प्रभामण्डलम् (षष्ठीतत्) स्फुरत् प्रभामण्डलं यस्य तत् स्फुरत्प्रभामण्डलम् (बहु)।

Case-ending.—(1) प्रणाशनाय—तादर्थ्ये चतुर्थी— प्रणाशनार्थम् इत्यर्थः (2) विद्विषः—कृद्योगेऽनुक्ते कर्मणि षष्ठी—"कर्तृकर्मणोः कृति" (V. notes on सागरम्, Sl. 2. C. I.) (3) महीध्र...पक्षव्यपरोपणोचित and स्फुरत्प्रभामण्डलम् are adjectives of अस्त्रम्।

Synonyms.—(1) महीध्र—(V. अचल Sl. 68, C. I.) (2) विद्विष्—(V. अरि, I, 61.

Different meanings.—(1) पक्ष—(V. Sl. 42, C. III.) (2) मत्सरः—'मत्सरा मक्षिकायां स्यान्मात्सर्यक्रोधयोः पुमान्। अन्यशुभद्वेषिणि कृपणे चाभिधेयवत्॥' (मे.) मत्सरा means flies. मत्सर means malice, anger, and a stingy fellow who does not brook other's riches.

Derivation.—(1) मत्सरः—मद् + सरः—'कृमृमदिभ्यः सिन्' (उ. ३।७३।) (2) आयसम्—अयः (धातुभेदः) तस्य विकारः इत्यर्थे अण् (2nd C. 8.) "अवयवे च प्राण्योषधिवृक्षेभ्यः" (4।3।135 पा. 1515 सि.) [A word expressive of a living being, an herb or a tree admits the affix अण् which means its अवयव (limb), or विकार (transformation).]

(3) उत्सर्प्य— उद् + सृप् + ल्यप् (4) प्रणाशनाय—प्र + (नश् + णिच् –) नाशि + ल्युट् (4th c. s.) The dental न of नश् is changed into the cerebral by the Sutra "उपसर्गादसमासेऽपि णोपदेशस्य" (८।४।१४ पा. २२८० सि.) [If the उपसर्ग, preceding a root which begins with a dental न but is read in धातुपाठ with a cerebral, has, in it, all the causes that change the dental into the cerebral ण, the dental न of the root undergoes the change, whether the verb formed of the root is compounded with the उपसर्ग or not]. Here नश् is the root which is read in धातुपाठ as णश्। Its verbal form नाशन is preceded by the उपसर्ग प्र which has the capacity of changing the dental न into the cerebral. So प्र + नाशन becomes प्रणाशन। But if नश् is transformed into नष्, its न् is not changed into ण् under the above circumstances. We can have the form प्रनष्ट, and not प्रणष्ट। See "नशेः षान्तस्य" (८।४।३६ पा. १५१८ सि.) (5) विद्विषः—वि + द्विष् + क्विप् (कर्तरि, 6th c.s.) (6) महीध्रः—मही + ध्र + कः—'कप्रकरणे मूलविभुजादिभ्य उपसंख्यानम्' (7) व्यपरोपणम्—(V. Sl. 56, C. III.) (8) आददे—आ + दा + लिट्—ए। (V. आददे, Sl. 18, C. I.)

Conjugation.—(1) सृज् (V. Sl. 18, C. I.)

For the allusion in महीध्रपक्षव्यपरोपणोचितम्—(V. Sl. 42, C. III.)

Remark.—A Calcutta editor paraphrases 'विरूढमत्सरः' as 'प्रकोपितः' and 'महीध्रपक्षव्यपरोपणोचितम्' as, पर्वतपक्षपातनपटुम्'। But as विरूढ is an अणिजन्त form, प्रकुपित should be its synonym and as महीध्रपक्षव्यपरोपणोचितम्' is the adjective of अस्त्रम्, a neuter word, its synonym should be पर्वतपक्षपातनपटु। The same editor remarks that the आत्मनेपद of आददे is determined by "स्वरितञितः कर्त्रभिप्राये क्रियाफले" (१।३।७२ पा. २१५८ सि.) and not by "आङो दोऽनास्यविहरणे" (१।३।२० पा. २६८६ सि.) because he fancies that the lattter necessitates that the agent should not reap the result of the action (अकर्त्रभिप्रायेऽर्थेऽयमारम्भः) while here the agent reaps the benefit of the action. It is wholly a misconception. The Sutra "आङोदोऽनास्यविहरणे" has not this proviso attached to it. For the Sutra and all its Várttikas see आददे in I, 18.

रघुर्भृशं वक्षसि तेन ताड़ितः
पपात भूमौ सह सैनिकाश्रुभिः।
निमेषमात्रादवधूय तद्व्यथां
सहोत्थितः सैनिकहर्षनिस्वनैः॥ ६१॥

Prose order.—रघुः तेन वक्षसि भृशम् ताड़ितः सैनिकाश्रुभिः सह भूमौ पपात—निमेषमात्रात् तद्व्यथाम् अवधूय सैनिकहर्षनिस्वनैः सह उत्थितः। Mallinátha places 'भृशम्' before 'वक्षसि'।

Explanation by use of Synonyms.—रघुः (दिलीपनन्दनः) तेन (बाणेन) वक्षसि (उरसि) भृशम् (अत्यर्थं) ताड़ितः (आहतःसन्) सैनिकाश्रुभिः सह (सैनिकानां नयनजलैः साकं) भूमौ (पृथिव्यां) पपात (निपतितवान्) निमेषमात्रात् (क्षणमात्रेण) तद्व्यथां (वज्रप्रहारजनितवेदनाम्) अवधूय (तिरस्कृत्य) सैनिकहर्षनिस्वनैः (सैनिकानन्दजनितसिंहनादैः) सह (सार्द्धम्) उत्थितः (उत्तस्थौ)।

Substance.—वासवो भीषणं तदस्त्रं रघौ निचिक्षेप। रघुस्तस्य गतिं रोद्धुं न शशाक। दिव्यं तदस्त्रं तस्योरसि पतितः। तेन दारुणं ताड़ितः रघुरपि विलुप्तचेतनो भूमौ पपात। तस्य सैनिकाः तद्दर्शनेन हतो रघुरिति मत्वा रुरुदुः। आश्चर्य्यं रघोः कापि महिमा। निमेषमात्रात् स लब्धचेतनो बभूव। वज्रप्रहारजनितव्यथां चावमत्य रणायोत्तस्थौ। अद्भुतं स्वामिनो वीर्य्यातिशयं वीक्ष्य तस्य सैनिकानां शोकाश्रुरानन्दाश्रुरूपेण क्षणात् परिणतः।

Change of voice.—रघुणा...ताड़ितेन...पेते...उत्थितम्।

Sanjivani.—रघुरिति। (रघुः) (तेन) वज्रेण (भृशम्) अत्यर्थं (वक्षसि) (ताड़ितः) आहतः सन्, सैनिकानाम् अश्रुभिः [सैनिकाश्रुभिः] (सह भूमौ पपात), तस्मिन् पतिते ते रुरुदुः इत्यर्थः, (निमेषमात्रात्) (तद्व्यथां) दुःखम् (अवधूय) तिरस्कृत्य, सैनिकानां हर्षेण; निस्वनाः, क्ष्वेड़ा; तैः [सैनिकहर्षनिस्वनैः] (सह उत्थितः) च। तस्मिन् उत्थिते हर्षात् ते सिंहनादांश्चक्रुरित्यर्थः।

Bengali.—বজ্রদ্বারা বক্ষঃস্থলে অত্যন্ত আহত হইয়া (রঘু) সৈনিকগণের নয়নবারির সহিত ভূতলে পতিত হইলেন—নিমেষমাত্রে সেই

বেদনা দূর করিয়া সৈনিকবৃন্দের আনন্দজনিত সিংহনাদের সহিত (ভূতল হইতে) উত্থিত হইলেন। ৬১।

English rendering.—Hit hard on the chest with that weapon, Raghu fell on the ground, with the tears of his troops and, casting off that pain in an instant, rose with the gladsome cheers of those troops. 61.

Grammatical notes, &c., &c.

Sama'sa.—(1) सैनिकानाम् अश्रूणि सैनिकाश्रूणि (षष्ठीतत्) तैः (2) निमेष एव निमेषमात्रम् (मयूरव्यंसकादित्वात् समासः) तस्मात् (3) तज्जनिता व्यथा तद्व्यथा (शाकपार्थिवादित्वात् मध्यपदलोपि कर्मधा) ताम् (4) सैनिकानां हर्षः सैनिकहर्षः (षष्ठीतत्) तेन निस्वनाः सैनिकहर्षनिस्वनाः (तृतीयातत्) तैः।

Case-ending.—(1) भृशम्—अव्ययं, क्रियाविशेषणम् (2) वक्षसि—अवच्छेदाधिकरणे सप्तमी (3) भूमौ—आधाराधिकरणे सप्तमी (4) सैनिकाश्रुभिः—सहयोगे तृतीया (5) निमेषमात्रात्—ल्यबलोपे पञ्चमी—निमेषमात्रमाश्रित्य इत्यर्थः (V. अन्वतः Sl. 4, C. II.) "सप्तमीपञ्चम्यौ कारकमध्ये" (२।३।७ पा. ६४३ सि.) इति सूत्रात् पञ्चमी वा। It means a 'word significatory of time as well as of distance receives सप्तमी or पञ्चमी when the time or the distance stands between two actions of the subject or the object or of both. Here the two actions are पतन and उत्थान of the subject। निमेषमात्र is the intervening time. So the word may get सप्तमी or पञ्चमी। (6) सैनिकहर्षनिस्वनैः—सहयोगे तृतीया (7) तेन—अनुक्ते कर्त्तरि तृतीया 'ताड़ितः' इत्यस्य।

Synonyms.—(1) अश्रु—'अश्रु नेत्राम्बु रोदनं चास्रमश्रु च' (अ.) (2) निस्वन—'शब्दे[1] निनाद[2]निनद[3]ध्वनि[4]ध्वान[5]रव[6]स्वनाः[7]। स्वान[8]निर्घोष[9]निर्ह्राद[10]स्वान[11]निस्वान[12]निस्वनाः[13]॥ आरव[14]आराव[15]संराव[16]विरावाः।' (अ.)

Different meanings.—(1) भूमि—'भूमिः क्षितौ स्थानमात्रे' (हे.)

Derivation.—(1) ताडितः—तड् (चुरादिः) + क्तः (कर्मणि) (2) पपात—पत् + लिट्-णल् (3) सैनिकाः—सेना + ठक् (1st c. p.) (4) अवधूय—अव + धू + ल्यप् (5) व्यथाम्—व्यथ् + अङ् (2nd c.s.) (6) उचित:—See II,61. (7) निस्वने—नि + स्वन् + अप् (3rd c. p.) The alternative form is निस्वाने—"नौ गदनदपठस्वनः" (३।३।६४ पा. ३२४१ सि.) [अप् is optionally added to the root गद, नद, पठ् or स्वन् preceded by नि]

Conjugation.—(1)—धू—(V. Sl. 53, C. I.) (2) पत्—(V. Sl. 60, C. II.) (3) स्था—(V. Sl. 45, C. I.)

तथापि शस्त्रव्यवहारनिष्ठुरे
विपक्षभावे चिरमस्य तस्थुषः ।
तुतोष वीर्यातिशयेन वृत्रहा
पदं हि सर्वत्र गुणैर्निधीयते ॥ ६२ ॥

Prose order.—तथापि शस्त्रव्यवहारनिष्ठुरे विपक्षभावे चिरं तस्थुषः अस्य वीर्यातिशयेन वृत्रहा तुतोष हि गुणैः सर्वत्र पदं निधीयते ।

Explanation by use of synonyms.—तथापि (वज्रपातेऽपि) शस्त्रव्यवहारनिष्ठुरे (आयुधव्यापारक्रूरे) विपक्षभावे (शत्रुत्वे) चिरं (दीर्घकालं) तस्थुषः (स्थितवतः) अस्य (रघोः) वीर्यातिशयेन (पराक्रमाधिक्येन) वृत्रहा (इन्द्रः) तुतोष (तुष्टिं ययौ) हि (यतः) गुणैः (उत्कर्षैः) सर्वत्र (सर्वस्मिन्स्थले) पदं (चरणं) निधीयते (स्थाप्यते, संक्रम्यते इति यावत्) ।

Substance.—वज्राहतोऽपि रघुर्न पराभवं मेने अपि तु भूयो रणायोद्यतः इति पश्यन्निन्द्रः विस्मितः । साधु रघुः इति तं मनसा प्रशशंस । ननु वैरिप्रशंसा किं सम्भाव्यते इत्यत्राह महानुभावाः शत्रूणामपि गुणज्ञाः भवन्ति । शत्रुमित्रोदासीनाः सर्व्व एव गुणैर्वश्याः भवन्ति ।

Change of voice.—वृत्रघ्ना...तुतुषे...गुणाः...निदधति ।

Sanjivani.—तथापीति । (तथापि) वज्रपातेऽपि ; शस्त्राणाम्, आयुधानां ;

व्यवहारैष, व्यापारैष ; निष्ठुरै, क्रूरै—[शस्त्रव्यवहारनिष्ठुरे] (विपक्षभावे) शत्रुत्वे (स्थिरं) (तस्थुषः) स्थितवतः (अस्य) रघोः (वीर्य्यातिशयेन) ; वृत्रं हतवान् इति (वृत्रहा)—"ब्रह्मभ्रूणवृत्रेषु क्विप्" (३।२।८७ पा. २९९८ सि.)—तुतोष। स्वयं वीर एव वीरं जानातीति भावः। कथं शत्रौ सन्तोषोऽत आह—(हि यस्मात्) (सर्व्वत्र) शत्रुमित्रोदासीनेषु (पदम्) अङ्घ्रिः (निधीयते)। गुणैः सर्व्वत्र संक्रम्यते इत्यर्थः। गुणाः शत्रूनप्यावर्जयन्तीति भावः॥ ६२॥

Sanjivani Explained.

स्वयं वीर एव * * * सन्तोषोऽत आह—One who is himself a hero, knows (the worth of) a hero : this is the purport. How can a foe be pleased with a foe ? To answer this the poet says &c.

शत्रुमित्रोदासीनेषु—This is a way of classifying men. Some are our foes, some friends, and some neutrals, *i.e.* neither foes nor friends. The last are apathetic as to our weal and woe.

गुणैः सर्व्वत्र * * * इति भावः—'Merits walk everywhere.' 'They influence even a foe.'

"ब्रह्मभ्रूणवृत्रेषु क्विप्"—हन् admits क्विप् in कर्त्तृवाच्य when it is preceded by the word ब्रह्मन् (Bráhman), भ्रूण (foetus), or वृत्र। e.g., ब्रह्महन्, भ्रूणहन्, वृत्रहन्।

Bengali.—তথাপি (বজ্রপাতেও) রঘু (রণ হইতে বিরত না হইয়া) শস্ত্রপ্রয়োগনিবন্ধনক্রূর শত্রুভাবে দীর্ঘকাল অবস্থিত রহিলেন দেখিয়া বাসব তাঁহার (রঘুর) বীর্য্যাধিক্যহেতু সন্তুষ্ট হইলেন। যেহেতু, গুণ সর্ব্বত্রই প্রভাববিস্তার করিয়া থাকে।৬২।

English rendering.—The slayer of Vritra was pleased with the superiority of the prowess of Raghu who, in spite of what had happened (*viz.*, the stroke of thunder) continued to stand so long (towards him) in an attitude of hostility, which is cruel for the use of weapons (that forms its distinctive feature). Verily, merits penetrate every heart. 62.

Grammatical notes, &c., &c.

Sama'sa.—(1) शस्त्राणां व्यवहारः शस्त्रव्यवहारः (षष्ठीतत्) तेन निष्ठुरः

असभ्यव्यवहारनिष्ठुर: (तृतीयातत्) तस्मिन् (2) विरुद्ध: पक्ष: विपक्ष: or विविध: पक्ष: (कर्मधा.) (V. R. T. of Amarakos'a, N. S. P. Ed. P. 309.) तस्य भाव: विपक्षभाव: (षष्ठीतत्) तस्मिन् (3) वीर्य्यस्य अतिशय: वीर्य्यातिशय: (षष्ठीतत्) तेन (4) वृत्रं हतवान् इति वृत्रहा (उपपदतत्)।

Case-ending.—(1) तथापि—अव्ययं, used in 7th case, भावाधिकरणे सप्तमी—वर्त्त्रोहतेऽपि इत्यर्थ: (2) विपक्षभावे—आधाराधिकरणे सप्तमी (3) चिरम्—अव्ययं कालस्यात्यन्तसंयोगे द्वितीया। (V. अक्षमालम्, Sl. 73, C. I.) (4) अस्य—शेषे षष्ठी 'वीर्य्यातिशयेन' इत्यनेन सम्बन्ध: (5) वीर्य्यातिशयेन—हेतौ तृतीया। Pánini hints that a word, allied with a तृप्तार्थक word, gets षष्ठी by the Sutra "पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेन" (२।२।११ पा. ७०५ सि.) Vopadeva explicitly enjoins that in alliance with a तृप्तार्थक word, another gets the 3rd as well as the 6th case. Here तृप् in तृतोष is तृप्तार्थ; so वीर्य्यातिशय gets तृतीया। It may optionally get षष्ठी। The rule is—'तृप्तार्थानां वा' (V. Káraka Sutra, 712.) (6) पदम्—उक्ते कर्मणि प्रथमा (7) सर्वत्र—अव्ययं, आधाराधिकरणे सप्तमी (8) गुणै:—अनुक्ते कर्त्तरि तृतीया।

Synonyms.—(1) वृत्रहन्—(V. मघवन्, Sl. 26, C. I.)

Different meanings.—(1) पद—'पदं शब्दे च वाक्ये च व्यवसायापदेशयो:। पादतच्चिह्नयो: स्थानत्राणयोरङ्कवस्तुनो:। श्लोकपादेऽपि च क्लीबं पुंलिङ्ग: किरणे पुन:॥' (त्रि. मे.) (2) गुण—I, 5-9. (3) वीर्य—'वीर्य्यं प्रभावे शुक्रे च तेज:सामर्थ्ययोरपि।' (मे.)

Derivation.—(1) व्यवहार:—वि + अव + हृ + घञ् (भावे) (2) निष्ठुरे—नि + स्था + उरच्—'मद्गुरादयश्च' (उ. १।४१।) (3) तस्थुष:—स्था + क्वसु (6th c. s.)—"क्वसुश्च" (३।२।१०७। पा. ३०८५ सि.) [क्वसु is used for लिट् in the Vedic language to signify the general past. But the secular poets use it frequently. Cf. "तं तस्थिवांसं नगरोपकण्ठे"]

See also II, 6. (4) तुतोष—तुष् + लिट्—णल् (5) वीर्य्यम्—वीर + यत्—"अचोयत्" (३।१।९७। पा. २८४२ सि.) [यत् is added to a root ending in a vowel] or, वीरे साधुः—"तत्रसाधुः" (४।४।९८। पा. १६५० सि.) इति तद्धित-यत् । (6) अतिशयेन—अति + शी + भावे अच् (3rd c. s.)—"एरच्" (३।३।५६। पा. ३२३१ सि.) [अच् is the affix added in the भाववाच्य to a root ending in इवर्ण] (7) वृत्रहा—वृत्र + हन् + क्विप् (भूते) (8) निधीयते—नि + धा + कर्मणि—लट्—ते ।

Conjugation.—(1) धा—(V. Sl. 24, C. I. (2) तुष्—तुष्यति (लट्) तुष्यतु (लोट्) अतुष्यत् (लङ्) तुष्येत् (वि. लिङ्) तुतोष तुतुषतुः (लिट्) अतुषत् (लुङ्) अतोषि (भावे-लुङ्) तोष्टा (लुट्) तोक्ष्यति (लृट्) अतोक्ष्यत् (लृङ्) तोषयति (णिच्-लट्) अतूतुषत् (णिच्-लुङ्) तुतुक्षति (सन्-लट्) तोतुष्यते (यङ्-लट्) तुष्टः (क्तः) ।

Declension of वृत्रहन् and तस्थिवस्—वृत्रहा, वृत्रहणौ, वृत्रहणः । वृत्रहणम्, वृत्रघ्नः । वृत्रघ्ना, वृत्रहभ्याम्, वृत्रहभिः । वृत्रघ्ने, वृत्रहभ्यः । वृत्रघ्नः । वृत्रघ्नोः, वृत्रघ्नाम् । वृत्रघ्नि, वृत्रहणि, वृत्रहसु । वृत्रहन् ।

तस्थिवान्, तस्थिवांसौ, तस्थिवांसः । तस्थिवांसम्, तस्थुषः । तस्थुषा, तस्थिवद्भ्याम्, तस्थिवद्भिः । तस्थुषे, तस्थिवद्भ्यः, तस्थुषः । तस्थुषोः, तस्थुषाम् । तस्थुषि, तस्थिवत्सु । तस्थिवन् । (Masculine). तस्थिवत्, तस्थुषी, तस्थिवांसि । तस्थिवत्, तस्थुषी, तस्थिवांसि । The rest are like masculine. In case of addres the form is तस्थिवत् । In feminine the form is तस्थुषी and is declined like नदी ।

Allusion in the name of वृत्रहा—इन्द्रेण देवपुरोहितस्य विश्वरूपस्य शिरसि छिन्ने तत्पिता त्वष्टा भृशं कुपितः सन् इन्द्रहननाय यज्ञमेकं विदधे ; 'इन्द्र-शत्रुर्भव' इति व्याहृत्य अग्नौ आहुतिं च ददौ । तेन भीषणकायः दग्धपर्व्वतसदृशः कोऽपि असुरः समुत्पेदे ।' त्वष्टृसम्भूतया असुरमूर्त्तिधारिण्या तपस्यया निखिल-लोकानामावृतत्वात् स 'वृत्र' इति नाम्ना ख्यातोऽभूत् । इन्द्रप्रमुखा देवास्तादृशं

भीषणं तदाननमवलोक्य भीताः सन्तः त्रिदशाः शरण्यमासाद्य एकाग्रचित्तास्तमुपासाञ्चक्रिरे । ततः आविर्भूते शङ्खचक्रगदाभृति नारायणे ते देवास्तस्मै वृत्रासुरस्य निग्रहे चेष्टितं विज्ञापयामासुः । ततस्तदुपदेशेन देवा दधीचिमुनिसन्निधिं जग्मुः, तद्देहं च प्रार्थयामासुः । स लीलया निजदेहं देवकार्य्यार्थं ददौ । तदस्थिभिः वज्रायुधं निर्मितम् । तेनैवेन्द्रः तद्भीषणासुरं निजघान । अतः इन्द्रस्य 'वृत्रहा' इति नामाऽभवदिति । (V. Bhágavata, chaps. 9—12, Skandha 6.) [When Indra slew Viswarupa, Tashtri, the father of the victim, became highly enraged and celebrated a sacrifice whence sprang a mighty Asura, वृत्र by name. The gods could not look at his face, and sought the shelter of Vishnu. The latter advised them to repair to the ascetic, Dádhichi, and ask of him the bone of his body. The deities acted according to his advice. The muni unhesitatingly gave up his body to them. With a bone of his, the terrible thunder-bolt was made. Indra smote Vitra with it and thus slew him.]

Parallel passage of the fourth foot of the verse.—(1) "गुणाः प्रियत्वेऽधिकृता न संस्तवः" (V. Kirátarjuniyam,) (2) "गुणाः पूजास्थानं गुणिषु न च लिङ्गम् न च वय. ।" (V. Uttaracharitam, Act IV.) (3) "स्त्रीपुमानित्यनास्थैषा वृत्तं हि महितं सताम् ।" (V. Kumarasambhavam, VI.)

अभङ्गमद्रिष्वपि सारवत्तया
न मे त्वदन्येन विसोढमायुधम् ।
अवेहि मां प्रीतमृते तुरङ्गमात्
किमिच्छसीति स्फुटमाह वासवः ॥६३॥

मूलस्य पाठान्तरम् ।

अभङ्गम्—So Nand. foot-notes which also notice अवध्यम् ।

For the fourth foot Cháritravardhana reads वरं वृणीष्वेति

तमाह वासवः। Some of the editions consulted by Nand., read वरं हृणीष्वेति तमादिदेश स।

Prose order.—सारवत्तया अद्रिषु अपि अभङ्गं मे आयुधं त्वदन्येन न विसोढ़ं, मां प्रीतम् अवेहि, तुरङ्गमात् ऋते किम् इच्छसि—इति वासवः स्फुटम् आह। Mallinátha places 'वासवः' after, स्फुटम्।

Explanation by use of synonyms.—सारवत्तया (बलवत्तया, स्थिरांशतयेति यावत्) अद्रिष्वपि (पर्वतेष्वपि) अभङ्गम् (अप्रतिबन्धं) मे (मम) आयुधं (अस्त्रं) त्वदन्येन (त्वदभिन्नेन जनेन) न विसोढ़ं (न सोढ़ं शक्यं)। मां प्रीतं (सन्तुष्टम्) अवेहि (जानीहि)। तुरङ्गमात् (अस्मादश्वात्) ऋते (विना) किं (किंवस्तु) इच्छसि (प्रार्थयसे) इति (इदं वचः) वासवः (इन्द्रः) स्फुटं (स्पष्टाक्षरम्) आह (उवाच)।

Substance.—ततः प्रीतो वासवो रघुमुवाच भोः क्षत्रियकुमार! प्रीतोऽस्मि ते वीर्य्यातिशयेन। पर्व्वता अपि यद्वज्रस्य शक्तिं सोढ़ुं न शेकुः, तद्वज्रस्य प्रहारस्त्वयावलीलया सेहे। चित्रमेतत्। प्रसन्नोऽस्मि ते। इमं तुरङ्गं विना ते यत् प्रार्थनीयमस्ति मां तदेव याचस्व। न हि तत् तुभ्यं ममादेयमिति जानीहि।

Change of voice.—...त्वदन्यः...विसोढ़वान्, अहं प्रीतः अवेये... इष्यते...वासवेन...ऊचे।

Sanjivani—अभङ्गमिति। (सारवत्तया अद्रिषु अपि) (अभङ्गम्) अप्रतिबन्धं (मे) (आयुधं) वज्रं (त्वदन्येन न विसोढ़म्)—अतः—(मां) (प्रीतं) सन्तुष्टम् (अवेहि) (तुरङ्गमम् ऋते) तुरङ्गं वर्जयित्वा—"अन्यारादितरर्त्ते—" (२।३।२९। पा. ५९९ सि.) इति पञ्चमी—(किम् इच्छसि इति स्फुटं वासवः आह)। तुरङ्गमात् अन्यत् अदेयं नास्तीति भावः॥ ६३॥

टीकायाः पाठान्तरम्।

All editions of Sanjivani read असङ्ग। This does not give a good sense. At the best, it means that the weapon does not stick to it but pierces through it. We suspect the true reading is अभङ्ग as one of the copies of Sanjivani consulted by Prof.

Nandgárgikar reads. The paraphrase अप्रतिबन्धम् shows that Mallinátha could not read असङ्गम्। We see, here, the hand of an erring copyist.

Sanjivani Explained.

तुरङ्गमादृते अन्यत् अदेयं नास्तीति भावः—The purport is 'there is nothing, except the horse, which I cannot give you'.

"अव्याहतादितरते—" See I, 66.

Bengali.—"বলবত্তাহেতু পর্ব্বত সকলেও অপ্রতিহত আমার অস্ত্র তুমি ব্যতীত অপর কেহই সহ্য করিতে সমর্থ হয় নাই, (অতএব) আমি তোমার উপর সন্তুষ্ট হইয়াছি জানিবে। তুরঙ্গমব্যতীত কি ইচ্ছা কর?" ইহা ইন্দ্র স্পষ্ট বলিলেন। ৬৩।

English rendering.—"None but thee could bear (the force of) this my weapon which, for its essence, is not capable of being impeded by the very rocks. Know me to be pleased with thee! What dost thou desire save this horse?"—So Vásava said in a clear voice. 63.

Grammatical notes, &c., &c.

Sama'sa.—(1) अविद्यमानः सङ्गः यस्य तत् असङ्गम् (बहु) (V. notes on अनन्यशासनाम्, Sl. 30, C. I.) (2) त्वत् अन्यः त्वदन्यः (पञ्चमीतत्) तेन. (3) तुरङ्गमात्—(V. तुरङ्ग, Sl. 38, C. III.).

Case-ending.—(1) अद्रिषु—विषयाधिकरणे सप्तमी। (2) सारवत्तया—हेतौ तृतीया (3) मे—शेषे षष्ठी (4) त्वत्—(When samása is not made) अन्ययोगे पञ्चमी (5) अन्येन—अनुक्ते कर्तरि तृतीया। (6) आयुधम्—उक्ते कर्मणि प्रथमा (7) तुरङ्गमात्—ऋतेयोगे पञ्चमी पाणिनी। The alternative form is तुरङ्गमम्। But that is not after पाणिनि or भट्टोजि or even हरदत्त। ज्ञानेन्द्र thus defends द्वितीया in alliance with ऋते। कथं तर्हि 'ऋते शिवं पुरुषाराधनमवतें' इति प्रयोगः? इति चेत् प्रमादोऽयमिति हरदत्तः। अन्ये तु 'ततोऽन्यत्रापि दृश्यते' इति द्वितीयपक्षात् चैवं धाप-

शीतमित्यादाविव ऋतेयोगे द्वितीयापि साधुरित्याहुः—अस्मिन् व्याख्याने 'ऋते द्वितीया च' इति चान्द्रसूत्रमनुकूलम् ।" (V. तत्त्वबोधिनी on २।३।२९। पा. ५९५ सि.) The Várttika •

> उभसर्वतसोः कार्य्या धिगुपर्य्यादिषु त्रिषु ।
> द्वितीयाम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते ॥

makes is clear that द्वितीया is possible not only in alliance with उभयतः, सर्व्वतः or धिक्, or with any of the three words उपरि, अधि and अधः repeated twice, i.e., with उपर्युपरि, अध्यधि or अधोऽधः but even in alliance with other words. In 'चैत्रं यावत् शीतम्,' चैत्र receives द्वितीया in alliance with यावत् । So द्वितीया in alliance with ऋते is not against the spirit of the Várttika.

The grammarian चान्द्र, again, explicitly enjoins द्वितीया in alliance with ऋते । (8) स्फुटम्—क्रियाविशेषणम् ।

Different meanings.—(1) अद्रि—'अद्रयो द्रुमशैलार्काः' (अ.) (2) सार—(V. Sl. 14, C. I.)

Derivation.—(1) अद्रिषु—अद् + क्रिन् (7th c. s.)—'अदिशदि—' (उ. ४।६५।) (2) सारवत्तया—(सृ + णिच् =) सारि + घञ् (कर्त्तरि, V. Sl. 14, C. I.) = सारः । सार + मतुप् = सारवत् । सारवत् + तल् (3rd c. s.) (3) विषीढम्—वि + सह् + क्तः (कर्म्मणि) । The analysis of सोढा—सह् + क्त । By "होढः" (८।२।३१। पा. ३२४ सि.) ह् is changed into ढ् । By "झषस्तथोर्धोऽधः" (८।२।४०। पा. २२८० सि.) त् is changed into ध् । The form becomes सढ् + ध् । Again by the rule—"ष्टुना ष्टुः" (८।४।४१ पा. ११३ सि.) ध् becomes ढ् । "ढ्रलोपे पूर्वस्य दीर्घोऽणः" (६।३।१११। पा. १७४ सि.) drops the first ढ् । Now by "सहिवहोरोदवर्णस्य" (६।३।११२ पा. २३५० सि.) [The अवर्ण of the roots सह् and वह् is changed into ओ if a ढ् of it elides] स of सढ् becomes सो । *N. B.* "The स

of विसोढम् is not changed into ष। The Sutra is "सोढः" (८।३।११५ पा. २३५८ सि.) [The स् of the सोढ् form of सह् should not be changed into ष् under any circumstances]. (4) अवेहि—अव +इ (अ)+लोट्—हि (5) तुरङ्गमात्— (V. तुरङ्ग Sl. 38, C. III.) (6) आह—ब्रू+लट्—तिप्, पक्षे ब्रवीति। (7) वासव:—(V. Sl. 58, C. III.).

Conjugation.—(1) सह् (to endure, to forgive &c.)—सहते (लट्) सहताम् (लोट्) असहत (लङ्) सहेत (वि. लिङ्) सेहे (लिट्) सहिता, सोढा (लुट्) सहिष्यते (लृट्) असहिष्यत (लृङ्) असहिष्ट, असहिषाताम्, असहिषत (लुङ्) असाहि (कर्मणि-लुङ्) सिसहिषते (सन्-लट्) सासह्यते (यङ्-लट्) साहयति (णिच्-लट्) असीसहत् (णिच्-लुङ्) सोढः (क्तः) It is also चुरादि—साहयति, सहति (लट्)। It is दिवादि to mean 'satisfaction' and 'forgiveness'.

'साहयत्याहवे क्षोभं सहति द्रविणव्ययम्।
अभ्यार्थं सहते नासौ सह्यति चितिरक्षणे॥'

(V. कविरहस्य Sl. 31.)

(2) ब्रू—(V. I, 86.)

Remark.—आह is a substitute of ब्रवीति। The Sutra is "ब्रुवः पञ्चानामादित आहो ब्रुवः" (३।४।८४ पा. २३५० सि.)। It means that the first five लिट् inflexions, viz., णल्, अतुस्, उस्, थल् and अथुस्, are optionally substituted for the first five लट् inflexions of the परस्मैपद of the root ब्रू, and आह् is optionally substituted for the root itself when followed by any of those five inflexions. Thus आह becomes a present tense, though it has the form of the past. So the rhetorician, Vámana, says—"आह इति भूते अन्यथाभ्रमात्" (See काव्यालङ्कारसूत्र) which means that the use of आह in the past tense is due to the mistake from its लकार form. It is not the ordinary लकार form signifying the past. This remark shows that though ungrammatical, its use is frequent.

Strict grammar requires that to make it past we should add a स्म to it.

The rhetorician goes on—"निपुणा एव प्रयुञ्जते—'आह स्म स्मितमधुमधुराक्षरां गिरम्' इति ।" One of the Calcutta editors, therefore, wishes to read the last foot as "किमिच्छसीति स्म तमाह वासवः" । Another reason which forces the editor to make the emendation is that स्फुटम् in the foot is a mere surplusage and स्मितम् which is noticed by Prof. Nandárgikar scarcely improves the situation. Praise is certainly due to his ingenuity. Throughout Raghuvansam one or two instances only may be found of Kálidása's using आह in the past tense.

ततो निषङ्गादसमग्रमुद्धृतं
सुवर्णपुङ्खद्युतिरञ्जिताङ्गुलिम् ।
नरेन्द्रसूनुः प्रतिसंहरन्निषु
प्रियंवदः प्रत्यवदत् सुरेश्वरम् ॥ ६४ ॥

उद्धृतम्—निःसृतम् (पा.)

नरेन्द्रसूनुः—दिलीपसूनुः (पा.)

प्रियंवदः—प्रियंवदम् (Nand. foot notes). This reading is bad. Raghu was प्रियंवद and not Indra.

Prose order.—ततः प्रियंवदः नरेन्द्रसूनुः निषङ्गात् असमग्रम् उद्धृतं सुवर्णपुङ्खद्युतिरञ्जिताङ्गुलिम् इषुं प्रतिसंहरन् सुरेश्वरं प्रत्यवदत् । Mallinátha places 'प्रियंवदः नरेन्द्रसूनुः' after 'प्रतिसंहरन्'।

Explanation by use of synonyms.—ततः (तदनन्तरं) प्रियंवदः (प्रियभाषी) नरेन्द्रसूनुः (राजकुमारः) निषङ्गात् (तूणीरात्) असमग्रम् (असम्पूर्णम्) उद्धृतम् (उत्तोलितं) सुवर्णपुङ्खद्युतिरञ्जिताङ्गुलिं (काञ्चनमूलप्रभा-भास्वरकराङ्गुलम्) इषुं (बाणं) प्रतिसंहरन् (निवर्त्तयन्) सुरेश्वरं (देवराजं) प्रत्यवदत् (प्रत्युवाच) ।

Substance—देवराजस्येदृशं सान्त्वयचनं निशम्य रघुनितरां प्रीत:। मर्य्यादज्ञ: स देवेन्द्रस्य मर्य्यादां रक्षन् समरादविरतोऽभूत्। प्रागेव वज्रस्य प्रत्युत्तरार्थं स: भीषणमेकं शरं तूणादुत्तोलयितुमारेभे। तस्य मूलं सुवर्णमयमासीत्। तत्प्रभया रघोरङ्गुलयोमण्डिता: आसन्। अधुना अर्द्धोत्तोलितं तत् शरं पुनस्तूणीरे संस्थापयामास।

Change of voice.—...प्रियंवदेन नरेन्द्रसूनुना...प्रतिसंहरता सुरेश्वर: प्रत्योच्यत।

Sanjivani.—तत इति। (तत:) (निषङ्गात्) तूणीरात् (असमग्र) यथा तथा (उद्धृत) सुवर्णपुङ्खद्युतिभि: रञ्जिता: अङ्गुलय: येन तं [सुवर्णपुङ्खद्युतिरञ्जिताङ्गुलिम्] (इषु) (प्रतिसंहरन्) निवर्त्तयन्—'नाप्रहरन्तं प्रहरेदिति' निषेधादिति भाव:—प्रियं वदतीति—(प्रियंवद:)—"प्रियवशे वद: खच्" (४।२।३८ पा. २९५३ सि.) इति खच्प्रत्यय:—"अरुर्द्विषत्—"(६।३।६७। पा. २९४८ सि.) इत्यादिना मुमागम:—(नरेन्द्रसूनु:) रघु: (सुरेश्वरं प्रत्यवदत्)—न तु प्राहरदिति भाव: ॥ ६४ ॥

Sanjivani Explained.

सुवर्णपुङ्खद्युतिरञ्जिताङ्गुलि—The shafts was golden and the lustre of its root fell on his fingers.

He used golden shafts, because he was a prince.

नाप्रहरन्तं प्रहरेत् इति निषेधात्—Raghu did not hit Indra because of the prohition of the S'ástra that one should not strike one's foe if the foe does not strike.

"प्रियवशे वद: खच्"—खच् is added in कर्मवाच्य to the root वद when it is preceded by प्रिय or वश।

"अरुर्द्विषत्—" (See II, 74). प्रिय is a word ending in a vowel. It precedes the verb वद which admits खच्। So मुम् is the augment after प्रिय।

Bengal.—তদনন্তর প্রিয়ভাষী রাজকুমার, যে বাণ তূণীর হইতে কিয়দংশমাত্র উদ্ধৃত হইয়া সুবর্ণময়মূলদেশপ্রভাদ্বারা তদীয় অঙ্গুলিচয়

রঞ্জিত করিতেছিল তাহা প্রতিসংহার করিতে করিতে দেবরাজকে প্রত্যুত্তর প্রদান করিলেন। ৬৪।

English rendering.—Then replacing the arrow which had being half raised from the quiver, and which, with the effulgence of its golden root, adorned his fingers, that prince of sweet speech answered the lord of the deities- 64.

Grammatical notes, &c., &c.

Sama'sa.—(1) न समग्रं असमग्रम् (नञ्तत्) (2) सु (शोभनः) वर्णः यस्य तत् सुवर्णम् (बहु) पुमांसं खनति,पुंसा खन्यते वा पुङ्खः ; सुवर्णनिर्मितः पुङ्खः सुवर्णपुङ्खः (शाकपार्थिवादित्वात् मध्यपदलोपि-कर्मधा) सुवर्णस्य पुङ्खः (षष्ठीतत्) इति वा तस्य द्युतिः सुवर्णपुङ्खद्युतिः (षष्ठीतत्) तया रञ्जिताः सुवर्णपुङ्खद्युतिरञ्जिताः (तृतीयातत्) सुवर्णपुङ्खद्युतिरञ्जिताः अङ्गुलयः येन स सुवर्णपुङ्खद्युतिरञ्जिताङ्गुलिः (बहु) तम् (3) नरः इन्द्र इव नरेन्द्रः (उपमितसमासः) or नराणां or नरेषु इन्द्रः (श्रेष्ठः) [षष्ठी or सप्तमीतत्] तस्य सूनुः नरेन्द्रसूनुः (षष्ठीतत्) (4) प्रियं वदतीति प्रियंवदः (उपपदतत्) (5) सुराणां or सुरेषु ईश्वरः (षष्ठी or सप्तमीतत्) तम्।

Case-ending.—(1) निषङ्गात्—"ध्रुवमपायेऽपादानम्" (See I, 18) इति सूत्रादपादाने पञ्चमी (2) सुवर्णपुङ्खद्युतिरञ्जिताङ्गुलिम्—विशेषणम्—'इषुम्' इत्यस्य (3) असमग्रम्—क्रियाविशेषणम्।

Synonyms.—(1) निषङ्ग—"तूणोपासङ्गतूणीरनिषङ्गा इषुधिर्द्वयोः। तूण्याम्।" (अ.) सुवर्ण—(I, 10).

Derivation.—(1) निषङ्गात्—नि + सन्ज् + घञ् (अधिकरणे, 5th c. s.) निषज्यन्ते (रज्यन्ते) शरा अत्र इति निषङ्गः। (2) उद्धृतम्—उद् + धृ or हृ + क्तः (कर्मणि, 2nd c. s.) (3) पुङ्खः—पुमस् + खन् + डः—"अन्येष्वपि दृश्यते" (V. notes on परिखा, Sl. 30, C. I.) (4) द्युतिः—द्युत् + इन् (करणे) द्योततेऽनया (5) रञ्जितः—(रञ्ज् + णिच्) रञ्जि + क्तः (कर्मणि) + टाप् (1st c. p.) (6) प्रतिसंहरन्—प्रति + सम् + हृ + शतृ (1st c. s.) (7) प्रियंवदः

—प्रिय + वद + खच्—मुमागमः (V. Sanjivani Explained.) (8) प्रत्यवदत् —प्रति + वद + लङ्—दिप् ।

Conjugation.—(1) वद—वदति (लट्) अवदत् (लङ्) वदतु (लोट्) वदेत् (वि. लिङ्) उवाद ऊदतुः उवदिथ, ऊदिव (लिट्) अवादीत् (लुङ्) वावद्यते (यङ्-लट्) वादयति (णिच्-लट्) अवीवदत् (णिच्-लुङ्) (2) हृ—(V. Sl. 39, C. III.)

PECULIARITIES.

प्रतिसंहरन्—"लक्षणहेत्वोः क्रियायाः" (३।२।१२६। पा० ३१०२ सि.) इति सूत्रात् 'प्रत्यवदन'क्रियायाः परिचायकेऽर्थे शतृप्रत्ययः । (See I, 25). When did Raghu reply ? To indicate the time the poet says हृषुं प्रतिसंहरन् । So प्रतिसंहरन् is the indicator of प्रत्यवदत् । Hence, हृ admits शतृ ।

अमोच्यमस्त्रं यदि मन्यसे प्रभो
ततः समाप्ते विधिनैव कर्मणि ।
अजस्रदीक्षाप्रयतः स मद्गुरुः
क्रतोरशेषेण फलेन युज्यताम् ॥ ६५ ॥

मूलस्य पाठान्तरम् ।

स मद्गुरुः—स मे गुरुः and च मे गुरुः Nand. foot-notes.

Prose order.—(हे) प्रभो ! यदि अस्त्रम् अमोच्यं मन्यसे, ततः अजस्रदीक्षाप्रयतः सः मद्गुरुः विधिना एव कर्मणि समाप्ते क्रतोः (यत् फलं तेन) अशेषेण फलेन युज्यताम् । Mallinátha places 'यदि' after 'मन्यसे' and 'अशेषेण' after 'फलेन' ।

Explanation by use of synonyms.—हे प्रभो ! (भो इन्द्र !) यदि (चेत्) अस्त्रं (तरत्रम्) अमोच्यं (त्यागानर्ह) मन्यसे (विचारयसि) ततः (तदा) अजस्रदीक्षाप्रयतः (अविरतयज्ञनिरतः) सः (प्रसिद्धः) मद्गुरुः (मज्जनकः) विधिना

एव (यथानियममेव) कर्मणि (यज्ञकार्य्ये) समाप्ते (सम्पन्ने सति) क्रतोः (यागस्य) यत् फलं भवेत्, तेन—अशेषेण (समग्रेण) फलेन (मित्रया) युज्यतां (युक्तोऽस्तु)।

Substance.—हे देवराज! किमधिकं ब्रूमः भवतः यतक्रतुत्वं रक्षितुम् अश्वमिमं त्वं प्रत्यर्पयितुं नेच्छसि चेत् तदा एवं क्रियताम् यथाविधि अश्वमेधयज्ञे सम्पन्ने सति तद्याजकस्य यत् फलं स्यात्, अश्वाभावादपि अविरतयज्ञकारिणो मज्जनकस्य तत्कृत्स्नं फलं भवतु।

Change of voice.—...अश्वः अमोच्यः मन्यते...अजस्रदीक्षाप्रयतं स मद्गुरुम् भवान्...युनक्तु (if युज्यताम् be in कर्मवाच्य)...। If it be a verb in कर्म्मकर्त्तृवाच्य, the sentence would not undergo any change. If, on the other hand, युज्यताम् be in कर्म्मवाच्य, the sentence in passive voice would be अजस्रदीक्षाप्रयतेन मद्गुरुणा युज्यताम्।

Sanjivani.—अमोच्यमिति। हे (प्रभो!) इन्द्र! (अश्वम् अमोच्यं मन्यसे यदि) (ततः) तर्हि—अजस्रदीक्षायां प्रयतः [अजस्रदीक्षाप्रयतः] (सः) (मद्गुरुः) मम पिता (विधिना एव कर्मणि समाप्ते) सति (क्रतोः—यत् फलं तेन (फलेन) (अशेषेण) कृत्स्नेन (युज्यतां) युक्तः अस्तु। अश्वमेधफललाभे किम् अश्वेन इति भावः॥ ६५॥

Sanjivani Explained.

अश्वमेधफललाभे * * * भावः—The sum and substance is —'If my father gets the fruits of the horse-sacrifice, without celebrating the sacrifice itself, what need is there of the horse?'

Bengali.—হে প্রভো! যদি অশ্বটীকে অমোচ্য বিবেচনা করেন, তাহা হইলে অবিরতযজ্ঞনিরত আমার সেই পিতা, যথাবিধি যজ্ঞ সমাপ্ত হইলে, উহার (যে ফল হয়, সেই) সমস্ত ফলভাক্ হউন। ৬৫।

English rendering.—If, O lord, thou regardest the horse unreleasable, then let my sire, (who is) always engaged in (the observance of) pious vows, be united with the entire fruit (that arises out) of the sacrifice when all its rites are completed agreeably to the ordinance. 65.

Grammatical notes, &c., &c.

Sama'sa.—(1) न मोच्यः अमोच्यः (नञ्तत्) तम् (2) अजस्रदीक्षाप्रयतः —(V. Sl. 44, C. III.) (3) मम गुरुः मद्गुरुः (षष्ठीतत्) (4) अविद्यमानः शेषः यस्य तत् अशेषम् (बहु) or अविद्यमानशेषम्—तेन।

Case-ending.—(1) विधिना—करणे तृतीया (2) कर्मणि—भावाधिकरणे सप्तमी— (V. notes on ज्ञाने I, 22) (3) क्रतोः—शेषे षष्ठी 'फलेन' इत्यनेन सम्बन्धः (4) मद्गुरुः—उक्तकर्म of 'युज्यताम्' which has भवता for its अनुक्तकर्तृ। Here 'युज्यताम्' should not be taken as in the active voice, because युज् would then be a दिवादि आत्मनेपदिन्, meaning 'to contemplate.' This sense does not suit the context. If युज्यताम् be in कर्म्मकर्तृवाच्य, मद्गुरुः would be its कर्मकर्तृ। (5) फलेन—सहार्थाप्रयोगेऽपि सहार्थे तृतीया।

Synonyms.—(1) क्रतु—(V. Sl. 31, C. I.) (2) अश्व—(V. तुरङ्ग, Sl. 38, C. III.).

Different meanings.—(1) क्रतु—(V. Sl. 38, C. III.) (2) गुरु:—(V. Sl. 64, C. I.)

Derivation.—(1) अमोच्यम्—मुच्+ण्यत् (कर्मणि)=मोच्यः। न+मोच्यः=अमोच्यः (2nd c. s.) "चजोः कु घिण्यतोः" (७।३।५२। पा. २८६३ सि.) [In alliance with the affix ण्यत् or one which has घ for इत्, the च and ज of the root, when they are the last letters, are changed into क and ग respectively: as सिच्-सेक, सेक्य; भुज्-भोग, भोग्य.] This rule, we see, does not apply to अमोच्य, although it is formed by ण्यत्। ण्यत् is added to it by the Sutra—"ऋहलोर्ण्यत्" (३।१।१२४। पा. २८७२ सि.) [A root ending in ऋ or a consonant, shall have the affix ण्यत्] Why is not च् of मुच् changed into क्? Pánini, Bhattoji, and Jnánendra do not notice the form. पचनाम्,

however, removes this difficulty. He has framed the rule— 'ऋचरुचमुचयाचप्रवचत्यजियजोनां ण्यति' which means that the च of ऋच्, रुच्, मुच् &c. does not change into क even if ण्यत् is added to the root. He quotes this very example— "अमोच्यमश्वं यदि मन्यसे प्रभो।" It may be derived also thus:— मुचि (चुरादि.)+ण्यत्=मोच्यः। न+मोच्यः। (2) मन्यसे—मन्+लट्—से (3) प्रभो.—प्र+भू+डुः (कर्त्तरि) (तत्सम्बोधने) (4) समाप्ते—सम्+आप्+क्त (कर्त्तरि, 7th c. s (5) अजस्र and दीक्षा—(V. Sl. 44, C. III.) (6) क्रतोः—(V. Sl. 38, C. III.) (7) युज्यताम्—युज्+लोट्—ताम् (कर्मणि) or कर्मकर्त्तरि।

Conjugation.—(1) युज्—V. Sl. 38, C. III; (2) मन्—(V. Sl. 2, C. I.).

Force of एव is अवधारण।

मन्यसे—In alliance with यदि, लट् is used for लृट्। "यदायद्योरुपसंख्यानम्".(३।३।१४७) पा. वा ४८०४ सि ।

यथा च वृत्तान्तमिमं सदोगत-
स्त्रिलोचनैकांशतया दुरासदः।
तवैव सन्देशहराद् विशांपतिः
शृणोति लोकेश तथा विधीयताम्॥ ६६ ॥

मूलस्य पाठान्तरम्।

लोकेश—देवेश (पा.)

Prose order.—सदोगतः त्रिलोचनैकांशतया दुरासदः विशांपतिः यथा इमं वृत्तान्तं तव सन्देशहरात् एव शृणोति च (हे) लोकेश ! तथा विधीयताम्।

Explanation by use of synonyms.—सदोगतः (सभायाम् प्राप्तः) त्रिलोचनैकांशतया (यजमानरूपेण शिवमूर्त्तिधारणात्) दुरासदः (अनाक्रमणीयः) विशांपतिः (नराणां नाथः, राजेति यावत्) यथा (येन प्रकारेण) इमम्

(उपस्थितं) वृत्तान्तम् (उदन्तं) तव (भवतः) सन्देशहरात् एव (वार्त्ताहारकात्) शृणोति च (आकर्णयति च) हे—लोकेश (लोकनाथ!) तथा (तादृक्कार्यं) विधीयताम् (अनुष्ठीयताम्)।

Substance.—साम्प्रतं नरपतिः यज्ञनिकेतनस्थः सन्नष्टमूर्त्तेः शिवस्य यजमानमूर्त्तिमाश्रित्य यज्ञकर्मणि निरतोऽस्ति। अस्माभिर्दूरस्थैस्तद्दर्शनं दुर्लभम्। अतएव हे लोकनाथ! यथा स नृपतिः वृत्तान्तमिमं त्वत्प्रेरितवार्त्ताहरमुखादेवाकर्णयति भवता तथानुष्ठीयतामिति मे निवेदनम्।

Change of voice.—सदोगतेन...दुरासदेन...पत्या...अयं वृत्तान्तः...श्रूयते...विदधातु।

Sanjivani.—यथेति। (सदोगतः) सदोगृहं गतः—त्रिलोचनस्य, ईश्वरस्य; एकांशतया; अष्टानाम्, अन्यतममूर्त्तित्वात् [त्रिलोचनैकांशतया] (दुरासदः) अस्मादृशैः दुष्प्रापः (विशांपतिः यथा इमं वृत्तान्तं तव) (सन्देशहरात्) वार्त्ताहरात् (एव शृणोति च) हे—(लोकेश) इन्द्र (तथा विधीयताम्) ॥ ६६ ॥

Bengali.—যজ্ঞনিকেতনস্থ এবং ত্রিলোচনের একাংশতা হেতু (অস্মাদৃশ জনগণের) দুর্লভদর্শন নরপতি যাহাতে আপনার দূত হইতেই এই বৃত্তান্ত শ্রবণ করিতে পারেন, হে লোকনাথ! তাহাই করুন। ৬৬।

English rendering.—And be it so arranged, O lord of the worlds, that that ruler of men who is (now) in the sacrificial chamber and who is (therefore) unassailable in consequence of his being (now) a part of the three-eyed (deity), may hear of this incident from thy own message-bearer.! 66.

Grammatical notes, &c., &c.

Sama'sa.—(1) वृत्तः अन्तः अस्य इति वृत्तान्तः or वृत्तस्य अन्तः (बहु) or षष्ठीतत्) तम् (2) सदः गतः सदोगतः (द्वितीयातत्) (3) त्रीणि लोचनानि यस्य स त्रिलोचनः (बहु) त्रिषु कालेषु लोकेषु वेदेषु च लोचनं (ज्ञानं) यस्य or त्रयो लोचनानि यस्मिन्। एकः (अद्वितीयः) अंशः एकांशः (कर्मधारयः) [V. एकसुतेन, Sl. 24, C. III.] त्रिलोचनस्य एकांशः त्रिलोचनैकांशः (षष्ठीतत्) तस्य भावः

विलोचनैकांशतया—तया (4) दुःखेन आसद्यते असौ इति दुरासदः (उपपदतत्) (5) सन्देशं हरति इति सन्देशहरः (उपपदतत्) तस्मात्—"हरतेरनुद्यमनेऽच्" (३।२।६। पा. २९२३ सि.) [The root हृ admits अच् in कर्तृवाच्य if it does not mean उद्यमन। E.g., अंशहर। To mean उद्यमन (effort) the form becomes हार as in भारहार] (6) लोकानाम् ईशः लोकेशः (तत्सम्बोधने) (For such a Samása, see द्विपेन्द्र, Sl. 7, C. II.)

Case-ending.—(1) यथा and तथा—अव्ययं, क्रियाविशेषणम्। (2) विलोचनैकांशतयो—इत्थं तृतीया (3) सन्देशहरात्—"श्रुत्यर्थानां श्रावयिता" इति मतादपादाने पञ्चमी। According to Pánini it falls under "ध्रुवमपायेऽपादानम्" (V. वनान्तरात्, Sl. 49, C. I.) "आख्यातोपयोगे" (१।४।२९ पा. ५९२ सि.) cannot cover it because here the relation between the addressor and the addressee is not that between a preceptor and a pupil. (4) विश्वाम्—शेषषष्ठी—The सम्बन्ध is स्वस्वामित्व।

Synonyms.—(1) त्रिलोचन—"भूतेशः खण्डपरशुर्गिरीशो गिरिशो मृडः। मृत्युञ्जयः कृत्तिवासाः पिनाकी प्रमथाधिपः॥ उग्रः कपर्दी श्रीकण्ठः शितिकण्ठः कपालभृत्। वामदेवो महादेवो विरूपाक्षस्त्रिलोचनः॥ कृशानुरेताः सर्वज्ञो धूर्जटिर्नीललोहितः।" (अ.)

Different meanings.—(1) वृत्तान्त—'वृत्तान्तोऽवसरे[1] भावे[2] कात्स्न्र्ये[3] स्यात्[4] वार्त्ताविशेषयोः[5]। वृत्तान्तः प्रक्रियायाञ्च।' (वि.)

Derivation.—(1) सदः—सद + असुन् (अधिकरणे, उ. ४।१८९१) (2) दुरासदः—दुर् + आ + सद + खल् (कर्मणि, 1st c. s.) (3) सन्देशहरात्—सम् + दिश् + घञ् (कर्मणि)—सन्देश + हृ + अच् (कर्तरि, 5th c. s.) (4) शृणोति—श्रु + लट्—तिप् (5) विधीयताम्—वि + धा + कर्मणि—लोट्—ताम्।

Conjugation.—(1) श्रु—(V. Sl. 3, C. II.) (2) धा—(V. Sl. 24, C. I.).

Declension of सदस्। When neuter, it is declined like पयस्—सदः, सदसी, सदांसि ; when feminine, सदः, सदसौ, सदसः। As regards the other cases, decline it like वेधस्।

Force of च is समुच्चय। It establishes the connection between the present and the previous verse.

Force of एव is इतरव्यवच्छेदकत्वम्। From thy messenger only and not from any others. (I, 18).

विशांपतिः—(V. our notes on it, Sl. 93, C. I.).

Remark.—Cháritravardhana thinks that the king was unassailable because he was a part and parcel of S'iva : he was a part and parcel of the great deity, because he was now engaged in sacrifice. Vallabha explains, he had the parts of S'iva in him because the sacrificer is one of the eight forms of that deity.

तथेति कामं प्रतिशुश्रुवान् रघो-
र्यथागतं मातलिसारथिर्ययौ।
नृपस्य नातिप्रमनाः सदोगृहं
सुदक्षिणासूनुरपि न्यवर्त्तत ॥ ६७ ॥

Prose-order.—मातलिसारथिः रघोः कामं तथा इति प्रतिशुश्रुवान् यथागतं ययौ, सुदक्षिणासूनुः अपि नातिप्रमनाः (सन्) नृपस्य सदोगृहं न्यवर्त्तत।

Explanation by use of synonyms.—मातलिसारथिः (मातलि-परिचालितरथाधिरूढ इन्द्रः) रघोः (दिलीपकुमारस्य) कामं (मनोरथं) तथा (तथास्तु) इति (एवं) प्रतिशुश्रुवान् (कृताङ्गीकारः) यथागतं (येन मार्गेणागतं तेनैव, येनाडम्बरेणागतं तेनैव वा) ययौ (अगाम) ; सुदक्षिणासूनुः (सुदक्षिणातनयः) अपि (पश्चात्तु) नातिप्रमनाः (विजयलाभेऽपि अश्वनाशात् नातिहृष्टचित्तः सन्) सदोगृहं (पितुर्यज्ञागारं) न्यवर्त्तत (निववृते, प्रत्यागतः इत्यर्थः)।

Substance.—रघोरभिप्रेतमाकर्ण्य—'तथास्तु' इत्युदीर्य देवराजोऽभीष्टकारबद्धः सन् येनैव पथागतः, तेनैव पुनः प्रतस्थे। सुदक्षिणातनयोरघुश्च विजयलाभेऽपि अश्वनाशात् नातिहृष्टचित्तः सन् पितुः यज्ञगृहं प्रत्याजगाम।

Change of voice.—मातलिसारथिना......प्रतिश्रुत्य वै......ययै, सुदक्षिणासूनुना...नातिप्रमनसा...न्यवर्त्यत।

Sanjivani.—तथेति। (मातलिसारथिः) इन्द्रः (रघोः) सम्बन्धिनं (कामं) मनोरथं (तथेति) तथास्तु इति (प्रतिश्रुत्य वान्)—"भाषायां सदवसश्रुवः" (३।२।१०८ पा. ३०९७ सि.) इति क्वसुप्रत्ययः—(यथागतं ययौ सुदक्षिणासूनुः रघुः अपि) नातिप्रमनाः) विजयलाभेऽपि अश्वनाशात् नातिहृष्टः सन्—नञर्थस्य नशब्दस्य सुप्सुपेति समासः—(नृपस्य सदोगृहं) प्रति (न्यवर्त्तत)॥ ६७॥

Sanjivani Explained.

भाषायां सदवसश्रुवः—See notes on निषेदुषी in II, 6.

विजयलाभेऽपि * * * सन्—He was not much glad though he achieved a victory because he could not get back the horse.

नञर्थस्य नशब्दस्य सुप्सुपेति समासः—See Samása.

Bengali.—মাতলিসারথি (ইন্দ্র) 'তথাস্তু' এই বলিয়া রঘুর অভিলাষপূরণে প্রতিজ্ঞাবদ্ধ হইয়া যে পথে আগমন করিয়াছিলেন, (পুনরায়) সেই পথেই প্রস্থান করিলেন। সুদক্ষিণাতনয়ও নাতিহৃষ্টচিত্ত হইয়া নৃপতির যজ্ঞসদনে প্রত্যাবর্ত্তন করিলেন। ৬৭।

English rendering.—Having promised (the fulfilment of) Raghu's desire, saying 'so be it,' he, having Mátili for his charioteer, went away as he had come. And the son of Sudakshiná, not much pleased, returned to the sacrificial chamber of the king. 67.

Grammatical notes, &c., &c.

Sama'sa.—(1) आगतम् (आगमनम्) अनतिक्रम्य यथागतम् (अव्ययीभावः) (2) मातलिः सारथिः यस्य स मातलिसारथिः (बहु) (3) प्रकृष्टं मनः यस्य स प्रमनाः—'प्रादिभ्यो धातुजस्य—' (V. notes on उद्बाहुः, Sl. 3, C. I.)

अति (अतिशयेन) प्रमनाः अतिप्रमनाः (सुप्सुपा) न अतिप्रमनाः (सुप्सुपा) [नञर्थस्य नशब्दस्य सुप्सुपेति समासः] There is a word न which has the same meaning as नञ्। Here न is compounded with अतिप्रमनाः। Had it been नञ् it would have changed into अन् (V. notes on, नाक, Sl. 5-9, C. I.) Vopadeva and other grammarians except पद्मनाभ (who is a strict fallower of Pánini) acknowledge the change of नञ् into अन् and न optionally, when it is followed by vowels (4) मदस्य गृहं मदोग्रहम् (षष्ठीतत्) (5) 'सुदक्षिणायाः सुतः सुदक्षिणासुतः (षष्ठीतत्) For the Samása of सुदक्षिणा—V. Sl. 31, C. I.).

Case-ending.—(1) तदा—अव्ययं, used in first case, having 'अस्' for verb its understood. (2) इति—अव्यय, adjective of कामम्। (3) रघोः—शेषे षष्ठी (4) कामम्—क्वसुप्रत्ययान्त'प्रतिगृह्य वान्' इति पदयोगे द्वितीया (5) यथागतम्—अव्ययं, क्रियाविशेषणम् (6) नृपस्य—शेषे षष्ठी (7) मदोग्रहम्—न्यवर्त्तत इति क्रियायाः कर्म। उपसर्गवत्त्वात् वृत्धातुरत्र सकर्मकः। मल्लिनाथमते 'प्रति' इति गम्यमाने कर्मप्रवचनीययोगे द्वितीया। Here the intransitive वृत् is transitive because of its alliance with an उपसर्ग। Mallinátha takes 'प्रति' to be understood in alliance with which मदोग्रह becomes कर्म।

Different meanings.—(1) काम—'कामः स्मरे[1] च्छयोः[2] पुमान्। रेतस्यपि[3] निकामे[4] च कार्थेऽपि[5] च व्यासदेसकम्।' (मे.)

Derivation.—(1) कामम्—कम् + घञ् (कर्मणि, 2nd c. s.) (2) प्रतिगृह्य वान्—प्रति + ग्रह + क्वसु (1st c. s.) The word प्रतिगृह्य वस् is declined thus :—प्रतिगृह्य वान्, प्रतिगृह्यवांसौ, प्रतिगृह्य वांसः, प्रतिगृह्य वांसम्, प्रतिगृह्य ऊषः। प्रतिगृह्य षा, प्रतिगृह्य वद्भ्याम् प्रतिगृह्य वद्भिः। प्रतिगृह्य षे,

प्रतिगृह्य बहुः। प्रतिगृह्य यः। प्रतिगृह्य यौः प्रतिगृह्य याम्। प्रतिगृह्य वि, प्रतिगृह्यवतम्। प्रतिगृह्य वन। (3) मातलिः—मत + ला + क = मतलः। मतल + इञ्—मतलस्यापत्यं पुमान् (4) सारथिः—(V. Sl. 37, C. III.) (5) ययौ—या + लिट्—णल् (6) न्यवर्तत—नि + वृत् + लङ्—त।

Conjugation.—(1) वृत्—(V. Sl 49, C. I.) (2) या—(V. Sl. 3, C. III.).

Force of अपि is पक्षान्तर।

Remark.—A Calcutta editor has not changed प्रतिगृह्य वान् in changing the voice. It is probably only a slip of the pen.

तमभ्यनन्दत् प्रथमं प्रबोधितः
प्रजेश्वरः शासनहारिणा हरेः।
परामृशन् हर्षजडेन पाणिना
तदीयमङ्गं कुलिशव्रणाङ्कितम् ॥ ६८ ॥

मूलस्य पाठान्तरम्।

हर्षजडेन—हर्षचलेन (चा. टि.)

Prose order.—हरेः शासनहारिणा प्रथमं प्रबोधितः प्रजेश्वरः हर्षजडेन पाणिना कुलिशव्रणाङ्कितं तदीयम् अङ्गं परामृशन् अभ्यनन्दत्।

Explanation by use of synonyms.—हरेः (इन्द्रस्य) शासनहारिणा (सन्देशवाहकेन) प्रथमं (पूर्वं) प्रबोधितः (ज्ञापितः वृत्तान्तमितिशेषः) प्रजेश्वरः (नरनाथो दिलीपः) हर्षजडेन (हर्षनिष्पन्देन) पाणिना (हस्तेन) कुलिशव्रणाङ्कितं (वज्रक्षतचिह्नितं) तदीयं (तत्सम्बन्धि) अङ्गं (गात्रं) परामृशन् (स्पृशन्) तं (पुत्रं रघुम्) अभ्यनन्दत् (आलिङ्गनादिभिः प्रीणयामास)।

Substance.—देवराजः दिवं गतोऽपि स्ववचनमनुसृत्य दिलीपाय दूतं विससर्ज। स च दूतः रघोरागमनात् प्राक् रघुपुरन्दरयोर्निखिलं वृत्तान्तं विज्ञापयामास। धन्योऽहं यस्य मे पुत्र ईदृशो वीरः इति चिन्तयन् वृद्धो राजा नितरां मुमुदे। पुत्रं चागतं तमालिङ्गनादिभिः प्रीणयामास। तस्य शरीरे

वज्रजनितं क्षतं कीदृशभूत् इति च ज्ञातुं तस्याङ्गं पस्पर्श। दिलीपस्यैवमानन्दातिशयोऽभूत् यत् तस्य हस्त आनन्देन जड़ीभूतो बभूव।

Change of voice.—प्रबोधितेन प्रजेश्वरेण......परामृशता सः अभ्यनन्द्यत।

Sanjivani.—तमिति। (हरेः) इन्द्रस्य (शासनहारिणा) पुरुषेण (प्रथमं) (प्रबोधितः) ज्ञापितः—वृत्तान्तम् इति शेषः—(प्रजेश्वरः) दिलीपः (हर्षजड़ेन) हर्षशिशिरेण (पाणिना कुलिशव्रणाङ्कितं, तस्य रघोः इदं (तदीयं) (अङ्गं) शरीरं (परामृशन्) सन् (तं) रघुम् (अभ्यनन्दत्) ॥ ६८ ॥

Sanjivani Explained.

हर्षजड़—Stupified by delight.

Bengali—ইন্দ্রের বার্তাবহকর্তৃক প্রথমেই বিজ্ঞাপিত নরনাথ (দিলীপ) হর্ষনিস্পন্দকরে বজ্রক্ষতচিহ্নিত তদীয়াঙ্গ স্পর্শ করিতে করিতে তাঁহাকে (রঘুকে) অভিনন্দন করিলেন। ৬৮।

English rendering—Informed beforehand by the bearer of Indra's message, that lord of men greeted his son, touching, with hands paralysed by joy, his body marked by the scar of the thunderbolt. 68.

Grammatical notes, &c., &c.

Sama'sa.—(1) प्रकर्षेण बोधितः प्रबोधितः (प्रादिः) (2) प्रकर्षेण जायन्ते इति प्रजाः (उपपदतत्) तासाम् ईश्वरः प्रजेश्वरः (षष्ठीतत्) (3) शासनं हरतीति शासनहारी (उपपदतत्) तेन (4) परा (विशेषेण) मृशन् परामृशन् (प्रादिः) (5) हर्षेण जड़ः हर्षजड़ः (तृतीयातत्) तेन (6) कुलिशः (पर्वतान्) श्यति (नाशयति) इति कुलिशम् (उपपदतत्) or, कुलौ (हस्ते) शेते, कुत्सितमीषद्वा लिशति (V. R. T. of Amarakos'a, N. S. P. Ed. p. 23.) कुलिशेन व्रणः कुलिशव्रणः (तृतीयातत्) तेन अङ्कितं कुलिशव्रणाङ्कितम् (तृतीयातत्) तत्।

Case-ending.—(1) प्रथमम्—क्रियाविशेषणम् (2) शासनहारिणा—अनुक्ते कर्तरि तृतीया (3) हरेः—शेषे षष्ठी—'शासनहारी' (दूतः) इत्यनेन सम्बन्धः (4) पाणिना—करणे तृतीया।

Synonyms.—(1) कुलिश—(V. अशनि, Sl, 56, C. III.)

Different meanings.—(1) कुलिश—'कुलिशौ न स्त्रियां प्रोक्तौ[1] दम्भोलौ[2] ना झषान्तरे।' (मे.) (2) शासन—'शासनं राजदत्तोर्व्यां[1] लेखाज्ञाशास्त्र[2]-शास्तिषु[3]।' (मे.)

Derivation.—(1) अभ्यनन्दत्—अभि + नन्द् + लङ्-तिप् (2) प्रबोधितः—प्र + (बुध् + णिच्—) बोधि + क्तः (कर्मणि)। The causative root बोधि governs two objects: one is indirect, प्रजेश्वर, and the other direct, वृत्तान्त। In the present tense (active voice) the तिङन्त form is—शासनहारी प्रजेश्वरं वृत्तान्तं बोधयति; in the passive voice the form is शासनहारिणा प्रजेश्वरः वृत्तान्तं बोध्यते। So in the active voice, the क्तवत् form is शासनहारी प्रजेश्वरं वृत्तान्तं बोधितवान्; in passive the form is शासनहारिणा प्रजेश्वरः वृत्तान्तं बोधितः। See "गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणिकर्त्ता स णौ" in notes on जायाप्रतिग्राहितगन्धमाल्याम् in II, 1. According to some, अप्रयोज्यकर्म takes प्रथमा in the passive voice in the case of बुद्ध्यर्थक, भक्षार्थक, or शब्दकर्मक roots. Here the verb is बोधि। So the passive form according to them is.—शासनहारिणा प्रजेश्वरं वृत्तान्तः बोधितः। In the Vritti of सुपद्म we find 'बुद्धिभक्षार्थशब्दकर्मकाणामप्रयोज्यस्य इत्येके।' (3) शासनहारिणा—शास् + ल्युट् (करणे) शासनम्। शासन + हृ + णिनिः कर्त्तरि (3rd c. s.) (4) परामृशन्—परा + मृश् + शतृ (1st c. s.) (5) जडेन—जल + अच (3rd c. s.) डलयोरभेदः। (6) तदीयम्—तद् + छः (2nd c. s.) (7) कुलिशम्—कुलिन् + शी + डः (कर्त्तरि) or कुलि (हस्त) + शी + डः or कु + लिश् + क।

Conjugation.—(1) नन्द्—(V. Sl. 57, C. I.) (2) मृश् (to touch) मृशति (लट्) मृशतु (लोट्) अमृशत् (लङ्) मृशेत् (वि. लिङ्) ममर्श (लिट्) मर्ष्टा, म्रष्टा (लुट्) म्रक्ष्यति, मर्क्ष्यति (लृट्) अमार्क्षीत्, अम्राक्षीत्, अमृक्षत्। अमार्ष्टाम्, अम्राष्टाम्, अमृक्षताम् &c. (लुङ्) अमर्शि (कर्मणि-लुङ्) मिमृक्षति

(सन्-लट्) मरीमृज्यते (यङ्-लट्) मर्मर्जति (णिच्-लट्) अमीमृजत् (णिच्-लुङ्) मृष्ट. (क्त)।

इति क्षितीशो नवतिं नवाधिकां
महाक्रतूनां महनीयशासनः ।
समारुरुक्षुर्दिवमायुषः क्षये
ततान सोपानपरम्परामिव ॥ ६९ ॥

मूलस्य पाठान्तरम् ।

इति—इत्थम् Nand, foot notes

Prose order —महनीयशासनः क्षितीशः इति महाक्रतूनां नवाधिकां नवतिम् आयुषः क्षये दिवं समारुरुक्षुः सोपानपरम्पराम् इव ततान ।

Explanation by use of synonyms- महनीयशासनः (पूजनीयाज्ञः) क्षितीशः महीपतिः) इति अनेन प्रकारेण) महाक्रतूनाम् अश्वमेधानां) नवाधिकां नवतिम् (एकोनशतम्) आयुषः जीवितकालस्य) क्षये अवसाने सति) दिवं स्वर्गं) समारुरुक्षुः समारोढुमिच्छुः सन्) सोपानपरम्परामिव (आरोहणपङ्क्तिमिव ततान (विस्तारयामास ।

Substance. अनेन प्रकारेणानिवार्यशासनस्य तस्य राज्ञः अश्वमेधानामेकोनशतं परिपूर्णमासीत् । यथा कोऽपि समुन्नतस्थलमधिरोढुमिच्छुः सन् सोपानपरम्परां निर्माति, तथा स राजा इहात् स्वर्गमारोढुमिच्छुः तान् अश्वमेधान् अधिरोहणपङ्क्तीरिव विरचयामास

Change of voice. -महनीयशासनेन क्षितीशेन नवाधिका नवतिः .:.समारुरुक्षुणा सोपानपरम्परा तेने

Sanjivani -(६९) इतीति । महनीयशासनः) पूजनीयाज्ञः क्षितीशः) (इति) अनेन प्रकारेण—"इति हेतुप्रकरणप्रकर्षादिसमाप्तिषु" इत्यमरः Cole. p. 573)— महाक्रतूनाम्) अश्वमेधानां, नवभिः अधिकां [नवाधिकां] नवतिम्) एकोनशतम्) आयुषः क्षये सति दिवं स्वर्गं (समारुरुक्षुः) आरोढुमिच्छुः सोपानानां परम्परां पङ्क्तिं [सोपानपरम्पराम्] इव ततान)।

Sanjivani Explained.

"इति हेतु * * *" इति signifies हेतु (reason), प्रकरण (subject), प्रकर्ष (excellence), आदि (beginning), समाप्ति ending.

The ninety-nine sacrifices are represented as so many steps for ascending to Heaven.

Bengali.—পূজনীয়শাসন মহীপতি, জীবিতকালাবসানে স্বর্গাধিরোহণেচ্ছু হইয়া এইরূপে একোনশত মহাযজ্ঞ যেন সোপানপঙ্‌ক্তির ন্যায় বিস্তার করিলেন। ৬৯।

English rendering.—Thus that lord of earth, whose behests were always honoured (with obedience), desirous of ascending to Heaven at the close of his life, constructed, like a flight of steps, nine over ninety great sacrifices. 69.

Grammatical notes, &c., &c.

Sama'sa.—(1) ऊनं एकेन ऊनशतम् (तृतीयातत्) (2) नवभिः अधिका नवाधिका (तृतीयातत्) ताम् (3) महान्तः क्रतवः महाक्रतवः (कर्मधा) तेषाम् (4) महनीयं शासनं यस्य स महनीयशासनः (बहु) (5) सम्यक् आरुरुक्षुः समारुरुक्षुः (सप्सुपा) (6) सह (विद्यमान) उप (उपरि) आनः (गमनम्) एभिः इति सोपानानि (बहु) [V. R. T. of Amarakosa, N. S. p. Ed. p. 139] तेषां परम्परा सोपानपरम्परा (षष्ठीतत्) ताम्।

Case-ending.—(1) इति—अव्यय, क्रियाविशेषणम् 'ततान' इति क्रियायाः (2) महाक्रतूनाम्—कर्मणि षष्ठी (3) दिवम्—'उ' प्रत्ययान्त—'समारुरुक्षुः'-शब्दयोगे द्वितीया—"न लोकाव्ययनिष्ठाखलर्थतृनाम्" (V. notes on सागरम्, Sl. 2, C. I.) (4) आयुषः—कृद्योगेऽनुक्ते कर्त्तरि षष्ठी (5) क्षये—भावाधिकरणे सप्तमी (6) सोपानपरम्पराम्—विधेयोपमानकर्मपदं—'नवाधिकां नवतिम्' इत्युद्देश्योपमेयकर्मपदस्य।

Synonyms.—(1) सोपान—'आरोहणं[1] स्यात् सोपानम्[2]' (अ.) (2) दिव्—'स्वरव्ययं स्वर्गनाकत्रिदिवत्रिदशालयाः सुरलोको द्योदिवौ द्वे स्त्रियां क्लीबे त्रिविष्टपम्॥' (अ.)

Different meanings.—(1) आसन—(V. Sl. 68, C. III.) (2) दिव्—'द्यौस्तु स्वर्गविहायसोः' (ह.) (3) चय—'चयोरोगान्तरे वेश्मकल्पान्तापचयेषु च।' (मे.)

Derivation.—(1) महनीयम्—मह् + अनीयर् (कर्मणि) (2) महाक्रतूनाम्—महत् + क्र + कतः (औणादिकः, 6th c. p.) (3) समारुरुक्षुः—सम् + आ + रुह् + सन् + उः (4) आयुषः—इ (ण) + उसिः (6th c. s.)—'एतेर्णिच्च' (उ. २।११८।) (5) चये—चि + अच् (7th c. s.)—"एरच्" (३।३।५६। पाः ३२३१ सि.) [Roots ending in इकार admit अच् in भाववाच्य] (5) ततान—तन् + लिट्—णल्।

Conjugation.—(1) तन्—(V. Sl. 25, C. III.) (2) रुह् (V. II, 26).

> अथ स विषयव्यावृत्तात्मा यथाविधि सूनवे
> नृपतिककुदं दत्त्वा यूने सितातपवारणम्।
> मुनिवनतरुच्छायां देव्या तया सह शिश्रिये
> गलितवयसामिक्ष्वाकूणामिदं हि कुलव्रतम् ॥ ७० ॥

इति श्रीरघुवंशे महाकाव्ये कालिदासकृतौ रघुराज्याभिषेको नाम तृतीयः सर्गः।

Prose order.—अथ विषयव्यावृत्तात्मा सः यथाविधि यूने सूनवे नृपतिककुदं सितातपवारणं दत्त्वा तया देव्या सह मुनिवनतरुच्छायां शिश्रिये—हि गलितवयसाम् इक्ष्वाकूणाम् इदं कुलव्रतम्।

Explanation by use of synonyms.—अथ (अनन्तर) विषयव्यावृत्तात्मा (विषयनिवृत्तचित्तः) सः (दिलीपः) यथाविधि (यथाशास्त्र') यूने (तरुणाय) सूनवे (पुत्राय) नृपतिककुदं (राजचिह्न') सितातपवारणं (श्वेतच्छत्र') दत्त्वा (प्रदाय) तया (पूर्वोक्तया) देव्या सह (सुदक्षिणया सार्द्धं) मुनिवनतरुच्छायां (तपोवनवृक्षानातपं) शिश्रिये (आश्रितवान्, वानप्रस्थाश्रमं स्वीचकार इत्यर्थः) हि

(यतः) गलितवयसां (जीर्णवयस्कानां, वृद्धानामिति यावत्) इक्ष्वाकूणाम् (इक्ष्वाकुगोत्रापत्यानाम्) इदं (वनगमनं) कुलव्रतं (कुलनियमः)।

Substance.—पुत्रं राज्यभारवहनसमर्थं वीक्ष्य कालो मे वाणप्रस्थमवलम्बितुमिति स विषयेभ्यो निवृत्तचित्तः सन् युवराजाय रघवे यथाविधि राज्यं प्रदाय महिष्या सुदक्षिणया सह तपोवनमाश्रिश्राय। नेदं दिलीपस्य नवं विधानमभूत्। चरमे वयसि वानप्रस्थाश्रमावलम्बनमिक्ष्वाकूणां कुलाचारः।

Change of voice.—...विषयव्यावृत्तात्मना तेन...मुनिवनतरुच्छाया ...श्रनेन कुलव्रतेन (भूयते)।

Sanjivani.—अथेति। (अथ) विषयेभ्यः; व्यावृत्तात्मा, निवृत्तचित्तः [विषयव्यावृत्तात्मा] (सः) दिलीपः (यथाविधि) यथाशास्त्रं (यूने तरुणाय) (नृपतिककुदं) राजचिह्नं—"ककुदत् ककुदं श्रेष्ठे वृषाङ्के राजलक्ष्मणि," इति विश्वः— (सितातपवारणं) श्वेतच्छत्रं (दत्त्वा तया) (देव्या) सुदक्षिणया (सह)—मुनिवनतरोः छायां [मुनिवनतरुच्छायां] (श्रिश्रिये) श्रितवान्—वानप्रस्थाश्रमं वृद्धानाम् (इक्ष्वाकूणाम्) इक्ष्वाकोर्गोत्रापत्यानां—तद्राजसंज्ञकत्वादञो लुक्—(इदं) वनगमनं (कुलव्रतं)। देव्या सहेत्यनेन सपत्नीकवानप्रस्थाश्रमपक्ष उक्तः। तथा च याज्ञवल्क्यः:—"सुतविन्यस्तपत्नीकस्तया वाऽनुगतो वनम्। वानप्रस्थो ब्रह्मचारी साग्निः सोपासनो व्रजेत्॥" (V. याज्ञवल्क्यसंहिता) इति। हरिणीवृत्तमेतत्। तदुक्तम् "रसयुगहयैर्न्सौ म्रौ स्लौ गो यदा हरिणी तदा" (V. वृत्तरत्नाकर, Karika 95.)

इति श्रीमहामहोपाध्याय कोलाचलमल्लिनाथसूरिविरचितायां रघुवंशटीकायां सञ्जीवनीसमाख्यायां तृतीयः सर्गः॥

सञ्जीवन्याः पाठान्तरम्।

अञो लुक्—अणो लुक् in Bengal editions. It is a mistake. अण् is not the अपत्यार्थ affix which can be added to इक्ष्वाकु। अञ् is determined by the Sutra "द्व्यञ्मगधकलिङ्गसूरमसादण्" (४।१।१७१ पा. ११८९ सि. See III, 5.)

इक्ष्वाकु being a word consisting of more than two vowels

cannot admit अण्। The Sutra applicable to it is "जनपदशब्दात् क्षत्रियादञ्" (४।१।१६८ पा. ११८६ सि.) It means "a word expressive of a जनपद (country) as well as a क्षत्रिय admits अञ् to signify 'children." E. g., इक्ष्वाकोरपत्यं पुमान् ऐक्ष्वाकः। टि or the last vowel of इक्ष्वाकु elides by the Sutra "दाण्डिनायनहास्तिनायनाथर्वणिक-जैह्माशिनेय—" (६।४।१७४ पा. ११४४ सि. See V, 2.)।

Sanjivani Explained.

"ककुदन ककुदं * * * राजलक्ष्मणि"—ककुदम् or ककुद means श्रृङ्ग, the limb (*i.e.*, the hump of a bull, as well as the ensigns of loyalty.

सुतविन्यस्तपत्नीकः * * * व्रजेत्—Leaving one's wife in charge of one's son, or followed by her, one observing the practice of a Brahmachárin should repair to the forest with one's sacrificial fire and thus enter into the third stage.

रसयुगहयैः * * * सदा—See Prosody.

'तद्राजसंज्ञकत्वादञोलुक्' The Sutra is "तद्राजस्य बहुषु तेनैवास्त्रियाम्" (२।४।६२ पा. ११८३ सि.) (V. notes on रघूणाम्, Sl. 5-9, C. I.).

Bengali.—অনন্তর বিষয়ভোগে বীতস্পৃহ সেই (রাজা) দিলীপ স্বীয় তরুণ পুত্র (রঘুকে) যথাবিধি শ্বেতচ্ছত্রাদি রাজচিহ্ন দিয়া দেবী (সুদক্ষিণার) সহিত মুনিগণাধ্যুষিততপোবনতরুচ্ছায়া আশ্রয় করিলেন। কারণ, গলিতবয়স্ক ইক্ষ্বাকুবংশীয় রাজগণের ইহাই কুলাচার।

English rendering.—Then he (the king), with soul with-drawn from all bonds, having given, with due rites, unto his young son the white umbrella, that emblem of royalty, repair-ed, with that queen of his, to the shade of a tree growing in an asylum of ascetics, sages, since this was the family custom of the descendants of Ikshâku in their declining years. 70.

Grammatical notes, &c., &c.

Sama'sa.—(१) विशेषेण भाववत: व्याहवत: (भादि:) ताहश: आत्मा यस्य

peror or his doings. For समास see II, 5. ष्यञ् is enjoined by the Sutra "गुणवचनब्राह्मणादिभ्यः कर्मणि च" (५।१।१२४ पा. १७८८ सि.) [A गुणवाचक word as well as a word of the ब्राह्मणादि group admits ष्यञ् to mean भाव (status) or कर्म (act). E. g. जाड्यम् (जडस्य भावः कर्म वा), ब्राह्मण्यम् (ब्राह्मणस्य भावः कर्म वा)] राजन् belongs to both the ब्राह्मणादि and the पुरोहितादि group. राजन् should, then, admit ष्यञ् by the Sutra quoted as well as यक् by the Sutra "पत्यन्तपुरोहितादिभ्यः यक्" (See राज्य in I, 58). But why is राज्य derived with यक् and साम्राज्य with ष्यञ्? The fact is that राजन् uncompounded belongs to the group पुरोहितादि। Hence, राजन् compounded falls under ब्राह्मणादि group. See 'राजासे' in the पत्यन्त group. (7) दीक्षितम्—दीक्षा—(V. Sl. 44, C. III.) दीक्षा + इतच् (जातार्थे) (See III, 12) or, दीक्ष् + क्त (कर्मणि, 2nd c. s.)

Conjugation.—(1) भज् (भ्वा. उ.)—भजति—ते (लट्) अभजत्-त (लङ्) भजतु—ताम् (लोट्) बभाज, भेजतुः; भेजे, भेजाते (लिट्) भक्ता (लुट्) भक्ष्यति-ते (लृट्) भज्यात्-भक्षीष्ट (आ. लिङ्) अभाक्षीत्, अभाक्ताम्; अभक्त, अभक्षाताम् (लुङ्) भज्यते (कर्मणि लट्) अभाजि (कर्मणि लुङ्) भाजयति (णिच्-लट्) अबीभजत् (णिच्-लुङ्)।

Rhetoric.—The figure of speech is उत्प्रेक्षा and अतिशयोक्ति। When Raghu became king, he attained a unique splendour. A halo of majesty was seen to surround his head. The poet fancies that this was no halo but rather the sheen of the umbrella held over his head by Lakshmi herself. The umbrella was invisible as much as Lakshmi. It could be merely inferred from the halo that was visible.

Though there is no इव here, yet the figure of speech is उत्प्रेक्षा। किल, bearing the sense of सम्भावना, serves the purpose of इव।

परिकल्पितसांनिध्या काले काले च वन्दिषु।
स्तुत्यं स्तुतिभिरर्थ्याभिरुपतस्थे सरस्वती ॥ ६ ॥

Prose order.—सरस्वती च काले काले वन्दिषु परिकल्पितसान्निध्या (सती) अर्थ्याभिः स्तुतिभिः स्तुत्यं तम् उपतस्थे। Mallinátha places 'स्तुत्यं तम्' before 'अर्थ्याभिः'।

Explanation by use of synonyms.—सरस्वती (वाग्देवी) च (पक्षान्तरे) काले काले (सर्वेष्वपि योग्यकालेषु) वन्दिषु (स्तुतिपाठकेषु) परिकल्पित-सान्निध्या (कृतसन्निधाना, समीपागता; यद्वा अनुमितसन्निधाना सती इत्यर्थः वन्दिनां स्तुतिगौरवात् वाग्देवी तेषु आविर्भूता इति लोकैरनुमितमिति) अर्थ्याभिः स्तुतिभिः (स्तोत्रैः) स्तुत्यं (स्तोत्राई) (तं रघुम्) उपतस्थे (देवताबुद्ध्या पूजयामास)।

Substance.—रघोर्गुणैः आकृष्टा केवलं लक्ष्मीः तत्सन्निधिं न प्राप सरस्वत्यपि यथावसरं तत्सन्निधिं प्राप्य वन्दिकण्ठाश्रिता सती सदर्थयुक्तैः स्तोत्रवचनै-रशेषगुणधरं तं रघुमाराधितवती। नासौ केवलं राजश्रीमण्डितः अपि तु ज्ञानश्री-भूषितः आसीत्।

Change of voice.—सरस्वत्या......परिकल्पितसान्निध्यया......स्तुत्यः सः...।

Sanjivani.—सम्प्रति सरस्वतीसान्निध्यमाह,—परिकल्पितेति। (सरस्वती च) (काले काले) सर्वेषु अपि योग्यकालेषु—"नित्यवीप्सयोः" (८।१।४। पा. २१४० सि.) इति वीप्सायां द्विर्वचनम्— वन्दिषु) परिकल्पितसान्निध्या) कृतसन्निधाना सती (स्तुत्यं) स्तोत्राई (तं) रघुम् (अर्थ्याभिः अर्थात् अनपेताभिः—"धर्मपथ्यर्थ-न्यायादनपेते" (४।४।९२। पा. १६४४ सि.) इति यत्प्रत्ययः—(स्तुतिभिः) स्तोत्रैः (उपतस्थे) देवताबुद्ध्या पूजितवतीत्यर्थः। 'देवतात्वं च—"ना विष्णुः पृथिवीपतिः" इति वा लोकपालात्मकत्वाद्वा, इत्यनुसन्धेयम्। एवञ्च सति—'उपाद्देवपूजासङ्गति-करणमित्रकरणपथिषु' (V. १।३।२५। पा. वा. २६९२ सि.) इति वक्तव्यादात्मनेपदं सिध्यति ॥ ६ ॥

Sanjivani Explained.

सम्प्रति * * आह—Now the poet speaks of the adjacency of Saraswati (the goddess of learning).

"नित्यवीप्सयोः"—(V. Sl. 22, C. III).

"धर्म्मपथ्यर्थन्यायादनपेते"—(V. व्याख्या in II, 55.)

उपतस्थे * * आत्मनेपदं सिध्यति—उपतस्थे means "worshipped him as a deity". It may be asked 'why should Saraswati take Raghu to be a deity ?' Mallinátha answers that he was a king and as such he was a deity. Moreover, he was made of the parts of the eight principal deities. Hence, the Várttika 'उपाद्देवपूजासङ्गतिकरणमित्रकरणपथिष्विति वाच्यम्' (V. उपस्थितान् in I, 45) is applicable. So स्था takes the आत्मनेपद form. The divinity of the king is declared by the text 'ना विष्णुः पृथिवीपतिः' [the lord of the earth is a form of Vishnu].

Bhattoji quotes this very line and defends the use of आत्मनेपद in the way in which Mallinátha defends it. His words are—"कथं तर्हि 'स्तुत्यं स्तुतिभिरर्थ्याभिरुपतस्थे सरस्वती' इति ? देवतात्वारोपात्।" Because divinity is attributed to Raghu, so उप + स्था bears the sense of देवपूजा and becomes आत्मनेपदी।

Bengali.—বাগ্‌দেবীও সময়ে সময়ে স্তুতিপাঠকগণের মধ্যে (অর্থাৎ তাহাদের কণ্ঠে) আবির্ভূত হইয়া সংগতার্থযুক্ত স্তোত্রদ্বারা স্তবার্হ সেই রঘুর আরাধনা করিতে লাগিলেন। ৬।

English rendering.—Saraswati (the goddess of learning) also, with her presence vouchsafed unto the bards from time to time, (or whose presence among the bards could be inferred) worshipped, with eulogies full of sense, him who deserved eulogy (in every way). 6.

Grammatical notes, &c., &c.

Sama'sa.—(1) परिकल्पितं सान्निध्यं यया सा परिकल्पितसान्निध्या (बहु)

Case-ending.—(1) काले काले—कालाधिकरणे सप्तमी (2) बन्दिषु आधाराधिकरणे सप्तमी (3) स्तुतिभिः—करणे तृतीया।

Synonyms.—(1) बन्दिन्—'बन्दिनः स्तुतिपाठकाः' (अ.) (2) सरस्वती —'ब्राह्मी तु भारती भाषा गीर्वाग् वाणी सरस्वती।' (अ.)

Different meanings.—(1) सरस्वती—'सरस्वती सरिद्भिदि। वाण्यापगायां स्त्रीरत्ने गोवाग्देवतयोरपि।' (मे.)

Derivation.—(1) परिकल्पितम्—परि + (क्लृप् + णिच्=) कल्पि + क्तः (कर्मणि) (2) सांनिध्यम्—सन्निधि + ष्यञ् (स्वार्थे) (3) बन्दिषु—बन्द् + णिनिः (7th c. p.) ग्रह्यादित्वात् or "आवश्यकाधमर्ण्ययोर्णिनिः" (३।३।१७०। पा. ३३११ सि.) इति सूत्रात् णिनिः (V. R. T. of Amarakośa, N. S. p. 341.) (4) स्तुत्यम्—स्तु + क्यप् (कर्मणि, 2nd c. s.) (5) स्तुतिभिः—स्तु + क्तिन् (करणे) स्तौति or स्तवीति अनया इति। (6) अर्थ्याभिः—अर्थ + यत् (अनपेतार्थे) + टाप् (3rd c.p.) (7) उपतस्थे—उप + स्था + लिट्—ए (8) सरस्वती—सरस् + मतुप् + ङीप्। The म of मतुप् is changed into व। (V. notes on वैवस्वत Sl. 12, C. I.)

Conjugation.—(1) स्था—(V. Sl. 45, C. I.)।

Force of च is पक्षान्तर।

Rhetoric.—The figure of speech is उत्प्रेक्षा though it is not patent (वाच्य) but only suggested (गम्य)। Saraswati could not possibly, with the court-bards, sing the praises of Raghu. It is a fancy of the poet. Raghu was so learned that he deserved honours even from Saraswati, the goddess of learning, herself. How did she honour him? Did she act as a bard? Was she found to stand before his throne with the encomiasts? No she was as much invisible as Lakshmi. Only she inspired the panegyrists. Her presence in spirit could be inferred. Hence, it is said बन्दिषु परिकल्पितसांनिध्या।

मनुप्रभृतिभिर्मान्यैर्भुक्ता यद्यपि राजभिः।
तथाप्यनन्यपूर्वेव तस्मिन्नासीद् वसुन्धरा॥७॥

Prose order.—वसुन्धरा मनुप्रभृतिभिः मान्यैः राजभिः भुक्ता यद्यपि, तथापि तस्मिन् अनन्यपूर्वा इव आसीत्।

Explanation by use of Synonyms.—वसुन्धरा (पृथिवी) मनुप्रभृतिभिः (मन्वादिभिः) मान्यैः (पूज्यैः) राजभिः (नृपतिभिः) भुक्ता (उपभुक्ता) यद्यपि (अवधारणे) तथापि (मनुप्रभृतिभिर्नृपैरुपभुक्तायां सत्यामपि) तस्मिन् (राजनि रघौ) अनन्यपूर्वा इव (अनन्योपभुक्तेव) आसीत् (बभूव)।

Substance.—रघुर्मन्वादिभ्यः पुण्यश्लोकेभ्यः प्रसिद्धराजभ्योऽपि गरीयानभूत्। तस्य राज्यं यादृक् प्रजानां सुखावहमभवत् मन्वादीनामपि राज्यं न तथाभूत् इति भङ्ग्याह। रघोः पूर्व्वं वैवस्वतमनुप्रभृतयो बहवो राजानः पृथिवीमुपभुक्तवन्तः। सा तु तेषु पतिषु न तथानुरक्ताभूत् यथा रघावभवत्। रघुं प्राप्य सा अनन्यभुक्ता तत्प्रथमपतिका कामिनीव ददृशे।

Change of voice.—...भुक्तया...(बभूवे)...अनन्यपूर्वया...अभूयत।

Sanjivani.—मन्विति। (वसुन्धरा) (मनुप्रभृतिभिः) मन्वादिभिः (मान्यैः) पूज्यैः (राजभिर्भुक्ता यद्यपि) भुक्तैव इत्यर्थः—यद्यपीत्यवधारणे—"अप्यर्थे यदि वार्थे स्यात्" इति केशवः—(तथापि) (तस्मिन्) राज्ञि,—अन्यः पूर्वः यस्याः सा अन्यपूर्वा न भवतीति (अनन्यपूर्वा) अनन्योपभुक्ता (इव आसीत्) तत्प्रथमपतिकेव अनुरक्तवती इत्यर्थः ॥ ७ ॥

Sanjivani Explained.

अप्यर्थे यदि वार्थे स्यात्—यदि means अपि or वा। अपि has अवधारण for one of its senses.

तत्प्रथमपतिकेवानुरक्ताभूत्—The Earth was attached to him as closely as she would be expected to do if he were her first (and only) lord.

Bengali.—যদিও বসুন্ধরা মনুপ্রভৃতি মাননীয় রাজগণ কর্তৃক উপভুক্তা হইয়াছিলেন তথাপি সেই (রঘুবিষয়ে) অনন্যোপভুক্তা বলিয়া বোধ হইতে লাগিল। ৭।

English rendering.—Though enjoyed by (many) estimable monarchs (such as) Manu and the rest, yet the Earth hung on him like a virgin wife. 7.

Grammatical notes, &c., &c.

Sama'sa.—(1) मनुः प्रभातः येषां ते मनुप्रभृतयः (बहु) तैः (2) अन्यः पूर्वः यस्याः सा अन्यपूर्वा (बहु) न अन्यपूर्वा अनन्यपूर्वा (नञ्तत्) (3) वसूनि धारयतीति वसुन्धरा (उपपदतत्)

Case-ending.—(1) राजभिः—अनुक्ते कर्त्तरि तृतीया (2) तथापि—अव्ययं, आधाराधिकरणे सप्तमी—राजभिरुपभुक्तायां सत्यामपि इत्यर्थः (3) तस्मिन्—विषयाधिकरणे सप्तमी।

Synonyms.—(1) वसुन्धरा—(V. क्षिति I, 65).

Different meanings.—(1) राजन्—'राजा प्रभौ च नृपतौ क्षत्रिये रजनीपतौ। यक्षे शक्रे च पुंसि स्यात्।' (मे.)

Derivation.—(1) मान्यैः—मान् + ण्यत् (कर्मणि, 3rd c. p.) (2) भुक्ता—भुज् + क्तः (कर्मणि) + टाप् (3) राजभिः—राज् + कनिन् (3rd c. p.) 'कनिन् युवृषि—' उ. १।१५६। (4) आसीत्—अस् + लङ्—तिप् (5) वसुन्धरा—वसु + धृ (चुरादिः) + खच् + टाप्—"संज्ञायां भृतृवृजिधारिसहितपिदमः।" (३।२।४६। पा. २९६३ सि.) [The roots भृ, तृ, वृ, जि, धारि, सहि, तपि and दम् admit खच् in कर्त्तृवाच्य, when the whole words signify proper names.] Here धारि admits खच्, because the whole word वसुन्धरा is the name of an individual, *viz.*, the Earth, and not of anything and everything which contains jewels or wealth. The augment मुम् comes after the vowel उ of वसु by the rule "अरुर्द्विषदजन्तस्य मुम्" (६।३।६७। पा. २९४२ सि. See II, 74.) Again, धा of the root धारि is shortened by the rule,—"खचि ह्रस्वः" (६।४।९४।

पा. ४।९५ वृत्ति.) [The penultimate vowels of causative roots are shortened if खच् is affixed.]

Conjugation.—(१) चम्—(V. Sl. 16, C. III.) (२) भुज्—(V. Sl. 56, C. I.).

Force of युयुधि—अवधारण or assertion.

Rhetoric.—The figure of speech is उत्प्रेक्षा।

Though the Earth was enjoyed by such illustrious lords as Manu, and others, yet she appeared to have been unenjoyed by any one before Raghu. This is a poetic fancy. So much was she attached to Raghu that she behaved as if she had him for her first and only lord. The plain sense is that Raghu excelled even the typical kings Manu and others of old. His rule was better than theirs. The subjects were cordially attached to him.

The representing of the Earth as the wife of a king is a conventionalism of the Sanskrit poets.

स हि सर्व्वस्य लोकस्य युक्तदण्डतया मनः।
आददे नातिशीतोष्णो नभस्वानिव दक्षिणः॥ ८॥

Prose order.—हि सः युक्तदण्डतया नातिशीतोष्णः दक्षिणः नभस्वान् इव सर्व्वस्य लोकस्य मनः आददे।

Explanation by use of synonyms.—हि (यतः) सः (रघुः) युक्तदण्डतया (यथापराधशासकतया) नातिशीतोष्णः (सुखस्पर्शः इति यावत्) दक्षिणः (दक्षिणदिग्भवः) नभस्वान् इव (वायुरिव मलयानिलश्चेत्यर्थः) सर्व्वस्य (समग्रस्य) लोकस्य (प्रजाजनस्य) मनः (चित्तम्) आददे (जहार)।

Substance.—प्रजानां मनो स रञ्जयामास। यथा हि नातिशीतोष्णः मलयानिलः सुखस्पर्शतया जनानाह्लादयति, तथा नातिमृदुर्नातितीक्ष्णो रघुः यथापराधं दोषिभ्यो दण्डप्रदानेन अखिलान् राष्ट्रस्थान् जनान् ह्लादयामास।

Change of voice.—तेन...नातिशीतोष्णेन दक्षिणेन नभस्वता...।

Sanjivani.—अत्र कारणमाह,—स इति। (यि) यस्मात् कारणात् (सः) रघुः (युक्तदण्डतया सर्वस्य लोकस्य मनः) (आददे) जहार—क इव?—अतिशीतः अत्युष्णो वा न भवतीति (नातिशीतोष्णः),—नञर्थस्य नशब्दस्य सुप्सुपेति समासः—(दक्षिणः) दक्षिणदिग्भवः (गन्धवान्) वायुः (इव) मलयानिल इव इत्यर्थः। युक्तदण्डतयैवाह कामन्दकः—"उद्वेजयति तीक्ष्णेन मृदुना परिभूयते। दण्डेन नृपतिस्तस्मात् युक्तदण्डः प्रशस्यते॥" (V. Kámandaka's नीतिसार)॥ ८॥

Sanjivani Explained.

उद्वेजयति * * * प्रशस्यते—If the king inflicts cruel punishment he sorely afflicts his people; if, on the other hand, the punishments he inflicts be exceedingly mild, he is soon overpowered by his subjects. Hence, a king who inflicts punishments in proper measure should be praised.

नञर्थस्य नशब्दस्य सुप्सुपेति समासः—In नातिशीतोष्ण the Samása is not with नञ् but with न। Hence, it is not a नञ्समास but a सुप्सुपा। See नातिप्रमनाः in III, 67.

Bengali.—কারণ, তিনি অপরাধানুযায়ী দণ্ড প্রদান করিয়া নাতিশীতোষ্ণ দক্ষিণানিলের ন্যায় লোকসমূহের মন হরণ করিলেন। ৮।

English rendering.—Since, he, through the propriety of his punishments (and rewards), won the hearts of all men, like the southern breeze which is neither exceedingly cold, nor exceedingly hot. 8.

Grammatical notes, &c., &c.

Sama'sa.—(1) युक्तः दण्डः यस्य स युक्तदण्डः (बहु) तस्य भावः युक्तदण्डता—तया। (2) शीतञ्च उष्णञ्च शीतोष्णम् or शीतोष्णे समाहारो वा इतरेतर (द्वन्द्वः)। If शीत and उष्ण be not द्रव्यवाचिन्, i.e., if they mean गुण and not द्रव्य, they admit समाहारद्वन्द्व optionally; e. g., शीतोष्णम्, शीतोष्णे। If, on the other hand, they mean द्रव्य and not गुण they admit इतरेतरद्वन्द्व। The form will be शीतोष्णे। See "विप्रतिषिद्ध

चानधिकरणवाचि" (२।४।१३ पा. ९१७ सि.) [Words expressive of pairs of opposites become singular in the द्वन्द्व compound, i.e., they admit समाहारद्वन्द्व, optionally if they be not द्रव्यवाचिन्। If they be द्रव्यवाचिन्, they form इतरेतरयोगद्वन्द्व] Here शीत and उष्ण are adjectives of द्रव्य, i. e., they are द्रव्यवाचिन्, so they form इतरेतरयोग। If we take them to be गुणवाचिन्, we will have to add the nominal affix अच् bearing the sense of मतुप् by the Sutra "अर्श आदिभ्योऽच्" (५।२।१२७ पा. १९३३ सि.)। शीतोष्णं विद्यते अस्य शीतोष्णः। अतिशयितः शीतोष्णः अतिशीतोष्णः (प्रादिः) न अतिशीतोष्णः नातिशीतोष्णः (सुप्सुपा) (V. Sanjivani.)

Case ending.—(1) लोकस्य—शेषे षष्ठी—'मनः' इत्यनेन सम्बन्धः (2) युक्तदण्डतया—इत्थं तृतीया (3) नभस्वान्—विधेयोपमानकर्तृ पदं—'सः' इत्युद्देश्योपमेयकर्तृपदस्य।

Synonyms.—(1) नभस्वत्—'(V. II, 10.) (अ.)

Different meanings.—(1) दक्षिण—'दक्षिणो दक्षिणोद्भूतसरलच्छन्दवर्तिषु। अवामे त्रिषु यज्ञादिविधिदाने दिशि स्त्रियाम्॥'(मे.) (2) शीत—'शीतं[1] हिमगुणे क्लीबं शीतलालसयोस्त्रिषु[2][3]। वानीरे बहुवारे[4][5] ना।' (मे.) (3) उष्ण—'उष्णोग्रीष्मे[1] पुमान् दक्षाशीतयोरन्यलिङ्गकः[2][3]।' (मे.)

Derivation.—(1) आददे—आ + दा + लिट्—ए (2) शीतम्—श्यै + क्तः (कर्त्तरि) "द्रवमूर्त्तिस्पर्शयोः श्यः" (६।१।२४ पा. ३०२० सि.)

[श्यै admits संप्रसारण i.e., श्यै becomes शी, in its निष्ठा form, if the whole word signifies a liquid having a form and hard to touch.]

"श्योऽस्पर्शे" (८।२।४७ पा. ३०२१ सि.) enjoins that the त् of क्त or क्तवतु added to श्यै is changed into न् if the resultant word does not signify the actual touch; e.g., शीनं घृतम् (congealed ghee—no idea of touch is present). In the case of water it should be

शीतं जलम् (water cool to the touch.) In संश्याना वृश्चिकः, श्यै does not admit संप्रसारण because it does not mean a liquid at all. संश्यानः – शीतात् सङ्कुचितः । It does not convey the idea of touch. Hence, the त of its क्त is changed into न ।

"प्रतेश्च" (६।१।२५ पा. ३०२२ सि.) lays down that श्यै preceded by the उपसर्ग प्रति admits संप्रसारण when क्त or क्तवत् is added to it. "विभाषाभ्यवपूर्वस्य" enjoins that श्यै gets संप्रसारण optionally in क्तान्त form provided it is preceded by the उपसर्ग, अभि or अव । E.g., अभिश्यानम्, अभिशीनं घृतम् । अवश्यानोऽवशीनो वृश्चिकः । The optionalitly is व्यवस्थित (limited.) Hence, we have the form समवश्यान only ।

(3) नभस्वान्— नभस् + मतुप् (1st c. s.) The म् of मतुप् is changed into व । (4) दक्षिणः—दक्ष् + इनन्—'द्रुदक्षिभ्यामिनन्' (उ. २।५०.)

Conjugation.—(1) दा—(V. Sl. 18, C. I.)

Parallel passages.

(1) "न खरो न च भूयसा मृदुः पवमानः पृथिवीरुहानिव ।
स पुरस्कृतमध्यमक्रमो नमयामास नृपाननुद्धरन् ॥"

(V. Raghu, Sl. 9, C. VIII.)

(2) "समवृत्तिरुपैति मार्दवं समये यस्य तनोति तिग्मताम् ।
अधितिष्ठति लोकमोजसा स विवस्वानिव मेदिनीपतिः ॥"

(V. Kirátárjuniyam, Sl. 38, C. II.)

**मन्दोत्कण्ठाः कृतास्तेन गुणाधिकतया गुरौ ।
फलेन सहकारस्य पुष्पोद्गम इव प्रजाः ॥ ९ ॥**

Prose order.—तेन प्रजाः गुरौ, सहकारस्य फलेन पुष्पोद्गमे इव, गुणाधिकतया मन्दोत्कण्ठाः कृताः ।

Explanation by use of synonyms.—तेन (रघुणा) प्रजाः (प्रकृतयः) गुरौ (पितरि दिलीपे) सहकारस्य (आम्रस्य) फलेन (प्रसवेन) पुष्पोद्गमे

इव (मुकुलाविर्भावे इवेत्यर्थः) गुणाधिकतया (उत्कर्षाधिक्येन हेतुना) मन्दोत्कण्ठाः (शिथिलीत्सुक्याः) क्रताः (किञ्चिताः)।

Substance.—पितुरप्यधिको दिलीपो जातः इति भङ्ग्याह। यथा सहकारस्य फले लब्धे तत्पुष्पे जनानामादरो न वर्त्तते, तथा दिलीपादधिकगुणं रघुं प्राप्य प्रजास्तत्पितरं क्रमेणैव विसस्मरुः। रघोः शासनगुणेन समधिकसुखसम्पत्तिसम्पन्नाः प्रजा दिलीपशासने क्रमेणैव हृतादराः बभूवुः।

Change of voice.—मन्दोत्कण्ठान्...कृतवान्...स...फलम्।

Sanjivani.—मन्देति। (तेन) रघुणा (प्रजाः) (गुरौ) दिलीपे विषये—सहकारः, अतिसौरभः, चूतः—"आम्रश्चूतो रसालोऽसौ सहकारोऽतिसौरभः" इत्यमरः—(Cole. p. 94) तस्य (फलेन) (पुष्पोद्गमे) पुष्पोदये (इव)—ततोऽपि (गुणाधिकतया)—हेतुना—(मन्दोत्कण्ठाः) अल्पोत्सुक्याः (क्रताः)। गुणोत्तरः उत्तरो विषयः पूर्वं विस्मारयति इति भावः॥ ९॥

Sanjivani Explained.

'गुणोत्तर......विस्मारयति'—A subsequent object, superior (to the sutceding one) in respect of quality, causes the previous one to be forgotten.

Bengal.—গুণাধিক্যবশতঃ আম্রফল যেরূপ তন্মুকুলবিষয়ে জনগণের ঔৎসুক্য নিবারণ করে রঘু সেইরূপ পিতৃবিষয়ে প্রজাদিগের ঔৎসুক্য লাঘব করিলেন। ৯।

English rendering.—By the superiority of his virtues, he cooled his subject's yearning for his sire, like the fruit of the mango-tree cooling people's yearning for its blossoms. 9.

Grammatical notes, &c., &c.

Sama'sa.—(1) मन्दा उत्कण्ठा यासां ताः मन्दोत्कण्ठाः (बहु) (2) गुणेषु or गुणेभ्यः अधिकः गुणाधिकः (सप्तमी वा पञ्चमीतत्) तस्य भावः गुणाधिकता—'अधिकशब्देन योगे सप्तमीपञ्चम्याविष्येते' (V. Vritti on २।१।७ पा.) In alliance with अधिक a word may admit the 7th or the 5th case.

There are the ज्ञापकसूत्र s—"तदशिष्यंसंज्ञा—"(१।२।५३ पा. १८४६ सि.) and "यस्मादधिकम्—" (२।३।९ पा. ६४५ सि.)। (3). सह कारयति (मेलयति वृन्दम्) इति सहकार: (उपपदतत्) तस्य । This tree was often found entwined with creepers. Hence, it got the name सहकार [V. R. T. of Amarakos'a, N. S. P. Ed. P. 153.] (4) पुष्पाणाम् उद्गम: पुष्पोद्गम: (षष्ठीतत्) तस्मिन् (5) प्रकर्षेण जायन्ते इति प्रजा: (उपपदतत्) ।'

Case-ending.—(1) तेन—अनुक्ते कर्त्तरि तृतीया (2) गुणाधिकतया—हेतौ तृतीया (3) गुरौ—विषयाधिकरणे सप्तमी (4) फलेन—अनुक्ते कर्त्तरि तृतीया (5) सहकारस्य—शेषे षष्ठी (6) पुष्पोद्गमे—विषयाधिकरणे सप्तमी (7) प्रजा:—उक्ते कर्मणि प्रथमा ।

Synonyms.—(1) सहकार—V. Sanjivani.) (2) पुष्प—"स्त्रिय: सुमनस: पुष्पं प्रसूनं कुसुमं समम् ।" (अ०)

Different meanings.—1) पुष्प—'पुष्पं विकासे चार्त्तवे । अनङ्गस्य विमाने च कुसुमे नेत्ररुज्यपि ।' (हे.) (3) फल—(V. Sl. 3, C. I.) (4) गुण—(V. Sl. 5-9, C. I.) (5) गुरु—(V. Sl. 65, C. I.)

Derivation.—(1) उत्कण्ठा—उद् + कण्ठ + (भावे) "गुरोश्च हल:" (३।३।१०३। पा. ३२८० सि.) (2) गुरौ—V. Sl. 18, C. II.). (3) सहकारस्य—सह + (कृ + णिच् – कारि) + अच् (कर्त्तरि, 6th c. s.) (4) पुष्पम्—पुष् + अच् (कर्त्तरि) (5) उद्गम.—उत् + गम् + अप् (6) प्रजा:—प्र + जन: (कर्मणि) + टाप् (1st c. p.)

Conjugation.—(1) कृ—(V. Sl. 8, C. III.)

Sandhi—पुष्पोद्गमेष्व is made up of पुष्पोद्गमे इव । ए becomes अय् । See धर्मेष्व in I, 25. The alternative form is पुष्पोद्गमयिव । The य् elides optionally by "लोप: शाकल्यस्य" (८।३।१९। पा ६० सि.) ।

Rhetoric.—The figure of speech is Simile. Raghu is compared with the fruit of the mango-tree, and Dilipa with the

advent of its blossoms. गुणाधिकता (superiority of merits) is the common virtue of Raghu and the fruit of the mango-tree. In the case of Raghu, प्रजा means the subjects and in that of the mango-fruit, it means the people in generel. As the people cease to yearn for the blossom when they see the fruit because the latter is superior in merit to the former, so the subjects ceased to think of Dilipa when they found Raghu excell him in discharging the duties of sovereignty-

नयविद्भिर्नवे राज्ञि सदसच्चोपदर्शितम्।
पूर्व एवाभवत् पक्षस्तस्मिन् नाभवदुत्तरः ॥१०॥

Prose order.—नयविद्भिः नवे राज्ञि सत् असत् च उपदर्शितं, तस्मिन् पूर्वः पक्षः एव अभवत्, उत्तरः न अभवत्।

Explanation by use of synonyms.—नयविद्भिः (नीतिशास्त्रज्ञैः) नवे (नवीने) राज्ञि (नृपे) सत् (धर्मयुद्धादिकम्) असत् (कूटयुद्धादिकं च) उपदर्शितं (प्रदर्शितम्, उपदिष्टमित्यर्थः) तस्मिन् (राजनि रघौ) पूर्वः (आद्यः) पक्षः (साधनयोग्यार्थः) एव अभवत् (संक्रान्तः) उत्तरः (परवर्तिपक्षः) न अभवत् (न संक्रान्तः)।

Substance.—रघु नव नृपमवलोक्य नीतिविदः नीतिमुपदिदिशुः। नीतेः प्रस्थानद्वयमस्ति। एका धर्म्या, अपरा अधर्म्या। रघुर्नीतिविद्यापारगोऽपि यत् नीतिविद्भिः उपदेशं जगृहुः तत् तस्य विनयाधिक्यं साक्षात्साक्ष्य। धर्म्यामधर्म्यां नीतिव्याख्यां च शृण्वन् धर्मप्रियः स धर्म्यामेवानुमेने न त्वधर्म्याम्। कूटमार्गं विहाय स साधुमार्गेणैव राज्यं शशास।

Change of voice.—नयविदः—उपदर्शितवन्तः...पूर्वेण पक्षेण... अभूयत, उत्तरेण...अभूयत।

Sanjivani.—नयेति।. (नयविद्भिः) नीतिशास्त्रज्ञैः (नवे) तस्मिन् (राज्ञि) विषये—तमधिकृत्येत्यर्थः—(सत्) धर्मयुद्धादिकम् (असत्) कूटयुद्धादिकं (च उपदर्शितं)। (तस्मिन् राज्ञि पूर्वः पक्षः एव) (अभवत्) संक्रान्त इत्यर्थः—(उत्तरः

पक्षः) (न अभवत्) न संक्रान्तः इत्यर्थः । तत्र सदसतोर्मध्ये सदेवाभिमतं नासत्—तदुपादानन्तु ज्ञानार्थमेव इत्यर्थः । पक्षः, साधनयोग्यार्थः—"पक्षः पार्श्वगरुत्साध्य-सहायबलभित्तिषु" इति केशवः ॥ १० ॥

Sanjivani Explained.

तत्र सदसतीः * * ज्ञानार्थमेव—Of the righteous and the unrighteous (courses of policy) which the politicians declared to him, only the righteous found favour with him and not the unrighteous one. What was the necessity then of discoursing upon the unrighteous course of policy? It was to give him a knowledge of the foul measures which his foes might adopt even if he disregarded them.

पक्षः * साधनयोग्यार्थः—a purpose capable of being achieved.

"पक्षः पार्श्व * * "—पक्ष means पार्श्व (side), गरुत् (feather), साध्य (the object to be attained), सहाय, बल as well as भित्ति (wall).

Bengali.—নীতিবিদ্ (মন্ত্রিগণ) কর্ত্তৃক (সেই) নূতন রাজাকে সৎ এবং অসৎ (এই উভয়ই) উপদেশ দেওয়া হইল, (কিন্তু) তাঁহাতে পূর্ব্ব পক্ষই সংক্রান্ত হইল, পরপক্ষ সংক্রান্ত হইল না। ১০।

English rendering.—Unto the new king (both) good and bad (measures) were shown by persons versed in politics. (But) the former alone were (acceptable) to him and not the latter. 10.

Grammatical notes, &c., &c.

Sama'sa.—(1) नयं विदन्ति इति नयविदः (उपपद) तैः (2) उप (समीपे) दर्शितम् उपदर्शितम् (समसीतत्)

Case-ending.—(1) नयविद्भिः—अनुक्त कर्त्तरि तृतीया (2) तस्मिन्—विषयाधिकरणे सप्तमी (3) सत् and असत्—उक्त कर्म्मणि प्रथमा (4) विषयाधिकरणे सप्तमी ।

Different meanings.—(1) नय—(Sl. 55, C. I.) (2) उत्तर—'उत्तरं प्रतिवाक्यं स्याद्‌ऊर्ध्वोदीच्योत्तमेऽन्यवत्। उत्तरस्तु विराटस्य तनये दिशि चोत्तरा॥' (वि.)

Derivation.—(1) नयविद्भिः—नी + अप् (करणे) = नयः। (V. notes on विनय, Sl. 24, C, I.) नय + विद् + क्विप् (कर्त्तरि, 3rd c. p.) (2) नवे—नु + अप् (कर्मणि, 7th c. s.)—"ऋदोरप्" (३।३।५७ पा. ११११ सि.) (3) उपदर्शितम्—उप + (दृश् + णिच् =) दर्शि + क्तः (कर्मणि) (3) अभवत्—भू + लङ्—तिप् (4) उत्तरः—उद् + तृ + अप् or—अतिशयेनोद्गतः इति—उद् + तरप्—द्रव्यप्रकर्षत्वाभावात्।

Conjugation.—(1) दृश्—(V. I, 15). (2) भू—(V. Sl. 15, C. III.)

Remark.—One of the Calcutta editors derives नय by the affix अच् to the root नी। It is a mistake.

पञ्चानामपि भूतानामुत्कर्षं पुपुषुर्गुणाः।
नवे तस्मिन् महीपाले सर्वं नवमिवाभवत्॥ ११॥

Prose order.—पञ्चानाम् भूतानाम् अपि गुणाः उत्कर्षं पुपुषुः, तस्मिन् नवे महीपाले (सति) सर्वं नवम् इव अभवत्।

Explanation by use of synonyms.—पञ्चानां (पञ्चसंख्यकानां) भूतानामपि (क्षित्यप्तेजोमरुद्‌व्योमरूपाणामपि) गुणाः (गन्धादयो धर्माः) उत्कर्षम् (अतिशयम्, उन्नतिं) पुपुषुः (धारयामासुः) तस्मिन् (पूर्वकथिते) नवे (नवीने) महीपाले (धरणीश्वरे रघौ सति) सर्वं (वस्तुजातं) नवमिव (नवीनमिव) अभवत् (आसीत्)।

Substance.—किमु ब्रूमोऽस्य नवस्य राज्ञोऽनुभावः। न केवलं सचेतनाः एवास्य गुणेन तुष्टाः। विचेतनान्यपि भूतान्यपि नवनवगुणानि दधुः। यद्‌ऽस्य प्रजानां सुखदानार्थं भूतानां गुणाः समधिका उभूवुः। तस्मिन् नवे नृपतौ सति सर्वं नवमिवाभवत्।

Change of voice.—...गुणैः उत्कर्षः पुपुषे...सर्वेण नवेन...अभूयत।

Sanjivani.—पञ्चानामिति। पृथिव्यादीनां (पञ्चानां भूतानाम् अपि) (गुणाः) गन्धादयः (उत्कर्षम्) अतिशयं (पुपुषुः)। अत्रौत्प्रेक्षते—(तस्मिन्) नवे नाम (नवे महीपाले) सति (सर्वं) वस्तुजातं (नवम् इव अभवत्)। तदेव भूतजातम् इदानीम् अपूर्वगुणयोगात् अपूर्वमिव अभवत् इति भावः॥११॥

Sanjivani Explained.

तदेव भूतजातम् * * अभवत्—The same elements became, as it were, extraordinary now because of its alliance with extraordinary excellence.

Bengali.—(পৃথিব্যাদি) পঞ্চভূতেরও (গন্ধাদি) গুণসমূহ উৎকর্ষ (আতিশয্য) লাভ করিল। সেই নবীন ভূপতির (শাসনে) সমস্তই যেন নবীন বলিয়া বোধ হইল।১১।

English rendering.—Even properties of the five primal essences cherished improvements: upon his becoming the new lord of Earth, everything, as it were, became new. 11.

Grammatical notes, &c., &c.

Sama'sa.—(1) महीं पालयति इति महीपालः (उपपदतत्) तस्मिन्।

Case-ending.—(1) भूतानाम्—शेषे षष्ठी (2) महीपाले—भावाधिकरणे सप्तमी or विषयाधिकरणे सप्तमी

Synonyms.—(1) नव—"प्रत्यग्रोऽभिनवो नव्यो नवीनो नूतनो। नूत्नश्च।" (अ.)

Different meanings.—(1) गुण— V. Sl. 5-9, C. III.) (2) भूत—(V. Sl. 29, C. I.)

Derivation.—भूतानाम्—(V. Sl. 29, C. I.) (2) उत्कर्षम्—उत् + कृष् + घञ् (भावे, 2nd c. s.) (3) पुपुषुः—पुष् + लिट्—उस् (4) महीपाले—मही + (पा + णिच्=पालि) + अण् (7th c. s.)—"कर्मण्यण्" (V. notes on गोपाल, Sl. 16, C. II.)

चतुर्थः सर्गः ।

स राज्यं गुरुणा दत्तं प्रतिपद्याधिकं बभौ ।
दिनान्ते निहितं तेजः सवित्रेव हुताशनः ॥ १ ॥

Prose-order.—सः गुरुणा दत्तं राज्यं प्रतिपद्य दिनान्ते सवित्रा निहितं तेजः (प्रतिपद्य) हुताशनः इव अधिकं बभौ ।

Explanation by use of synonyms.—सः (रघुः) गुरुणा (पित्रा) दत्तं (यथाशास्त्रमर्पितं) राज्यं (राजत्वं) प्रतिपद्य (प्राप्य) दिनान्ते (सायंकाले) सवित्रा (सूर्य्येण) निहितं (विन्यस्तम्, अर्पितमिति यावत्) तेजः (दीप्तिं, तीक्ष्णतामितियावत्) प्रतिपद्य—हुताशनः इव (वह्निवत्) अधिकम् (अत्यर्थं) बभौ (दिदीपे) ।

Substance.—दिलीपः संसारे वीतस्पृहो वानप्रस्थाश्रममवलम्ब्य रघवे च राज्यमदात् इति पूर्व्वस्मिन् सर्गे कथितम् । अस्मिन् तु रघोः साम्राज्यस्थितिमूलं दिग्विजयादिकं वर्णयिष्यन्नादौ सिंहासनमधिरूढः स कीदृशं बभौ इति सामान्यत आह । सायंकाले सूर्य्यतेजः समधिगम्य अग्निर्यथा अत्यर्थं दीप्यते, तथा पितुरधिगतराज्यस्तत्क्षणतया अमितप्रतापः स रघुस्तेजसा समधिकं प्रतापवानभूत् ।

Change of voice.—तेन...हुताशनेन...बभे ।

Sanjivani.—शारदा शारदाम्भोजवदना वदनाम्बुजे ।
सर्वदा सर्वदास्माकं सन्निधिं सन्निधिं क्रियात् ॥

स इति । (सः) रघुः (गुरुणा) पित्रा (दत्तं) (राज्यं) राज्ञः कर्म प्रजापरिपालनात्मकम्—पुरोहितादित्वाद् यक्—(प्रतिपद्य) प्राप्य (दिनान्ते) सायंकाले (सवित्रा) सूर्य्येण (निहितं तेजः)—प्रतिपद्य—(हुताशनः) अग्निः (इव अधिकं बभौ) । "सौरं तेजः सायमग्निं संक्रमते ;" "आदित्यो वा अस्तं यन् अग्निमनु प्रविशति" "अग्निं वा आदित्यः सायं प्रविशति ।" इत्यादि श्रुतिप्रमाणात् ॥ १ ॥

Sanjivani Explained.

शारदा * * * क्रियात्—May S'áradá, of face as sweet as an

autumnal lotus, who can give everything (the world has unto her devotee), place, in our lotus-like mouth, valuable treasure (of words).

सौरं तेजः ... प्रविशति—At evening the solar energy passes into the fire. Or, the sun, when setting, enters into the fire. Or, the sun himself enters the fire.

इत्यादिश्रुतिप्रामाण्यात्—On the authority of these S'rutis, Kálidása says—दिनान्ते निहितं तेजः, &c.

पुरोहितादित्वाद् यक्—राज्य is formed by the affix यक्। राजन् admits यक् because it belongs to the group पुरोहित &c.

The Sutra is "पत्यन्तपुरोहितादिभ्यो यक्" (५।१।१२८ पा. १७८३ सि.) See *Sanjivani Explained* under I, 58.

Here both the meanings—राज्ञः कर्म and राज्ञः अधिकारः—are applicable.

Bengali.—সেই (রঘু) পিতৃদত্ত রাজ্য প্রাপ্ত হইয়া, দিবাবসানে সূর্য্যনিহিত তেজঃপ্রাপ্ত হুতাশনের ন্যায় অধিক দীপ্তিশালী হইলেন। ১।

English rendering—Obtaining the empire bequeathed by his revered sire, he shone more brilliantly, like the eater of oblations (*viz.*, fire), at the end of the day, (obtaining) the energy imparted by the sun. 1.

Grammatical notes, &c., &c.

Sama'sa—(1) दिनस्य अन्तः दिनान्तः (षष्ठीतत्)। तस्मिन् (2) हूयते, अग्नौ प्रक्षिप्यते, यत् तत् हुतम्। अश्नाति इति अशनः। हुतस्य अशनः हुताशनः। Or, हुतम् अशनं यस्य। हुतम् अश्नाति इति विग्रहे हुताशः इति स्यात्। The Sutra "कर्मण्यण्" will apply and we cannot have the form हुताशन। We have, therefore, made a षष्ठीतत्पुरुष or बहुव्रीहि of हुत and अशन।

Case-ending.—(1) रघुणा—अनुक्ते कर्त्तरि तृतीया 'दत्तम्' इत्यस्य (2) अधिकम्—क्रियाविशेषणम् (3) दिनान्ते—कालाधिकरणे सप्तमी (4) सवित्रा—अनुक्ते कर्त्तरि तृतीया—'निहितम्' इत्यस्य (5) हुताशनः—विधेयोपमानकर्तृ-

पदं—'सः' इत्युद्देश्योपमेयकर्तृपदस्य (6) तेजः—विधेयोपमानकर्मपदं, 'राज्यम्' इत्युद्देश्योपमेयकर्मपदस्य । 'प्रतिपद्य' इति क्रियायाः कर्म ।

Synonyms.—(1) दिन—'घस्रो दिनाहनी वा तु क्लीवे दिवसवासरौ ।' (अ.)

Different meanings.—(1) तेजस्—'तेजो दीप्तौ प्रभावे च स्यात् पराक्रमरेतसोः.' (मे.) (2) गुरु — (V. Sl. 65, C. I.)

Derivation—(1) राज्यम्—राजन् + यक् भावकर्मणोः, 2nd c. s.) (2) गुरुणा —गृ + उ (3rd c. s.) 'कृग्रोरुच्च' उ. ।१।२४।। The definition of गुरु is —"निषेकादीनि कर्माणि यः करोति यथाविधि । सम्भावयति चान्नेन स विप्रो गुरुरुच्यते ॥" (Manusamhitá, Sl. 142, Ch. II.) (3) दत्तम् —दा + क्त (कर्मणि, 2nd c. s.) "दो दद्‌घोः" ७।४।४६ पा. ७०३० (स.) इति 'दा' धातोः दद्‌आदेशः । The root दा, which is not technically called घु, admits the form 'दद्' if a कित affix beginning with त is added to it. E. g., दत्तः । दान् (भ्वा. प. which admits यच्छ in लट्, लोट्, लङ्, and विधिलिङ्) and (डु) दाञ् (ह्वा. उ.), both of which mean 'to give', are not घुसंज्ञक । दाप् (अ. प. meaning 'to cut' is घुसंज्ञक । Its क्त form is दित । (4) प्रतिपद्य—प्रति + पद् + ल्यप् (5) बभौ— भा + लिट् — णल (6) निहितम्—नि + धा + क्त (कर्मणि, 2nd c. s. (7) तेजः—तिज् + असुन् (करणे, उ. ४।१८९।) (8) सविता —सू + तृच (कर्तरि, 3rd c. s.) (सू is तुदादि परस्मैपदी, meaning प्रेरण । So भानुजि gives the explanatory phrase as—'सुवति (प्रेरयति) कर्मणि लोकान् इति सविता' । रायमुकुट (another annotator of Amarakosha) remarks that सू of सविता is neither of the अदादि nor of the दिवादि class. सू (अ. and दि.) admits in तृच् the double form सविता and सोता । सू (तु) admits in तृच् the one form सविता । भानुजि says—"स्वरतिसूति सूयति—" (७।२।४४। पा. २२७९ सि.) इति इड्विकल्पापत्तेः 'सोता' इति रूपप्रसङ्गात्—उक्तधातोः स्वीकृतम् ।' (V. R. T. of Amarakos'a, N. S. P. Ed. p. p. 46—

47.) (9) हुताशन:—हु + क्त: (कर्मणि) – हुतम् । अश् + ल्यु: (कर्तरि) – अशन: । हुत + अशन: ।

Conjugation.—(1) पद—(V. Sl. 1, C. I.) (2) भा—(V. Sl. 16, C. II). (3) दा—(V. Sl. 18, C. I.)

Rhetoric.—The figure of speech is simile. रघु is compared to हुताशन, गुरु (दिलीप) to सवितृ, and राज्य to तेजस्। The idea that Fire receives the energy of the Sun at night is derived from S'ruti. It is, therefore, regarded as a stern fact to form an उपमान। If it be merely a fancy and not a fact, the figure of speech would be अभूतोपमा। Many rhetoricians do not acknowledge अभूतोपमा। See I, 31.

Remark.—One of the Calcutta editors expounds हुताशन as 'हुतम् अश्नातीति हुताशन:।' It is a mistake. See **Sama'sa.**

Cháritravardhana and others read the following verse after the present one :—

अनन्तरं दिलीपं च तं च श्रुत्वा रघुं प्रभुम् ।
राज्ञामुद्धतभारार्थे हृदि शल्यमिवार्पितम् ॥

दिलीपानन्तरं राज्ये तं निशम्य प्रतिष्ठितम् ।
पूर्वं प्रधूमितो राज्ञां हृदयेऽग्निरिवोत्थित: ॥ २ ॥

मूलस्य पाठान्तरम् ।

प्रधूमित:—प्रधूमितं (चा.) । Thus it is an epithet of हृदय ।

Prose order.—दिलीपानन्तरं तं राज्ये प्रतिष्ठितं निशम्य पूर्वं राज्ञां हृदये प्रधूमित: अग्नि: उत्थित: इव। Mallinátha places 'तम्' after 'प्रतिष्ठितम्'।

Explanation by use of synonyms.—दिलीपानन्तरं (दिलीपात् परं तं रघुं) राज्ये (राजकर्मणि तदधिकारे च) प्रतिष्ठितम् (अवस्थितं) निशम्य (आकर्ण्य) पूर्वं (प्राक्, दिलीपसमये इति यावत्) राज्ञाम् (अभिचरद्राज्ञां) हृदये

(चित्ते) प्रधूमितः (सञ्जातधूमः) अग्निः (वह्निः) उत्थित इव (प्रज्वलित इव, पूर्वाभ्यधिकः सन्तापोऽभूदित्यर्थः)।

Substance.—दिलीपेन विनिहतवीर्य्या दासीकृता राजानः सन्तप्ता आसन्। भयात् ते सन्तापं न प्रकटयामासुः। अधुना रघुःसिंहासनमधिचकार। किं वयं बालकस्याधीनाः इति तेऽधिकमन्तप्ता बभूवुः। एतदेव कविरुत्प्रेक्षयाह अमूषां हृदयी यः सन्तापानलः पूर्व्वं धूमायमान आसीत् अधुना स प्रज्वलितो बभूव।

Change of Voice.—...प्रधूमितेन अग्निना उत्थितम्...।

Sanjivani.—दिलीपेति। (दिलीपानन्तरं राज्ये) (प्रतिष्ठितम्) अवस्थितं (तं) रघुं (निशम्य) आकर्ण्य (पूर्वं) दिलीपकाले (राज्ञां हृदये)—प्रकर्षेण धूमोऽस्य सञ्जातः—(प्रधूमितः) (अग्निः) सन्तापाग्निः (उत्थित इव) प्रज्वलित इव—पूर्वाभ्यधिकः सन्तापोऽभूत् इत्यर्थः। राज्यकर्तृकस्यापि निशमनस्याग्नावुपचाराद्भि समानकर्तृकत्वविरोधः॥ २॥

सञ्जीवन्याः पाठान्तरम्।

पूर्व्वाभ्यधिकः—पूर्व्वेभ्योऽधिकः Nand.

Sanjivani Explained.

राजकर्तृकस्यापि...विरोधः—The finite verb in the verse is उत्थितः and निशम्य is the infinite verb. Both the finite and the infinite verb should have the same nominative. अग्नि is, no doubt, the nominative of the finite verb. It should be the nominative of निशम्य as well. But logically राजन् and not अग्नि should be the nominative. To meet the difficulty Mallinátha says—'Though the kings are really the subject of hearing, yet the authorship of hearing is attributed to the fire, i.e., the fire is represented as the agent of hearing and hence there is no conflict on the point of समानकर्तृकत्व।' Mallinátha, however, does not explain why the authorship of hearing should be attributed, by a transference of epithet, to अग्नि। He means that the king and the fire being intimately connected,—indeed, the one being the आधार of the other,—the transference of epithet is possible.

We may meet the difficulty in another way. If we admit that the finite कृदन्त verb, स्थित is understood after निशम्य, the difficulty vanishes. Both निशम्य and स्थित shall have राजन् for their nominative. The sentence will be निशम्य स्थितानां राज्ञां हृदये अग्निरुज्ज्वलित इव। (See I. 77.)

N. B. The rule that both the fininite and the infinite verb shall have the same nominative is sometimes not observed : cf. रथस्थं वामनं दृष्ट्वा पुनर्जन्म न विद्यते। जन्मन् is not the nominative of दृष्ट्वा and विद्यते। Some, even here, admit स्थितस्य after दृष्ट्वा। The sentence in full is रथस्थं वामनं दृष्ट्वा स्थितस्य पुनर्जन्म न विद्यते।

Bengali.—দিলীপের পর রঘু রাজ্যে প্রতিষ্ঠিত হইয়াছেন, ইহা শ্রবণ করিয়া, পূর্ব্বে (দিলীপরাজত্বকালে) শত্রুরাজগণের হৃদয়ে যে ক্রোধবহ্নি ধূমায়মান ছিল তাহা (এক্ষণে) প্রজ্বলিত হইয়া উঠিল। ২।

English rendering.—Hearing him installed in the empire after Dilipa, the fire (of jealousy), which had before been smouldering, blazed up, as it were, in the hearts of the (hostile) kings.

Grammatical notes, &c, &c.

Sama'sa.—(1) अविद्यमानम् अन्तरं यस्मिन् (कर्मणि) तद्यथा तथा अनन्तरम् or अविद्यमानान्तरम् (बहु) दिलीपस्य अनन्तरं दिलीपानन्तरम् (षष्ठीतत्) (2) प्रकर्षेण धूमितः प्रधूमितः (प्रादि)।

Case-ending.—(1) दिलीपानन्तरम्—क्रियाविशेषणम् 'प्रतिष्ठित' इति क्रियायाः (2) पूर्वम्—क्रियाविशेषणम्—'प्रधूमित' क्रियायाः (3) राज्ञाम्—सम्बन्धे षष्ठी (4) हृदये—आधाराधिकरणे सप्तमी (5) राज्ये—विषयाधिकरणे सप्तमी।

Synonyms.—(1) अग्नि—(V. Sl. 5-9, C. I.)

Different meanings.—(1) हृदय—'हृदयं मानसे बुक्कोरस्यपि नपुंसकम्।' (मे.)

Derivation.—(1) राज्ञी—(V. Sl. 1, C. IV.) (2) निशम्य—(V. Sl. 52, and 61, C. II.) (3) प्रतिष्ठितम्—प्रति + स्था + क्त (कर्त्तरि, 2nd c. s.) (4) प्रधूमित:—धूम + इतच् (जातार्थे) = धूमित: (प्र + धूमित:) (see विलम्बित in I, 33.) (5) हृदये—हृ + कयन् (7th c. s.)—'वृञ्‌हृञोः षुग्‌दुकौ च' (उ. ४।१००) इति सूत्रात् दुक् (द्)। [The roots वृ and हृ take an additional ष् and द् respectively when the उणादि affix कयन् is added to them]. The definition of हृदय is.—'पद्मकोशप्रतीकाशं सुषिरं चाप्यधोमुखम्। हृदयं तद्विजानीयाद् विश्वस्यायतनं महत्॥' (भरत:) (6) उत्थित:—उद् + स्था + क्त: (कर्त्तरि)—By "उद: स्थास्तम्भो: पूर्वस्य" (८।४।६१ पा. ११८ सि.) the स् of स्था preceded by उद् changes into थ्।

Conjugation.—(1) शम्—(V. Sl. 52, C. II.) (2) स्था—(V. 45, C. I.)

The force of इव is उत्प्रेक्षा।

Rhetoric.—The figure of speech is उत्प्रेक्षा। No idea of similarity is possible when इव is allied with the verb. Here इव is connected with उत्थित। So it is a क्रियोत्प्रेक्षा। No comparison is meant. The fire of jealousy, which smouldered before, was, as it were, ablaze now. उत्प्रेक्षा is of four sorts *viz.*, जात्युत्प्रेक्षा, गुणोत्प्रेक्षा, क्रियोत्प्रेक्षा, and द्रव्योत्प्रेक्षा, inasmuch as जाति, गुण, क्रिया, and द्रव्य, form the subjects (विषय) of उत्प्रेक्षा। See Rhetoric I, 13.

पुरुहूतध्वजस्येव तस्योन्नयनपङ्क्तय:।
नवाभ्युत्थानदर्शिन्यो ननन्दु: सप्रजा: प्रजा:॥ ३॥

मूलस्य पाठान्तरम्।

सप्रजा:—सुप्रजा: (चा.)

Prose order.—पुरुहूतध्वजस्य इव तस्य नवाभ्युत्थानदर्शिन्य: उन्नयनपङ्क्तय: सप्रजा: प्रजा: ननन्दु:।

Explanation by use of synonyms.—पुरुहूतध्वजस्य इव (इन्द्रकेतनस्येव) तस्य (रघोः) नवाभ्युत्थानदर्शिन्यः (नवाभ्युदयदर्शिका इति रघुपक्षे, गृह्यमार्गे नवीनोत्थानावलोकिन्य इति ध्वजपक्षे) उन्नयनपङ्क्तयः (प्रीतिविस्फारित-नयननिकरा इति रघुपक्षे, ऊर्ध्वप्रेषितदृष्टिसमूहा इति ध्वजपक्षे) सप्रजाः (ससन्ताना) प्रजाः (जनाः) ननन्दुः (जहृषुः)।

Ssubstance—अनावृष्टिनिवारणार्थं राज्यस्य सर्वथा मङ्गलसाधनार्थञ्च राजानः शरदि पुरन्दरपूजनाय चतुरस्रं ध्वजं तोरणदेशे संस्थापयन्ति. तस्योत्थानं यथा सर्वाः प्रजा ऊर्ध्वनयनैरवलोक्य परमां प्रीतिं भजन्ते, तथा सर्वमङ्गलनिदानस्य रघोः नवं सिंहासनारोहणम् अवलोक्य ससन्ताना प्रजाः उन्नमितनेत्राः सत्यः परमानन्दं लेभिरे। रघुरपि सकलान् जनान् रञ्जयामास। जनाश्च पितरीव तस्मिन्ननुरक्ताः।

Change of voice.—...नवाभ्युत्थानदर्शिनीभिः उन्नयनपङ्क्तिभिः सप्रजाभिः प्रजाभिः ननन्दे।

Sanjivani.—पुरुहूतेति। पुरुहूतध्वजः, इन्द्रध्वजः—स किल राजभि-रिष्टार्थं पूज्यते इत्युक्तं भविष्योत्तरे—"एवं यः कुरुते यात्राम् इन्द्रकेतोर्युधिष्ठिर। पर्जन्यः कामवर्षी स्यात् तस्य राज्ये न संशयः॥" इति—"चतुरस्रं ध्वजाकारं राजद्वारे प्रतिष्ठितम्। आहुः शक्रध्वजं नाम पौरलोकसुखावहम्॥"—(पुरुहूत-ध्वजस्य इव) (तस्य रघोः—नवम् अभ्युत्थानम्, अभ्युन्नतिम्, अभ्युदयञ्च; पश्यन्तीति [नवाभ्युत्थानदर्शिन्यः] उत्, ऊर्ध्वं, प्रस्थिताः, उन्नमिताश्च, नयनपङ्क्तयः यासां ताः [उन्नयनपङ्क्तयः] (सप्रजाः, ससन्तानाः (प्रजाः) जना —"प्रजा स्यात् सन्ततौ जने" इत्युभयत्राप्यमरः (Cole, p. 309) (ननन्दुः) ॥ ३ ॥

Extracts from different commentaries.—

Cháritravardhana understands by अभ्युत्थान, in the case of the king, such practices as roaming in the capital on elephants, &c. He regards it as a custom of kings newly installed. His words are—अभ्युत्थानं गजारोहणादिकम्। अभिषिक्तो हि राजा गजेन्द्रमारुह्य पुरं प्रदक्षिणीकुर्यादित्याचारः।

Sanjivani Explained.

स किल * * भविष्योत्तरे—It is said in 'Bhavishyottara' that इन्द्रध्वज (the pole raised in honour of Indra) is worshipped, for obtaining rains, by the kings.

एवं यः * * * न संशयः—He who thus celebrates the festivity of इन्द्रध्वज, clouds undoubtedly pour forth, in his realm, rain in abundance.

चतुरस्रं ध्वजाकारम् * * * सुखावहम्—They call a quadrangular pole of the shape of a flagstaff, set up at the palace-gate, by the name of शक्रध्वज which brings happiness to the empire.

"प्रजा स्यात् सन्ततौ जने" इत्युभयत्रापि अमरः—प्रजा, in सप्रजाः, means सन्तान। The nominative प्रजा means the people. The text from Amarakosha gives the double sense of प्रजा, *viz.*, children, and men. This text is, therefore, applicable to the two प्रजा's in this verse.

Bengali.—(যেরূপ জনসমূহ) ঊর্দ্ধনয়নে ইন্দ্রধ্বজের নূতন অভ্যুত্থানদর্শনে আনন্দলাভ করে, সেইরূপ প্রজাগণ সন্তানবর্গের সহিত উন্নমিতনেত্রে তাঁহার (রঘুর) নবীন অভ্যুদয় দর্শন করিয়া আনন্দিত হইল। ৩।

English rendering.—With rows of uplifted eyes, the subjects with their children, witnessing his recent elevation, like that of Puruhuta's banner, rejoiced exceedingly. 3.

Grammatical notes, &c., &c.

Sama'sa.—(1) पुरूणि हूतानि नामान्यस्य or पुरु (प्रचुरं) हूतम् (आह्वानं) यस्य सः पुरुहूतः (बहु) or पुरु (प्रभूतं) हूतं (यज्ञाह्वानं) यस्य (बहु) तस्य ध्वजः पुरुहूतध्वजः (षष्ठीतत्) तस्य। (2) नयनानां पङ्क्तयः (षष्ठीतत्) उन्नमिताः नयनपङ्क्तयः यासां ताः उन्नयनपङ्क्तयः (बहु ध्वजपक्षे); उन्नमिताः नयनपङ्क्तयः यासां ताः उन्नयनपङ्क्तयः (बहु रघुपक्षे)। (3) नवम् अभ्युत्थानं (समुत्तोलनं) नवाभ्युत्थानम् (कर्मधा) तत् पश्यन्तीति नवाभ्युत्थानदर्शिन्यः (उपपदतत्—ध्वजपक्षे); नवम् अभ्युत्थानम् (अभ्युदयः) नवाभ्युत्थानम् (कर्मधा) तत् पश्यन्तीति

(उपपदतत्पुरुष — रघुवंशे 4) प्रकर्षेण जायन्ते इति प्रजाः (उपपदतत्) ताभिः सह वर्तमानाः सप्रजाः (तुल्ययोगबहु०) ।

Case-ending.—(1) तस्य—कर्तृकर्मणोः कृति षष्ठी । ल्युट् (अनट्) is the कृत् affix in अभ्युत्थान । (2) पुरुहूतध्वजस्य—विशेषणपदम् 'तस्य' (रघोः इत्युद्देश्यविधेयपदस्य—कर्तृकर्मणोः कृति षष्ठी—"कर्तृकर्मणोः कृति" इति सूत्रात् V. notes on सागरम्, Sl. 2, C. I.) (3) उन्नयनपङ्क्तयः and नवाभ्युत्थानदर्शिन्यः are adjectives of प्रजा ।

Synonyms.— 1) पुरुहूत—(V. मघवन्, Sl. 26, C. I.) (2) ध्वज—(V. Sl. 74, C. II).

Different meanings.—(1) ध्वज—(V. Sl. 74, C. II.) (2) प्रजा— V. Sanjivani .

Derivation.—पुरुहूत —पृ + कु. पुरु —'पृभिदि—' (उ. १'२३) ह्वे + क्त (भावे) = हूतम् । (पुरु + हूतम् । (2) ध्वजस्य—(V. Sl. 56, C. III.) (3) नवाभ्युत्थानदर्शिन्यः—नु + अप नवम् । अभि + उद् + स्था + ल्युट् (भावे) अभ्युत्थानम् । स of the root स्था changes into थ् by the rule "उदः स्थास्तम्भोः पूर्वस्य" V. उत्थित, Sl. 61, C. III.) नवाभ्युत्थान + दृश् + णिनिः (शीलार्थे) + ङीप् (1stc. p.) (4) ननन्दुः—नन्द + लिट् + उस् (5) प्रजाः—प्र + जन् + ड + टाप् 1stc. p. .

Conjugation.—(1) नन्द्— V. Sl. 57, C. I..

Force of इव is उपमा ।

For the places where the root स्था takes आत्मनेपदीय and परस्मैपदीय forms (V. notes on उपस्थिताम्, Sl. 45, C. I.).

Allusion.—पुरुहूतध्वज—असुरनिपीडितेषु इन्द्रप्रमुखेषु देवेषु क्षीरोदशायिनः विष्णोरभ्यर्थनं प्राप्तेषु भगवान् पद्मयोनिः असुरनाशार्थं देवराजाय चतुरस्रं ध्वजमेकं प्रददौ । तेन स निखिलान् दैत्यान् निजघान । चेदिराजो वसुरिन्द्रात् तद्ध्वजं प्राप्य यथाविधि पूजयित्वा च अपूर्वैश्वर्यं लेभे । तदवधि इन्द्रध्वजस्य पूजनाय अर्चीमहोत्सवान् नृपतीन् आज्ञापयामास ।

Rhetoric.—The figure of speech is उपमा। Raghu is compared to इन्द्रध्वज, his elevation to the throne to the setting up of an इन्द्रध्वज। Raghu's subjects looked on his elevation with as much pleasure as people feel when they look upon an Indra's pole recently set up for the benefit of the empire.

There is a pun in प्रजा, उन्नयन and अभ्युत्थान। प्रजा, in the case of Raghu, means 'subjects'; in that of इन्द्रध्वज, 'men in general.' उन्नयन, in the case of Raghu, means उल्लसितनयन (of joyous eyes); in that of इन्द्रध्वज, ऊर्द्धदृष्टि। The sense of the verse in full is—'As the people are gladdened when they cast their eyes up on the pole raised in Indra's honour, so Raghu's subjects were delighted when they saw him elevated to the throne'.

सममेव समाक्रान्तं द्वयं द्विरदगामिना।
तेन सिंहासनं पित्र्यमखिलं चारिमण्डलम् ॥ ४ ॥

मूलस्य पाठान्तरम्।

पित्र्यम्—पैत्र्यम् (चा.)

Prose order.—द्विरदगामिना तेन पित्र्यं सिंहासनम् अखिलम् अरिमण्डलं च द्वयं समम् एव समाक्रान्तम्।

Explanation by use of synonyms.—द्विरदगामिना (गजगतिना, वा गजारोहणेन चलता) तेन (रघुणा) पित्र्यं (पितुरागतं, पैतृकमिति यावत्) सिंहासनं (सिंहाकारं नृपासनम्) अखिलं (समग्रम्) अरिमण्डलञ्च (शत्रुराष्ट्रसमूहश्च) द्वयम् (उभयं) सममेव (युगपदेव) समाक्रान्तम् (अधिष्ठितम्)।

Substance.—ननु उपविशतु स पैतृकसिंहासने पितुः सामन्ताः किं तस्य शासनं मेनिरे इति पृच्छन्तं कविराह। अहो रघोरलौकिकः प्रभावः। यदैव स पितुः सिंहासनमधिकरोह तदैव निखिलशत्रूणां राष्ट्राण्यपि सोऽधिचकार।

Change of voice.—द्विरदगामी सः......समाक्रान्तवान्।

Sanjivani.—सममिति। द्विरद इव द्विरदेव गच्छतीति तेन (द्विरद-

गामिना)—'कर्त्तर्य्युपमाने' (३।२।७९। पा. २९८९ सि.) इति—"सुप्यजातौ—" (३।२।७८ पा. २९८८ सि. इति च णिनिः— 'तेन'(रघुणा (मन्ने) युगपत् (एव कर्थ) समाक्रान्तम्) अधिष्ठितम् —कि तत् द्वयम् ? पित्र्यागतं (पित्र्)—"पितुर्यत्" (४।३।७९ पा. १४५८ सि.) इति यत्प्रत्यय —(सिंहासनम् अखिलम्) - परीणां मण्डलं राष्ट्रम् [अरिमण्डलं] (च) ॥ ४ ॥

Sanjivani Explained

"कर्त्तर्य्युपमाने" and "सुप्यजाता—" See notes on प्राथीं in I, 3.

"पितुर्यत"—The तद्धित affix यत् is also added to पितृ in the sense of 'it comes from पितृ'।

The Sutra in full is 'पितुर्यच्च'। The 'च' in the Sutra means that ठञ् is also added to the word पितृ। E.g., पैतृकम्।

सिंहासन समाक्रान्तम् is plain. अरिमण्डलं समाक्रान्तम् means 'he occupied the domains of his foes'.

Bengali. – গজেন্দ্রগামী সেই রঘু কর্তৃক পৈতৃক সিংহাসন এবং নিখিলশত্রুরাজ্য (এই) উভয়ই একফালে অধিকার করা হইল। ৪।

English rendering. –By him of elephantine gait (and who was accustomed to ride on elephants), the two were simultaneously seized, *viz*, his paternal throne and the entire circle of his foes.

Grammatical notes, &c , &c.

Sama'sa.—(1) सम्यक् आक्रान्तम् समाक्रान्तम् (सुप्सुपा) (2) द्वौ रदौ (दन्तौ) यस्य द्विरदः (बहु) स इव गच्छति द्विरदगामी (उपपदतत्) तेन or द्विरदैः गच्छति (नगरं परिभ्रमति) इति। (3) सिंहाकारम् आसन सिंहासनम् (शाकपार्थिवादित्वात् मध्यपदलोपी समास) or, सिंह इव आसनम् (सिंहासन... समासः) [V. R. T. of Amarakos'a, N. S. P. Ed. p. 316] (4) अरीणां मण्डलम् अरिमण्डलम् (षष्ठीतत्)

Case-ending.—(1) युगपत्—अव्ययं, क्रियाविशेषणम् (2) द्वयम्—कर्मणि प्रथमा (3) तेन—अनुक्ते कर्त्तरि तृतीया (4) सिंहासनम् and अरिमण्ड-

सम्—उद्देश्यकर्मपद, having स्वम् for विधेयकर्मपद (5) द्विरदगामिना is the adjective of तेन ।

Synonyms.—(1) द्विरद—(V. द्विप, Sl. 7, C. II.) (2) अरि—'द्विषौ ऽहितसपत्नारिरिपुद्विषद्वैरिदुर्हृदः । द्विड्विपक्षाहितामित्रदस्युशात्रवशत्रवः । अभिघातिपरारातिप्रत्यर्थिपरिपन्थिनः ।' (अ.)

Different meanings.—(1) मण्डल—'स्यान्मण्डलं द्वादशराजके च देशे च बिम्बे च कदम्बके च । कुष्ठप्रभेदेऽप्युपसर्गकेऽपि भुजङ्गभेदे पुनि मण्डलः स्यात् ॥' (वि.) बिम्ब = Solar or lunar disk. कदम्बक = multitude.

Derivation.—(1) समाक्रान्तम्—सम् + आ + क्रम् + क्तः (कर्मणि) (2) द्विरदगामिना—द्विरद + गम् + णिनि. (ताच्छील्ये, 3rd c. s.) See "कर्त्तर्य्युपमाने"। In the case of द्विरदैः गच्छति—See "सुप्यजातौ णिनिस्ताच्छील्ये"। (3) पित्र्यम्—पितृ + यत् (पितुरागतमित्यर्थे)। It also takes ठञ् so the alternate form is पैतृकम्। (4) रिः—ऋ + इ—'अच इः' (उ.४।११९।) इयर्त्ति प्राप्नोति विरोध मित्यरिः। (5) मण्डलम्—मण्ड + कलच्—वृषादित्वात् (उ.१।१०६)।

Conjugation.—(1) क्रम्—(V. Sl. 15, C. II).

Force of एव is अवधारण।

Force of च is समुच्चय।

Rhetoric.—The figure of speech is अतिशयोक्ति। When the difference between two ideas is overlooked, or when two ideas which are related are represented as not related, or when an impossible idea is represented as feasible, or the reverse of the thing happens, the figure of speech is अतिशयोक्ति or poetic exaggeration.

In the present case, Sáhityadarpana says, an impossibility is recorded. Raghu cannot occupy the throne and domains of his foes at the same time. Yet the poet represents the simultaneity, which suggests the ease and swiftness with which the king subjugated all enemies after his installation on the throne.

छायामण्डललक्ष्येण तमदृश्या किल स्वयम् ।
पद्मा पद्मातपत्रेण भेजे साम्राज्यदीक्षितम् ॥५॥

Prose-order.--पद्मा स्वयम्, अदृश्या किल छायामण्डललक्ष्येण पद्मातपत्रेण साम्राज्यदीक्षितं तं भेजे ।

Explanation by use of synonyms.—पद्मा (लक्ष्मीः) स्वयम् (आत्मनैव) अदृश्या (अप्रत्यक्षा सती) किल (सम्भावने) छायामण्डललक्ष्येण (कान्तिपुञ्जानुमेयेन, अनातपमण्डलानुमेयेन च, पद्मातपत्रेण कमलच्छत्रेण) साम्राज्यदीक्षितं (साम्राज्यकर्मणि अभिषिक्तं) तं (रघुं) भेजे (सिषेवे)।

Substance.—राज्याभिषिक्तो रघुः कामपि शोभां दधौ। तस्य कान्तिपुञ्जोऽखिलाभिः सा च सर्वदिक्षु प्रसृता तस्य शिरसि मण्डलमिवाभवत्। राजलक्ष्मीसन्निधानात् एवं तस्य शोभामस्यत समजनि। तत कविकल्पयति यत् कमला प्रीता सती रघौ, मूर्त्तिविधिमासाद्य तस्य मूर्द्धनि स्वयम् आतपत्रं धृत्वा सिंहासनारूढं तं नृपवरं सिषेवे। ईदृशमस्य प्रभावः। ननु कमला आगता चेत् कथं सभासदस्तां न ददृशुः? तदाह सा हि देवी मानवचक्षुषामदृश्या। अप्रत्यक्षा भूत्वा तत्र तस्थौ। भवतु आतपत्रमपि कथं न दृष्टम्? दैविककमलातपत्रत्वात् तन्न दृष्टम्। किन्तु तत् केवलं तस्य शिरोविसारिणा मण्डलाभतेन तेजःपुञ्जेनानुमेयमभवत्।

Change of voice.--पद्मया...अदृश्यया...साम्राज्यदीक्षितः सः ... ।

Sanjivani—अथ सिंहासनारोहणानन्तरं तस्य लक्ष्मीसन्निधानमाह, छायेति। अत्र रघोस्तेजोविशेषेण स्वयं सन्निहितया लक्ष्म्या छत्रधारणं कृतमित्युत्प्रेक्षते। (पद्मा) लक्ष्मीः—"लक्ष्मीः पद्मालया पद्मा कमला श्रीर्हरिप्रिया ।" इत्यमरः (Cole. p. 5.) —(स्वयम् अदृश्या किल)—किलेति सम्भावनायाम्—सती (छायामण्डललक्ष्येण) कान्तिपुञ्जानुमेयेन,—ननु स्वरूपतोऽदृश्येन—छायामण्डलमित्यनेन अनातपमण्डलमुच्यते— 'छाया सूर्यप्रिया कान्तिः प्रतिबिम्बमनातपः' इत्यमरशाश्वतौ.—(Cole. p. 345.)—(पद्मातपत्रेण)—पद्ममेव आतपत्रं तेन कारणभूतेन—साम्राज्ये, साम्राज्यकर्मणि, मण्डलाधिपत्ये दीक्षितम्, अभिषिक्तं [साम्राज्यदीक्षितं] (तं भेजे)। अत्रांशे कल्पितादृशी कान्तिसम्पत्तिरिति भावः ॥५॥

सञ्जीवन्याः पाठान्तरम् ।

Nand. reads सा before स्वयम् ।

Sanjivani Explained.

अथ * * * आह—Now the poet says that the goddess of royal prosperity attended upon him after he ascended the throne.

अथ रघोः * * * उत्प्रेक्षते—The poet fancies that the goddess Lakshmi, approaching nigh (as if attracted by Raghu's unique majesty, held the umbrella over his head.

लक्ष्मीः * * * हरिप्रिया—लक्ष्मी, पद्मालया, पद्मा, कमला, श्री and हरिप्रिया are synonymous.

किलेति सम्भावनयाम्—किल means possibility. It is not a fact but a mere possibility that Lakshmi approached him, though herself invisible, and held the umbrella over his head. Hence, it is a case of उत्प्रेक्षा ।

न तु स्वरूपतो दृश्येन—The umbrella was not actually visible. It could be merely inferred by the halo of the splendour round Raghu's head.

छाया मण्डलम् इत्यनेन * * * लक्ष्यते—By छायामण्डल the shade of the umbrella is also meant.

अन्यथा कथमेतादृशी * * * इति भावः—The purport is, Raghu could not have such wealth of splendour had not Lakshmi attended upon him.

छाया * * अनातपः—छाया means the wife of the sun, splendour, reflection, as well as umbra or shade.

Bengli.—সাম্রাজ্যাভিষিক্ত রঘুর কান্তিপুঞ্জাবলোকনে এইরূপ বোধ হইল, যেন, কমলা স্বয়ং অদৃশ্য হইয়া কমলরচিতচ্ছত্র দ্বারা তাঁহার সেবা করিতেছেন ।৫।

English rendering.—Padmá (the goddess of Prosperity), herself invisible, served, as it were, him, who was initiated in the duties of sovereignty, with a lotus-made umbrella, as could be inferred from the radiant halo (round the monarch's head.) 5.

Grammatical notes, &c., &c.

Sama'sa—(1) छायाया: (शोभाया: वा अनातपस्य) मण्डलं छायामण्डलम् (षष्ठीतत्) तेन लक्ष्यं छायामण्डललक्ष्यम् (तृतीयातत्) तम् (2) न दृश्या अदृश्या (नञ्तत्) (3) आ (सम्यक्) तप आतप. (प्रादि:) तस्मात् त्रायते (रक्षति) इत्यात-पत्रम् (प्रादि.) पद्ममेव आतपत्रं पद्मातपत्रम् (रूपककर्मधा) तेन (4) साम्राज्ये दीक्षित. साम्राज्यदीक्षित. सप्तमीतत् तम् ।

Case-ending.— 1, स्वयम्—अव्यय , प्रकृत्यादिभ्यस्तृतीया (2) पद्मात-पत्रेण—करणे तृतीया 3) छायामण्डललक्ष्येण—Adjective of पद्मातपत्रेण ।

Synonyms.—(1) पद्मा— V. Sanjivani).

Different meanings -पद्मा—'पद्मा:स्त्री पद्मके व्यूहनिधिसंख्या-न्तरेऽम्बुजे । ना नागे. स्त्री फञ्जिकायोचारटीपद्मगासु ॥' (मे)

पद्मक—The red dots on the body of an elephant.

व्यूह – an array of troops , पद्मव्यूह । ना masculine.

फञ्जिका – the plant *Siphonanthus Indica* (बामुनहाटी).

चारटी—The plant *Hibiscus mutabilis*

(2) छाया— V Sanjivani . (3) मण्डल— V. Sl, 4. C. IV)

(5. लक्ष्य—'लक्ष्यं व्याजशरव्ययो: सञ्ज्ञायामपि' हे ।

Derivation.— 1) छाया—(V III, 70 . (2) लक्ष्य—लक्ष् + यत् (कर्मणि, 3rd c. s.)—See "अर्चायत" ३।१।८० पा., ३८४२ सि.) । (3) अदृश्या—दृश् + यत् - (अर्हार्थे, कर्मणि, । टाप् । न + दृश्या) । (4) पद्मा—पद्म + अच् (अर्श आदित्वात्) + टाप् (5) आतपत्रेण—V. अनातपत्रम् in II, 13). (5) भेजे—भज् + लिट्—ए । The alternative form is बभाज since the root भज् is उभयपदी । Here the verb takes आत्मनेपदीय form because कर्त्रभिप्रायक्रियाफल is intended. See II, 25. साम्राज्य—सम्राज् + ष्यञ् (भावकर्मणो:) । It means either the status of an em-

स व्यावृत्तात्मा (बहु) विषयेभ्यः व्यावृत्तात्मा विषयव्यावृत्तात्मा (पञ्चमीतत्) or विषयेभ्यः व्यावृत्तः विषयव्यावृत्तः (पञ्चमीतत्) विषयव्यावृत्तः आत्मा यस्य स विषयव्यावृत्तात्मा (बहु) (2) विधिम् अनतिक्रम्य यथाविधि (अव्ययीभावः) (2) कं (सुखं) कौति प्रापयति इति ककुदम् (उपपदत्—पृषोदरादित्वात् साधुः) नृणां पतिः नृपतिः (षष्ठीतत्) तस्य ककुद नृपतिककुदम् (षष्ठीतत्) तत् (4) आ (सम्यक्) तपः आतपः (सुपसुपा) तत् वारति इत्यातपवारणम् (उपपदतत्) सितम् आतपवारणं सितातपवारणम् (कर्मधा) (5) मुनिभिराश्रितं वनं (मुनिवनम्) (शाकपार्थिवादित्वात् मध्यपदलोपि कर्मधा) तस्य तरुः मुनिवनतरुः (षष्ठीतत्) तस्य छाया मुनिवनतरुच्छाया (षष्ठीतत्) ताम् (6) गलितं वयः येषां ते गलितवयसः (बहु) तेषाम् । The alternative form is गलितवयस्कानाम्—"शेषाद्विभाषा" (V. notes on व्यूढोरस्क, Sl. 13, C. I.) (7) कुलस्य व्रतं कुलव्रतम् (षष्ठीतत्) ।

Case-ending.—(1) यथाविधि—अव्ययं, क्रियाविशेषणम् (2) सूनवे—सम्प्रदाने चतुर्थी (3) देव्या—सहयोगे तृतीया (4) इक्ष्वाकूणाम्—शेषे षष्ठी 'कुलव्रतम्' इत्यनेन सम्बन्धः

Different meanings.—(1) विषय—"विषयो गोचरे देशे तथा जनपदेऽपि च । प्रबन्धायत्य यो ज्ञेयश्च रूपादिके पुमान् ॥" (मे.) (2) कुल—'कुलं जनपदे गोत्रे सजातीयगणेऽपि च भवने च तनौ क्लीबं कण्टकार्य्यौषधौ कुली ॥' (मे.)

Derivation.—(1) विषयः—वि + सि + अच् (2) ककुदम्—क + कु + क्विप्—त् comes by "ह्रस्वस्य पिति कृति तुक्" (V. notes on जगतः, Sl 1, C. I.) Now by निपातन अ is added to त् and त् is also changed into द [V. R. T. of Amarakos'a, N. S. P. Ed. P. 476.] ककुद is both masculine and neuter. ककुद् is feminine. Amara says—'प्राधान्ये राजलिङ्गे च वृषाङ्गे ककुदोऽस्त्रियाम् ।' (3) दत्त्वा—दा + क्त्वा (4) सितम्—षो + क्त (5) आतपवारणम्—आतप + वृ (चुरादिः) + ल्युट् (करणे) (6) छायाम्—छो + ण + टाप् (2nd c. s.)—"आतो युक्चिण्कृतोः" (७।३।३३। पा. ३०७१ सि.)

[A root ending in आ admits an additional य after it if चित्, णित्, ञित् or कृत् affix is added to it.] or क्री + यः + टाप्—'माक्रामशिम्यो: यः' (उ. ४।१०१) (7) शिश्रियुः—श्रि + लिट्-उ (8 इक्ष्वाकूणाम्—इक्ष्वाकु + अञ्- ऐक्ष्वाकः (6th c. p. - ऐक्ष्वाकाणाम् is the form. But by the rule "तद्राजस्य बहुषु तेनैवास्त्रियाम्' the अपत्यार्थ अञ् elides in the plural, so we get the form इक्ष्वाकूणाम्।

Conjugation.—(1) श्रि (to take shelter)—श्रयति-ते (लट्) श्रयतु, श्रयताम् (लोट्) अश्रयत्-त (लङ्) श्रयेत, श्रयेत (वि. लिङ्) शिश्राय, शिश्रियतुः, शिश्रयिथ, शिश्रिये (लिट्) अशिश्रियत्—त (लुङ्) श्रयिता (लुट्) श्रयिष्यति—ते (लृट्) श्रीयते (कर्मणि-लट्) अश्रायि (कर्मणि-लुङ्) शिश्रयिषति—ते; शिश्रीषति-ते (सन्-लट्) शेश्रीयते (यङ्-लट्) श्राययति-ते (णिच्-लट्) अशिश्रियत्-त (णिच्-लुङ्) श्रीयात्, श्रयिषीष्ट (आ. लिङ्) श्रित (क्तः) (2) दा—(V. Sl. 18, C. I.)

मुनिवनतरुच्छाया—"छाया बाहुल्ये" (२।४।२२ पा. ८२५ सि.) [When a plurality of shades is meant, the word छाया becomes neuter. Plurality of shade is determined by the plurality of the object casting it. Here the shade of one tree is meant and, therefore, the तत्पुरुष ending in छाया does not become neuter. In other words we get the form मुनिवनतरुच्छाया and not मुनिवनतरुच्छायम्]। In the case of the singularity of the shade the Sutra is.

"विभाषा सेनासुराच्छायाशालानिशानाम्" (२।४।२५, पा. ८२८ सि.) [A तत्पुरुष ending in सेना, सुरा, छाया, शाला or निशा becomes neuter optionally. E.g., ब्राह्मणसेनम्, ब्राह्मणसेना; यवसुरम्, यवसुरा; कुड्यच्छायम्, कुड्यच्छाया; धर्मशालम् धर्मशाला] The छ of छाया is doubled by the rule "छे च" (६।१।७३ पा. १०१ सि. [त (तुक्) comes after a ह्रस्वस्वर (short vowel) when छ follows it] त on its part becomes च। तरु ends in a short vowel, त comes after it because it is followed by छ of छाया।

"दीर्घात्" (६।१।७५। पा. १४८ सि.) enjoins [(तुक्) त् comes after a दीर्घस्वर (long vowel) when छ follows it e.g. चेच्छिद्यते]

But it is optionally doubled by the rule "पदान्ताद्वा" (६।१।७६। पा. १४९ सि.) [त् comes optionally after a दीर्घ vowel at the end of a पद if it be followed by छ of छाया। E. g. लक्ष्मीच्छाया, लक्ष्मीछाया]

Prosody.—The metre, हरिणी, is "रसयुगहयैर्न्सौ म्रौ स्लौ गो यदा हरिणी तदा"। It means that when accents represented by the symbols न, स, म, र, स, ल and ग occur in the order shown below and when the pause is after the sixth, and next after the fourth (*i-e.*, after the tenth from the beginning) and next after the seventh (*i.e.*, after the seventeenth from the beginning), the metre is called हरिणी।

Scanning.—

न	स	म	र	स	ल ग
⏑⏑⏑	⏑⏑—	———	—⏑—	⏑⏑—	⏑ —
अ य स	वि ष य,	व्या ह ता	त्मा, य था	वि धि सू	म। ये

The pauses are after the sixth, the tenth, and the seventeenth accent.

Remark.—One of the Calcutta editors says that 'व्याहतः' is in कर्मकर्तृवाच्य। It is not so. The root हन् with वि and आ is अकर्मक, so the affix क्त is added to it in कर्तृवाच्य by the Sutra "गत्यर्थाकर्मकश्लिषशीङ्स्थासवसजनरुहजीर्यतिभ्यश्च" (३।४।७२। पा. ९६०८ सि.)। Unless the root be सकर्मक, it cannot admit कर्मकर्तृवाच्य। For कर्मकर्तृवाच्य, see कुमा I, 72.

Conjugation.—(1) पुष्—(V. Sl. 22, C. III.)

पञ्चानां भूतानाम्—(1) क्षिति has five गुण's—as, रूप, रस, गन्ध, स्पर्श and शब्द । (2) अप् has four, as,—रूप, रस, स्पर्श and शब्द (3) तेजस् has three, as,—रूप, स्पर्श and शब्द (4) मरुत् has two, as,—स्पर्श and शब्द (5) व्योमन् has only one, as,—शब्द ।

Force of अपि is सम्भावना ।

यथा प्रह्लादनाच्चन्द्रः प्रतापात्तपनो यथा ।
तथैव सोऽभूदन्वर्थो राजा प्रकृतिरञ्जनात् ॥ १२ ॥

Prose order.—यथा चन्द्रः प्रह्लादनात्, यथा तपनः प्रतापात् (अन्वर्थः भवति) तथा एव स राजा प्रकृतिरञ्जनात् अन्वर्थः अभूत् ।

Explanation by use of synonyms.—यथा (यादृक्) चन्द्रः (शशधरः) प्रह्लादनात् (आह्लादविधानात्) यथा (यादृक्) तपनः (सूर्य्यः) प्रतापात् (सन्तापजननात्) अन्वर्थो भवति, तथा एव (तादृगेव) स राजा (स नृपतिः रघुः) प्रकृतिरञ्जनात् (प्रजातोषणात्) अन्वर्थः (सार्थकराजशब्दः) अभूत् (जातः) ।

Substance.—यथा लोकानां हृदयानन्दविधानात् - चन्दयति, आह्लादयतीति धातुगतार्थेन—चन्द्र इति नाम सार्थकं जायते, यथा च जीवानां सन्तापविधानात्—तपतीति धातुगतार्थेन—तपन इति नाम सार्थकं भवति, तथा प्रकृतिरञ्जनात्—रञ्जयतीति धातुगतार्थेन—स रघुः सार्थकराजशब्दोऽभूत् । तस्मिन्नेव राजशब्दः सार्थकः अन्येषु निरर्थकः । स हि प्रजानुरञ्जनात् परमार्थतो राजा अपरे तु नामतस्तथा इत्यपरराजभिः सह तस्य भूयान् भेदः ।

Change of voice.—...चन्द्रेण...तपनेन...तेन राज्ञा...अन्वर्थेन अभावि ।

Sanjivani.—यथेति । (यथा)—चन्दयति, आह्लादयतीति (चन्द्रः) इन्दुः—चदिधातोरौणादिको रक्प्रत्ययः—(प्रह्लादनात्) आह्लादकरणात्, अन्वर्थः, अनुगतार्थनामकः अभूत् ; (यथा) च तपतीति (तपनः) सूर्य्यः—नन्द्यादित्वात् ल्यु प्रत्ययः—(प्रतापात्) सन्तापजननात् अन्वर्थः ; (तथा एव सः राजा प्रकृतिरञ्जनात्)

(अन्वर्थः) सार्थकराजशब्दः (अभूत्)। यद्यपि राजशब्दो राजतेर्दीप्त्यर्थत्वात् कनिन्-प्रत्ययान्तो न तु रञ्जेः, तथापि धातूनामनेकार्थत्वाद्रञ्जनाद्राजेत्युक्तं कविना ॥१२॥

Sanjivani Explained.

चदिधातोः * * * रकारप्रत्ययः—चन्द्र is derived from the root चन्द्+र of उणादि class. It literally means 'one who gladdens.'

नन्द्यादित्वात् ल्यु प्रत्ययः—तपन is derived from the root तप् with the affix ल्यु because तप् belongs to the group नन्द्, &c. The Sutra enjoining ल्यु is "नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः" (३।१।१३४। पा. ८९६ सि.) The roots नन्दि, &c., admit ल्यु, ग्रहि &c., णिनि, and पच्, &c., अच् in कर्त्तवाच्य। The गणसूत्र is 'सहितपिदमः संज्ञायाम्'। It means सह्, तप् and दम् admit ल्यु provided the whole word means संज्ञा। तपन means a name.

यद्यपि राजशब्द * * * कविना—Though the word राजन् is derived from the root राज् meaning 'to shine', with the affix कनिन्, and not from the root, रञ्ज, so as to mean 'one who gratifies', yet the poet uses राजा in the sense of रञ्जक because धातु's are said to have more senses than one.

Bengali.—যেরূপ আনন্দবিধানহেতু চন্দ্র এই নাম, (এবং) যেরূপ সন্তাপজননহেতু তপন এই নাম, সার্থক হইয়াছে, সেইরূপ সেই রাজাও প্রকৃতিরঞ্জনহেতু 'রাজা' এই সার্থক নাম ধারণ করিলেন।১২।

English rendering.—As *Chandra* is so (named) in consequence of (his) gladdening all creatures, as *Tapana* is so (named) for (his) heating (all things), even so he was properly called *Rájá* for his gratifying the people. 12.

Grammatical notes, &c., &c.

Sama'sa.—(1) प्रकर्षेण ह्लादनं प्रह्लादनम् (प्रादिः) तस्मात् (2) प्रकर्षेण तापः प्रतापः (प्रादिः) तस्मात् (3) अनुगतः अर्थम् अन्वर्थः (प्रादिः see अभिमुख,

Sl. 29, C. V.) (4) प्रकृष्टा कृतिः (कार्य्यं) यासां ताः प्रकृतयः (बहु) 'प्रादिभ्यो धातुजस्य—' (V. उदाहृ, Sl. '3, C. I.) तासां रञ्जनं प्रकृतिरञ्जनम् (षष्ठीतत्) तस्मात्।

Case-ending.—(1) यथा and तथा—अव्ययं, क्रियाविशेषणम् (2) प्रह्लादनात्, प्रतापात् and प्रकृतिरञ्जनात्—हेतौ पञ्चमी।

Synonyms.—(1) चन्द्र—See I, 12. (2) तपन—(V. सूर्य्य Sl. 13, C. III.)

Different meanings.—(1) चन्द्र—'चन्द्रोऽम्बुकाम्ययोः[1]। स्वर्णे[2] सुधांशौ कर्पूरे[1] काम्पिल्ये मेचकेऽपि च।' (हे.) (2) तपन—'तपनोऽरुष्करेऽपि[2] स्याद्भास्करे निरयान्तरे[3]।' (मे.) (3) प्रकृति—'प्रकृतिर्गुणसाम्ये[1] स्यादमत्यादिस्वभावयोः[2][3]। योनौ लिङ्गे पौरवर्गे।' (मे.) (4) राजन्—(V. Sl. 7, C. IV,)

Derivation.—(1) प्रह्लादनात्—प्र + (ह्लाद + णिच् =) ह्लादि + ल्युट् (भावे, 5th c. s.) (2) चन्द्रः—चन्द् + रक्—'स्फायितञ्चि—' (उ. २।१३।) (V. R. T. of Amarakos'a, N. S. P. Ed. P. 39.) According to भागुरि—चन्द् is सकर्मक, as, चन्दति, आह्लादयति जनानिति चन्द्रः। But Mallinátha takes it to be अकर्मक and, therefore, derives it as (चन्द्र + णिच्) – चन्दि + रक्। The affix णिच् is necessary to make it सकर्मक। (3) प्रतापात्—प्र + तप् + घञ् (भावे, 5th c. s.) (4) तपनः—तप् + ल्युः (कर्त्तरि) (5) अभूत्—भू + लुङ्—दिप् (6) राज् + कनिन् (1st c. s.) 'कनिन् युवृषि—' (उ. १।१५६।) The root 'राज्' means दीप्ति (shining) but here it means रञ्जन (gratification). [V. Sanjivani Explained]. (7) रञ्जनात्—(रञ्ज् + णिच् =) रञ्जि + ल्युट् (भावे, 5th c. s.)

Conjugation.—(1) भू—(V. Sl. 15, C. III.) (2) चन्द्—चन्दति (लट्) चन्दतु (लोट्) अचन्दत् (लङ्) चन्देत् (वि. लिङ्) चचन्द (लिट्) अचन्दीत् (लुङ्) चन्दिता (लुट्) चन्दिष्यति (लृट्) अचन्दिष्यत् (लृङ्) चन्दयति

(णिच्-लट्) अरञ्जयत् (णिच्-लुङ्) अरञ्जि (लुङ्) रक्तः (क्त:) (3) रञ्ज्—रजति—ते, रज्यति—ते (लट्) ररञ्ज, ररञ्जिथ, ररङ्क्थ। ररञ्जे (लिट्) रङ्क्ता (लुट्) रङ्क्ष्यति—ते (लृट्) अराङ्क्षीत्, अराङ्क्ताम्, अराङ्क्षुः। अरङ्क्त, अरङ्क्षाताम् अरङ्क्षत (लुङ्) रज्यते (कर्मणि-लट्) अरञ्जि (कर्मणि-लुङ्) रिरङ्क्षति—ते (सन्-लट्) रारज्यते (यङ्-लट्) रक्तः (क्त:)। To mean to hunt animals, the form in णिच्—लट् is रजयति। In all other senses, the form is रञ्जयति। अररञ्जत् (णिच्-लुङ्) रञ्जयामास &c. (लिट्) रञ्जितः (णिच्-क्त)।

Force of एव is अवधारण (assertion).

Rhetoric.—The figure of speech is मालोपमा। See II, 75.

कामं कर्णान्तविश्रान्ते विशाले तस्य लोचने।
चक्षुष्मत्ता तु शास्त्रेण सूक्ष्मकार्य्यार्थदर्शिना ॥ १३ ॥

मूलस्य पाठान्तरम्

Charitravardhana reads for the first line कामं कमलपत्राभे नेत्रे तस्यानुकारिणी।

सूक्ष्मकार्य्यार्थदर्शिना—सूक्ष्मकार्य्यार्थदर्शिनः (पा.)

Prose order.—तस्य विशाले लोचने कामं कर्णान्तविश्रान्ते (आस्तां) चक्षुष्मत्ता तु सूक्ष्मकार्य्यार्थदर्शिना शास्त्रेण (अभूत्)। Mallinatha places 'तस्य' after 'विशाले'।

Explanation by use of synonyms.—तस्य (रघोः) विशाले (विस्तृते) लोचने (नयने) कामम् (वाढं) कर्णान्तविश्रान्ते (कर्णप्रान्तगते) आस्ताम्—चक्षुष्मत्ता (चक्षुःफलं) तु (भेदे) सूक्ष्मकार्य्यार्थदर्शिना (अतीन्द्रियकर्त्तव्यार्थप्रकाशकेन) शास्त्रेण (वेदादिना) अभूत्।

Substance.—शास्त्रानुसारिणस्तस्य निखिलव्यवहारा बभूवुरित्याह। रघोः कर्णविश्रान्तं लोचनद्वयमासीत्। तथापि तस्मिन् चाक्षुलोचनद्वयेऽपि सः अतीन्द्रियार्थप्रापकेण शास्त्रेणैव कर्त्तव्याकर्त्तव्यं सर्वं विचारयामास। शास्त्रमेव तस्य प्रकृतलोचनमासीत्। साधारणमनुष्यवद् वाह्यलोचनाभ्यां स प्रकृतमेवद्रष्टा नाभूत्।

Change of voice.—...विशालाभ्यां लोचनाभ्यां...कर्णान्तविश्रान्ताभ्याम् (अभूयत) चक्षुष्मत्तया...(अभावि)।

Sanjivani.—काममिति। (विशाले) (तस्य) रघोः (लोचने कामं)—कर्णान्तयोः विश्रान्ते [कर्णान्तविश्रान्ते] कर्णप्रान्तगते (चक्षुष्मत्ता तु) चक्षुःफलं तु इत्यर्थः। सूक्ष्मान् कार्य्यार्थान्, कर्त्तव्यार्थान्, दर्शयति, प्रकाशयतीति (सूक्ष्मकार्य्यार्थदर्शिना) (शास्त्रेण) एव। शास्त्रं दृष्टिर्विवेकिनाम् इति भावः॥ १३॥

Sanjivani Explained.

शास्त्रं दृष्टिः विवेकिनाम्—Sástra is the eye of the wise.

Bengali.—তাঁহার বিশাললোচনদ্বয় আকর্ণবিশ্রান্ত (ছিল বটে) কিন্তু (তাঁহার) চক্ষুঃশালিত্ব সূক্ষ্মকর্তব্যার্থনিরূপক শাস্ত্রদ্বারাই (সম্পাদিত হইত)। ১৩।

English rendering.—Verily, his large eyes extended as far as the border of his e[illegible] but his possession of vision (i. e., keensightedness) was due to the Sástras (inspired writings) revealing subtle purposes requiring accomplishment.

Grammatical notes, &c., &c.

Sama'sa.—(1) विशेषेण श्रान्ते विश्रान्ते (प्रादि:) कर्णयोः अन्तौ कर्णान्तौ (षष्ठीतत्) तयोः विश्रान्ते कर्णान्तविश्रान्ते (सप्तमीतत्) (2) कार्य्याः करणीयाः अर्थाः कार्य्यार्थाः (कर्मधा), सूक्ष्माः कार्य्यार्थाः सूक्ष्मकार्य्यार्थाः (कर्मधा) तान् दर्शयतीति सूक्ष्मकार्य्यार्थदर्शि (उपपदतत्) तेन।

Case-ending.—(1) कामम्—अव्ययं, क्रियाविशेषणम् (2) शास्त्रेण—अभेदे तृतीया। शास्त्र was his चक्षुः and there is no difference between the two. [V. notes on तया, Sl. 32, C. I.] (3) तस्य—शेषषष्ठी चक्षुष्मत्ता इत्यनेन सम्बन्धः।

Synonyms.—(1) कर्ण—'कर्णशब्दग्रहौ श्रोत्रं श्रुतिः स्त्री श्रवणं श्रवः'(अ.

Different meanings.—कर्ण—'कर्णः पृथासुते ज्येष्ठे सुवर्णालौ श्रुतावपि।' (मे.) (2) काम—'कामं वाढेऽनुमतिरितसौः। कामः स्मरेच्छाकाम्येषु।'(है.) (3) अर्थ—(V. Sl. 1, C. I.).

Derivation.—(1) शास्त्रेण—शास् + ष्ट्रन् (करणे, 3rd c. s.) 'सर्वधातुभ्यः ष्ट्रन्' उ. ४।१५८। (2) कर्ण—कृ + नः—'कृवृजृसि—' (उ. ३।१०) कीर्य्यते (शब्दग्रहणाय क्षिप्यते) यत्, or, कीर्य्यते शब्दः अस्मिन् or, किरति शरीरे सुखम् एतत् इति कर्णम् (भागुरिः) or —कर्ण (भेदन.) + अच् (3) विश्रान्ते —वि + श्रम् + क्त (कर्तरि, 1st c. d.) (4) लोचने—लोच् + ल्युट् (करणे, 1st c. d.) (5 चक्षुष्मता—चक्षुस् + मतुप् अस्त्यर्थे चक्षुष्मत्। चक्षुष्मतोभाव इति चक्षुष्मत् + तल् (6) सूक्ष्मकार्य्यार्थदर्शिना—सूक्ष्मकार्य्यार्थ + दृश् + णिनि (शीलार्थे, 3rd c. s.)

Conjugation.— (1) शास - V. Sl 30, C. I.) (2) दृश्—(V. Sl. 15, C. I.)

Force of तु is भेद—Although he had large eyes extending to the extremities of the ears, yet it was the Sástras which formed his eyes.

Parallel passage —'अनेकसंशयोच्छेदि परोक्षार्थस्य दर्शकम् । सर्वस्य लोचनं शास्त्रं यस्य नास्त्यन्ध एव सः ॥' (हितोपदेशे)

लब्धप्रशमनस्वस्थमथैनं समुपस्थिता ।
पार्थिवश्रीर्द्वितीयेव शरत् पङ्कजलक्षणा ॥ १४ ॥

Prose order—अथ पङ्कजलक्षणा शरत् द्वितीया पार्थिवश्रीः इव लब्धप्रशमनस्वस्थम् एनं समुपस्थिता । Mallinátha places 'पङ्कजलक्षणा द्वितीया पार्थिवश्रीः इव' after 'एनम्

Explanation by use of synonyms अथ (अनन्तरं) पङ्कजलक्षणा (पद्मचिह्ना) शरत् (तन्नामक ऋतुः) द्वितीया (अन्या) पार्थिवश्रीरिव (राजलक्ष्मीरिव) लब्धप्रशमनस्वस्थं (शत्रुशमनरक्षणप्रतीकाराभ्यां प्राप्तस्य राज्यस्य स्थिरीकरणेन समाहितचित्तम्) एनं (रघुं) समुपस्थिता (प्राप्ता)।

Substance.—रघुरचिरात् सामदानभेददण्डादिभिरुपायैः शत्रून् वशीकृत्य राज्ये शान्तिं स्थापयामास । एवं तस्मिन् स्वस्थचित्ते भूते विकसितकमलदलशोभिता शरद् अपरा राजलक्ष्मीरिव समाराधयितुमुपतस्थे। तस्मिन् दिग्विजयकाले समुपस्थिते दिग्विजयार्थं तन्मतिस्तु प्रवृत्ते ।

Change of voice.—...पङ्कजलक्षणया शरदा द्वितीयया पार्थिवश्रिया ...लब्धप्रशमनस्वस्थः एवः समुपस्थितः ।

Sanjivani.—लब्धेति । (अथ)—लब्धस्य राज्यस्य प्रशमनेन परिपन्थिनाम् अनुरञ्जनप्रतीकाराभ्यां स्थिरीकरणेन स्वस्थं समाहितचित्तं [लब्धप्रशमनस्वस्थम्] (एनं) रघुं (पङ्कजलक्षणा) पद्मचिह्ना—श्रियोऽपि विशेषणमेतत्—(शरत्, द्वितीया) (पार्थिवश्रीः) राजलक्ष्मीः (इव) (समुपस्थिता) प्राप्ता । "रक्षा पौरजनस्य देशनगरग्रामेषु गुप्तिस्तथा योधानामपि संग्रहोऽपि तुलया मानव्यवस्थानम् । साम्यं लिङ्गिषु दानवृत्तिकरणं त्यागः समानेऽर्चनं कार्य्याण्येव महीभुजां प्रशमनान्येतानि राज्ये नवे" ॥ १४ ॥

Sanjivani Explained.

"रक्षा पौरजनस्य...राज्ये नवे"—Protection of the citizens, fortifications in the country, towns, and villages, collection of troops, establishment of measurements by standards, equal treatment of all, assignment of living and gift unto the Brahmacharins, charity (to all), and reverence for equals, are the acts of pacification of a newly installed king.

'लब्धस्य राज्यस्य.. समाहितचित्तम्'—The king became comforted when he pacified and consolidated the empire by conciliating and checking his foes.

Bengali.—অনন্তর কমলশোভিতা শরৎ, অন্যা রাজলক্ষ্মীর ন্যায়, লব্ধ রাজ্যের শান্তিবিধানহেতু সমাহিতচিত্ত সেই রঘুর নিকট সমাগত হইল। ১৪।

English rendering.—Then unto him who had become tranquil in consequence of the pacification of his acquisition (*viz.*, his empire), Autumn, marked by lotuses, approached, like a second (Goddess of) regal prosperity. 14.

Grammatical notes, &c., &c.

Sama'sa.—(1) स्वस्मिन् तिष्ठतीति स्वस्थः (उपपदतत्) लब्धस्य (राजस्य) प्रशमनं लब्धप्रशमनम् (षष्ठीतत्) तेन स्वस्थः लब्धप्रशमनस्वस्थः (तृतीयातत्) सम्

(2) पृथिव्याः ईश्वरः पार्थिवः तस्य श्रीः पार्थिवश्रीः (षष्ठीतत्) (3) पङ्कात्—जातानि पङ्कजानि (पञ्चमीतत्) न तु पङ्कात् जायन्ते इति पङ्कजानि। The latter विग्रहवाक्य is prohibited by the rule "भूते" (३।२।८४ पा. ३८८५ सि.)। The element भूते ('in the past') applies to all the Sutras that follow it down to ३।२।१२३ पा. पङ्कज is derived from जन् with ड। The Sutra that enjoins ड is "अन्येष्वपि दृश्यते" (३।२।१०१ पा. पा. ३०११ सि. V. notes on परिखा in I, 30). भूते applies to this Sutra. The Sutra, therefore, means that ड is added in कर्तृवाच्य to जन् to signify the past tense। पङ्कजानि लक्षणानि यस्याः सा पङ्कजलक्षणा (बहु)

Case-ending—(1) भरत्—उद्देश्योपमेय कर्मपदम्, 'पार्थिवश्रीः' इति विधेयोपमान कर्तृपदस्य (2) एनम्—सकर्मकोपपूर्वकस्थाधात्वर्थार्थे कर्म i. e. 'एनम्' is the object of उपस्थिता। The sense of एनमुपस्थिता is अस्य सन्निहिता बभूव। We know that उप + स्था which is अकर्मक means also 'सन्निधान'। See "अकर्मकाच्च" (१।३।२६ पा. २६८३ सि. V. I, 45). How can then उप + स्था be सकर्मक here though it means सन्निधान? The answer is उप + स्था, meaning सन्निधान, is not necessarily अकर्मक। It is plain from the वृत्ति of "अकर्मकाच्च" which runs as "उपात्तिष्ठतेरकर्मकादात्मनेपदं स्यात्"। The statement that if उप + स्था be अकर्मक, it will admit आत्मनेपद, indicates that if उप + स्था admits परस्मैपद, it is not अकर्मक but is सकर्मक। Vopadeva makes it clear. 'भद्रात् किम्—राजानमुपतिष्ठति" (सपाद ४५० सू). Thus, according to him, उप + स्था meaning सन्निधान, is सकर्मक as well.

Different meanings.—(1) शरद्—"स्यादृतौ वत्सरे शरत्" (अ.) (2) श्री—(V. III, 36) (3) पार्थिव—'पार्थिवो नृपतौ भूमिविकारे पार्थिवीत्यपि।' (मे.)

Derivation.—(1) शरत्—शृ + अदिः—'शृदृभसोऽदिः' (उ. १।१३०।) The word शरद् is feminine. It is declined like आपद् (2) प्रशमनम्—प्र + शम् + ल्युट् (भावे) (3) स्वस्थम्—स्व + स्था + कः (2nd c. s.) "सुपिस्थः" (३।२।४। पा. २९१६ सि.) [The root स्था admits क in कर्तृवाच्य when it is preceded by a सुबन्त word.] (4) सम् + उप + स्था + क्त (कर्त्तरि) + टाप् (5) पार्थिवः—पृथिवी + अञ्—"तस्येश्वरः" (५।१।४२। पा. १७०८ सि.) प्रत्ययः। See II. 20, Sanjivani. (5) श्रीः—श्रि + क्विप्—श्रयति हरिमिति—'क्विब्वचिप्रच्छि—' (V. notes on वाक्, Sl. 1, C. I.) (6) पङ्कजम्—पङ्क + जन् + डः।

Conjugation.—(1) स्था—(V. Sl. 45, C. I).

Rhetoric.—The figure of speech is उपमा। शरत् is compared to पार्थिवश्री। पङ्कजलक्षणा, which admits of a double sense and thus becomes a common epithet to both, constitutes the common point of resemblance. शरत् is पङ्कजलक्षणा because lotuses bloom in autumn alone and form its characteristic mark. राजश्री is so because लक्ष्मी is supposed to live in a forest of lotuses and bear lotus in her hand.

As श्री (the goddess of prosperity), with a lotus in her hand, approached him (see IV,—6), so शरत् marked by lotuses came upon Raghu. She bears the name of पद्मा।

एनम्—This secondary form is used without the previous use of इदम् or एतद्—(V. notes on एनम्, Sl. 43, C. III).

निर्वृष्टलघुभिर्मेघैर्मुक्तवर्त्मा सुदुःसहः।
प्रतापस्तस्य भानोश्च युगपद्व्यानशे दिशः॥ १५॥

मूलस्य पाठान्तरम्।

Châritravardhana reads :—

निर्वृष्टलघुभिर्मेघैः सवितुस्तस्य चोभयोः।
वर्धिष्णवो दिशां भागान् प्रतापा यत रेचिताः॥

Prose order.—निर्वृष्टलघुभिः मेघैः मुक्तवर्त्मा (अतएव) सुदुःसहः तस्य भानोः च प्रतापः युगपत् दिशः व्यानशे।

Explanation by use of synonyms.—निर्धौतलघुभिः (वर्षणवर्षेरतएव विगतभारैः) मेघैः (वारिदैः) मुक्तवर्त्मा (परित्यक्तमार्गः) अतएव,सुदुःसहः (अति दुःखेनसोढुंशक्यः) तस्य (रघोः) भानोः च (सूर्य्यस्य च) प्रतापः (पौरुषं—रघुपक्षे, आतपः—भानुपक्षे) युगपत् (समकालं) दिशः (ककुभः) व्यानशे (व्याप)।

Substance.—वर्षासु सूर्य्यः मेघाच्छन्नाग्निरिवाभवत्। उपस्थितायां शरदि नभो मेघमुक्तं बभूव। अधुना मेघावरणाभावात् सूर्यश्च तेजोभिरतीव दुःसहं सन् सर्वाः दिशश्छादयामास। रघोरपि दिग्विजययात्रामार्गः वर्षापगमतया सुखसञ्चारी जातः, अतएव तदा तस्यापि दुःसहः प्रतापः सर्वं दिङ्मण्डलं व्याप्तवान्। शरदि भानुर्यथा मेघादिविनिर्मुक्ते आकाशमार्गे सुतीव्रं तेजो विस्तारयति, रघुरपि तथा वर्षादिविगमात् सुखसञ्चारं मार्गमासाद्य दिग्विजयाय प्रतस्थे। तेन च अतिदुःसहः प्रतापः तस्य प्रकटितोऽभूत्।

Change of voice—......मुक्तवर्त्मना सुदुःसहेन......प्रतापेन... व्यानशिरे।

Sanjivani—निर्धौतेति। निःशेषेण धौताः निर्धौताः—कर्त्तरि क्तः—अतएव-लघवः तैः [निर्धौतलघुभिः] (मेघैः) (मुक्तवर्त्मा) त्यक्तमार्गः—अतएव—(सुदुःसहः) (तस्य) रघोः (भानोश्च) (प्रतापः) पौरुषम्; आतपश्च;—"प्रतापौ पौरुषातपौ" इति यादवः—(युगपत् दिशः) (व्यानशे) व्याप ॥ १५ ॥

Bengali.—নিঃশেষবর্ষণহেতু (জলশূন্য—অতএব) লঘু মেঘনিকর কর্ত্তৃক ত্যক্তমার্গ (হওয়াতে) সেই রঘুর এবং ভাস্কর সুদুঃসহ প্রতাপ এককালেই দিঙ্মণ্ডল ব্যাপ্ত করিল। ১৫।

English rendering.—Exceedingly unbearable, (and) its course no longer obstructed by clouds (then) emptied out and light, his energy, as also that of the sun, simultaneously overspread all the points of the compass. 15.

Grammatical notes, &c., &c.

Sama'sa.—(1) निःशेषं धौताः निर्धौताः (प्रादिः) आदौ निर्धौताः पश्चात् लघवः निर्धौतलघवः (स्नातानुलिप्तवत् समासः V. सुधीस्थिताम्, Sl. 24, C. II.) तैः

(2) मुक्तं वर्त्म यस्य स मुक्तवर्त्मा (बहु) (3) दुःखेन सह्यते असौ इति दुःसहः (प्रादि:) सुष्ठु दुःसहः सुदुःसहः (सुपसुपा) (4) प्रकृष्टः तापः प्रतापः (प्रादि:)।

Case-ending.—(1) मेघैः—अनुक्ते कर्त्तरि तृतीया 'मुक्तः' इत्यस्य (2) तस्य and भानोः—शेषे षष्ठी प्रताप इत्यनेन सम्बन्धः (3) युगपत्—अव्ययं, क्रियाविशेषणम् (4) दिशः—कर्म of व्यानशे।

Synonyms.—(1) भानु—(V. सूर्य, Sl. 13, C. III.) (2) मेघ—'अभ्रं मेघो वारिवाहः स्तनयित्नुर्बलाहकः। धाराधरो जलधरस्तडित्वान् वारिदोऽम्बुभृत्। घनजीमूतमुदिरजलमुग्धूमयोनयः॥' (अ.)

Different meanings.—(1) मेघ—'मेघो मुस्ताजलदयोः पुमान्।' (मे.) (2) भानु—'भानुरंशौ रवौ दिने' (हे.)

Derivation.—(1) निर्वृष्टाः—निर् + वृष् + क्तः (कर्त्तरि, 1st C. p.) (2) भानोः—भा + नुः (6th c. s.)—'दाभाभ्यांनुः' (उ. ३।३२) (3) मेघैः—मिह् + अच् (3rd s. p.) (4) सुदुःसहः—सु + दुः + सह् + खल् (कर्मणि) (5) प्रतापः—प्र + तप् + घञ् (भावे) (6) व्यानशे—वि + अश् + लिट् – ए।

Conjugation.—(1) अश् (to spread out)—अश्नुते, अश्नुवाते (लट्) अश्नुताम् (लोट्) आश्नुत आश्नुवाताम् (लङ्) अश्नुवीत (वि. लिङ्) आनशे, आनशिषे, आनक्षे, आनशिध्वे—आनड्ढ्वे (लिट्) आशिष्ट, आष्ट। आशिषाताम्, आक्षाताम्। आशिषत, आक्षत (लुङ्) आशि (कर्मणि-लुङ्) अशिता, अष्टा (लुट्) अशिष्यते, अक्ष्यते (लृट्) अशिषीष्ट, अक्षीष्ट (आ. लिङ्) अशिशिषते (सन्-लट्) अशाश्यते (यङ्-लट्) आशयति (णिट्) आशिशत् (णिच्-लुङ्) अष्टः (क्तः)।

Rhetoric.—The figure of speech is तुल्ययोगिता। It is defined thus :—

नियतानां सकृद्धर्मः सा पुनस्तुल्ययोगिता।

When several relevant facts or several irrelevant ones are strung together, the figure is तुल्ययोगिता। Here both the vigour

of the sun and the prowess of Raghu are relevant facts. Autumn came, the clouds dispersed and the sun gained in strength. Raghu grew powerful because he got an opportunity of setting out in his campaign of conquest, autumn being the season when such campaigns were begun, the rains no longer obstructing the march of troops. As these two relevant facts are represented together, the figure of speech is तुल्ययोगिता । Moreover, a similarity between Raghu and the sun is suggested by pun upon प्रताप and its epithets. In the case of Raghu, प्रताप means 'prowess' ; in that of the sun, it means 'heat'. निर्वृष्ट लघुभिर्मेघैर्मुक्तवर्त्मा applies to Raghu's prowess because in the autumn, the paths were dried up and Raghu got an opportunity of showing his strength unto other kings. The same expression suits also the autumnal sun. In autumn the clouds are scattered away and the sun is no longer hid. He shines brilliantly.

वार्षिकं संजहारेन्द्रो धनुर्जैत्रं रघुर्दधौ ।
प्रजार्थसाधने तौ हि पर्यायोद्यतकार्मुकौ ॥ १६ ॥

Prose order.—इन्द्रः वार्षिकं धनुः संजहार, रघुः जैत्रं (धनुः) दधौ,—हि तौ प्रजार्थसाधने पर्यायोद्यतकार्मुकौ (आस्ताम्) ।

Explanation by use of synonyms.—इन्द्रः (पुरन्दरः) वार्षिकं (प्रावृषिजं) धनुः (शरासनं) संजहार (संहृतवान्) रघुः (दिलीपनन्दनः) जैत्रं (जयशीलं धनुः) दधौ (जग्राह) । हि (यस्मात्) तौ (इन्द्ररघू) प्रजार्थसाधने (प्रकृतिप्रयोजनसम्पादने) पर्यायोद्यतकार्मुकौ (क्रमधृतशरासनौ) आस्ताम् ।

Substance.—उपस्थितायां शरदि इन्द्रः वर्षाभवं स्वकीयं शरासनं संहृतवान् । रघुश्च दिग्विजयसाधनं स्वधनुर्दधौ । उभावपि प्रजानां मङ्गलसाधने पर्यायेणैव स्वस्व धनुर्धारयामासतुः । इन्द्रः वर्षासु जलवर्षणेन शस्यसम्पदं वर्धयित्वा प्रजानां मङ्गलं साधयामास, वर्षापगमे शरदि समागतायां रघुरपि दिग्विजयव्यापारेण आहत-

मिनः सन् राज्यस्य नक्षत्रसाधनाय यत्नैः सुलीकं मीवयामास । एवं तौ प्रजाप्रयोजनसाधने पर्य्यायधृतकार्मुकौ आस्ताम् ।

Change of voice.—...इन्द्रेण...संजज्ञे, रघुणा...दधे...ताभ्यां... पर्य्यायोद्यतकार्मुकाभ्याम् (अभूयत) ।

Sanjivani—वार्षिकमिति । (इन्द्रः)—वर्षासु भवं (वार्षिकं) वर्षानिमित्तम् इत्यर्थः—"वर्षाभ्यष्ठक्" (४।३।१८। पा. १३८९ सि.) इति ठक्प्रत्ययः—(धनुः संजहार रघुः) (जैत्रं)जयशीलम्—जैत्रशब्दात् तृन्नन्तात्—"प्रज्ञादिभ्यश्च"(५।४।३८।पा. २१०६ सि.) इति स्वार्थे अण्प्रत्ययः—धनुः (दधौ) । (हि) यस्मात् (तौ) इन्द्ररघू प्रजानाम् अर्थस्य, प्रयोजनस्य, वृष्टिविजयलक्षणस्य ; साधने,—विषये [प्रजार्थसाधने] पर्य्यायेण उद्यते कार्मुके याभ्यां तौ (पर्य्यायोद्यतकार्मुकौ) । 'पर्य्यायोद्यमविक्रमौ' इति पाठान्तरे पर्य्यायेण उद्यमः विक्रमश्च ययोः तौ पर्य्यायोद्यमविक्रमौ । अनयोः पर्य्यायकरणात् अक्लेशः इति भावः ॥ १६ ॥

Extract form different Commentaries.—Vallava reads between the present and the next verse the following :—

अधिज्यमायुधं कर्त्तुं समयोऽयं रघोरिति ।
स्वं धनुः शङ्कितेनेव संजह्रे शतमन्युना ॥

It is undoubtedly a repetition of the verse under comment.

Sanjivani Explained.

"वर्षाभ्यष्ठक्"—ठक् is the nominal affix which is added to the words वर्षा, &c., in the sense of 'to be born' in वर्षा । वार्षिक means 'Born in वर्षा' ।

जैत्रशब्दात् * * अण्प्रत्यय—जैत्र is derived from the तृन्नन्त word जैतृ to which अण् is affixed in स्वार्थ by the Sutra "प्रज्ञादिभ्यश्च" ।

The Sutra means that 'अण् is added in स्वार्थ to such word as प्रज्ञ ।' प्रज्ञ-एव प्राज्ञः ।

Bengali.—ইন্দ্র বর্ষানিবৃত্ত ধনুঃ সংহৃত করিলেন, এবং রঘুও জয়শীল (ধনুঃ) ধারণ করিলেন—যেহেতু তাঁহারা (উভয়েই) প্রজাপ্রয়োজনসাধনে পর্য্যায়ক্রমে ধনুর্ধারণ করিতেন। ১৬।

English rendering.—Indra whithdrew that bow of his which is seen in the rainy season; Raghu took up his victorious one. For they wielded, by turns, their bows for acheiving the the objects of all creatures (of the Earth).—16.

Grammatical notes, &c., &c.

Sama'sa.—(१) प्रकर्षेण जायन्ते इति प्रजाः (उपपदतत्) तासाम् अर्थः (प्रयोजनं) प्रजार्थः (षष्ठीतत्) तस्य साधनं प्रजार्थसाधनम् (षष्ठीतत्) तस्मिन् । (२) पर्य्यायेण उद्यते पर्य्यायोद्यते (तृतीयातत्) पर्य्यायोद्यते कार्मुके याभ्यां तौ पर्य्यायोद्यतकार्मुकौ (बहु) (३) स च सा च तौ (एकशेषद्वन्द्वः) ।

Case-ending.—(१) प्रजार्थसाधने—विषयाधिकरणे सप्तमी ।

Synonyms.—(१) इन्द्र—(V. मघवन्, Sl. 26, C. I.) (२) कार्मुक—(III, 59.)

Different meanings.—(१) कार्मुक—'अथ कार्मुकः वंशे कार्मुकमिष्वासे कर्मठे । (मे.)

Derivation.—(१) वार्षिकम्—वर्षा + ठक् (भावार्थे) (२) इन्द्रः—इन्द् + रन्—'ऋजेन्द्र—' (उ. २।२८) (३) संजहार—सम् + हृ + लिट्—णल् (४) जैत्रम्—जि + तृन् (शीलार्थे) = जेतृ । जेतृ + अण्—(प्रज्ञादित्वात् स्वार्थे)—(५) दधौ—धा + लिट्—णल् (६) पर्य्यायः—परि + इ (ण्) + घञ् (भावे) (७) कार्मुकम्—कर्मन् + उकञ्—कर्मणे प्रभवतीति ।

Conjugation.—(१) हृ—(V. Sl. 39, C. III.) (२) धा—(V. Sl. 24, C. I.)

Force of हि is हेतु ।

Remark.—Dilipa is said to propitiate Indra who, in return, gave him rains for the welfare of his subjects. There was an exchange of presents between the two. With Raghu the case was slightly different. Indra showered first and then the king celebrated sacrifices in his honour.

पुण्डरीकातपत्रस्तं विकसत्काशचामरः।
ऋतुर्विडम्बयामास न पुनः प्राप तच्छ्रियम्॥ १७॥

मूलस्य पाठान्तरम्।

विकसत्—विलसत् (पा.)

Prose order.—पुण्डरीकातपत्रः विकसत्काशचामरः ऋतुः तं विडम्बयामास, तच्छ्रियं पुनः न प्राप।

Explanation by use of synonyms.—पुण्डरीकातपत्रः (सिताम्भोजच्छत्रः) विकसत्काशचामरः (प्रफुल्लत्काशपुष्पव्यजनः) ऋतुः (शरत्कालः) तं (रघुं) विडम्बयास (अनुचकार), तच्छ्रियं (तस्य रघोः शोभां) पुनः (किन्तु) न प्राप (अनुकर्त्तुं न शशाक)।

Substance—शरदि शुभ्रकमलानि प्रस्फुटितानि यानि तस्य ऋतोश्छत्राणीव शुशुभिरे, काशपुष्पाणि च विकसितानि, यानि तस्य चामराणीव ददृशिरे। तादृशच्छत्रचामरशोभितः शरदृतुः छत्रचामरशोभितं महाराजं रघुं बाह्यदृश्येन अनुचकार। किन्तु तस्य ऊर्जस्वलां राजशोभामनुकर्त्तुं नैव शशाक। तस्य प्रतापानुकरणं दुराशैव।

Change of voice.—पुण्डरीकातपत्रेण विकसत्काशचामरेण ऋतुना सः विडम्बयामासे, तच्छ्रीः...प्रापि।

Sanjivani.—पुण्डरीकेति। पुण्डरीकं, सिताम्भोजम्; एव आतपत्रं यस्य सः तथोक्तः [पुण्डरीकातपत्रः] विकसन्ति काशानि, काशाख्यतृणकुसुमानि एव चामराणि तस्य सः तथोक्तः [विकसत्काशचामरः] (ऋतुः) शरदृतुः—पुण्डरीकनिभातपत्र काशनिभचामरं (तं) रघुं (विडम्बयामास) अनुचकार। तस्य रघोः श्रियं [तच्छ्रियं] (पुनः) शोभां तु (न प्राप)। "शोभासम्पत्तिपद्मासु लक्ष्मीः श्रीरिव दृश्यते" इति शाश्वतः॥ १७॥

Sanjivani Explained.

शोभा सम्पत्ति पद्मासु * * * दृश्यते—लक्ष्मी like श्री means beauty, wealth, as well as the goddess Padmá.

पुण्डरीकातपत्रम्—In case of the autumn, it means that the season had white lotuses for its (regal) umbrella. In that of Raghu, it means 'possessed of an umbrella as white and beautiful as the white lotus'.

विकसत्काशचामरः—In the case of the season, this expression means (having) kása flowers for its yak-tail'. In that of Raghu, it means 'having yak-tails resembling the blooming Kás'a flowers.

Bengali.—শুভ্রকমলচ্ছত্র এবং বিকসিতকাশপুষ্পচামর শরদৃতু তাঁহার অনুকরণ করিল, কিন্তু তাঁহার শোভা অনুকরণ করিতে পারিল না। ১৭।

English rendering. With white lotuses forming his umbrella, and the blooming blossoms of *Saccharum spotaneum*, forming his yalk tail, the Season (Autumn) mimicked him but could not attain his beauty. 17.

Grammatical notes, &c., &c

Sama'sa—(1) आतपात् त्रायते इति आतपत्रम् (उपपदतत्) । पुण्डरीकमेव आतपत्रं यस्य स पुण्डरीकातपत्रः (बहु) ऋतुपक्षे । पुण्डरीकतुल्यं आतपत्रं यस्य इति रघुपक्षे । (2) विकसन्ति काशानि विकसत्काशानि (कर्मधा) तान्येव चामराणि यस्य स विकसत्काशचामरः (बहु) ऋतुपक्षे तत्तुल्यानि चामराणि यस्य स इति रघुपक्षे (3) तस्य श्रीः तच्छ्रीः (षष्ठीतत्) ताम्।

Case-ending.—(1) पुण्डरीकातपत्रः and विकसत्काशचामरः—adjectives of ऋतु।

Synonyms.—(1) पुण्डरीक—'पुण्डरीकं सिताम्भोजम्' (अ) (2) चामर—(V. Sl. 16, C. III.)

Different meanings.—(1) पुण्डरीक—'पुण्डरीकं सिताम्भोजे सितच्छत्रे च भेषजे। पुंसि व्याघ्रेऽग्निदिङ्नागे कोषकारान्तरेऽपि च॥' (मे.) (2) चामर—(V Sl. 16, C. III.)

Derivation.—(1) पुण्डरीकम्—पुण्ड् + अरीकम्—'कर्करीकादयश्च'(उ. ४।२०।) (2) आतपत्रम्—(II, 13) (3) चामरम्—(V. Sl. 16, C. III.) (4) ऋतुः—ऋ + तु—'अर्त्तेश्च—' (उ. १।७२।) (5) विडम्बयामास—वि + डम्ब् लिट्—णल् (6) प्राप—प्र + आप् + लिट्—णल् ।

Conjugation.—(1) डम्ब्—(to imitate, ape, or mimick)—डम्बयति (लट्) डम्बयतु (लोट्) अडम्बयत् (लङ्) डम्बयेत् (वि. लिङ्) डम्बयामास &c. (लिट्) अडडम्बत् (लुङ्) डम्बयिता (लुट्) डम्बयिष्यति (लृट्) अडम्बि (कर्मणि-लुङ्) डम्बितः (क्तः) (2) आप्—(V. Sl. 48, C. I.)

Force of पुनः is भेदः । 'पुनरप्रथमे मतम् । अधिकारे च भेदे च तथा पक्षान्तरेऽपि च ।' (मे.)

पुनः means any time but the first, the introduction of a new topic or of an alternative.

प्रसादसुमुखे तस्मिंश्चन्द्रे च विशदप्रभे ।
तदा चक्षुष्मतां प्रीतिरासीत् समरसा द्वयोः ॥ १८ ॥

Prose order.—प्रसादसुमुखे तस्मिन् विशदप्रभे चन्द्रे च द्वयोः तदा चक्षुष्मतां प्रीतिः आसीत् ।

Explanation by use of synonyms.—प्रसादसुमुखे (सन्तोषहेतुना सहर्षसुखमण्डले) तस्मिन् (रघौ) विशदप्रभे (कमनीयकान्तौ) चन्द्रे च (सुधाकरे च) द्वयोः (उभयोर्विषये) तदा (तस्मिन् काले) चक्षुष्मतां (नेत्रशालिनां) प्रीतिः (अनुरागः) समरसा (तुल्यास्वादा) आसीत् (अभूत्) ।

Substance.—शरदि मेघापगमात् आकाशे चन्द्रमण्डलं निर्मलं जातं ; राज्यस्य प्रशमनात् हर्षहेतुना रघोरपि मुखमण्डलं प्रसन्नमासीत् । तदा रघुचन्द्रौ विलोक्य दर्शकानां तुल्या प्रीतिरजायत । चन्द्रमण्डलवत् मनोरमं रघुवदनमिति ध्वन्यते ।

Change of voice.—...प्रीत्या समरसया अभूयत ।

Sanjivani.—प्रसादेति । प्रसादेन सुमुखे [प्रसादसुमुखे] (तस्मिन्) रघौ (विशदप्रभे) निर्मलकान्तौ (चन्द्रे च द्वयोः) विषये (तदा चक्षुष्मतां) (प्रीतिः) अनुराग: (समरसा) समस्वादा, तुल्यभोग्या इति यावत्—"रसो गन्धरसे स्वादे" इति विश्वः—(आसीत्)

N. B. In all the Calcutta editions, we find रसोगन्धे रसे &c.' It is a great blunder. Bhánuji reads in रामाश्रमी 'रसो गन्धरसे स्वादे।' गन्धरस means myrrh.

Bengali.—তৎকালে প্রসন্নতাহেতু হৃষ্টমুখ রঘু এবং নির্ম্মলকান্তি চন্দ্র এই উভয়েই প্রশস্তচক্ষুশালী জনগণের তুল্য প্রীতি অনুভূত হইতে লাগিল । ১৮ ।

English rendering.—With respect to the two, *viz*., him of face beautiful for its benignity, and the moon of pure effulgence, the gratification of those who had eyes was of equal relish. 18.

Grammatical notes, &c., &c.

Sama'sa.—(1) सु (शोभनं) मुखं यस्य स सुमुखः (बहु) प्रसादेन सुमुखः प्रसादसुमुखः (तृतीयातत्) तस्मिन् (2) विशदा प्रभा यस्य स विशदप्रभः (बहु) तस्मिन् (3) समः रसः (स्वादः) यस्याः सा समरसा (बहु) ।

Case-ending.—(1) द्वयोः—आधाराधिकरणे सप्तमी । It refers to both तस्मिन् (रघौ) and चन्द्रे । (2) चक्षुष्मताम्—शेषे षष्ठी or कृद्योगेऽनुक्ते कर्त्तरि षष्ठी । "प्रीतिः" इत्यनेन सम्बन्धः ।

Synonyms.—(1) चन्द्र—(V. Sl. 12, C. IV.)

Different meanings.—(1) रस—(V. Sl. 18, C. I.) (2) मुख—'मुखमुपायि प्रारम्भे श्रेष्ठे निःसरणास्ययोः' (वि.)

Derivation.—(1) सुखम्—खन् + अच्—'खनतेः खने मुट् चोदात्तः' (उ. ५।२०) 'ब्रह्मणा यतः खातं तस्मादाहुर्मुखं बुधाः' इति निरुक्तम् । Brahmá himself dug the hole in the body, so it is called मुख by the

learned. (2) प्रसादः—प्र + सद + घञ् (भावे) (3) चन्द्रे—(V. Sl. 12, C. IV.) (4) चक्षुष्मताम्—चक्षुस् + मतुप् (प्राशस्त्ये, 6th c. p.)—(V. notes on प्रज्ञिमति, Sl. 12, C. I.) (5) प्रीतिः—प्री + क्तिन् (भावे) (6) आसीत्—अस् + लङ्-तिप् ।

Conjugation.—(1) अस्—(V. Sl. 16, C. III.)

Force of च is समुच्चय ।

तदा means, in the case of चन्द्र, शरत्, and in the case of रघु the time when the pacification of his kingdom was effected.

हंसश्रेणीषु तारासु कुमुद्वत्सु च वारिषु ।
विभूतयस्तदीयानां पर्य्यस्ता यशसामिव ॥ १९ ॥

Prose order.—हंसश्रेणीषु तारासु कुमुद्वत्सु वारिषु च तदीयानां यशसां विभूतयः पर्य्यस्ताः इव ।

Explanation by use of synonyms.—हंसश्रेणीषु (मरालपङ्क्तिषु) तारासु (नक्षत्रेषु) कुमुद्वसु (कुमुदबहुलेषु) वारिषु च (जलेषु च) तदीयानां (रघुसम्बन्धिनां) यशसां (कीर्त्तीनां) विभूतयः (सम्पदः) पर्य्यस्ता इव (प्रसारिता इव) ।

Substance.—शरदि समुपस्थितायां भुवि शुभ्रा हंसश्रेणयः, गगने समुज्ज्वला नक्षत्रनिकरा, जलेषु शुभ्राणि कुमुदपुष्पाणि च दद्दशिरे । अत्र कविकल्प्रेक्षते यत् रघोः शुभ्रयशांसि ततस्ततः प्रसृतानि सन्ति तानि शुभ्राण्येव विदधुः । तदा दिग्विजयोद्यतस्य रघोः शुभ्रयशांसि ऊर्द्धमधः स्थितानि निखिलवस्तूनि व्यानशिरे इव ।

Change of voice.—...विभूतिभिः पर्य्यस्तम्...(भावे) or विभूतीः पर्य्यस्तवान् (रघुरिति शेषः—कर्तृवाच्ये) ।

Sanjivani.—हंसेति । हंसानां श्रेणीषु, पङ्क्तिषु [हंसश्रेणीषु] (तारासु) नक्षत्रेषु—कुमुदानि सन्ति येषु इति कुमुद्वन्ति—"कुमुद्वान् कुमुदप्राये" इत्यमरः (Cole. p. 75)—"कुमुदनड्वेतसेभ्यो ड्मतुप्" (४।२।८८। पा. १३०६ सि.) तेषु कुमुदप्रायेषु इत्यर्थः—[कुमुद्वत्सु] (वारिषु च) (तदीयानां) रघुसम्बन्धिनां (यशसां)

(विभूतय:) सम्पद: (पर्य्यस्ता: इव) प्रसारिता: किम्?—इत्युत्प्रेक्षा। अन्यथा कथमेषां धवलिमा इति भाव: ॥ १९ ॥

सञ्जीवन्या: पाठान्तरम्।

All editions read कुमुद्वान् कुमुदप्राय:। We have given the correct reading of Amarakosha.

Sanjivani Explained.

कुमुद्वान् कुमुदप्राये—कुमुद्वत् means 'abounding in water-lilies'.

नड्वेतसेभ्यो ड्मतुप—ड्मतुप् is added to कुमुद, नड़, and वेतस। E. g., कुमुद्वत्, नड्वत्, वेतस्वत्।

अन्यथा कथमेषां धवलिमा इति भाव:—The purport is that if the splendour of Raghu's fame had not suffused them, whence could their whiteness have come?

Bengali.—মরালশ্রেণী, নক্ষত্রপুঞ্জ এবং কুমুদাকীর্ণসলিলরাশিতে রঘুর যশঃসম্পৎ যেন বিকীর্ণ হইয়া পড়িল।

English rendering.—Among rows of swans, among the stars, and among waters adorned with lilies, the splendour of his fame was, as it were, diffused.—19.

Grammatical notes, &c., &c.

Sama'sa.—(1) हंसानां श्रेण्य: हंसश्रेण्य: (षष्ठीतत्) तासु। (2) विशिष्टा: भूतय: विभूतय: (प्रादि:)।

Case-ending.—(1) हंसश्रेणीषु, तारासु and वारिषु—आधाराधिकरणे सप्तमी (2) यशसाम्—शेषे षष्ठी। (3) विभूतय:—कर्त्तृपदम् when क्त is added to परि+अस् in कर्त्तृवाच्य। If पर्य्यस्त be in कर्मवाच्य it is उक्ते कर्मणि प्रथमा। 'रघुणा' is the अनुक्तकर्त्ता understood.

Synonyms.—(1) यशस्—"यश: कीर्त्ति: समज्ञा च" (अ.) (2) हंस—"हंसास्तु श्वेतगरुतश्चक्राङ्गा मानसौकस:।" (अ.) (3) तारा—"नक्षत्रमृक्षं भं तारा तारकाप्युडु वा स्त्रियाम्।" (अ.)

Different meanings.—(1) विभूति—'विभूतिर्भूतिरैश्वर्यं शक्तौ दृष्टिप्रकारयोः स्त्रियाम् । मांसपाकविशेषोत्पातयोरपि ॥' (मे.)

Derivation.—(1) प्रसमाम्—प्रस्+असुन् (6th c. p.) 'प्रसर्द्दवने युट् च' (उ. ४।१८९) (2) पर्यस्ताः—परि+अस्+क्तः (कर्मणि)+टाप् (1st c. p.) if it means प्रसारिता। 'रघुणा', the अनुक्तकर्त्ता, is in that case understood. If it means 'to fall', क्त is used in कर्तृवाच्य। So we have changed the voice in both ways. (3) नदीनाम्—नद्+अच् (6th c. p.) (4) हंसः—हन्+सः—'हनवादिभ्यः सः' (उ. ३।६२) or हन्+अच्। सक् (स्) comes to it by निपातन। 'भवेद्वर्णागमाद्धंसः' V. notes on दिवाकसाम्, Sl. 19, C. III.) (5) कुमुद्वत्सु—कुमुद्+ड्मतुप् (7th c.p.) 'कुमुदनड्वेतसेभ्यो ड्मतुप्' (V. Sanjivani Explained). By the addition of an affix, whose ङ् is इत् elides the टि (the last vowel and the consonant after it, if any) drops. So the last vowel of कुमुद elides in alliance with the affix ड्मतुप् which is ङित्। Now the form is कुमुद्+मत्। The म of the affix is changed into व by the rule 'झयः' (V. notes on गुडिमति, Sl. 12, C. I.) So we get the form कुमुद्वत्। (6) विभूतयः—वि+भू+क्तिन् (भावे, 1st c. p.)

Conjugation.—(1) अस्—(to throw) [V. Sl. 16, C. III.]

Rhetoric.—The figure of speech is उत्प्रेक्षा। The Hindu poets represent fame as white. The swans, the waters abounding with lilies, and the stars are naturally white. Their whiteness increases in autumn. The poet fancies that the improvement in their colour is due to the splendour of Raghu's white fame having suffused them. So white was his fame.

इक्षुच्छायनिषादिन्यस्तस्य गोप्तुर्गुणोदयम् ।
आकुमारकथोद्घातं शालिगोप्यो जगुर्यशः ॥ २० ॥

Prose order.—इक्षुच्छायनिषादिन्यः शालिगोप्यः गोप्तुः तस्य गुणोदयम् आकुमारकथोद्घातं यशो जगुः ।

Explanation by use of synonyms.—इक्षुच्छायनिषादिन्यः (इक्षूणामनातपे उपवेशनकारिण्यः) शालिगोप्यः (शस्यपालिकाः स्त्रियः) गोप्तुः (रक्षकस्य) तस्य (रघोः) गुणोदयं (गुणोत्पन्नम्) आकुमारकथोद्घातम् (बाल्येऽपि कथारम्भं) यशः (कीर्त्तिं) जगुः (गीतवत्यः) ।

Substance.—रघोर्यशसा निखिलं राष्ट्रं परिततम् । शस्यपालिका बालिका अपि तद्यशो विजज्ञुः । तेषां रमणीनामपि तत् श्रुतिपथं गतम् । तास्तु शरदि धान्यरक्षणनियुक्ताः श्रमकातराः इक्षूणां विस्तृतच्छायां भुवि नोपविष्टाः रघोः शैशवादारभ्य सर्वाण्यवदानानि जगुः । आबालं सर्वाः प्रजास्तद्यशोऽमृतमास्वाद्य प्रशशंसुः ।

Change of voice.—इक्षुच्छायनिषादिनीभिः शालिगोपीभिः...जगे ।

Sanjivani.—इक्ष्विति । इक्षूणां छाया इक्षुच्छायम् "छाया बाहुल्ये" (२।४।२२। पा. ८२५ सि.) इति नपुंसकत्वम्—तत्र निषण्णाः (इक्षुच्छायनिषादिन्यः)—स्त्रीलिङ्गपाठे इक्षोः छाया इति विग्रहः—अन्यथा बहुत्वे नपुंसकत्वप्रसङ्गात्—शालीन् गोपायन्ति रक्षन्तीति (शालिगोप्यः) शस्यपालिकाः स्त्रियः—"कर्मण्यण्" (३।२।१। पा. २९१३ सि.) "टिड्ढाणञ्—" (४।१।१५। पा. ४७० सि.) इत्यादिना ङीप्—गोप्तुः) रक्षकस्य (तस्य रघोः,—गुणेभ्यः उदयः यस्य तत् (गुणोदयं) गुणोत्पन्नम्, आकुमारं, कुमारात् आरभ्य ; कथोद्घातः, कथारम्भः ; यस्य तत् [आकुमारकथोद्घातं] कुमारैरपि श्रूयमाणमित्यर्थः (यशः) (जगुः) गायन्ति स्म । अथवा कुमारस्य सतः रघोः याः कथाः इन्द्रविजयादयः, ततः आरभ्य आकुमारकथम् । तत्रापि अभिविधौ अव्ययीभावः । आकुमारकथम् उद्घातः यस्मिन् कर्मणि । गानक्रियाविशेषणमेतत् । "स्यादभ्यादानमुद्घात आरम्भः" इत्यमरः (Cole. p. 295). आकुमारकथोद्भूतमितिपाठे कुमारस्य सतः तस्य कथाभिः चरितैः उद्भूतं यद् यशः तद् यशः आरभ्य यशो जगुः इति व्याख्येयम् ॥ २० ॥

Sanjivani Explained.

"छायाबाहुल्ये" इति नपुंसकत्वम्—The resultant इक्षुच्छाय is neuter because of the Sutra "छाया बाहुल्ये" । For its explanation see notes on सुनिषण्णतरुच्छायाम् in III, 70.

क्वचित्पाठे इक्षोःछाया * * * नपुंसकत्वप्रसङ्गात्—If the reading be इक्षुच्छाया, the व्यासवाक्य will be इक्षोःछाया because else the resultant form will be neuter. इक्षोःछाया yields the form इक्षुच्छाया because in that case there is no plurality of shade and hence the Sutra "छायाबाहुल्ये" does not apply.

"कर्मण्यण्"—A root admits अण् in कर्तृवाच्य if it is preceded by its object.

"टिड्ढाणञ्—" (V. notes on पार्व्वती in I, 1.)

आकुमारकथोद्घातम्—It is explained by Mallinátha in two ways. One is—'Raghu's praises were sung by all his subjects including the very children. Here कुमार means 'child,' and आकुमार means 'all beginning with the children'. Another explanation is that they sang his praises for the feats he displayed from his childhood such as his defeating Indra, &c. कुमार, in this case, means 'Raghu in his childhood'. कुमार is compounded with कथा। So आकुमारकथ means 'feats from his childhood.'

In both cases, the samásas of कुमार and कुमारकथा with आङ् are अव्ययीभाव। The whole word आकुमारकथोद्घात is an adverb of जगुः। आङ् in both cases means अभिविधि (See I, 5-9).

"स्यादभ्यादानमुद्घात आरम्भः"—अभ्यादान, उद्घात and आरम्भ are synonymous.

आकुमारकथोद्भूतमिति पाठे * * व्याख्येयम्—If the reading be आकुमारकथोद्भूतम्, it should be explained as—'they sang his praises born of his feats in childhood.'

Bengali.—শালিধান্যরক্ষণনিযুক্তা (কৃষকরমণীগণ) ইক্ষুচ্ছায়ায় বসিয়া রক্ষক সেই রঘুর গুণোৎপন্ন যশঃ তদীয় শৈশবকথা হইতে আরম্ভ করিয়া গান করিতে লাগিল (বা সেই রঘুর গুণোৎপন্ন ও রাষ্ট্রের বালক হইতে আরম্ভ করিয়া প্রজাবৃন্দ কর্ত্তৃক উদ্ঘোষিত যশো গান করিতে লাগিল)।

English rendering.—The women, that watched the crops of *Sáli* (paddy) reposing in the shade of sugar-cane plants,

sang the fame, arising out of merits, of that protector of all, beginning with the anecdotes of his childhood. –20.

Grammatical notes, &c., &c.

Sama'sa. – 1 इक्षूणां छाया इक्षुच्छायम् (षष्ठीतत्) इक्षोः छाया yields the form इक्षुछाया। (V. Sanjivani.) इक्षुच्छाये निषीदन्ति इति इक्षुच्छाय-निषादिन्यः (उपपदतत्) (2 गुणेभ्यः उदयः यस्य तत् गुणोदयम् (बहु) (3) कथानाम् उद्‌घातः कथोद्‌घातः (षष्ठीतत्) कुमारात् आरभ्य आकुमारम् (अव्ययीभावः) —"आङ्मर्य्यादाभिविध्योः." (२।१।१३ पा. ६६० सि. V. आसमुद्र in I, 5-9). आकुमारं कथोद्‌घातः यस्य गानकर्मणः यशसो वा तत् आकुमारकथोद्‌घातम् (बहु) or कुमारस्य कथा) कथा कुमारकथा षष्ठीतत् तास्यः आरभ्य आकुमारकथम् (अव्ययीभावः) आकुमारकथम् उद्‌घातः यस्मिन् गानकर्म्मणि तत् आकुमारकथोद्‌घातम् बहु For the Samása of कुमार V. Sl. 12, C. III. 4 शालीन् गोपायन्तीति शालिगोप्यः उपपदतत् ।

Case-ending. (1) तस्य –कर्मणि षष्ठी (2) आकुमारकथोद्‌घातम्—This is an adjective of यश or adverb of गानक्रिया।

Synonyms. (1) इक्षु—'रसाल इक्षुः' अ.)

Different meanings.— 1 कुमार —(V. Sl. 12, C. III.) (2 शालि —'शालिस्तु गन्धोलौ कलमादिषु' । हे

Derivation. – 1) शालि—शाड् + इन् (उ. ४।११८) हलयोरैक्यम्। ड is changed into ल। 2 इक्षु –इष + क्सु. (3 इक्षुच्छायानिषादिन्यः—इक्षुच्छाय + नि + सद + णिनि + ङीप्, 1st c.p. (4 गोप्तुः—गुप् + तृच् (कर्तरि 6th c. s.) (5) कुमार – V. Sl. 12, C. III.) (6) उद्‌घातः—उद् + हन् + घञ् (भावे) "हनस्तोऽचिण्णलोः". (७।३।३२ पा. २५७४ सि.) इति नकारस्य तत्वम्। (7) शालिगोप्यः—शालि + गुप + अण्—शालिगोपः। शालिगोप + ङीप् (1st c. p.) (8) जगुः—गै + लिट् –उस् (9) यशः —(V. Sl. 19, C. IV.)

Conjugation.—(1) गै (to sing)—गायति (लट्) गायतु (लोट्) अगायत् (लङ्) गायेत् (वि. लिङ्) गेयात् (आ. लिङ्) जगौ, जगतुः, जगिथ, जगाथ (लिट्) अगासीत्, अगासिष्टाम्, अगासिषुः (लुङ्) गीयते (कर्मणि-लट्) अगायि (कर्मणि-लुङ्) गाता (लुट्) गास्यति (लृट्) अगास्यत् (लृङ्) गापयति (णिच्-लट्) अजीगपत् (णिच् लुङ्) जिगासति (सन्-लट्) जेगीयते (यङ्-लट्) गीतः (क्तः)।

Remark.—Bhattoji defends the reading इक्षुच्छायानिषादिन्यः thus : इक्षूणां छाया = इक्षुच्छायम् तत्र आनिषादिन्यः । आ सम्यक् निषादिन्यः = आनिषादिन्यः ।

प्रससादोदयादम्भः कुम्भयोनेर्महौजसः ।
रघोरभिभवाशङ्कि चुक्षुभे द्विषतां मनः ॥ २१ ॥

मूलस्य पाठान्तरम्।

अभिभवाशङ्कि—परिभवाशङ्कि वा।

Prose order.—महौजसः कुम्भयोनेः उदयात् अम्भः प्रससाद, (महौजसः) रघोः (उदयात्) अभिभवाशङ्कि द्विषतां मनः चुक्षुभे ।

Explanation by use of Synonyms.—महौजसः (विपुलतेजसः) कुम्भयोनेः (कुम्भसम्भवस्य अगस्त्यस्य) उदयात् (प्रकाशात्) अम्भः (सलिलं) प्रससाद (निर्मलं बभूव) महौजसः, विपुलप्रतापस्य रघोः (दिलीपकुमारस्य) उदयात्, स्वेषु देशेषु आगमनात् अभिभवाशङ्कि (पराभवशङ्कितं) द्विषतां (शत्रूणां) मनः (चित्तं) चुक्षुभे (कालुष्यं प्राप)।

Substance.—शरदि भीरभाद्रस्य समर्दशदिवसे विपुलज्योतिरगस्त्यनक्षत्रस्योदयात् वर्षाकलुषितं जलं पुनर्विमलं बभूव । महाप्रतापस्य रघोश्च दिग्विजयप्रवर्त्तनात् ततः पराभवशङ्कितानि रिपूणां चित्तानि कलुषितान्यासन्। अहो शरदो वैचित्र्यम् । समकालमेकस्य सा सुखमपरस्य दुःखमावहत् ।

Change of voice.—...अम्भसा प्रसेदे...अभिभवाशङ्किना...मनसा...।

Sanjivani.—प्रससादेति । (महौजसः) (कुम्भयोनेः) अगस्त्यस्य—"अगस्त्यः

[Once on a time, when the conjoint gods, Mitrávaruna, were rambling, they found the Apsará, Urvasi. Their passion excited, their seed fell. It was divided into several parts. One part fell on the ground, another into water, and a third in a pot. From the first was born Vasishtha, from the second the fishes, and from the third Agástya. Hence, Agastya is called कुम्भयोनि as well as वारुणि । Vasishtha is called Maitrávaruni.]

मदोदग्राः ककुद्मन्तः सरितां कूलमुद्रुजाः ।
लीलाखेलमनुप्रापुर्महोक्षास्तस्य विक्रमम् ॥ २२ ॥

Prose order.—मदोदग्राः ककुद्मन्तः सरितां कूलमुद्रुजाः महोक्षाः तस्य लीलाखेलं विक्रमम् अनुप्रापुः । Mallinatha places 'तस्य' after 'लीलाखेलम्' ।

Explanation by use of synonyms.—मदोदग्राः (मदोद्धताः) ककुद्मन्तः (प्रशस्तककुदः) सरितां (नदीनां) कूलमुद्रुजाः (तटभञ्जकाः) महोक्षाः (महावृषभाः) तस्य (रघोः) लीलाखेलं (विलासमनुसरन्तं विक्रमं गतिं) अनुप्रापुः (अनुचक्रुः) ।

Substance.—समुपस्थितायां शरदि विशालवपुः कतमाद्दोऽन्यतमो रघुः महोक्षानिव करिदन्ताग्राभिघातैः सरितां कूलानि भिन्दन् दिग्विजयाय सलीलं प्रतस्थे । वपुष्मन्तो मदोन्मत्ता महावृषभाश्च तदा नदीतटानि शृङ्गैर्विदारयन्तः सलीलगमनेन रघुमनुचक्रुः ।

. **Change of voice.**—मदोदग्रैः ककुद्मद्भिः...कूलमुद्रुजैः महोक्षैः ...लीलाखेलः विक्रमः अनुप्रापे ।

Sanjivani.—मदेति । (मदोदग्राः) मदोद्धताः—ककुदेषामस्तीति (ककुद्मन्तः) महाककुदः इत्यर्थः—यवादित्वात् मकारस्य वत्वाभावः—(सरितां)—कूलानि उद्रुजन्तीति—(कूलमुद्रुजाः)—"उदि कूले रुजिवहोः" (३।२।३१ पा. २९४६ सि.) इति खश्प्रत्ययः—"अरुर्द्विषदजन्तस्य मुम्—" (६।३।६७ पा. २९४२ सि.) इत्यादिना मुमागमः

—महान्तः उक्षाणः (महोक्षाः)—"अचतुर—" (५।४।७७। पा. ८४५ सि.) इत्यादिना निपातनादकारान्तः—(लीलाखेलं) विलाससुभगं (तस्य) रघोः—उत्साहवतः बपुष्मतः परभैक्रमस्य—(विक्रमं) शौर्यम् (अनुप्राप्ः) अनुचक्रुः ॥ २२ ॥

Sanjivani Explained.

यवादित्वात् मकारस्य वत्वाभावः—In ककुद्मत्, the म is not changed into व because ककुद् belongs to the group यवादि। See "मादुपधायाश्च मतोर्वोऽयवादिभ्यः" explained under notes on बुद्धिमति in I, 12.

"उदिकूले रुजिवहोः—The root रुज् or वह admits खश् in कर्त्तृवाच्य if it is preceded by the उपसर्ग, उत्, and if the word कूल be its object. Here all the requirements of the Sutra are fulfilled. Hence, उद् + रुज् admits खश्।

"अरुर्द्विषत्—" इत्यादिना मुमागमः—कूल admits मुम् (म्), by the Sutra अरुर्द्विषत् &c., because the root that follows it admits a खित् affix. (For its explanation, see notes on पुरन्दर in II, 74).

अचतुर—" इत्यादिना निपातनादकारान्तः—महोक्ष is made of महत् and उक्षन्। The resultant form expected would be महोक्षन्। The अकारान्त form महोक्ष is a case of निपातन। The Sutra that determines it is "अचतुर &c." For its Expl., see पुरुषायुष-जीविभ्यः in I, 63.

Bengali.—মদোদ্ধত, প্রশস্তককুদ্যুক্ত এবং ক্রীড়াভিলাষী হইয়া শৃঙ্গদ্বারা নদীতটভঙ্গকারী বৃষভগণ তাঁহার (রঘুর) বিলাসসুভগ বিক্রমের অনুকরণ করিতে লাগিল। ২২।

English rendering.—Excited by energy, endued with large humps, and engaged in afflicting (with their horns) the banks of rivers, the mighty bulls imitated his gracefully sportive gait. 22.

Grammatical notes, &c., &c.

Sama'sa.—(1) उद्गतम् अयं येषां ते उदग्राः (बहु)—'प्रादिभ्योधातु-जस्य—' (V. notes on उदग्र, Sl. 3, C. I.) मदेन उदग्राः मदोदग्राः

(तृतीयातत्) (2) ककुद्—(V. ककुद, Sl. 70, C. III.) (3) कूलमुद्रुजाः —उपपदतत्) (4) लीलया खेलः (मधुरः) लीलाखेलः (तृतीयातत्) तम् (5) महान् उक्षाः महोक्षाः।

Case-ending.—(1) सरिताम्—शेषे षष्ठी (2) तस्य—सम्बन्धे षष्ठी। (3) लीलाखेलम्—Adjective of विक्रमम् (4) महोदग्राः, ककुद्मन्तः and कूलमुद्रुजाः—adjectives of महोक्षाः।

Synonyms.—(1) उक्षन्—(V. Sl. 32, C. III.).

Different meanings.—(1) ककुद्—(V. ककुद, Sl. 70, C. III.) (2) कूल—'कूलं तटे सैन्यपृष्ठे, तडागस्तूपयोरपि' (हे.) (3) विक्रम—'विक्रमः शक्तिसंपत्तिः क्रान्तिमात्रे च विक्रमः' (धरणिः)

Derivation.—(1) ककुद्मन्तः—ककुद् + मतुप् (प्राशस्त्ये, 1st c. p.) (2) कूलमुद्रुजाः—कूल + उद् + रुज् + खश् (1st c. p.) (3) अनुप्रापुः—अनु + प्र + आप् + लिट् (4) महोक्षाः—(V. Sl. 32, C. III.) (5) विक्रमम्—वि + क्रम् + घञ् (भावे, करणे वा, 2nd c. s.) Note that the penultimate vowel अ in the root क्रम् is not lengthened. See आश्रम, Sl. 48, C. I.

Conjugation.—(1) आप्—(V. Sl. 48, C. I.).

प्रसवैः सप्तपर्णानां मदगन्धिभिराहताः।
असूययेव तन्नागाः सप्तधैव प्रसुस्रुवुः॥ २३॥

Prose order.—तन्नागाः सप्तपर्णानां मदगन्धिभिः प्रसवैः आहताः (सन्तः) असूयया इव सप्तधा एव प्रसुस्रुवुः। Mallinátha places 'तन्नागाः' after 'आहताः' and 'मदगन्धिभिः' before 'सप्तपर्णानाम्'।

Explanation by use of synonyms.—तन्नागाः (रघुगजाः) सप्तपर्णानां (विषमच्छदवृक्षाणां), मदगन्धिभिः (मदस्येव गन्धयुक्तैः) प्रसवैः (पुष्पैः) आहताः (ताडिताः सन्तः) असूयया इव (आहतिनिमित्तया स्पर्धयेव) सप्तधा एव (सप्तप्रकारेणैव) प्रसुस्रुवुः (मदं ववृषुः)।

Substance.—अधुना दिग्विजययात्रा वर्ण्यते । शरदि सप्तपर्णानां कुसुमानि विकसितान्यभूवन् । तेषां गन्धो गजमदस्येव बभूव । दिशश्च सर्व्वाङ्गेन मोदिताः । रघोर्गजास्तद्गन्धप्रदेशे हस्तिनां मदधारणशीलमनुमाय उन्मत्ता बभूवुः । ततस्ते स्पर्द्धया नासारन्ध्राभ्यां कटाभ्यां मेढ्रात् नेत्राभ्याञ्च इति सप्ताङ्गेभ्यः दानवारि ववृषुः । एवं गजा भीषणा वर्णायेति भण्यते ।

Change of voice.—तन्नागैः...आहतैः...प्रसुस्रुवे ।

Sanjivani.—प्रसवैरिति । मदस्य इव गन्धः येषां तैः (मदगन्धिभिः)—"उपमानाच्च" (५।४।१३७ पा. ८५६ सि.) इति इकारः समासान्तः—(सप्तपर्णानां) वृक्षविशेषाणाम्—"सप्तपर्णो विशालत्वक् शारदो विषमच्छदः" इत्यमरः (Cole. p. 19) (प्रसवैः) पुष्पैः (आहताः)—तस्य रघोः नागाः गजाः [तन्नागाः]—"गजेऽपि नागमातङ्गौ" इत्यमरः (Cole. p. 305)—(असूयया इव) आहतिनिमित्तया स्पर्द्धया इव (सप्तधा एव) (प्रसुस्रुवुः) मदं ववृषुः—प्रतिगजगन्धाभिमानादिति भावः । "करात् कटाभ्यां मेढ्राच्च नेत्राभ्याञ्च मदस्रुतिः" इति पालकाव्ये । करात्, नासारन्ध्राभ्यामित्यर्थः ॥ २३ ॥

Sanjivani Explained.

"उपमानाच्च"—गन्ध preceded by a उपमान becomes गन्धि provided the two form a बहुव्रीहि compound. Here मदगन्ध is the उपमान । गन्ध follows it and forms a बहुव्रीहि compound with it. So the resultant becomes मदगन्धि instead of मदगन्ध । The other Sutras enjoining इ to गन्ध in बहुव्रीहि समास are :—

1, "गन्धस्येदुत्पूतिसुसुरभिभ्यः" (५।४।१३५ पा. ८७४ सि.)—गन्ध after उत्, पूति, सु or सुरभि admits इ *i.e.*, becomes गन्धि provided they form बहुव्रीहि compound. उद्गन्धि, पूतिगन्धि, सुगन्धि, सुरभिगन्धि ।

2. "अल्पाख्यायाम्" (५।४।१३६ पा. ८७५ सि.) गन्ध meaning अल्प admits इ when it is the last component of a बहुव्रीहि compound. सूपस्य गन्धो लेशो यस्मिन् तत् सूपगन्धि ।

"सप्तपर्णो[1] विशालत्वक्[2] शारदो[3] विषमच्छदः[4]"—These four words are synonymous.

"गजेऽपि नागमातङ्गौ"—The words नाग and मातङ्ग mean गज as well. This अपि suggests the other senses the word conveys. नाग means lead, serpent, cruel, cloud, &c. मातङ्ग means चण्डाल as well as गज।

करात् कटाभ्यां * * मदस्रुतिः"—Ichor is discharged through the two nostrils, the two temples, the genital organ, and the two eyes.

Bengali.—তাঁহার (রঘুর) গজসকল সপ্তপর্ণের মদগন্ধি পুষ্প কর্তৃক আহত হইয়া যেন স্পর্দ্ধাপূর্ব্বক সপ্ত অঙ্গ হইতে মদধারা বর্ষণ করিতে লাগিল। ২৩।

English rendering.—Struck by the ichor-scented flowers of *Echites scholaris*, his elephants, as if from jealousy, discharged (ichor) through all their seven outlets. 23.

Grammatical notes, &c., &c.

Sama'sa.— 1 मदस्य गन्ध इव गन्धः येषां तै मदगन्धिनः तैः (उपमानपूर्वपदलोपि-बहु) (V. notes on मुनिवृत्तीनाम्, Sl. 5-9, C. I.) इत् (इ) is added to गन्ध। (2) काण्डे काण्डे सप्त पर्णानि येषां ते सप्तपर्णाः (बहु) तेषाम्—[V. R. T. Amarakos'a, N. S. p. Ed. p. 154.] (3) तस्य नागाः तन्नागाः (षष्ठीतत्) ।

Case-ending.—(1) प्रसवैः—'आहता' इत्यस्य अनुक्ते कर्तरि तृतीया—(2) सप्तपर्णानाम्—शेषे षष्ठी 'प्रसवैः' इत्यनेन सम्बन्धः (3) असूयया—इत्थं तृतीया। (4) सप्तधा—अव्ययं, क्रियाविशेषणम्।

Synonyms.—(1) नाग—(V. द्विप, Sl. 71, C. I.)

Different meanings.—(1) नाग—'नागो मतङ्गसर्पे पुन्नागकेसरे। क्रूराचारे नागदन्ते मुस्तके वारिदेऽपि च॥ देहानिलविशेषे च "सं हि स्यादुत्तरस्थितः। नागं रङ्गे सीसपत्रे स्त्रीवधे करणान्तरे॥' (मे.) (2) मद—(V. Sl. ..7, C. II).

Derivation.—(1) प्रस्रवैः—प्र + स्रु + अप् (कर्मणि, 3rd c. p.) or प्र + स्रु + अच् (V. R. T. of Amarakośa, N. S. P. Ed. p. 500) (2) आहताः—आ + हन् + क्तः (कर्मणि, 1st c. p.) (3) असूयया—असु (अ) + यक् (कण्ड्वादित्वात्) = असूय (धातुसंज्ञा)। असूय + अः (3rd c. s.) (4) नागाः—नग + अण् (भवार्थे, 1st c. p.) (5) सप्तधा—सप्तन् + धाच् (प्रकारार्थे) (6) प्रसुस्रुवुः—प्र + स्रु + लिट्-उस्।

Conjugation.—(1) स्रु (to pour)—स्रवति (लट्) स्रवतु (लोट्) अस्रवत् (लङ्) स्रवेत् (वि. लिङ्) सुस्राव, सुस्रुवतुः, सुस्रोथ, सुस्रुव (लिट्) स्रोता (लुट्) स्रोष्यति (लृट्) असुस्रुवत् (लुङ्) स्रावयति (णिच्-लट्) असिस्रवत्, असुस्रवत् (णिच्-लुङ्) अस्रावि (कर्मणि-लुङ्) सुस्रूषति (सन्-लट्) सोस्रूयते (यङ्-लट्) स्रूयात् (आ. लिङ्) स्रुतः (क्तः) (2) हन्—V. Sl. 5, C. II.

Rhetoric.—The figure of speech is here उत्प्रेक्षा। No doubt, *Echites scholaris* blooms in autumn. But the idea that Raghu's elephants, struck by their odour, felt a jealousy, and through rivalry discharged ichor is purely poetic. Hence, it is उत्प्रेक्षा।

सरितः कुर्वती गाधाः पथश्चाश्यानकर्दमान्।
यात्रायै नोदयामास तं शक्तेः प्रथमं शरत् ॥२४॥

Prose order.—सरितः गाधाः पथः च आश्यानकर्दमान् कुर्वती शरत् शक्तेः प्रथमं तं यात्रायै नोदयामास। Mallinātha places 'तम्' before 'शक्तेः'।

Explanation by use of synonyms.—सरितः (नदीः) गाधाः (सुप्रतराः) पथश्च (मार्गांश्च) आश्यानकर्दमान् (शुष्कपङ्कान्) कुर्वती (विदधती) शरत् (शरदृतुः) शक्तेः (उत्साहशक्तेः) प्रथमं (प्राक्) तं (रघुं) यात्रायै (दिग्विजयार्थं निर्गमनाय) नोदयामास (प्रेरयामास)।

Substance.—शरदि नदीनां प्रावृषिजोत्पीडो ह्रासमगमत्। अतस्ताः सर्वाः सुखेन तरणयोग्या बभूवुः। मार्गेषु कर्दमः शुष्कः। ततस्तेऽपि सुगमा अभूवन्। एवं दिग्विजयसुखकरः कालः चतुरङ्गबलशालिनः मन्त्रशक्तिसमन्वितस्य तस्य राज्ञो दिग्विजयोत्साहं जनयामास।

Change of voice.—...कुर्वत्या शरदा...स...नोदयामासे ।

Sanjivani.—सरित इति । (सरितः) (नद्याः) सुप्रतराः कुर्वती (पथः) मार्गान् (च) (आश्यानकर्दमान्) शुष्कपङ्कान् (कुर्वती)—"संयोगादेरातो धातोर्यण्वतः" (८।२।४३ पा. १०१७ सि.) इति निष्ठातकारस्य नत्वम्—(शरत्) शरदृतुः (तं) रघुं (शक्तेः) उत्साहशक्तेः (प्रथमं) प्राक् (यात्रायै) दण्डयात्रायै (नोदयामास) प्रेरयामास । प्रभावमन्त्रशक्तिसम्पन्नस्य शरत् स्वयमुत्साहमुत्पादयामास इत्यर्थः ॥२४

Sanjivani Explanied.

"संयोगादेरातो धातोर्यण्वतः"—The त् of क्त or क्तवत् is changed into न् when it is added to a root ending in आ, and beginning in conjoint letters one of which is य, व, र, or ल ।

The root श्यै becomes श्या । It begins with conjoint letters one of which is य, and ends in आ । Hence, त् of क्त added to it changes into न् । The resulting form is श्यान ।

प्रभावमन्त्रशक्तिसम्पन्नस्य * * * इत्यर्थः—The sense is that the autumn roused his energy for the campaign of conquest, endued as he was with strength of prestige and councillors.

What Mallinátha intends to say is that the expression—'urged him, before his energy did, to undertake the campaign of conquest'—means 'roused his energy to undertake the campaign'.

Bengali.—শরৎ নদীসকলকে তরণযোগ্য এবং মার্গসমূহকে বিশুষ্ককর্দম করিয়া রঘুর উৎসাহশক্তি জন্মিবার পূর্ব্বেই (যেন) তাঁহাকে দিগ্বিজয়যাত্রার নিমিত্ত প্রোৎসাহিত করিল। ২৪।

English rendering.—Making the rivers fordable, and the roads dry of mire, autumn urged him to a campaign (of conquest) before his energy did it. 24.

Grammatical notes, &c., &c.

Sama'sa.—(1) आश्यानः (विशुष्कः) कर्दमः येषु ते आश्यानकर्दमाः (बहु) तान् ।

Case-ending.—(1) यात्रायै—"क्रियार्थोपपदस्य च कर्मणि स्थानिनः";

इति सूत्रात् चतुर्थी—(V. चापलाय, Sl. 5-9, C. I.) यात्रां कर्त्तुमित्यर्थः ; तादर्थ्ये चतुर्थी वा (2) शक्तेः—कालवाचि 'प्रथम' शब्दयोगे पञ्चमी। (V. मत्तः परम् in I, 66). (3) प्रथमम्—क्रियाविशेषणम्।

Synonyms.—(1) सरित्—'अथ नदी सरित्। तरङ्गिणी शैवलिनी तटिनी ह्रदिनी धुनी। स्रोतस्वती द्वीपवती स्रवन्ती निम्नगापगा॥' (अ.) (2) कर्दम—'निषद्वरस्तु जम्बालः पङ्कोऽस्त्री शादकर्दमौ।' (अ.)

Different meanings.—(1) शक्ति—'शक्तिरस्त्रान्तरे गौर्य्यामुत्साहादौ बले स्त्रियाम्।' (मे.) (2) यात्रा—'यात्रा तु यापनोपाये गतौ देवार्चनोत्सवे॥(वि.)

Derivation.—(1) यात्रायै—या + त्रन् + टाप् (4th c. s.) 'हुयामा—' (४ उ. ४।१६८।) (2) सरितः—सृ + इतिः (औणादिकः, 2nd c. p.) (3) कुर्वती—कृ + शतृ + ङीप्। कृ is तनादि, so, नुम् is not added to it in शतृ feminine form. (V. बिभ्रती in I, 83). (4) गाधाः—गाध् + घः 'गुरोश्च हलः' (भावे, 2nd c. p.) (5) आश्यानः—आ + श्यै + क्तः (कर्त्तरि)। त् of क्त is changed into न्। (6) नोदयामास—(नुद + णिच् –) नोदि + लिट्—णल् (7) शक्तेः—शक् + क्तिन् (भावे, 5th c. s.) The alternative form is शक्त्याः।

Conjugation.—(1) नुद (to urge)—नुदति—ते (लट्) नुदतु-ताम् (लोट्) अनुदत्-त (लङ्) नुदेत्-त (वि. लिङ्) नुद्यात्, नुत्सीष्ट (आ. लिङ्) नुनोद, नुनुदे (लिट्) अनौत्सीत्, अनौत्ताम्, अनौत्सुः। अनुत्त, अनुत्साताम्, अनुत्सत (लुङ्) नोदयति (णिच्-लट्) अनूनुदत् (णिच्-लुङ्) अनोदि (कर्मणि-लुङ्) नोत्ता (लुट्) नोत्स्यति-ते (लृट्) अनोत्स्यत्-त (लृङ्) नुनुत्सति-ते (सन्-लट्) नोनुद्यते (यङ्-लट्) नुन्नः, नुत्तः (क्तः) See "नुदविदोन्दत्राघ्राह्रीभ्योऽन्यतरस्याम्" (८।२।५६। पा. ३०१८ सि.)। (2) श्यै—श्यायते (लट्) श्यायताम् (लोट्) अश्यायत (लङ्) श्यायेत (वि. लिङ्) शश्ये (लिट्) अश्यास्त (लुङ्) श्याता (लुट्) श्यास्यते (लृट्) श्यानः (क्तः) शीतः (स्पर्शे—क्तः) शीनः (द्रवद्रव्यमूर्त्तौ—क्तः)।

Remark.—One of the Calcutta editors says that the पञ्चमी in प्राक्: is a case of दिग्वाचकशब्दयोगे पञ्चमी। It is a mistake. 'प्रथम' is not a दिग्वाचक, but a कालवाचक word. भट्टोजि gives the example of कालवाचकशब्द as चैत्रात्पूर्वः फाल्गुनः।

> तस्मै सम्यग्घुतो वह्निर्वाजिनीराजनाविधौ।
> प्रदक्षिणार्चिर्व्याजेन हस्तेनेव जयं ददौ॥ २५॥

तस्मै सम्यक्—सम्यक् तस्य (Nand. foot-notes).

एव—इव (मु.)

Prose order.—वाजिनीराजनाविधौ सम्यक् हुतः वह्निः प्रदक्षिणार्चिर्व्याजेन हस्तेन इव तस्मै जयं ददौ।

Explanation by use of Synonyms.—वाजिनीराजनाविधौ (अश्वगजादीनां नीराजनाख्ये शान्तिकर्मणि) सम्यक् (यथाविधि) हुतः (होमेन तर्पितः) वह्निः (हुताशनः) प्रदक्षिणार्चिर्व्याजेन (दक्षिणदिग्गामिज्वालाच्छलेन) हस्तेन इव (करेणेव) तस्मै (रघवे) जयं (विजयाशिषं) ददौ (दत्तवान्)।

Substance.—रघुर्दिग्विजयार्थं प्रयाणकाले स्वमङ्गलाय वह्नावाहुतिं प्रदाय नीराजनाख्यं शान्तिकर्मानुष्ठितवान्। हुतभुक् च आहुतिग्रहणाय दक्षिणावर्तं शिखां प्रसारयामास। एतद्धि शुभशंसि लक्षणम्। तत् कविरुत्प्रेक्षते यत् हुताशनः दक्षिणदिग्गामिशिखाहस्तेनेव रघवे विजयाशिषमदात्।

Change of voice.—...हुतेन वह्निना...जयः ददे।

Sanjivani.—तस्मा इति। वाजिनाम् अश्वानां नीराजनाविधौ, नीराजनाख्ये शान्तिकर्मणि [वाजिनीराजनाविधौ] (सम्यक्) विधिवत् (हुतः) होमसमिद्धः (वह्निः)—प्रगतं दक्षिणम्—तिष्ठद्गुप्रभृतित्वादव्ययीभावः—प्रदक्षिणं या अर्चिः, ज्वाला, तस्याः व्याजेन [प्रदक्षिणार्चिर्व्याजेन] (हस्तेन इव तस्मै जयं ददौ)। तथाच वराहसंहितायाम्—"स्निग्धः प्रदक्षिणगतो हुतभुक् नृपस्य धात्रीं समुद्ररशनां वशगां करोति" (बृहत्संहितायाम् ४४ अध्याये) इति। वाजिग्रहणं गजादीनामप्युपलक्षणं, तेषामपि नीराजनाविधानात्॥ २५॥

Sanjivani Explained.

तिष्ठद्गुप्रभृतित्वादव्ययीभावः—(V. notes on प्रदक्षिणक्रियार्थायाम् in I, 76).

उक्तमाहवयात्रायाम्—It is said in the chapter entitled आहवयात्रा (setting out for war) of बृहत्संहिता ।

इद्धः * * * करोति—Fire, ignited into a blaze (by libations of clarified butter), brings the Earth under the control of the king if it spreads its tongue to the right-hand side for accepting the butter.

वाजिग्रहणम् * * * नीराजनाविधानात्—Though the text has only वाजिन्, it suggests गज and other limbs of war as well, because the ceremony of नीराजना is sanctioned not only for the horse but for elaphants as well.

Bengali.—অশ্ব (এবং গজ) সমূহের নীরাজনানামক শান্তিকার্য্যানুষ্ঠানে যথাবিধি প্রীণিত বহ্নি দক্ষিণদিগ্‌গামিশিখাচ্ছলে হস্ত দ্বারাই তাঁহাকে যেন জয় দান করিলেন। ২৫।

English rendering.—Duly fed with libations at the rite called *Nirâjanâ* of the steeds (and elephants), the Fire, gave as it were victory unto him with its hand represented by flames turning towards the right hand side (of the priest). 25.

Grammatical notes &c., &c.

Sama'sa.—(1) वाजिनां नीराजना वाजिनीराजना (षष्ठीतत्) तस्याः विधिः वाजिनीराजनाविधिः (षष्ठीतत्) तस्मिन् (2) प्रगता दक्षिणं (पार्श्वं) प्रदक्षिणम् (अव्ययीभावः) प्रदक्षिणम् अर्चिः प्रदक्षिणार्चिः (सुप्सुपा) Or प्रगता दक्षिणं दक्षिणां (दिशम्) वा सा प्रदक्षिणा (प्रादि) प्रदक्षिणा अर्चिः प्रदक्षिणार्चिः (कर्मधा) तस्याः व्याजः (षष्ठीतत्) तेन or प्रदक्षिणार्चिरेव व्याजः प्रदक्षिणार्चिर्व्याजः (रूपक कर्मधा) तेन। For the peculiarity of the Samása with प्रदक्षिण see. I,

Case-ending.—तस्मै—सम्प्रदाने चतुर्थी (2) वाजिनीराजनाविधौ—विषयाधिकरणे सप्तमी (3) सम्यक्—क्रियाविशेषणम् (4) प्रदक्षिणार्चिर्व्याजेन—करणे तृतीया (5) हस्तेन—करणे तृतीया।

Synonyms.—(1) अर्चि—'वह्नेर्द्वयोर्ज्वालकीलावर्चिर्हेतिः शिखा स्त्रियाम्।' (अ.) (2) वाजिन्—(V. तुरङ्ग, Sl. 38, C. III.) (3) वह्नि—(V. अग्नि, Sl. 5-9, C. I).

Different meanings.—(1) अर्चि—'अर्चिर्मयूखशिखयोर्न ना' (मे.) (2) वह्नि—'वह्निर्भल्लातकेऽपि स्याच्चित्रकाख्यौषधे पुमान्' (मे.) (3) व्याज—'व्याजः शाठ्येऽपदेशे च' (वि.)

मयूख=किरण। अपदेश=छल।

Derivation.—(1) सम्यक्—सम्+अञ्च+क्विन् (कर्तरि) (2) हुतः—हु+क्तः (कर्मणि) (3) वह्निः—वह्+निः (उ. ४।५१) (4) वाजी—वज+णिनिः (आवश्यकार्थे) (5) नीराजना—निर्+राजि (राज+णिच्=)+युच् (भावे—"ण्यासश्रन्थो युच्" (३।३।१०७।पा. ३२८४ सि.) [A णिजन्त root, आस्, as well as श्रन्थ admits युच् in भाववाच्य। E. g. कारणा, हारणा, आसना, श्रन्थना] (6) व्याज—वि+आङ्+अज्+घञ् (करणे 3rd (c. s.) व्याजेन, छद्मन्यनेन। (7) जयम्—जि+अच् (2nd c. s.) (8) ददौ—दा+लिट्-णल्।

Conjugation.—(1) हु—जुहोति, जुहुतः, जुह्वति (लट्) जुहोतु, जुहुधि (लोट्) अजुहोत्, अजुहुताम्, अजुहवुः (लङ्) जुहुयात् (वि. लिङ्) जुहाव, जुहवाञ्चकार, जुहवामास, जुहवाम्बभूव (लिट्) होता (लुट्) होष्यति (लृट्) अहोष्यत् (लृङ्) हूयात् (आ. लिङ्) अहौषीत्, अहौष्टाम्, अहौषुः (लुङ्) हावयति (णिच्-लट्) अजूहवत् (णिच्-लुङ्) हूयते (कर्मणि-लट्) अहावि (कर्मणि लुङ्) जुहूषति (सन्-लट्) जोहूयते (यङ्-लट्) इत्यादि। (2) दा—(Sl. 18, C.I.)

नीराजना—A religious ceremony which our kings used to perform before setting out on a campaign. It was supposed to be capable of strengthening the horse and the elephants and other elements of the invading army. It consisted of five limbs: 1. a lamp; 2. lotuses; 3. a piece of well-washed cloth; 4. leaves of mango; and 5. those of *Ficus religiosa*. These should, in succession, be gently moved before the object of worship in perpendicular gyrations. The spacious time for the

performance of this ceremony was the twelfth, the eighth, or the fifteenth day of the lighted fortnight of *Kárttika*.

Rhetoric.—The figure of speech in दक्षीव is उत्प्रेक्षा, and that in प्रदक्षिणार्चिर्व्याजेन is अपह्नुति। It is thus defined :—

प्रकृतं यन्निषिध्यान्यत् साध्यते सा त्वपह्नुतिः।

When the real is concealed and the unreal is established, the figure of speech is अपह्नुति। The flame on the right-hand side is the real fact. It is here concealed and हस्त, its standard of comparison, which is unreal, is represented as real.

स गुप्तमूलप्रत्यन्तः शुद्धपार्ष्णिरयान्वितः।
षड्विधं बलमादाय प्रतस्थे दिग्जिगीषया ॥ २६ ॥

मूलस्य पाठान्तरम्।

गुप्तमूलप्रत्यन्तः—गुप्तमूलपर्यन्तः (चा.)

प्रतस्थे दिग्जिगीषया—स प्रतस्थे जिगीषया Nand. (foot-notes).

Prose order.—गुप्तमूलप्रत्यन्तः शुद्धपार्ष्णिः अयान्वितः सः षड्विधं बलम् आदाय दिग्जिगीषया प्रतस्थे।

Explanation by use of synonyms.—गुप्तमूलप्रत्यन्तः (रक्षितस्वनिवासप्रान्तदुर्गः) शुद्धपार्ष्णिः (उद्धृतपृष्ठशत्रुः, सेनारक्षितपृष्ठदेशो वा) अयान्वितः (शुभदैवान्वितः) सः (रघुः) षड्विधं (मौलभृत्यादिरूपं षट्प्रकारं) बलं (सैन्यम्) आदाय (गृहीत्वा) दिग्जिगीषया (दिग्जयेच्छया) प्रतस्थे (चचाल)।

Substance.—दिग्विजयप्रयाणात् प्राक् स रघुः स्वकीयमावासं स्वराष्ट्रस्य प्रान्तस्थितानि दुर्गाणि च सैन्यस्थापनादिना संररक्ष। पृष्ठभागवर्त्तिनः समाक्रमितुमुद्यतान् रिपूनुज्जहार। इत्थं स्वाधिकारं दुर्भेद्यं कृत्वा स षड्विधं सैन्यमादाय पराधिकारं जेतुं प्रतस्थे। यात्राकालस्तस्य शुभ आसीत्। दैवं तस्यानुकूलं बभूव।

Change of voice.—गुप्तमूलप्रत्यन्तेन शुद्धपार्ष्णिना अयान्वितेन तेन...

Sanjivani.—स इति। गुप्तौ मूलं, स्वनिवासस्थानं; प्रत्यन्तः, प्रान्तदुर्गश्च, येन सः (गुप्तमूलप्रत्यन्तः) (शुद्धपार्ष्णिः) उद्धृतपृष्ठशत्रुः, सैन्यया रक्षितपृष्ठदेशो वा

(षयान्वित:) षुभदैवान्वित:—"षय: शुभावहो विधि:" इत्यमर: (Cole. p. 32) (स:) रघु: (षड्विधं) मौलभृत्यादिरूपं (बलं) सैन्यम्—"मौलं भृत्य: सुहृच्छ्रेणी द्विषदाटविकं बलम्" इति कोष:—आदाय दिशां जिगीषया जेतुमिच्छया [दिग्जिगीषया] (प्रतस्थे) चचाल ॥ २६ ॥

Sanjivani Explained.

Mallinátha takes मूल to mean the abode of the king, *i.e.*, his capital. The lexicographers, however, do not notice this sense. They mean by it निकुञ्ज (bower) and not a palace. मूल means root. The root of the empire is taken by Mallinátha to be its capital.

प्रत्यन्त, is taken by Mallinatha to mean frontier forts. We do not find this sense also in the lexicons ordinarily used. By प्रत्यन्त, Amara means म्लेच्छदेश (the country of the barbarians). A Calcutta editor understands by मूल the centre, and by प्रत्यन्त the wings, of the army. गुप्तमूलप्रत्यन्त he interprets as 'guarding the centre and the wings of the army'. The senses he attributes to the words cannot be found in the lexicons. If we are to dissent from Mallinátha, we think मूल should be translated as the root, the main support, of the empire, *i.e.*, the treasure, the ministers, &c. Indeed, मूल means 'treasure' as well. प्रत्यन्त means the frontier. The sense would then be 'guarding the frontiers of the empire, and making arrangements for preventing the administration from coming into a dead-lock after his departure'.

"मौलंबल: * * * "—The six-fold army consists of 1. the king and his relations, 2. the paid soldiers, 3. the allies, 4. the guild of artisans (something, perhaps, like military engineers), 5. the (ostensible) foes (who are in possession of the secrets of the real foes, *i. e.* something like spies), and 6. the foresters (something, perhaps, like sappers and miners).

Bengali.—তিনি স্বকীয় রাজধানী এবং প্রান্তদুর্গ রক্ষা করিয়া পৃষ্ঠদেশের শত্রু বিনাশানন্তর (বা সেনা দ্বারা পৃষ্ঠদেশের রক্ষাকরণানন্তর)

শুভদৈবান্বিত হইয়া ষড়্বিধ সৈন্য সহ দিগ্‌বিজয়ার্থ যাত্রা করিলেন। ২৬।

English rendering.—Keeping the capital and the frontier forts (of his empire) well guarded, and clearing his rear (of foes), and endued with luck, he set out, with the intent of conquering the quarters, taking with him forces of sixfold variety. 26.

Grammatical notes, &c., &c.

Sama'sa.—(1) प्रतिगतः अन्तम् प्रत्यन्तः (प्रादिः)—'अत्यादयः क्रान्ताद्यर्थे द्वितीयया' (२।२।१८ पा. वा. ७८० सि. का.) [The उपसर्ग's अति, &c., are compounded with द्वितीयान्त words if they mean 'to over-reach,' &c.] मूलञ्च प्रत्यन्तश्च मूलप्रत्यन्तौ (द्वन्द्वः) गुप्तौ मूलप्रत्यन्तौ येन स गुप्तमूलप्रत्यन्तः (बहु) (2) शुद्धः पार्ष्णिः यस्य सः शुद्धपार्ष्णिः बहु (3) अयेन अन्वितः अयान्वितः (तृतीयातत्) (4) षट् विधाः प्रकाराः यस्य तत् षड्विधम् (बहु) (5) दिशां जिगीषा दिग्जिगीषा (षष्ठीतत्) तया।

Case-ending.—(1) दिग्जिगीषया—हेतौ तृतीया ; (2) गुप्तमूलप्रत्यन्तः, शुद्धपार्ष्णिः, and अयान्वितः—adjectives of सः।

Synonyms.—(1) बल—V. सेना, Sl. 19, C. I.)

Different meanings.—(1) मूल—'मूलं शिफाद्ययोः। मूलवित्ते-ऽन्तिके भामेः'। (मे.) (2) पार्ष्णि—पार्ष्णिः स्त्रीपुंसयोः पादमूले स्याद् ध्वजिनी-कटौ।' (रन्तिदेवः)। ध्वजिनीकटि—the loin, *i.e.*, the rear of the army.

Derivation.—(1)गुप्तः—गुप् + क्तः (कर्मणि (2) पार्ष्णिः—पृष + निः (निपातनात् वृद्धिः) 'घृणिपृश्निपार्ष्णिचूर्णिभूर्णि' (उ. ४·५३) (3) अयः—इ(ण्) + घः (करणे) "पुंसि संज्ञायां घः प्रायेण" (३।३।११८ पा. ३२९६ सि.) [To mean a proper name (संज्ञा), some roots admit घ ; the resultant becomes masculine.] (4) जिगीषया—(जि + सन् =) जिगीष् + अ (3rd c. s.) (5) आदाय—आ + दा + ल्यप् (6) प्रतस्थे—प्र + स्था + लिट्-ए। Here

स्था is allied with the prefix उ, so it is आत्मनेपदी । (V. notes on उपस्थिताम् Sl. 45, C. I.)

Conjugation.—(1) स्था—(V. Sl. 45, C. I.) (2) दा—(V. Sl. 18, C. I.)

Remark.—Amara divides an army into four parts :—1. Elephants, 2. horse, 3. cars, and 4. foot-soldiers. His commentators remark that troops on boat or the naval force and forest troops of the old classification are included by Amara in पदाति । So Cháritravardhana says—हस्त्यश्वरथपदातिनाविकाटविकाश्चेति केचित् ।

अवाकिरन् वयोवृद्धास्तं लाजैः पौरयोषितः ।
पृषतैर्मन्दरोद्धूतैः क्षीरोर्मय इवाच्युतम् ॥ २७ ॥

Prose order.—क्षीरोर्मयः मन्दरोद्धूतैः पृषतैः अच्युतम् इव वयोवृद्धाः पौरयोषितः लाजैः तम् अवाकिरन् । For Mallinatha's prose order, see Sanjivani.

Explanation by use of synonyms.—क्षीरोर्मयः (क्षीरसमुद्रवीचयः) मन्दरोद्धूतैः (मन्दराद्रिणोत्क्षिप्तैः) पृषतैः (बिन्दुभिः) अच्युतमिव (विष्णुमिव) वयोवृद्धाः (वयसा प्रवीणाः) पौरयोषितः (पुरस्त्रियः) लाजैः (भ्रष्टयवैः) तं (रघुम्) अवाकिरन् (ववृषुः) ।

Substance.—पुरा किल देवा दानवाश्च मिलित्वा वासुकिं रज्जुं मन्दरञ्च मन्थनदण्डं विधाय समुद्रं ममन्थुः । कूर्मराजो मन्दराचलं पृष्ठे दधार । तदा क्षीरसमुद्रस्य वीचिनिकरा यथा मन्दरपर्वताद्रिणोत्क्षिप्तैर्जलबिन्दुभिर्नारायणमसिषिचुः तथा वयसा प्रवीणाः पुराङ्गनाः दिग्विजययात्रायां रघोरभिनन्दनार्थं तस्योपरि आचारलाजान् विकीर्णवत्यः ।

Change of voice.—क्षीरोर्मिभिः...अच्युतः...वयोवृद्धाभिः पौरयोषिद्भिः...सः अवाकीर्यत ।

Sañjivani.—अवाकिरन्निति । (वयोवृद्धाः पौरयोषितः) (तं) रघुं

प्रयान्ती (लाजैः) आचारलाजैः (मन्दरोद्धतैः) (पृषतैः) बिन्दुभिः (क्षीरोर्मयः) क्षीरसमुद्रोर्मयः (अच्युतं) विष्णुम् इव (अवाकिरन्) पर्य्यक्षिपन् ॥ २७ ॥

Bengali.—মন্দরপর্ব্বতের আলোড়নোত্থিত জলবিন্দুদ্বারা ক্ষীর-সমুদ্রের উর্ম্মিমালা যেরূপ বিষ্ণুকে অভিবৃষ্ট করিয়াছিল, তদ্রূপ, বয়োবৃদ্ধা পুরনারীগণ আচারলাজদ্বারা তাঁহাকে (রঘুকে) অভিবৃষ্ট করিলেন ॥ ২৭ ॥

English rendering.—The matrons of the city, of advanced years, strewed him with fried paddy, as the waves of the ocean of milk strewed the Lord (Vishnu) of undecaying glory with sprays raised by the Mandara mountain, when it was churned in days of old. 27.

Grammatical notes, &c., &c.

Sama'sa.—(1) वयसा वृद्धाः वयोवृद्धाः (तृतीयातत्) (2) पौराः योषितः पौरयोषितः (कर्मधा) (3) मन्दरेण उद्धताः मन्दरोद्धताः (तृतीयातत्) तैः (4) क्षीरस्य ऊर्मयः क्षीरोर्मयः (षष्ठीतत्) (5) अविद्यमानं च्युतं (च्युतिः) यस्य सः अच्युतः (बहु) । As अच्युत is संज्ञा, the form अविद्यमानच्युत is not admissible. (V. अनव्ययासमास, Sl. 30, C. I.) or thus :—नास्ति च्युतं (स्खलनं) स्वपदात् यस्य सः अच्युतः तम् (V. R. T. of Amarakosha, N. S. P. Ed. P. P. 10—11.) 7.

Case-ending.—(1) लाजैः—करणे तृतीया (2) क्षीरोर्मयः—उपमान-विधेयकर्तृपदं—'पौरयोषितः' इत्युद्देश्योपमेयस्य कर्तृपदस्य (3) पृषतैः—करणे तृतीया । It is उपमान and विधेयपद—'लाजैः' is its उपमेय and उद्देश्यपद ।

Synonyms.—(1) पृषतैः—(III, 3) (2) ऊर्मि—(V. वीचि in I, 43).

Different meanings.—(1) ऊर्मि—'ऊर्मिः पीड़ाजवोत्कण्ठाभङ्ग-प्रकाश्यवीचिषु । वस्त्रसंकोचलेखायाम् ।' (मे)

Derivation.—(1) अवाकिरन्—अव + आ + कॄ—लङ्—अन् (2) लाजैः—(V. Sl. 10, C. II.) (3) पृषतैः—पृष् + अतच् (3rd c. p.) पृषिरञ्जिभ्यां

कित्' (ङ० १।२।११) (4) उद्धतैः—उद् + धृ + क्तः (कर्मणि. 3rd c. p.) (5) ऊर्मिः—ऋ + मिः (1sc. p.) 'अर्त्तेरुच्च' (8।88।पा०) ऋ is changed into ऊ and र् is added to it. The word ऊर्मि is both masculine and feminine.

Conjugation.—(1) कृ—(V. Sl. 10, C. II.) (2) धृ—(V. Sl. 53, C. I.)

Rhetoric.—The figure of speech is simile. पौरयोषित् is compared to क्षीरोर्मि। The words पौरयोषित् and ऊर्मि are both feminine. लाज is compared to पृषत। लाज is white, and पृषत (spray) of क्षीरसमुद्र is also white. Raghu is compared to अच्युत। So the certainty of his success is suggested.

Allusion in the last two lines of the verse.—पुरा सर्वे देवा दानवाश्च एकीभूय मन्दरं मन्थनदण्डं वासुकिञ्च रज्जुं कृत्वा कूर्मराजपृष्ठे मन्दराचलं स्थापयित्वा च अमृतलाभाय रत्नाकरं ममन्थुः। (V. Mahābhāratam, Adiparvan, Chap. XVIII. [In olden days the gods and the Asuras together churned the ocean for nectar. The mountain, Mandara, was made the churning rod, and Vāsuki, the rope. Mandara was placed on the back of the primeval tortoise.

स ययौ प्रथमं प्राचीं तुल्यः प्राचीनबर्हिषा ।
अहिताननिलोद्धूतैस्तर्जयन्निव केतुभिः ॥ २८ ॥

मूलस्य पाठान्तरम् ।

तर्जयन्—कम्पयन् Nand. (foot-notes).

Prose order.—प्राचीनबर्हिषा तुल्यः सः अनिलोद्धूतैः केतुभिः अहितान् तर्जयन् इव प्रथमं प्राचीं ययौ

Explanation by use of synonyms.—प्राचीनबर्हिषा (इन्द्रेण तदाख्येन राजविशेषेण) वा तुल्यः (सदृशः) सः (रघुः) अनिलोद्धूतैः (अनुकूलवातचालितैः) केतुभिः (ध्वजैः) अहितान् (रिपून्) तर्जयन्निव (भर्त्सयन्निव) प्रथमं (प्राक्) प्राचीं (पूर्वदिशं) ययौ (गतवान्)।

Substance.—पुरन्दरप्रतापो रघुः प्रथमं पूर्वदिशं जेतुं जगाम। पथि तस्यानुकूलः पवनो ययौ। तस्य केतवश्चैव चकम्पिरे। तैर्दृश्यमनुमीयते स्म यत् तानुग्रैरतिभयङ्करैः केतुभिस्तानरीन् तर्जन्निव स चचाल।

Change of voice.—तुल्येन तेन...तर्जयता...प्राची यये।

Synonyms.—स इति। प्राचीनबर्हिर्नाम कश्चिन्महाराज इति केचित्—प्राचीनबर्हिः—इन्द्रः—"पर्जन्यो मघवा तथा हरिहयः प्राचीनबर्हिस्तथा" इति इन्द्रपर्य्यायेषु हलायुधाभिधानात्—तेन (प्राचीनबर्हिषा) (तुल्यः) (सः) रघुः अनिलेन, अनुकूलवातेन, उद्धूतैः [अनिलोद्धूतैः] (केतुभिः) ध्वजैः (अहितान्) रिपून् (तर्जयन् इव) भर्त्सयन् इव—'तर्जिभर्त्स्योरनुदात्तेत्त्वेऽपि चक्रिणो क्लिष्टकरणेनानुदात्तत्त्वनिमित्तस्यात्मनेपदस्यानित्यत्वज्ञापनात् परस्मैपदम्' इति वामनः'—(प्रथमं) (प्राचीं दिशं) ययौ) ॥ २८ ॥

Sanjivani Explained.

प्राचीनबर्हिस्—Mallinátha takes it to mean first a king of that name. But as this monarch is not well-known, he takes the word as meaning Indra himself. Haláyudha includes प्राचीनबर्हिस् among the names of Indra. So Mallinátha does not speak without authority.

तर्जिभर्त्स्योः. * * परस्मैपदम्—The root तर्ज is भ्वादि as well as चुरादि। The भ्वादि root is परस्मैपदी, but the चुरादि one is आत्मनेपदी, because तर्ज has an अनुदात्त vowel for इत्। See notes on धारयतः in II, 25. The present participle form of the चुरादि तर्ज should be तर्जयान and not तर्जयत्। How are we to defend the form तर्जयत्? Vámana says :—'Though the चुरादि roots तर्ज and भर्त्स have अनुदात्त vowels for इत् and, therefore, should admit आत्मनेपद only, yet they become परस्मैपदी because Pánini himself

hints, by reading the root अधु as अधिङ् in धातुपाठ, that अनुदात्तेत्व or, the fact of a root having an अनुदात्त vowel for इत्, is not an obligatory cause of आत्मनेपद। What Vámana means is this. The root अध is read in धातुपाठ as अधिङ्।" Had it been read as अधि, it would have an अनुदात्त vowel इ for इत्। This would have been sufficient to make the root आत्मनेपदी। Yet he adds a ङ् to it and makes it, ङित् as well. ङित्व is another determinant of आत्मनेपद। Thus by resorting to the two determinants of आत्मनेपद, Pánini hints that अनुदात्तेत्व does not always make the root आत्मनेपदी। तर्ज being an अनुदात्तेत् root should not always be आत्मनेपदी। It may sometimes be परस्मैपदी। Of course, this being a ज्ञापकसूत्र, it is not to apply in every case. Every root having an अनुदात्त vowel for इत् should not be both आत्मनेपदी and परस्मैपदी। The optionality is व्यवस्थित। (See I, 54 for व्यवस्थित-विभाषा) The Sutra enjoining that an अनुदात्तेत् or a ङित् root should be आत्मनेपदी is "अनुदात्तङित: आत्मनेपदम्" (१।३।१२ पा. २१५७ सि.)

N. B. Bhattoji defends the present use of तर्जयन् in a different way. He takes तर्जि to be the causative form of the भ्वादि root तर्ज। Thus तर्जयन् does not mean 'menacing' but 'causing to menace'. रघु caused the flags to menace his foes. If the root be चुरादि तर्ज, केतु is करण तृतीया and रघु its कर्त्ता। If it be the भ्वादि णिजन्त form, रघु is the nominative of causation and केतु of 'reproach'. केतु cannot be कर्म of the णिजन्त तर्जि (See Remark on II, 1.) Of course, the representation of the inanimate flags as reproaching the foe is poetic.

Bengali.—ইন্দ্রতুল্য সেই রঘু অনিলকম্পিতকেতুসমূহ দ্বারা শত্রুদিগকে যেন তর্জন করিতে করিতেই প্রথমে পূর্ব্বদিগভিমুখে যাত্রা করিলেন। ২৮।

English rendering.—He, the equal of Práchinavarhis, proceeded first towards the East, reproaching his foes, as it were, with banners waved by the wind. 28.

Grammatical notes, &c., &c.

Sama'sa—(1) प्राचीनः (प्राग् भवः) बर्हिः (अग्निः) यस्य सः प्राचीनबर्हिः तेन । Agni was born before Indra. So Indra got the appellation of प्राचीनबर्हिस् । When it means the king of that name, it is to be taken as a whole word.

☞ प्राचीनबर्हिस् was the most famous of the sons of Havirdhana. He married the daughter of the sea-god and begat ten sons on her. We find the name of प्राचीनबर्हिस in वायुपुराण. He is mentioned as a great yogin. (2) न हिताः अहिताः (नञ्तत्) ताम् (3) अनिलेन—उद्धताः अनिलोद्धताः (तृतीयातत्) तैः ।

Case-ending—(1) प्रथमम्—क्रियाविशेषणम् (2) प्राचीनबर्हिषा—तुल्यशब्दयोगे तृतीया षष्ठी वा । The alternative form is प्राचीनबर्हिषः—"तुल्यार्थैरतुलोपमाभ्यां तृतीयाऽन्यतरस्याम्" (V. प्रसन्ना, Sl. 15, C. I.) (3) केतुभि.—करणे तृतीया ।

Different meanings.—(1) केतु—(II, 33).

Derivation.—(1) ययौ—या + लिट् (2) केतुभिः—चाय् + तुः (3rd c. p.) चाय् is changed into कि—'चायः किः' (उ. १।७४) (3) प्राचीम्—प्र + अञ्च + क्विन् (कर्तरि) + ङीप् (2nd. c. s.) (4) प्राचीनः—प्राच् + ख. (भवार्थे) (5) अहिताम्—हितमस्ति अस्य इति हितः । हित + अच्—(अर्श आदित्वात्, (1st c. p.) = हिताः । न + हिताः = अहिताः [2nd c. p.] (6) तर्जयन्—तर्ज (चुरादिः) + शतृ (1st c. s.) तर्ज is also भ्वादि परस्मैपदी, as, तर्जति । When it is चुरादि, it adopts the आत्मनेपदी form, as तर्जयते । How is then तर्जयन् formed? For the answer, see Sanjivani Explained. Cf. भूपालान् न तर्जयति सज्जनान् ।' (कविरहस्ये)

Conjugation.—(1) तर्ज् (to reproach)—तर्जति (भ्वा. लट्) तर्जयते (चु. लट्) तर्जतु, तर्जयताम् (लोट्) अतर्जत्, अतर्जयत (लङ्). तर्जेत्;

तर्जयेत (वि. लिङ्) ततर्ज, तर्जयाञ्चकार &c. (लिट्) तर्जिता, तर्जयिता (लुट्) तर्जिष्यति, तर्जयिष्यते (लृट्) अतर्जीत्, अततर्जत (लुङ्) तर्जयति (णिच्-लट्) अततर्जत् (णिच्-लुङ्) अतर्जि (कर्मणि लुङ्) तर्जितः (क्त) (२) या—(V. Sl. 3, C. III.).

Geography.—प्राची literally means the East. In classical Sanskrit it was used to signify the eastern or rather the south-eastern portion of the Gangetic valley, *viz.*, मगध, मिथिला, अङ्ग, वङ्ग, &c. Sometimes प्राच्य was used to mean the countries in the upper Gangetic valley, *viz.*, those lying between मगध and the plains of कुरुक्षेत्र। See Bhima's दिग्विजय in Sabháparvan in Mahábháratam. Here प्राची means merely the eastern countries.

रजोभिः स्यन्दनोद्धूतैर्गजैश्च घनसन्निभैः।
भुवस्तलमिव व्योम कुर्वन् व्योमेव भूतलम्॥ २९॥

मूलस्य पाठान्तरम्

स्यन्दनोद्धूतैः—स्यन्दनोद्धूतैः (आ.) स्यन्दनोत्कीर्णैः Nand (foot-notes), तुरङ्गोत्कीर्णैः (मु.)

Prose order.—स्यन्दनोद्धूतैः रजोभिः घनसन्निभैः गजैः च (यथाक्रमं) व्योम भुवः तलम् इव, भूतलं (च) व्योम इव कुर्वन् (ययौ)।

Explanation by use of synonyms.—स्यन्दनोद्धूतैः (रथसञ्चालनोत्थितैः) रजोभिः (धूलिपटलैः) घनसन्निभैः (वर्णतः क्रियातः परिमाणतश्च मेघतुल्यैः) गजैः (वारणैः)—यथाक्रम—व्योम (आकाशं) भुवः (पृथिव्याः) तलं (पृष्ठदेशं) भूतलं च (महीपृष्ठं च) व्योम इव (आकाशमिव) कुर्वन् (विदधत्) ययौ

Substance.—रघोर्बलं विपुलमासीत्। किम् बहुना तस्य रथसञ्चालनोत्थितं धूलिपटलं आकाशतलमिवसमाच्छादयामास यद्गगनतलं धूलिः परिपूरितं महीमयं च सत् महीतलमिव बभौ। तस्य च घोरैः कृष्णवर्णैस्तुङ्गैः गजसमूहैः पृथ्वीतलमेवं समाच्छादितम्, यत् भूतलं गगनतलमिव प्रत्यभात्—इत्थं स रघुराकाश-पृथिव्योर्वैपरीत्यं संघटयन् भयङ्करवेगेन प्राच्यानरीन् जेतुं ययौ।

Change of voice.—...कुर्वता (यया)।

Sanjivani—रजोभिरिति। किं कुर्वन्? (स्यन्दनोद्धतैः रजोभिः) घनसन्निभैः) वर्णतः क्रियातः परिमाणतश्च मेघतुल्यैः (गजैश्च)—यथाक्रमं—(व्योम) आकाशं (भुवः तलम् इव) (भूतलं) च (व्योम इव कुर्वन्)—ययौ—इति पूर्वेन सम्बन्धः ॥ २९ ॥

Sanjivani Explained.

वर्णतः क्रियातः * * मेघतुल्यैः—The poet says that the elephants of Raghu resembled the clouds Mallinātha mentions the points of resemblance. They looked like clouds in colour, act, and measure. They were as dark and as huge as the clouds. Moreover as the clouds drench the earth with rain, the elephants drenched it with the *ichor* they discharged.

Bengali.—(রঘু) রথসঞ্চালনোৎক্ষিপ্ত ধূলিপটল দ্বারা এবং মেঘতুল্য-গজসমূহদ্বারা (যথাক্রমে) আকাশকে মহীতলের ন্যায় এবং ভূতলকে আকাশতুল্য করিয়া (গমন করিতে লাগিলেন)। ২৯।

English rendering.—Making the welkin (look) like the surface of the Earth, and the surface of the Earth (look) like the welkin, with the dust raised by his cars, and with the elephants resembling clouds : 26.

Grammatical notes, &c., &c.

Sama'sa.—(1) स्यन्दनैः उद्धूतानि स्यन्दनोद्धूतानि (तृतीयातत्) तैः (2) घनस्य वा घनेन तुल्याः घनसन्निभाः (नित्यसमासः) तैः। संनिभ means तुल्य only when it forms the last component of a compound. It cannot be used independently. Amara has "स्युरुत्तरपदे त्वमी। निभसंकाशनीकाशप्रतीकाशोपमादयः" ॥ We are, therefore, to make an अस्वपद विग्रह of घनसन्निभ। Hence the Samāsa is नित्य। See notes on भूत्यर्थम् in I, 18. (3) भुवः or भुवः तलं भूतलम् (षष्ठीतत्) तत्।

Case-ending.—(1) रजोभिः and गजैः—करणे तृतीया (2) भूतलं and व्योम—शतृप्रत्ययान्त 'कुर्वन्' योगे द्वितीया। See "न लोकाव्ययनिष्ठाखलर्थतृनाम्" (V. notes on सागरम्, Sl. 2, C. I.).

Synonyms.—(1) व्योमन्—'द्योदिवौ द्वे स्त्रियामभ्रं व्योम पुष्करमम्बरम्। नभोऽन्तरीक्षं गगनमनन्तं सुरवर्त्म खम्। वियद् विष्णुपदं वा तु पुंस्याकाशविहायसी॥' (अ०) (2) गज—(V. द्विप, Sl. 32, C. III.) (3) स्यन्दन—(V. रथ, Sl. 47, C. III.) (4) रजस—(V. पांशु in II, 2).

Different meanings.—(1) रजस—'रजः क्लीवं गुणान्तरे। आर्तवे च परागे च रेणुमात्रेऽपि दृश्यते।' (मे.) (2) व्योमन्—'व्योम वारिणि चाकाशे भास्करस्यार्चनाश्रये' (मे.) (3) घन—V. Sl. 37, C. III.)

Derivation.—(1) स्यन्दनः—स्यन्द + युच—''चलनशब्दार्थादकर्मकाद्युच्' (३।२।१४८, पा. २९९८ सि. [Roots having the sense of 'to move' or of 'to make sound' admit युच् in कर्तृवाच्य if they be intransitive. स्यन्द means 'to move.' So युच् is added to it in the कर्तृवाच्य.] (2) उद्धतैः—(V. Sl. 27, C. IV.) (3) गजैः—गज् + अच् (3rd c. p.) (4) सन्निभैः—सम् + नि + भा + कः (कर्तरि, 3rd c. p.) (5) व्योम—व्ये (अ) + मन् (निपात्यते 'नामन्सीमन्—' (उ० ४।१५०)) (6) कुर्वन्—कृ + शतृ (1st c. s.)

Conjugation.—(1) कृ—V. Sl. 15, C. I.) कुर्वन्—''धातुसम्बन्धे प्रत्ययाः' (३।४।१, पा० २८२९ सि०) इति सूत्रादनीते शतृप्रत्ययः। (V. कुर्वन् in II, 46).

Remark.—Cháritravardhana and others read the following verse after the present one :—

पुरोगैः कलुषास्तस्य सह प्रस्थायिभिः कृताः।
पश्चात् प्रयायिभिः पङ्काश्चक्रिरे मार्गनिम्नगाः॥

प्रतापोऽग्रे ततः शब्दः परागस्तदनन्तरम्।
ययौ पश्चाद्रथादीति चतुस्कन्धेव सा चमूः॥ ३० ॥

*मूलस्य पाठान्तरम्।

रथादीति—रथानीकम् (चा.)

Prose order.—अग्रे प्रतापः ततः शब्दः तदनन्तरं परागः पश्चात् रथादि—इति चतुस्कन्धा इव सा चमूः ययौ।

Explanation by use of synonyms.—अग्रे (प्राक्) प्रतापः (तेजोनामा) ततः (तत्परं) शब्दः (सेनाकलकलः) तदनन्तरं (ततः) परागः (धूलिपटलः) पश्चात् (तत्परं) रथादि (रथाश्वादिकं चतुरङ्गबलम्) इति (अनेन प्रकारेण) चतुस्कन्धा इव (चतुर्व्यूहा इव) सा चमूः (सैन्यं) ययौ (चचाल)।

Substance.—तत् च सैन्यं किम्भूतं ययौ तदाह। अग्रे रघोः प्रतापवार्त्ता ततः सर्वजनभयोत्पादकः सेनाकोलाहलः प्रससार। तदनु रथचक्रोत्थितः दिङ्मण्डलव्यापी धूलिपटलः नभस्तारमैत। तत्पश्चात् रथाश्वादिकं चतुरङ्गबलमगात्। इत्थं सा सेना चतुर्धा विभिन्नेव चचाल।

Change of voice.—...प्रतापेन...शब्देन...परागेण...रथादिना...चतुस्कन्धया...तया चम्वा ययौ।

Sanjivani.—प्रताप इति। (अग्रे) (प्रतापः) तेजोविशेषः—"स प्रभावः प्रतापश्च यत्तेजः कोशदण्डजम्" इत्यमरः (Cole. p. 192) (ततः) (शब्दः) सेनाकलकलः (तदनन्तरं) (परागः) धूलिः—"परागः पुष्परजसि धूलिस्नानीययोरपि" इति विश्वः—(पश्चात्) (रथादि) रथाश्वादिकं चतुरङ्गबलम् (इति) इत्थं (चतुःस्कन्धा इव) चतुर्व्यूहा इव—"स्कन्धः प्रकाण्डे कायेऽंशे विज्ञानादिषु पञ्चसु। नृपे समूहे व्यूहे च।" इति हैमः—(सा चमूः ययौ)—रथानीकमिति पाठे 'इति' शब्दाध्याहारेण योज्यम्॥ ३० ॥

Bengali.—অগ্রে প্রতাপ, তৎপরে কলকলশব্দ, তদনন্তর ধূলিপটল, পশ্চাৎ রথাদি, এইরূপে চতুরংশে বিভক্ত হইয়াই যেন সেই সেনা গমন করিতে লাগিল। ৩০।

English rendering.—With prestige at the fore-front, then the uproar, after that the dust, and then the force consisting of cars and the rest, that vast army proceeded as if in four divisions. 30.

Grammatical notes, &c., &c.

Sama'sa.—(1) प्रकृष्टः तापः प्रतापः (प्रादि) (2) परा (प्रकर्षेण) गच्छति (वायुसाहाय्येन उड्डीयते) इति परागः (उपपदतत्) (3) अविद्यमानम् अन्तरं यस्मिन् कर्मणि तत् अनन्तरम् or अविद्यमानान्तरम् (बहु) तस्य अनन्तरं तदनन्तरम् (षष्ठीतत्) (4) रथाः आदयः यस्य तत् रथादि (बहु)* (5) चत्वारः स्कन्धाः यस्याः सा चतुःस्कन्धा (बहु)

Case-ending.—(1) अग्रे—औपश्लेषिकाधिकरणे सप्तमी (2) ततः—अव्ययं, औपश्लेषिकाधिकरणे सप्तमी (3) तदनन्तरम्—क्रियाविशेषणम् (4) पश्चात्—अव्ययं, औपश्लेषिकाधिकरणे सप्तमी (5) इति—अव्ययं प्रस्थानक्रियायाः विशेषणम्।

Synonyms.—(1) पराग—'परागः सुमनोरजः' (अ.) (2) चमू—(V. सेना, Sl. 19, C. I.)

Different meanings.—(1) स्कन्ध—V. Sanjivani.) (2) पराग—'परागः कौसुमे रेणौ धूलिस्नानीययोरपि। गिरिप्रभेदे विख्यातावुपरागे च चन्दने॥' (मे.) (3) चमू—'चमूः सेनाविशेषे च सेनामात्रे च योषिति।' (मे.)

उपराग = eclipse.

Derivation.—(1) चमूः—चम् + ऊ—चमति (भक्षयति, नाशयतीत्यर्थः) अवन् इति—'कृषिचमितनि—' (उ. १।८१) (2) परागः—परा + गम् + डः—"अन्येष्वपि दृश्यते" (३।२।१०१ पा. ३०११ सि.) (V. notes on परिखीकृत—, Sl. 30, C. I.) (3) प्रतापः—प्र + (तप् + णिच् =) तापि + घ. (करणे) "पुंसि संज्ञायां घः प्रायेण" (३।३।११८ पा. ३२८६ सि.) or प्र + तप् + घञ् (भावे) [V. R. T. of Amarakos'a, N. S. P. Ed. p. 312.] (4) ययौ—या + लिट्—णल् (5) स्कन्धः—स्कन्द् + घञ् (करणे)। The द of the root is

changed into ध्। 'स्कन्देश्च स्वाङ्गे' (उ. ४।२०७) इति बाहुलकादनमुन्यपि धः [Although असुन् is not added to स्कन्द् and स्कन्ध does not the shoulders, yet द् of the root is changed into ध्]

Conjugation.—(1) या—(V. Sl. 3, C. III.).

Force of इति is प्रकार—'इति प्रकरणे हेतौ प्रकाशादिसमाप्तिषु। निदर्शने प्रकारे स्यादनुकर्षे च सम्मतम्॥' (वि.)

मरुपृष्ठान्युदम्भांसि नाव्याः सुप्रतरा नदीः ।
विपिनानि प्रकाशानि शक्तिमत्त्वाच्चकार सः ॥ ३१ ॥

Prose order.—शक्तिमत्वात् सः (रघुः) मरुपृष्ठानि उदम्भांसि नाव्याः नदीः सुप्रतराः, विपिनानि प्रकाशानि चकार। Mallinatha places शक्तिमत्वात् after सः।

Explanation by use of synonyms.—शक्तिमत्वात् (समर्थत्वात् धनजनसामर्थ्यात्) सः (रघुः) मरुपृष्ठानि (धन्वतलानि, निर्जलस्थलानीति यावत्) उदम्भांसि (उद्गतजलानि), नाव्याः (नौभिस्तार्याः) नदीः (सरितः) सुप्रतराः (सुखेन तरणयोग्याः), विपिनानि (वनानि) प्रकाशानि (प्रकटानि निर्वृक्षाणि इति यावत्) चकार (कृतवान्)।

Substance.—तस्य नृपस्य ईदृशी शक्त्युत्कर्ष आसीत् यत् दिग्विजययात्रायां पथि मरुभूमौ स सलिलमुत्पादयामास ; अगाधसलिलाः दुस्तर्योनदीः सेतुबन्धादितःसुखेन तरणयोग्याश्चकार ; दुर्गमानि तरुभिनिरन्तराणि वनानि निर्वृक्षाणि कृत्वा स तस्य सुगमं पन्थानं रचयामास। दिग्विजयप्रयाणपरस्य तस्य किमपि प्रत्यूहाय नाकल्पत।

Sanjivani.—(सः) रघुः (शक्तिमत्त्वात्) समर्थत्वात् (मरुपृष्ठानि) निर्जलस्थानानि—"समानौ मरुधन्वानौ" इत्यमरः (Cole. p. 74).—(उदम्भांसि) उद्भूतजलानि चकार। (नाव्याः) नौभिस्तार्याः (नदीः)—"नाव्यं त्रिलिङ्गं नौतार्ये" इत्यमरः (Cole. p. 62)—"नौवयो विषमूल—" (४।४।९१पा. १६४३ सि.) इत्यादिना यत्प्रत्ययः—(सुप्रतराः) सुखेन तार्याश्चकार। (विपिनानि) अरण्यानि—

"अटव्यरण्यं विपिनम्" इत्यमरः (Cole. p. 86)—(प्रकाशानि) निर्वृक्षाणि चकार। प्रभुत्वोत्कर्षात् तस्यागम्यं किमपि नासीत् इति भावः ॥ २१ ॥

Sanjivani Explained.

"नाव्यं * * नौतार्य्यं"—नाव्य means capable of being crossed by boat'. It admits of three genders.

"अटव्यरण्यं विपिनम्"—अटवी, अरण्य, and विपिन are synomymns. The rest of the पर्याय is 'गहनं काननं वनम्।'

प्रभुत्वोत्कर्षात् * * नासीत्—In consequence of his excessive power there was no quarter which was unapproachable to him. No common king could have done these wonderful things.

"नौवयोधर्मविषमूल—"The Sutra in full is "नौवयोधर्मविषमूलमूल-सीतातुलाभ्यस्तार्य्यतुल्यप्राप्यवध्यानाम्यसमसमितसम्मितेषु"। It means that नौ, वयस्, धर्म, विष, मूल, मूल, सीता and तुला admit the nominal affix यत् in the sense of तार्य्य, तुल्य, प्राप्य, वध्य, आनाम्य (brought under control), सम, समित (levelled) and सम्मित (equalled). E. g., नावा तार्य्यं नाव्यम्; वयसा तुल्यः वयस्यः (of the same age). धर्मेण प्राप्यम् धर्म्यम्। विषेण वध्यं विष्यम्; मूलेन आनाम्यः समो वा मूल्यः।, मूलेनानाम्यः =to be subjugated by the potency of roots. सीतया समितं सीत्यम् क्षेत्रम् (plain levelled by the ploughshare). तुलया संमितम् तुल्यम्।

Bengali.—তিনি শক্ত্যুৎকর্ষহেতু মরুস্থল হইতে জলোৎপাদন, নৌকাদ্বারা তরণীয় নদীসকলকে সুখোত্তরণযোগ্য, এবং অরণ্যসকল বৃক্ষরহিত করিলেন। ২১।

English rendering.—In consequence of his might (resourcefulness) he made the surfaces of deserts covered with water; rivers crossable by boats, easily fordable; and forests, denuded (of trees). 31

Grammatical notes, &c., &c.

Sama'sa.—(1) मरूणां पृष्ठानि मरुपृष्ठानि (षष्ठीतत्) तानि (2) उद्गतम् अम्भः येभ्यः तानि उदम्भांसि (बहु) प्रादिभ्योधातुजस्य—' V. notes on उद्बाहुः, Sl. 3. C. I.) (2) प्रकर्षेण तीर्य्यन्ते इति प्रतराः (उपपदतत्) सुखे प्रतराः सुप्रतराः (सुपसुपा) ताः (3) काशन्ते इति काशानि, प्रकर्षेण काशानि प्रकाशानि (प्रादिः) तानि ।

Case-ending.—(1) शक्तिमत्त्वात्—हेतौ पञ्चमी (2) नाव्याः and सुप्रतराः are adjectives of नदीः (3) उदम्भांसि—Adjective of मरुपृष्ठानि (4) प्रकाशानि—Adjective of विपिनानि ।

Synonyms.—(1) अम्भम्—(V. Sl. 89, C. I.)

Different meanings.—(1) मरु—'मरुर्ना गिरिधन्वनोः' (मे.) (2) शक्ति—V. Sl. 24, C. IV. (3) प्रकाश—'प्रकाशोऽपि प्रसिद्धे स्यात् प्रहासातपयोः स्फुटे (वि).

Derivation.—(1) मरुः—मृ + उः—म्रियन्तेऽस्मिन् भूतानि इति See 'भृमृशी'—(उ० १।७) (2) अम्भः—(V. Sl. 89, C. I. (3) नाव्याः—नौ + यत् (2nd c. p.) (4) सुप्रतराः—सु + प्र + तॄ + खल् (कर्मणि, 2nd C. p.) (5) विपिनानि—वेप + इनन् (2nd C. P.) The penultimate vowel of the roots is shortened by the rule :—वेपितुह्योर्ह्रस्वश्च' (उ० २।५२। (6) प्रकाशानि—प्र + काश् + अच् or घञ् (2nd c. p.) (7) शक्तिमत्वात्—शक्ति + मतुप् = शक्तिमत् ; शक्तिमत् + त्व (भावे, 5th C. S.) (8) चकार—कृ + लिट्—णल् ।

Conjugation.—(1) कृ—(V. Sl. 15, C. I).

Remark.—शक्तिमत्त्वात् is translated by Mallinathátha as शक्त्युत्कर्षात्। One of the Calcutta editors takes शक्त्युत्कर्ष to mean योगबल । It is certainly a mistake. If Raghu had योगबल, he would not have marched with a vast army for subjugating his

enemies. He would have acheived his purpose by a fiat of his will and without any trouble. Therefore, by प्रभावनकर्ष is meant शक्तिप्राबल्य or excess of power.

The same editor derives सुप्रतरा, and gives its वाक्य thus :— 'सुप्रतरन्ति सुखेन प्रतरन्ति ताः इति सु + प्र + तृ + खल्—कर्मणि।' It is not the वाक्य of कर्मकाण्ड which would be सुखेन प्रतीर्य्यन्ते इति सुप्रतराः।

स सेनां महतीं कर्षन् पूर्वसागरगामिनीम्।
बभौ हरजटाभ्रष्टां गङ्गामिव भगीरथः॥ ३२॥

Prose order.—पूर्वसागरगामिनीं महतीं सेनां कर्षन् सः हरजटाभ्रष्टां गङ्गां (कर्षन्) भगीरथः इव बभौ। Mallinātha places 'पूर्वसागरगामिनीम्' after 'सेनाम्'।

Explanation by use of synonyms.—पूर्वसागरगामिनीं (पूर्वसमुद्रगमनोद्यतां) महतीं (विशालां) सेनां (चमूं) कर्षन् (नयन्) सः (रघुः) हरजटाभ्रष्टां (शिवमस्तककेशनिर्गतां) गङ्गां (सुरधुनीं कर्षन्) भगीरथः (दिलीपसूनुः) इव (यथा) बभौ (शुशुभे)।

Substance.—इमां विपुलां वाहिनीं रघुः पूर्व्वसागराभिमुखं निनाय। सा अप्रतिहतवेगा महती वर्द्धयिनी पूर्व्वसागरगामिनी अप्रतिबद्धा गङ्गेव ददृशे। रघुरपि तां सेनां नयन् हरजटास्खलितां गङ्गां पूर्व्वाभिमुखं नयन् स्वस्य पूर्व्वपितामहो भगीरथ इव रराज।

Change of voice.—...कर्षता तेन... कर्षता) भगीरथेन...बभे।

Sanjivani.—स इति। (महतीं सेनां पूर्व्वसागरगामिनीं कर्षन्) (सः) रघुः—हरस्य जटाभ्यः भ्रष्टां [हरजटाभ्रष्टां] (गङ्गां)—कर्षन्—सापि पूर्व्वसागरगामिनी—(भगीरथ इव बभौ)। भगीरथोनाम कश्चित् कपिलदग्धानां सागराणां नप्ता तत् पावनाय हरकिरीटाद् गङ्गां प्रवर्त्तयिता राजा, यत्सम्बन्धाद् गङ्गा च भागीरथीति गीयते॥ ३२॥

Sanjivani Explained.

भगीरथो नाम * * * भागीरथीति गीयते—Bhagiratha was a king (of Ikshaku's race). He was the great-grand-son of Sagara whose sons were reduced to ashes by the great sage, Kapila, by the fire of his wrath. For the salvation of their souls Bhagiratha brought down mother Gangá from Heaven on the Earth, by propitiating her through his penances. Gangá was afraid that the Earth would not be able to bear the momentum of her fall from the heavens. Her force could be borne by S'iva only. She, therefore, instructed Bhagiratha to propitiate S'iva. Bhagiratha did it and S'iva agreed to receive the falling Gangá on his head. Everything occurred as arranged. Gangá fell down from the welkin. S'iva received her. She was caught in the basin formed with his matted locks. The deity had to take out a lock of his hair to give passage to her whence she fell down on Earth. Bhagiratha led her along his path. He proceeded towards the East and she followed. At last he came to the skirts of the Eastern sea. There lay the remains of his forefathers, the sons of Sagara. They were all sanctified with the waters of Gangá. Gangá is called Bhágirathi, because she was brought down by Bhagiratha.

Bengali.—তিনি বিপুলসেনা পূর্ব্বসাগরাভিমুখে পরিচালিত করাতে (পূর্ব্বসাগরাভিমুখে) হরজটাভ্রষ্টগঙ্গা পরিচালক ভগীরথের ন্যায় শোভা পাইতে লাগিলেন। ৩২।

English rendering.—Leading that vast army which was moving towards the eastern sea, he shone like *Bhagiratha* leading Gangá dropped from the matted locks of Hara.—32.

Grammatical notes, &c., &c.

Sama'sa.—(1) सागरः (V. Sl. 2. C. I,) पूर्वः सागरः पूर्वसागरः (कर्मधा) तं गच्छतीति पूर्वसागरगामिनी(उपपदतत्) ताम् or पूर्व्वसागरं गामिनी

ताम् "गतिगाम्यादीनामुपसंख्यानम्" इति वार्त्तिकेन द्वितीयातत् पुरुषः (V. द्वितीयगामी in III. 40). (2) हरस्य जटाः हरजटाः (षष्ठीतत्) ताभ्यःभ्रष्टा हरजटाभ्रष्टा पञ्चमीतत्) ताम्

Case-ending.—(1) सः—उद्देश्य and उपमेय कर्तृपद (3) सेनाम्—उद्देश्य and उपमेय कर्मपद (4) गङ्गाम्—विधेय and उपमान कर्मपद।

Synonyms.—(1)सेना—V. Sl. 19, C. I.) (2) सागर—V. समुद्र, Sl. 5—9, C. I) (3) गङ्गा—'गङ्गा विष्णुपदी जह्नुतनया सुरनिम्नगा। भागीरथी त्रिपथगा त्रिस्रोता भीष्मसूरपि॥ (अ०)।

Different meanings.—(1) जटा—'जटा लग्नकचे मूले मांस्यां प्रबेपुनर्जटी' (मे०) (2) हर—'हरो नागकरभयोः वैश्वानरेऽपि च' (मे०)।

Derivation.—(1) हरः—हृ + अच (2) सेनाम्—(V. Sl. 19, C. I.) (3) सागर—V. Sl. 2, C. I.) (4) पूर्वसागरगामिनीम्—पूर्वसागर + गम् + णिनिः (कर्त्तरि तान्च्छील्याथ वा) + ङीप् (2nd c. s. [V. notes on प्रार्थी in I, 3.] (5) वभौ—भा + लिट्—णल् (6) जटा—जन् + टन् + टाप्—'जनेष्टन् लोपश्च' (उ०४।१३०) (7) भ्रष्टाम्—भ्रन्श् + क्तः (कर्त्तरि) + टाप् (2nd c. s.) (8) गङ्गाम्—गम् + गन् + टा (2nd c. s. 'गन् गम्यद्योः' (उ० १।१२३)। (9) कर्षन्—कृष् + शत्र 1st c. s.)

Conjugation.—(1)भा—(*V.* Sl. 16, C. II.) (2) कृष्—(*V.* Sl. 27, C. II.)

Rhetoric.—The figure of speech is simile. Raghu is compared to भगीरथ, and सेना to गङ्गा। The point of resemblance between the first pair depends upon that of the second. सेना and गङ्गा resemble each other in vastness and movement towards the direction of पूर्वसागर।

Allusion.—सगरनृपात् वंशजान् प्राक् कपिलशापदग्धानां षष्टिसहस्रसगरपुत्राणामुद्धाराय कठोरतपश्चरणं विधाय गङ्गामानेतुं न शशाक। ततस्तत्

पुत्रो दिलीपस्तदर्थं विलपन् दुष्करं तपस्तेपे । सोऽपि निष्फलोऽभवत् । तस्य पुत्रो भगीरथः कठोरतपस्यया चतुराननं गङ्गां च प्रसादयामास । ब्रह्मा गङ्गायाः पृथ्वीगमनमनुमेने । गङ्गा च स्वर्गादवतरणे सम्मता बभूव । मत्पतनवेगधारणक्षमो हरएव इत्युक्तायां तस्यां भगीरथो महादेवं प्रीणयितुं तपश्चचार । भगीरथस्य कठोरतपसा प्रीतः शङ्करः गङ्गां शिरसि धारयामास । तां च बहुवत्सरान् स्वजटाजूटमध्ये निबध्य संरक्षितवान् । भगीरथस्तु गङ्गां नावलोक्य पुनर्महेश्वरं प्रसादयितुमारेभे । तस्य स्तवेन प्रसन्नः शङ्करः तां विन्दुसरसि निचिक्षेप । सापि शङ्करेण मुक्ता स्रोतःसप्तकेन विभज्यमाना भगीरथप्रदर्शितमार्गमनुसृत्य पातालं प्रविवेश । तत्पावनजलेन पतितसगरपुत्राणां भस्मान्याप्लावितानि । ततस्ते सागराः कर्तोद्धाराः दिव्यं विमानमधिरुह्य दिवं ययुः । ब्रह्मा तु प्रीतो भगीरथम् उवाच—भोः नरशार्दूल ! यावत् सागरे जलं स्थास्यति, तावत् इमे सगरपुत्रा दिवमधिवत्स्यन्ति । गङ्गेयं ते कन्यास्वरूपा भविष्यति । त्वन्नाम्ना च इयं भुवि भागीरथीत्याख्यां च गमिष्यति । पथत्रयेण प्रवहितत्वादस्या नामान्तरं त्रिपथगापि भवेत् । इति बहुविधं मधुरवचमुक्त्वा निशम्य भगवान् कमलयोनिरन्तर्दधे । (V. Rámáyanam, A'dikándam, cantos 39—42. See also Allusions under I, 2 ; and III, 50.)

Geographical notes.—By पूर्वसागर the bay of Bengal is meant. It need not be said that the Ganges in a hundred currents falls into that bay. The confluence of Gangá and the bay is, to this day, a place of pligrimage to millions of Hindus.

त्याजितैः फलमुत्खातैर्भग्नैश्च बहुधा नृपैः ।
तस्यासीदुल्बणो मार्गः पादपैरिव दन्तिनः ॥ ३३ ॥

Prose order.—फलम् त्याजितैः उत्खातैः बहुधा भग्नैः नृपैः, पादपैः दन्तिनः इव तस्य मार्गः उल्बणः आसीत् ।

Explanation by use of synohyms.—फलं (नृपपक्षे,—वित्तं राज्यं वा, पादपपक्षे,—प्रसवं) त्याजितैः (विहापितैः) उत्खातैः (नृपपक्षे,—स्वपदात् च्यावितैः ; पादपपक्षे,—उत्पाटितैः) बहुधा (बहुप्रकारेण) भग्नैः (नृपपक्षे,—

रथोज्झितैः,—पादपपक्षे,—छिन्नविच्छिन्नैः) नृपैः (नरपतिभिः), पादपैः (वृक्षैः) दन्तिनः (गजस्य) इव (यथा) तस्य (रघोः) मार्गः (पन्थाः) उल्बणः (प्रकाशः) आसीत् (अभूत्)।

Substance.—सम्प्रति रघोः गमनपथं वर्णयति। स पन्थाः कथं लक्षितोऽभूत्। तदाह धनहानैर्भ्रष्टराज्यैर्विद्रुतैश्च नृपैः स व्यक्तोऽभूत्, यथा गजमार्गो फलशून्यैरुत्पाटितैः भग्नैः द्रुमैः व्यक्तो भवति। वनेनोभां भवति यत् वारणो हि गमनकाले सम्मुखस्थितान् कांश्चित् पादपान् फलशून्यान् विधत्ते, कांश्चिद् वा समूलमुत्पाटयति, कांश्चिद् वा बहुधा भनक्ति। इत्थं स गमनमार्गे सुखसञ्चारं विधाय सानन्दं गच्छति। रघुरपि दिग्विजयप्रयाणे कांश्चिद् नृपान् वित्तशून्यान् कांश्चिद् वा भ्रष्टराज्यान्, कांश्चिद् वा रणे जित्वा हताहतान् विधाय स्वस्य गमनमार्गं प्रकटयाञ्चकार। रघुहि गजविक्रम आसीत्।

Change of voice.—मार्गेण उल्बणेन अभूयत।

Sanjivani.—आजितैरिति। (फल) लाभं—हस्तपक्षे,—प्रसवश्च,—"फलं फले धने बीजे निष्पत्तौ भोगलाभयोः" इति केशवः—(आजितैः)—अजेर्ण्यन्तात् द्विकर्मकादप्रधाने कर्मणि क्तः—(उत्खातैः) स्वपदात् च्यावितैः—भग्नैः उत्पाटितैः—(बहुधा) (भग्नैः) रथोज्झितैः—भग्नैः छिन्नैः (नृपैः), (पादपैः (दन्तिनः) गजस्य इव (तस्य रघोः मार्गः) उल्बणः) प्रकाशः (आसीत्)। "प्रकाशं प्रकटं स्पष्टम् उल्बणं विशदं स्फुटम्" इति यादवः॥ ३३॥

Sanjivani Explained

"फलं फले * * * भोगलाभयोः"—फल means फल (fruit), धन (wealth), बीज (seed), निष्पत्ति (decision), भोग (enjoyment), as well as लाभ (profit).

प्रकाशम् * * * स्फुटम्—प्रकाश, प्रकट, स्पष्ट, उल्बण, विशद, and स्फुट are synonyms.

'अजेर्ण्यन्तात्......कर्मणि क्तः'—अज is द्विकर्मक। क्त is added to it in कर्मवाच्य। It speaks of its अप्रधानकर्म। So आजित should be

the qualitative of the अप्रधानकर्म्म of त्याजि। फल is, here, the प्रधान and वृक्ष the अप्रधानकर्म्म। Hence त्याजित is the verbal adjecttive of वृक्ष and not of फल which is governed by त्याजित।

N. B. Strictly speaking, the causative त्याजि should not be द्विकर्म्मक, for the Sutra "गतिबुद्धिप्रत्यवसानार्थशब्दकर्म्माकर्म्मकाणामणिकर्त्ता स णौ" (V. notes under II, 1) or "हृक्रोरन्यतरस्याम्" (१।४।५३ पा. ५४१ सि.) or any Várttika does not enjoin that the अणिकर्त्ता of त्याजि should be its कर्म्म in णिजन्त form. Yet Kálidása uses it as द्विकर्म्मक। Perhaps, he takes त्याजि to be a गत्यर्थ root. In deference to Pánini he takes ग्राहि as well to be द्विकर्म्मक। If it be द्विकर्म्मक, the क्त of त्याजि should speak of its अप्रधानकर्म्म। (V. "ण्यन्ते कर्त्तुश्चकर्म्मणः" under notes on जायाप्रतिग्राहितगन्धमाल्याम् in II, 1.)

Jnánendra remarks—इह "गतिबुद्धीतिसूत्रेण यस्य कर्म्मसंज्ञा तद्गौणम्।" That is, the गौणकर्म्म of a णिजन्त root, which receives कर्म्मसंज्ञा by the Sutra "गतिबुद्धि &c."

फलं त्याजितैः पादपैः नृपैर्वा—In अणिजन्तकाल the कर्त्तृवाच्य form was नृपाः पादपा वा फलं तत्यजुः। In णिजन्तकाल the कर्त्तृवाच्य form of the same becomes स नृपान् पादपान् वा फलं त्याजितवान्। The कर्म्मवाच्य form of the latter is तेन नृपाः पादपाः वा फलं त्याजिताः।

Bengali.—হস্তীর গমন পথ যেমন ফলহীন, উৎপাটিত এবং বহুপ্রকারে ছিন্নবিচ্ছিন্ন বৃক্ষদ্বারা প্রকটিত হয়, সেইরূপ রঘুর পথও ধনশূন্য রাজ্যচ্যুত রণে ছিন্নবিচ্ছিন্ন নৃপতি দ্বারা প্রকটিত হইয়াছিল। ৩৩।

English rendering.—His route was discernible by kings forced to part with (their) wealth, dethroned, and discomfited in diverse ways, like that of a tusker by trees divested of fruit, uprooted, and broken.

N. B. This verse has been misunderstood and mistrans-

lated by nearly all the editors. The fact is, उल्लय which Mallinatha explains is equivalent to प्रकाश, does not mean 'made clear' or 'left open,' but discernible' or 'marked out.'

Grammatical notes, &c. &c.,

Samasa.—(1) नृन् पाति इति नृपाः (उपपदतत्) (2) पादैः (मूलैः) पिबन्ति (आकर्षन्ति रसम्) इति पादपाः (उपपदतत्) तैः।

Case-ending.—(1) फलम्—अनुक्तं प्रधानकर्मणि द्वितीया (2) बहुधा—अव्यय, क्रियाविशेषणम् (3) नृपैः—करणे तृतीया—It is here उद्देश्य and उपमेयपद (4) पादपैः—करणे तृतीया—It is विधेय and उपमानपद of नृपैः (5) तथ्य and दर्शितः—नेपथ्य 'मार्गः' इत्यनेन सम्बन्धः—तथ्य is the उद्देश्य and उपमेयपद having दर्शितः for its विधेय and उपमानपद (6) व्याजितैः, उत्खातैः and भग्नैः are adjectives, qualifying नृपैः and पादपैः।

Synonyms.—(1) दर्शितम्—(V. विप. Sl. 32, C. III. (2) पादप—(V. अनोकह in II, 13.) (3) मार्ग "अयनं वर्त्म मार्गाध्वपन्थानः पदवी सृतिः" (अ.

Different meanings.—(1) मार्ग—V. Sl. 2, C. III. (2) पादप—'पादपः पादपीठे स्यात् पादकार्यो च पादपा' (वि.) (3) फल—(V. Sanjivani.)

Derivation.—(1) व्याजितैः—व्यज् + णिच्—) व्याजि + क्त (कर्मणि, 3rd c. p.) (2) उत्खातैः—उत् + खन् + क्तः (कर्मणि, 3rd c. p.) The न् of the खन् is changed into आ in alliance with the affix क्त, which is a झल् कित्। [The consonants except the fith letter of each class (वर्ग) and य, व, र and ल are called झल्]। "जनसनखनां सन्झलोः" (६।४।४२। पा. २५०४ सि.) enjoins that आ is the अन्तादेश of जन्, सन् and खन्, *i.e.*, आ is substituted for the last letter of these roots if the affix सन् or a कित् or ङित् affix beginning with झल् is added. (3) भग्नैः—भञ्ज् + क्तः (कर्मणि, 3rd c. p.) (4) बहुधा—बहु + धाच्

(प्रकारार्थे) (5) आसीत्—अस् + लङ्—तिप् (6) उल्बणः—उत् + वण् + अच्—पृषोदरादित्वात्—उदः तकारस्य लत्वम् । त of the prefix उत् is changed into ल् । (7) मार्गः—मृज् + घञ् (8) पादपैः— पाद + पा + कः (3rd c. p.) "आतोऽनुपसर्गे कः" (३।२।३। पा. २९१५, सि.) (9) दन्तिनः—दन्त + इनि (अतिशायनार्थे, 6th c. s.) See 'भूमनिन्दा &c.' under the notes on बुद्धिमति. Sl. 12, C. I.)

Conjugation.—(1) भञ्ज्—(V. Sl. 5-9, C. I.) (2) अस्—(V. Sl. 16, C. III.)

पौरस्त्यानेवमाक्रामंस्तांस्तान् जनपदान् जयी ।
प्राप तालीवनश्याममुपकण्ठं महोदधेः ॥ ३४ ॥

Prose order.—जयी पौरस्त्यान् तान् तान् जनपदान् एवम् आक्रामन् तालीवनश्यामं महोदधेः उपकण्ठं प्राप । Mallinātha places 'एवम्' before 'पौरस्त्यान्' ।

Explanation by use of synonyms.—जयी (जयशीलो रघुः) पौरस्त्यान् (प्राच्यान्) तान् तान् (सर्वान्) जनपदान् (देशान्) एवम् (अनेन प्रकारेण) आक्रामन् (पराभवन्) तालीवनश्यामं (तालतरुसमूहैर्नीलवर्णं) महोदधेः (महार्णवस्य) उपकण्ठम् (अन्तिकं) प्राप (आससाद) ।

Substance.—जयशीलो रघुः क्रमेण निखिलान् प्राच्यजनपदान् विजिगाय । तांश्चातीत्य महार्णवस्य तालतरुनिचयैः श्यामीकृतं तटमुपागमत् ।

Change of voice.—जयिना...आक्रामता तालीवनश्यामः...उपकण्ठः प्रापि ।

Sanjivani.—पौरस्त्यानिति । (जयी) जयनशीलः—"जिदृक्षिविश्री—" (३।२।१५७। पा. ३१३७ सि.) इत्यादिना इनिप्रत्ययः—सः रघुः (एवं)—पुरः भवान् (पौरस्त्यान्) प्राच्यान्—"दक्षिणापश्चात्पुरसस्त्यक्" (४।२।९८ पा. १३१८ सि.) इति त्यक्प्रत्ययः—(तान् तान्) सर्वान् इत्यर्थः—वीप्सायां द्विरुक्तिः—(जनपदान्) देशान्

(आक्रामन्) तालीवनैः श्यामं [तालीवनश्यामं] (महोदधेः (उपकण्ठम्) अभिकं (प्राप) ॥ ३४ ॥

Sanjivani Explained.

"जिदृक्षिविश्री—"—The Sutra in full is "जिदृक्षिविश्रीण्वमाव्यथाभ्यमपरिभूप्रसूभ्यश्च" (३।२।१५७ पा. ३१३७ सि.) It means the root जि, दृ, क्षि, श्री preceded by वि, इ(ण्), वम्, व्यथ् preceded by नञ्, भ्यम् preceded by नञ्, and भ by प्र admit इनि in कर्तृवाच्य। E. g. जयी, दरी, क्षयी, विश्रयी, अत्ययी, वमी, अव्ययी, अभ्यमी, परिभवी and प्रसवी।

"दक्षिणापश्चात्पुरसस्त्यक"—दक्षिणा, पश्चात् and पुरस् admit त्यक् in the sense of भव। E. g. दाक्षिणात्य, पाश्चात्य and पौरस्त्य। दक्षिणा is an आदन्त अव्यय।

Bengali—জয়শীল রঘু এইরূপে পূর্ব্বদিগস্থিত জনপদসমূহ জয় করিয়া তালবনসমূহ দ্বারা শ্যামবর্ণ মহাসমুদ্রের তটদেশ প্রাপ্ত হইলেন। ৩৪।

English rendering.—Thus invading all the eastern localities one after another, the (ever) victorious one arrived at the coast of the great ocean, dark with forests of palmyra. 34.

Grammatical notes &c., &c.

Sama'sa.— 1) जनः पदं (वस्तु) यत्र ते जनपदाः (बहु) तान् (V. R. T. Amarakos'a, N. S. P. 128.) (2) तालीनां वनं तालीवनम् (षष्ठीतत्) तेन श्यामः तालीवनश्यामः (तृतीयातत्) तम् (3) उदकानि धीयन्ते अस्मिन् इत्युदधिः—महान् उदधिः महोदधिः (कर्मधा) तस्य (4) उपगतः कण्ठम् उपकण्ठः (प्रादिः) तम्—'अत्यादयः क्रान्ताद्यर्थे द्वितीयया' (१।४।८१ पा. वा. ८८० सि. वा.) [अति, &c., are compounded with द्वितीयान्त words if the former mean क्रान्त, &c. E. g., to mean इन्द्रमतिक्रान्तः, अति is compounded with इन्द्र]

Case-ending.—(1) एवम्—अव्ययं, क्रियाविशेषणम् (2) महोदधेः—षष्ठी (3) तालीवनश्यामम्—Adjective of उपकण्ठम् (4) जनपदान्—object governed by आक्रामन् ।

Different meanings.—(1) श्याम—(II, 17).

Derivation.—(1) श्यामम्—श्यै + मक् (2nd c. s.) [उ. १।१४५।] (2) पौरस्त्यान्—पुरस् + त्यक् (भवार्थे, 2nd c. p.) (3) आक्रामन्—आ + क्रम् + शतृ (1st c. s.) । शतृ is added to it because आक्रमण is the लक्षण (characteristic) of the क्रिया प्रापण। See "लक्षणहेत्वोः क्रियायाः" (३।२।१२६। पा. ३१०३ सि. in I, 25.) (4) जयी—जि + इनि (शीलार्थे) (5) प्राप—प्र + आप् + लिट् —णल् (6) ताली—तल् (चुरादि) + अच् + ङीष् । गौरादित्वात्, जातित्वाद् वा (7) महोदधेः— V. Sl. 17, C. III.)

Conjugation.—(1) आप्—(V. Sl. 48, C. I.)

Rhetoric.—The figure of speech in the last two feet is स्वभावोक्ति or natural description. Even up to this day the shores of the Eastern sea are studded with palmyras. It is delightful to look at the rows of these dark trees with their leafy crowns.

Geographical notes.—पौरस्त्या जनपदाः, or eastern countries, are not meant by the poet to include the lower Gangetic valley, e.g., वङ्ग, &c. (V. notes on प्राची in IV, 28.)

अनम्राणां समुद्धर्तुस्तस्मात् सिन्धुरयादिव ।
आत्मा संरक्षितः सुह्मैर्वृत्तिमाश्रित्य वैतसीम् ॥ ३५ ॥

मूलस्य पाठान्तरम् ।

आश्रित्य—आस्थाय Nand. (foot-notes).

Prose order.—अनम्राणां समुद्धर्तुः तस्मात् सिन्धुरयात् इव, सुह्मैः वैतसीं वृत्तिम् आश्रित्य आत्मा संरक्षितः ।

Explanation by use of synonyms.—अनम्राणाम् (अवि-

नीतानां) समुद्धर्तुः (उन्मूलयितुः) तस्मात् (रघोः) सिन्धुरयात् इव (नदीवेगादिव) सुह्मैः (सुह्मदेशीयैः क्षत्रियनृपैः) वैतसीं (वेतससम्बन्धिनीं) वृत्तिं (व्यवहारं, प्रणतिमित्यर्थः) आश्रित्य (अवलम्ब्य) आत्मा (स्वः) संरक्षितः (त्रातः) ।

Substance.—यथा हि वेतसा नदीवेगमुखे निपत्य नम्रीभूय स्वम् स्वजीवितं रक्षन्ति, तथा सुह्मनृपतयः प्रणतिकौशलेन उद्धतान्नूलनात् नदीवेगवत् प्रबलप्रतापात् तस्माद् रघोः स्वजीवितं ररक्षुः । रघुः सुह्मदेशीयान् क्षत्रियनृपतीन् अवनतान् विलोक्य तथा किमप्यहितं न विदधे ।

Change of voice. सुह्माः आत्मानं संरक्षितवन्तः ।

Sanjivani—अनम्राणामिति अनम्राणां—कर्मणि षष्ठी—(समुद्धर्तुः उन्मूलयितुः तस्मात् रघोः सकाशात्—"भीत्रार्थानां भयहेतुः" (१।४।२५ पा ४८८ सि) इत्यपादानत्वात् पञ्चमी— (सिन्धुरयात् नदीवेगात् इव सुह्मैः । सुह्मदेशीयैः—सुह्मादयः शब्दाः जनपदवचनाः क्षत्रियवाचकाः— वैतसीं वेतससम्बन्धिनीं वृत्तिं प्रणतिमित्यर्थः—आश्रित्य आत्मा संरक्षितः) । अत्र कौटिल्यः—'बलीयसाभियुक्तो दुर्बलः सर्वत्रानुप्रणतो वेतसधर्मम् आतिष्ठेत्' इति । ३५ ॥

सञ्जीवन्याः पाठान्तरम् ।

वेतससम्बन्धिनीम्—वेतस सम्बन्धिनीम् All other editions

N B It is certainly a slip. There is no such word as वेतस that वेतस would be its form in षष्ठी singular

"भीत्रार्थानां भयहेतुः"—N notes on भयहेतु in II, 4

अत्र कौटिल्यः—'बलीयसाभियुक्तो * * धर्ममातिष्ठेत्'—On this subject Chanakya says "A weak potentate, assailed by a stronger one, should be submissive and adopt the practice of the canes"

सुह्मादयः शब्दाः * * क्षत्रियवाचकाः—सुह्म, &c, are names of countries as well as of chiefs

वैतसीवृत्ति—The practice of the cane, *i e*, submission. Canes are elastic. So they are bent down and not broken if a current of water strikes them.

Bengali.—উদ্ধতগণের উন্মূলক, নদীবেগসদৃশ সেই রঘু হইতে, সুহ্মদেশীয় নৃপতিবৃন্দ বৈতসধর্ম্ম অবলম্বনান্তে আপনাদিগকে রক্ষা করিলেন। ৩৫।

English rendering.—From him, uprooter of unyielding ones, as from the tide of a river, their ownselves were saved by the *Suhmas* adopting the behaviour of the cane. 35.

Grammatical notes, &c., &c.

Sama'sa.—(1) न नम्राः अनम्राः (नञ्तत्) तेषाम् (2) सम्यक् उद्धर्त्ता समुद्धर्त्ता (सुपसुपा) तस्य (3) सिन्धोः रयः सिन्धुरयः (षष्ठीतत्) तस्मात् इव सिन्धुरयादिव (सुपसुपा see I, 1) (4) सम्यक् रक्षितः संरक्षितः (सुपसुपा)

Case-ending.—(1) सुह्मैः—अनुक्ते कर्त्तरि तृतीया (2) अनम्राणाम्—कृद्योगेऽनुक्ते कर्मणि षष्ठी। The कृदन्त affix तृच is added to the root हृ in समुद्धर्त्तुः—"कर्त्तृकर्मणोः कृति" (V. notes on सागरम्, Sl. 2, C. I.) (3) तस्मात्—"भीत्रार्थानां भयहेतुः" इति सूत्रात् त्राणार्थ 'रक्ष्' धातुयोगे भयहेतोः तस्य रघोरपादानत्वम् अतः पञ्चमी (4) सिन्धुरयात्—This is विधेय and उपमानपद। The उद्देश्य and उपमेयपद is 'तस्मात्' (5) आत्मा—उक्ते कर्मणि प्रथमा।

Synonyms.—(1) वेतस—'अथ वेतसे। रथाभ्रपुष्पविदुरशीतवानीरवञ्जुलाः।' (अ.)

Different meanings.—(1) सिन्धु—'सिन्धुः समुद्रे नद्याञ्च नदे देशेभदानयोः।' (वि.) (2) वृत्ति—(I, 59) (3) आत्मन्—'आत्मा कलेवरे यत्ने स्वभावे परमात्मनि। चित्ते धृतौ च बुद्धौ च परव्यावर्त्तनेऽपि च॥' (धरणिः)

देशेभदानयोः—देश (the country called सिन्धु), and इभदान (ichor).

परव्यावर्त्तन—Self or exclusion of one other than self.

Derivation.—(1) अनम्राणाम्—नम् + र (प्रह्वत्वे, 1st c. p.) =

नमा: (न + नमा:) 6th c. p.६ (2) समुद्धर्तुः—सम् + उत् + ह + तृच् (6th c. s.) The root is not धृ, for then समुद्धर्ता would mean 'protector,' whereas here it means 'destroyer.' (3) सिन्धुः—स्यन्द् + उ: The य of the root is changed into इ, and द to ध। "स्यन्देः संप्रसारणं धश्च" (उ. १११) (4) संरक्षित:—सम् + रक्ष् + क्त: (कर्मणि) (5) आश्रित्य—आ + श्रि + ल्यप् (6) वैतसीम्—वे (ञ) + असुन्=वेतसः। वेतस + अण् (इदमर्थे) + ङीप् 2nd c. s.)

सुह्मा:—सुह्मस्य तद्राजो राजः अपत्यानि पुमांस: इत्यर्थे, सुह्मानां देशानां राजान: इत्यर्थे वा सुह्म + अण्। The Sutra enjoining अण् is "द्व्यञ्मगधकलिङ्गसूरमसादण्" (४.१.१७० पा. ११८८ सि.) For its explanation, see मागधी in III, 5. The sense of सुह्मा: is either the male descendants of सुह्म or the kings of सुह्म। In both cases, अण् elides by the Sutra "तद्राजस्य बहुषु तेनैवास्त्रियाम्" (see रघूणाम् in I, 59). अण्, &c., meaning 'kings' are as much तद्राज affixes as those meaning 'descendants'.

Conjugation.—(1) श्रि— V. Sl. 70, C. III.)

Parallel passage.—"तृणानि नोन्मूलयति प्रभञ्जनो मृदूनि नीचैः प्रणतानि सर्वत: । समुच्छ्रितानेव तरून् प्रबाधते महान् महत्येव करोति विक्रमम् ॥" (V. Hitopades'a).

Rhetoric.—The figure of speech is Simile. Raghu is compared to सिन्धुरय and the kings of सुह्म to वेतस। The common point is submissiveness.

Geographical notes.—सुह्म is evidently the country to the west of वङ्ग or Bengal. From Sabhāparvan, section 30, we understand that after conquering वङ्ग Bhima proceeded against ताम्रलिप्त, the modern Tamlook, in the district of Midnapore.

Next he marched against the king of Karvata, then against the lord of the Suhmas. Afterwards he subjugated the Mlechchhas who lived on the sea-shore. Then he proceeded by the sea shore towards the north and conquered the lower Eastern Bengal. Thus according to Vyása, सुह्म lay to the south of Tamlook. Prof. Haraprasad Sástri identifies सुह्म with the tract of land bounded on the south by Udishya, on the north by Rárha, on the east by the Bay of Bengal, and on the west by Magadha. This corresponds with Vyása's description.

In the same section of the same Parvan, however, the Rishi mentions another सुह्म which is evidently on the south of Kuśita and the north of मगध। Thus this सुह्म falls on the north-west corner of Bengal. We think that it is this सुह्म which is meant by Kálidása.

Márkandeya Purána does not mention सुह्म. We may infer from it that in the days of Markandeya Purána it had dwindled down into an insignificant principality.

If we are right that सुह्म is not mentioned in Rámáyana then it is an anachronism of our poet. A Calcutta editor identifies सुह्म with Tippera and Aracan. This identification is utterly impossible for Raghu marched first to सुह्म and then to वङ्ग। Tippera was included within प्राग्ज्योतिष। The editor's misconception, perhaps, arises from the fact that the commentator Vallabha, identifies सुह्म with ब्रह्मदेश or Burmah.

वङ्गानुत्खाय तरसा नेता नौसाधनोद्यतान् ।
निचखान जयस्तम्भान् गङ्गास्रोतोऽन्तरेषु सः ॥ ३६ ॥

मूलस्य पाठान्तरम् ।

साधनोद्यतान्—साधनोद्धतान् (पा) ।

Prose order—नेता सः नौसाधनोद्यतान् वङ्गान् तरसा उत्खाय गङ्गास्रोतोऽन्तरेषु जयस्तम्भान् निचखान ।

Explanation by use of synonyms.—नेता (सेनानायकः) सः (रघुः) नौसाधनोद्यतान् (सैन्योपकरणसमुद्यतान्) वङ्गान् (वङ्गीयान् भूपतीन्) तरसा (बलेन) उत्खाय (उन्मूल्य) गङ्गास्रोतोऽन्तरेषु (गङ्गाप्रवाहमध्यगतद्वीपेषु) जयस्तम्भान् (विजयसूचकस्तूपान्) निचखान (स्थापयामास) ।

Substance.—ततो वङ्गीयैर्नृपैः सह रघोः संघर्षोऽभूत् । ते तु पराक्रान्ता राजानो नौसाधना बभूवुः । रघुस्तदीयं दीर्घं रणं सह ते समराद्यीद्यताः । रघुस्तु स्वपराक्रमेण सर्वान् तान् विजित्य । गङ्गाप्रवाहाणां मध्यगतद्वीपेषु जयसूचकस्तम्भान् स्थापयित्वा स जयी जनेषु स्थलेषु च सर्वत्रैव वङ्गदेशेषु स्वकीयम् अव्याहतं पराक्रमं दर्शयामास ।

Change of voice.—नेत्रा तेन ... जयस्तम्भाः निचख्निरे ।

Sanjivani.—वङ्गानिति । (नेता नायकः सः) रघुः, नौभिः साधनैः उद्यतान्, सन्नद्धान् (नौसाधनोद्यतान्) (वङ्गान्) राज्ञः (तरसा) बलेन—"तरसी बलरंहसी" इति यादवः । उत्खाय उन्मूल्य—गङ्गायाः स्रोतसां प्रवाहाणाम् अन्तरेषु, द्वीपेषु [गङ्गास्रोतोऽन्तरेषु] (जयस्तम्भान्) (निचखान) स्थापितवान् इत्यर्थः ॥ ३६ ॥

Sanjivani Explained.

तरसी बलरंहसी—तरस् means बल (strength) as well as वेग (speed).

Bengali.—নৌসেনা দ্বারা যুদ্ধপ্রবৃত্ত বঙ্গীয়নৃপতিগণকে নায়ক রঘু নিজবলে উন্মূলিত করিয়া গঙ্গাপ্রবাহের মধ্যবর্তী স্থলসমূহে জয়স্তম্ভ স্থাপন করিলেন ॥ ৩৬ ॥

English rendering.—*Uprooting, by force, the Bangas who were ever ready (to meet invaders) with a naval force, that leader (of victorious hosts) planted pillars of victory (on the deltas) between the currents of Gangá.*—36.

Grammatical notes, &c., &c.

Samása.—(१) नावः एव साधनानि (सैन्यानि) नौसाधनानि

(रूपकक्रमेण) तैः उद्यताः नीसाधनीयताः (तृतीयातत्) ताम् (2) जयस्तम्भाः स्तम्भाः जयस्तम्भाः (मध्यपदलोपि-समासः, शाकपार्थिवादित्वात्) ताम् (3) गङ्गायाः स्रोतांसि गङ्गास्रोतांसि (षष्ठीतत्) तेषाम् अन्तराणि गङ्गास्रोतोऽन्तराणि (षष्ठीतत्)।

Case-ending—(1) तरसा—करणे तृतीया (2) गङ्गास्रोतोऽन्तरेषु—आधाराधिकरणे सप्तमी।

Different meanings.—(1) अन्तर—'अन्तरमवकाशावधिपरिधानान्तर्धिभेदतादर्थ्ये। छिद्रात्मीयविनाबहिरवसरमध्येऽन्तरात्मनि च॥' (अ.) (2) स्रोतस्—'स्रोतोऽम्बुवेग इन्द्रिये' (मे०) (3) साधन—'साधनं मृतसंस्कारे सैन्ये सिद्धौषधे गतौ। निर्वर्त्तनोपायमेढ्रदापनेऽनुगमे धने॥' (मे.) (4) स्तम्भ—'स्थूणाजडीभावौ' (अ.)

Derivation.—(1) वङ्गान्—वङ्गानां देशानां राजानः इत्यर्थे वङ्ग + अण् = वङ्गाः by the Sutra—"द्व्यञ्मगधकलिङ्गसूरमसादण्" (४।१।१७०।पा० ११८८ सि.) The तद्राज अण् elides. See सूत्रं in IV, 35. (2) उत्खाय—उत् + खन् + ल्यप्—खन् is changed into खा by the rule "जनसनखनां सञ्झलोः" (V. notes on उत्खातैः, Sl. 33, C. IV.) (3) नेता—नी + तृच् (कर्त्तरि, 1st c. s.) (5) उद्यतान्—उत् + यम् + क्तः (कर्त्तरि, 2nd c. p.) (5) निचखान—नि + खन् + लिट्—णल् (6) स्तम्भान् स्तम्भ् + अच् or घञ् (भावे, 2nd c. p.) (7) स्रोतः—स्रु + असुन्। A तुट् (त्) comes after the vowel of the root by the rule,—'स्रुरीभ्यां तुट्च' (उ०४।२०२०।)

Conjugation.—(1) खन्—(V. Sl. 55, C. III.)

Geography.—वङ्ग—It corresponds with the middle part of the modern Bengal which is made of अङ्ग, वङ्ग, पौण्ड्र, ताम्रलिप्त, कर्वट, सागरानूप, &c.

Remark.—The king of वङ्ग in the days of Mahábhárata was समुद्रसेन। His son चन्द्रसेन also cuts a figure in the war of the Kurus and the Pándus. From the present verse we see that

Bengal was noted for its naval force in the days of Kálidása. In the Moghul period we know it was divided into twelve principalities whence it was called बारभुँ ई बाङ्गाला। These proicipalities were, for all purposes, independent. They could keep armies and conduct the administration. They paid homage to the Moghul power. Pratápáditya, of Jessore, again, threw off this nominal yoke in the best days of Akbar, and reigned independently for full 18 years. He fell a victim to treachery in the reign of Jáhángir. Yet Jessore and other principalities retained their old rights of maintaining troops and carrying on the admininistration on their own account. The towering war-boats of Bengal were objects of admiration to even the Portuguese. It is a libel to say that Bengal has always been the land of cowards.

आपादपद्मप्रणताः कलमा इव ते रघुम् ।
फलैः संवर्द्धयामासुरुत्खातप्रतिरोपिताः ॥ ३७ ॥

Prose order.—उत्खातप्रतिरोपिताः आपादपद्मप्रणताः कलमाः इव ते रघुं फलैः संवर्द्धयामासुः । Mallinátha places 'आपादपद्मप्रणताः' at the beginning of the prose sentence and 'ते' before 'कलमाः' ।

Explanation by use of synonyms.—उत्खातप्रतिरोपिताः (उत्पाटिताः मूलात् उन्मूल्य विरलीभूय रोपिताः इति कलमपक्षे—सिंहासनात् च्याविताः अनन्तरं पुनस्तत्र स्थापिताः इति वङ्गपक्षे) आपादपद्मप्रणताः (मञ्जरीभारेण समुत्पन्नं यावद् नताः इति कलमपक्षे, रघोः पादयोः पतिताः इति वङ्गपक्षे) कलमाः इव (शालिविशेषाः इव) ते (वङ्गाः) रघुं (दिलीपसूनुं) फलैः (धनैः इति वङ्गपक्षे, शस्यैः इति कलमपक्षे) संवर्द्धयामासुः (समर्द्धितवन्तः) ।

Substance.—रघुः वङ्गान् विजित्य तान् स सिंहासनात् च्यावयामास । प्रणतेषु तेषु तान् स पुनः सिंहासने स्थापितवान् । यथोक्तरूप एव रघुं तु राज्यमूचुः । तस्मात् दासभावं स्वीकुर्वता स तेषां राज्यं न जहार । वङ्गीयनृपाणां

व्यवहारं कविर्वक्ष्यमाणदृष्टान्तेन दर्शयति। यथाहि अचिरोद्गतानि शालिधान्यानि कृषकैः प्रथममुत्पाट्य विभिन्नस्थलेषु प्रतिरोपितानि वृद्धिं परिवर्द्धमानाः समूलदेशं यावत् अवनतानि भूत्वा कृषकान् शस्यसम्पदा संवर्द्धयन्ति तथा कलमीया नृपा रघुणा प्राक् सिंहासनाच्याविताः, ततश्च स्थापिताःसन्तः तस्य चरणे विनतमस्तकाः तं प्रचुरधनैः सम्मानयामासुः।

Change of voice.—उत्खातप्रतिरोपितैः आपादपद्मप्रणतैः कलमैः... तैः रघुः...संवर्द्धयामासे।

Sanjivani.—आपादेति। आपादपद्मम्, अङ्घ्रिपर्य्यन्तं; प्रणताः [आपादपद्मप्रणताः] अतएव उत्खाताः, पूर्वमुद्धृताः, अपि प्रतिरोपिताः, पश्चात् स्थापिताः [उत्खातप्रतिरोपिताः] (ते) बद्धाः (कलमाः इव) शालिविशेषाः इव—"शालयः कलमाद्याश्च षष्टिकाद्याश्च पुंस्यमी" इत्यमरः (Cole. p. 226)—तेऽपि आपादपद्मं मूलपत्रपर्य्यन्तं प्रणताः—'पादौ बुध्नतुरीयांशपर्वताः" इति विश्वः—उत्खातप्रतिरोपिताश्च—रघुं) फलैः) धनैः—अन्यत्र शस्यैः—संवर्द्धयामासुः) "फलं फले धने बीजे निष्पत्तौ भोगलाभयोः। शस्ये।" इति केशवः॥ ३७॥

Sanjivani Explained.

"शालयः * * * पुंस्यमी"—The varieties of शालि paddy are कलम, &c., and षष्टिक &. c. These words are masculine.

"पादौ बुध्न"—पाद means बुध्न (the sun), तुरीयांश (the fourth part), as well as hillocks at the foot of a mountain.

"फलं फले * * "—फल means fruit, wealth, seed, result, enjoyment, profit, as well as crops.

आपादपद्मप्रणताः—In the case of the kings, पादपद्म means 'the lotus-like feet' of Raghu whereon they prostrated themselves. In the case of the *kalama* plants, पादपद्म would be taken to mean 'the lotuses blooming at the feet of the paddy plants'. Kalama and other varieties of S'áli paddy which are called हैमन्तिक or autumnal crop, are sown in the month of Jyaistha, and transplanted at the advent of the rainy season. The paddy fields are low-lands. Water accumulates there. The

plants always keep their heads above the water. In these pools of water, lotuses and lilies are seen. The verdant plants, with the white and the red blossoms interspersed look very beautiful. The lotuses at the feet of the paddy plants are meant here.

Bengali প্রথমোৎপাত শালিধান্যের ক্ষুদ্র ক্ষুদ্র চারা গুলি, যেরূপ কৃষক কর্ত্তৃক প্রথমে উৎপাটিত পশ্চাৎ স্থানান্তরে প্রতিরোপিত হইলে মূলস্থিত পদ্মপুষ্পের পাদদেশ পর্য্যন্ত অবনত হইয়া শস্যদানে কৃষককে সংবর্দ্ধিত করে, সেইরূপ বঙ্গাধিনৃপগণ রঘুকর্ত্তৃক প্রথমে উৎখাত, পশ্চাৎ স্বপদে প্রতিষ্ঠিত হইয়া, তাঁহার চরণকমলে প্রণত হইয়া ধনদানে তাঁহার সংবর্দ্ধনা করিলেন ৩৭

English rendering. Like (blades of) *kalama* paddy replanted after having been uprooted and bent down to the lotuses at their roots, enriching the sower with their yield, they i.e., the kings of the Bangas, who had been dethroned and re-instated, having bowed down unto his lotus like feet, honoured him with their treasures. 37

Grammatical notes, &c., &c

Samasa पादौ पद्मानि इव पादपद्मम् उपमितसमासः—इति रूपपक्षे or, पादपद्मं पद्म पादपद्मम् शाकपार्थिवादित्वात् मध्यपदलोपि समासः इति कर्मधारयपक्षे । आ पादपद्मात् इति आपादपद्मम् (अव्ययीभाव) समासाभावपक्षे—आ पादपद्मात् । "आङ् मर्य्यादाभिविध्योः. V. पाअन्न. Sl 5.9, C. I.) प्रकर्षेण नता. प्रणता. (आदि) आपादपद्म प्रणता, आपादपद्मप्रणताः (सुप्सुपा) (2 आदौ उत्खाताः पश्चात् प्रतिरोपिताः उत्खातप्रतिरोपिताः (स्नातानुलिप्तवत् कर्मधारयः ("पूर्वकालैकसर्वजरत्—" (V सुगृहीतनाम, Sl 14, C. II)

Case-ending.—(1), कर्त्तरि-करणे तृतीया (2) कलमाः—This is विशेष्य and उपमान कर्तृपद, the word "ते" is its उद्देश्य and उपमेय कर्तृपद (3 आपादपद्मप्रणताः; and 'उत्खातप्रतिरोपिताः' are adjectives of 'कलमाः' and 'ते' ।

Synonyms.—(1) पद्म—(V. III, 17.)

Different meanings.—(1) पद्म—"पद्मोऽस्त्री पद्मके व्यूहनिधि-सङ्ख्यान्तरेऽप्यु जे । ना नागे ॥" (मे.)

Derivation.—(1) प्रणता:—प्र + नम् + क्त: (कर्त्तरि, 1st c. p.) (2) कलमा:—कल् + अम: (औणादिक:, 1st. c. p.) (3) संवर्द्धयामासु:—सम् + (वृध् + णिच्=)वर्धि + लिट्—उस् (4) उत्खाता:—उत् + खन् + क्त: (कर्मणि 1st c. p.) (5) प्रतिरोपिता:—प्रति + रुह् + णिच् + क्त: (कर्मणि, 1st. c. p.) "रुह: पोऽन्यतरस्याम्" (७।३।४३।पा० २५८८ सि०) इति णिचि रुहो हकारस्य पकार: वैकल्पिक: । रोहि becomes optionally रोपि । So the alternative from is प्रतिरोहिता: ।

Conjugation.—(1) वृध् (II, 32.) (2) रुह् (II, 26.)

Rhetoric.—The figure of speech is simile. The *Banga* kings are compared to the plants of Kalama paddy. As these plants are uprooted and sown again, so the Banga kings were first dethroned and then re-installed. As the paddy, when transplanted, grows luxuriantly and bends down with the weight of corn, so the kings, re-installed, fell at Raghu's feet. As the paddy plants enrich the sower with their fruit, the kings enriched Raghu with their tributes.

How apposite is this simile ! Paddy plants grow in autumn ; Raghu met the Bangas in autumn. The kings of the country fell at Raghu's feet at a time when the paddy plants bent down with the weight of their corn. We cannot sufficiently praise the poet for his selection of the उपमान. The practice of the chiefs of Bengal is fitly illustrated by that of the chief crop of Bengal.

Remark.—From this verse one may argue that Kálidása was a Bengali. The minute details he gives of the cultivation of paddy in Bengal show that he was at least intimately acquainted with Bengal.

स तीर्त्वा कपिशां सैन्यैर्बद्धद्विरदसेतुभिः ।
उत्कलादर्शितपथः कलिङ्गाभिमुखो ययौ ॥ ३८ ॥

मूलस्य पाठान्तरम्।

कपिशाम्—करभाम् Nand (foot notes) as also Mallinatha

उत्कलादर्शित— उत्कलादेशित, उत्कलैर्दर्शित Nand (foot notes)

कलिङ्गाभिमुख— कलिङ्गाभिमुखम् Sumati ... Nand

Prose order—स बद्धद्विरदसेतुभिः सैन्यैः कपिशां तीर्त्वा उत्कलादर्शितपथः (सन्) कलिङ्गाभिमुखः ययौ।

Explanation by use of synonyms. सः (रघुः) बद्धद्विरदसेतुभिः (रचितगजसेतुभिः) सैन्यैः (सेनासमवायैः) कपिशां (तन्नामिकां नदीं) तीर्त्वा (उत्तीर्य) उत्कलादर्शितपथः (उत्कलैः सन्दर्शितमार्गः सन्) कलिङ्गाभिमुखः (कलिङ्गोन्मुखः) ययौ (प्रयातः)।

Substance रघोः सैन्या गजपरम्पराभिः कपिशाख्यायां नद्यां सेतुं निर्मितवन्तः। तमेव समेत्य स तां नदीमुत्तीर्य स्वदेशमागतं तस्मिन् उत्कलनृपतयस्तस्य ... तद्दर्शितमार्गमाश्रित्य रघुः कलिङ्गान् प्रति प्रतस्थे।

Change of voice.—तेन उत्कलादर्शितपथेन कलिङ्गाभिमुखेन ययै।

Sanjivani.—स इति। (स) ... बद्धा द्विरदा एव सेतवः यैः तैः [बद्धद्विरदसेतुभिः] (सैन्यैः) कपिशां नदीं—करभाम् इति केचित् पठन्ति (तीर्त्वा)—उत्कलैः राजभिः आदर्शितपथः, सन्दर्शितमार्गः [उत्कलादर्शितपथः] सन्, (कलिङ्गाभिमुखः ययौ) ॥ ३८ ॥

According to Charitravardhana, उत्कलादर्शितपथः suggests that the kings of the Utkalas surrendered on the very day of battle.

Bengali.—তিনি সৈন্যগণ দ্বারা গজসেতু নির্ম্মাণ করাইয়া সসৈন্যে কপিশানদী পার হইয়া কলিঙ্গাভিমুখে যাত্রা করিলেন। উৎকলনৃপতিগণ তাঁহাকে পথ দেখাইয়া দিলেন। ৩৮।

English rendering.—Having crossed the Kapisá with his troops who had constructed a bridge of elephants, he proceeded towards Kalinga—his path pointed out by the Utkalas. 38.

Grammatical, notes &c., &c.

Samása.—(1) द्वौ रदौ येषां ते द्विरदाः (बहु) त एव सेतवः द्विरदसेतवः (रूपककर्मधा) बहवः द्विरदसेतवः यैः ते बहुद्विरदसेतवः (बहु) तैः (2) आ (सम्यक्) दर्शितः आदर्शितः (सुपसुपा) उत्कलैः आदर्शितः उत्कलादर्शितः (तृतीयातत्) उत्कलादर्शितः पन्थाः यस्य सः उत्कलादर्शितपथः (बहु) पथिन् is changed into पथ by the rule :—"ऋक्पूरब्धूः पथामानक्षे" (५।४।७४। पा. ९४० सि.) See II, 18. (3) अभिगतः मुखम् अभिमुखः (प्रादिः)—'अत्यादयः क्रान्ताद्यर्थे द्वितीयया' (V. notes on उपकण्ठम्, Sl. 35, C. IV.) कलिङ्गानाम् अभिमुखः कलिङ्गाभिमुखः (षष्ठीतत्)।

Case-ending.—(1) सैन्यैः—सहार्थशब्दाप्रयोगेऽपि सहार्थे तृतीया (2) बहुद्विरदसेतुभिः—adjective of 'सैन्यैः'। If 'बहु' be connected with 'सैन्यैः' it is अनुक्तकर्त्तरि तृतीया and बहुद्विरदसेतुभिः करणे तृतीया।

Synonyms.—(1) द्विरद—(V. Sl. 32, C. III.).

Different meanings.—(1) सेतु—'सेतु—'सेतुर्नाली कुमारके (वि.) (2) सैन्य—'सैन्य' सैनिकसैमयो.' (हे.)

Derivation.—(1) तीर्त्वा—तॄ + क्त्वाच् (2) सैन्यः—सेना + ण्यः (3rd c. p.) "सेनाया वा" (४।४।४५। पा. १५८५ सि.) [सेना admits ण्य optionally to mean 'a collection'. सेनानां समवायः सैन्याः सैनिकाः।] सेतुभिः—सि + तुन् (औणादिक, 3rd c. p.) (4) आदर्शितः—आ + दृश् + णिच् + क्तः (कर्मणि) (5) ययौ—या + लिट्—णल्। (6) उत्कलाः—

उत्कलस्य राज्ञः अपत्यानि पुमांस इत्यर्थे उत्कल + अञ् । The Sutra is "जनपदशब्दात्क्षत्रियादञ्" (४।१।१६८ पा. ११८६ सि.) It means 'a word which signifies both a country and a Kshatriya admits अञ् to mean its descendants.' The अञ् elides by the Sutra "तद्राजस्य—" &c. See I, 5-9.

Conjugation.—(1) या—III, 3; (2) तृ—(I, 2).

Geography.—1. कपिशा is identified by some of the Calcutta editors with सुवर्णरेखा । They are unable to quote any authority. Prof. Apte identifies it with कांसाइ । We have not been able to find the name कपिशा or कश्मा in Mahábhárata and other works. In Mahábhárata we find a name कौशी । We are informed by several inhabitants of Cuttuck that a portion of the river महानदी, just before it branches out into three streams at a point few miles to the west of Cuttuck, is still called कपिशा । The three branches are called Jobra, Mahánadi, and Kátjuri. We do not find the name 'Kapis'á' in the maps. The main river, for its entire length, is named Mahánadi. The way in which Vyása names कौशी, *viz.*, कौशीं चापि महानदीम् also supports the identification of कपिशा with महानदी । An objection may be raised against this identification. From the text, Kapis'á seems to be the boundary stream of वङ्ग and उत्कल । It would be a river in the heart of उत्कल if it is identified with महानदी while that discrepancy would not arise if it be सुवर्णरेखा or कांसाइ । We may meet the objection thus: the text does not necessarily mean that Raghu entered उत्कल by crossing Kapisá. It may mean that he entered उत्कल, subjugated the Utkalas, and then crossed the Kapisá and went to Kalinga, guided by the Utkalas. If the latter be the sense, Kapisá should be the entrance to Kalinga, and, hence, a southern stream of उत्कल । In those days, again, the Kapisá or Mahánadi might have been the southern boundary of Bengal.

N. B. The local name, कपिशा, shows Kálidasa's intimate acquaintance with Bengal and Orissa. It lends support to the guess already hazarded that Kálidása was a Bengali.

2. उत्कल—It is Orissa. The name उत्कल is still extant. It was in vogue in the days of Rámayana.* In those of Mahábhárata it dwindled down into insignificance, for Bhima is not represented in his campaign of conquest, to have been opposed by the Utkalas. The way in which Kálidása also refers to them shows that उत्कल was looked down even in his time.

3. कलिङ्ग—It corresponds with modern Ganjam. It lay to the south of Utkala. Godávari† formed its southern, and the Bay of Bengal its eastern, boundary. It was a very powerful kingdom. The mountain, महेन्द्र, rendered it impregnable. It had sway over the Eastern sea in the days of Kálidása. ‡

The following extract from Sir W. W. Hunter's Statistical Account of Cuttack will throw light on the question :—

"Our earliest glimpses at Orissa disclose an unexplored maritime kingdom, stretching from the mouth of the Ganges to the mouth of the Krishna. It was a long narrow strip of coast, everywhere shut out from the Indian continent by a wide *terra incognita* of mountain and forests. Under the name of Kalinga, it formed one of the five outlying kingdoms of ancient India, with its capital situated about half-way down the coast, and still surviving in the present town of Kalinga-patam. We soon, however, bocome conscious of this territory, being divided into two. parts. The name Kalinga is applied more distinctively to the delta of the Godávari, while the delta

* किष्किन्ध्याकाण्डे ४१ स. ८ श्लो.

† सभापर्व्वणि ८७ स.

‡ रघुवंश VI, 54.

of the Mahánadi on the north gradually stands out as a separate country. The mountain spurs which run down to the sea on the south of the Chilká Lake formed a well-defined natural boundary. A wide debatable land existed between the two kingdoms; on the north of which dwelt an Uriyá-speaking people, while the south was inhabited by Telegu races, as at the present day," (p. p. 77-78). As regards Utkala the same scholar goes on :—

"The northern kingdom that thus looms hazily forth on the horizon of history, was known as Odra or Utkala. Odra is the aboriginal name and survives in the present Orissa (Odra-desa). Utkala is unquestionably Sanskrit."

In Márkandeya Purána we find the name 'Odra' instead of 'Utkala.'

स प्रतापं महेन्द्रस्य मूर्द्ध्नि तीक्ष्णं न्यवेशयत् ।
अङ्कुशं द्विरदस्येव यन्ता गम्भीरवेदिनः ॥ ३९ ॥

Prose order.—यन्ता गम्भीरवेदिनः द्विरदस्य (मूर्द्ध्नि) तीक्ष्णम् अङ्कुशम् इव, सः महेन्द्रस्य मूर्द्ध्नि तीक्ष्णं प्रतापं न्यवेशयत् । Mallinátha places 'सः... प्रतापम्' at the beginning of the prose sentence.

Explanation by use of Synonyms.—यन्ता (हस्तिपकः) गम्भीरवेदिनः (अवधीरितभीषणप्रहारस्य) द्विरदस्य (गजस्य) मूर्द्ध्नि, तीक्ष्णम्—अङ्कुशमिव (सृणिमिव), सः (रघुः) महेन्द्रस्य (कुलपर्वतविशेषस्य,—अथवा महेन्द्रपर्वताधिराजस्य) मूर्द्ध्नि (शिरसि) तीक्ष्णं (दुःसहं) प्रतापं (विक्रमं) न्यवेशयत् (निचिक्षेप)।

Substance.—उत्कलमतिक्रम्य स कलिङ्गं प्राप । तत्र कलिङ्गनाथेन सह घोरं युद्धमभूत् । महता क्लेशेन रघुस्तं जिगाय । एतदुपमयाह । यथा हस्तिपको दुर्दान्तं गम्भीरवेदिनं कुञ्जरं शिरसि तीक्ष्णायसाङ्कुशप्रहारेण क्रमशः वशमानयति तथा दुर्दान्तं कलिङ्गनाथं रघुः स्वकीयपराक्रमातिशयं प्रदर्श्य वशीचकार ।

Change of voice.—यन्ता...अङ्कुशम् or अङ्कुशः......तेन प्रतापः न्यवेश्यत।

Sanjivani.—स इति। (सः) रघुः (महेन्द्रस्य) कुलपर्वतविशेषस्य—"महेन्द्रोमलयः सह्यः शक्तिमानृक्षपर्वतः। विन्ध्यश्च पारियात्रश्च सप्तैते कुलपर्वताः॥" इति विष्णुपुराणात् (V. Ch. 58) (मूर्द्धि) (तीक्ष्णं) दुःसहं (प्रतापं) (यन्ता) सारथिः (गम्भीरवेदिनः) (द्विरदस्य) गजविशेषस्य—मूर्द्धि, तीक्ष्णं, निशितम्; (अङ्कुशम् इव) (न्यवेशयत्) निचिक्षिपवान्। "त्वग्भेदाच्छोणितस्रावात् मांसस्य क्रथनादपि। आत्मानं यो न जानाति स स्याद् गम्भीरवेदिता।" इति राजपुत्रीये (पालकाप्ये)—"चिरकालेन यो वेत्ति शिक्षां परिचितामपि। गम्भीरवेदी विज्ञेयः स गजो गजवेदिभिः॥" इति मृगचर्मीये (पालकाप्ये)॥ ३९॥

Sanjivani Explained.

"महेन्द्रो मलयः * * * सप्तैते कुलपर्वताः"—The seven principal mountains of Bhāratavarsha are 1. महेन्द्र (corresponding with he northern part of the Eastern Ghāts), 2. मलय (the Southern portion of the western Ghats), 3. सह्य (the western Ghāt range), 4. शक्तिमत् (not identifiable), 5. ऋक्ष (the mountain range consisting of Ramghur and Jubbulpore rocks), 6. विन्ध्य, 7. पारियात्र (the central India range *viz.*, Arvali range and those to their south-east including the hills in Bhopal, Malwa &c.)*

"त्वग्भेदात् * * * गम्भीरवेदिता"—The elephant that cannot feel though its skin be pierced, its blood gushes and even flesh be cut, is called गम्भीरवेदिन् or गम्भीरवेदित (one of stolid sensation).

चिरकालेन * * * गजवेदिभिः"—That elephant should be known, by the judges of elephants, as गम्भीरवेदिन् which takes a longtime in breaking.

Bengali—হস্তিপক যেরূপ গম্ভীরবেদি-হস্তীর মস্তকে (অতিদুঃখে) নিশিত অঙ্কুশ প্রবেশ করায়, রঘু সেইরূপ মহেন্দ্রপর্ব্বতের শিরোদেশে দুঃসহ প্রতাপ নিবেশিত করিলেন। ৩৯।

---

* These identifications are based upon Márkandeyapuránam. 58.

English rendering.—He planted his keen prowess upon the head of the Mahendra mountains like a driver (planting) a goad on that of an elephant of blunted sensibility. 39.

Grammatical notes, &c., &c.

Sama'sa.—(1) द्वौ रदौ (दन्तौ) यस्य स द्विरदः (बहु) तस्य (2) गम्भीरं (मन्दं यथा स्यात् तथा) वेत्ति इति गम्भीरवेदी (सुप्सुपा) तस्य।

Case-ending.—(1) महेन्द्रस्य—शेषे षष्ठी 'मूर्ध्नि' इत्यनेन सम्बन्धः (2) प्रतापम्—This is उद्देश्य and उपमेय कर्म। 'अङ्कुशम्' is its विधेय and उपमान कर्म (3) द्विरदस्य—विधेय and उपमानपद—'महेन्द्रस्य' is its उद्देश्य and उपमेयपद (4) सः—उद्देश्य and उपमेय कर्तृपद। 'यन्ता' is its विधेय and उपमानकर्तृपद।

Synonyms.—(1) मूर्द्धन्—'उत्तमाङ्गं शिरः शीर्षं मूर्धा ना मस्तकोऽस्त्रियाम्' (अ०) (2) अङ्कुश—'अङ्कुशोऽस्त्री सृणिः स्त्रियाम्' (अ०) (3) द्विरद—(V. द्विप, Sl. 7, C. II.)

Different meanings.—(1) यन्तृ—'यन्ता हस्तिपके सूते' (अ०)

Derivation.—(1) न्यवेशयत्—नि + विश् + णिच् + लङ्—तिप् (2) अङ्कुशम्—अङ्क् + उशच् (2nd c. s.) 'मानसिवर्णिसिपर्णिमितलङ्कुशाकुशम्— उ. ४।१०७) (3) यन्ता—यम् + तृच् कर्तरि, 1st c. s.) (4) गम्भीरवेदिनः—गम् + ईरन्—म् of the root is changed into भ् and नुम् comes after the penultimate vowel of the root. The rule is 'गभीरगम्भीरौ' (उ० ४।३५)। गम्भीर + विद् + णिनि; ताच्छील्ये, 6 c. s.) (V. प्रार्थ्य in I, 3.)

Conjugation.—(1) विश्—(V. Sl. 28, C. III.)

Remark.—One of the Calcutta editors expounds गम्भीरवेदिनः as 'गम्भीरं वेदितुं शीलमस्य'। What does it mean?

Rhetoric.—The figure of speech is उपमा। Mahendra stands for its lord.

Geography.—महेन्द्र—It corresponds with the northern part of the Eastern Ghát range. In the days of Vyása the river 'Vaitarani' formed its northern boundary. Yudishthira, during his wanderings is said to have reached the mountain just after crossing the Vaitarani. It extended to the South as far as Godávari. *

Márkandeya Puránam names the rivers that rises from Mahendra.† They are पितृकुल्या, सोमकुल्या, इक्षुका, लाङ्गलिनी, वंशकरा। Unfortunately none of these names is extant. So we cannot specialise the mountain further. A few miles on the northwest of Vizigapatan we see a hill called Ramagir or Ramagiri. Has it received its appellation from Paras'urама, who came to live in the Mahendra mountain after he had given away the whole Earth unto Kas'yapa in a sacrifice?

प्रतिजग्राह कालिङ्गस्तमस्त्रैर्गजसाधनः ।
पक्षच्छेदोद्यतं शक्रं शिलावर्षीव पर्वतः ॥ ४० ॥

Prose order.—गजसाधनः कालिङ्गः अस्त्रैः तं, पक्षच्छेदोद्यतं शक्रं शिलावर्षी पर्वतः इव, प्रतिजग्राह।

Explanation by use of synonyms.—गजसाधनः (गजसैन्य-सहायः सन्) कालिङ्गः (कलिङ्गाधिपः) अस्त्रैः (आयुधैः) तं (रघुं) पक्ष-च्छेदोद्यतं (पक्षकर्त्तनोद्युक्तं) शक्रम् (इन्द्रं) शिलावर्षी (प्रस्तरखण्डनिक्षेपी) पर्वतः इव (अद्रिरिव) प्रतिजग्राह (आचक्राम)।

Substance.—रघुणाक्रान्ताः कालिङ्गा उत्कला इव भीताः सन्तः न तस्य शरणं जगृहुः, प्रत्युत वीरधर्म्मेण रणाय प्रवर्त्तिरे। तेषां गजसैन्यानि प्रथितान्यासन्। तत्सहायः सन् तेषामधिपो रघुं प्रत्याचक्राम। अत्र कविरुपमामाह। कालिङ्गः पर्व्वत इव दृढ़ः। गर्व्वखर्व्वोद्यतो रघुः पर्व्वतपक्षच्छेदोद्यत इन्द्र इव रराज।

---

* वनपर्व्वणि ८७ अ.

† ५८ अ.

यथा पर्व्वतस्य शिलावर्षणेन वासवरोधप्रयासो वृथा भूतः तथा कालिङ्गस्यापि रघुप्रतिरोधप्रयासो वृथा भविष्यतीति धन्यते।

Change of voice.—गजसाधनेन कालिङ्गेन...सः, पक्षच्छेदोद्यतः शक्रः शिलावर्षिणा पर्व्वतेन...प्रतिजगृहे।

Sanjivani.—प्रतीति। (गजसाधनः)—सन्—(कालिङ्गः) कलिङ्गानां राजा—"द्व्यञ्मगधकलिङ्ग—" (४।१।१७० पा. ११८८ सि.) इत्यादिना अण्-प्रत्ययः—(अस्त्रैः) आयुधैः (तं) रघुं,—पक्षाणां छेदे उद्यतम्, उद्युक्तं, [पक्षच्छेदोद्यतं] (शक्रं, शिलावर्षी पर्वत इव) (प्रतिजग्राह) प्रत्यभियुक्तवान्॥ ४०॥

Sanjivani Explained.

"द्व्यञ्मगधकलिङ्ग—"—See Sanjivani Explained of III, 5.

Bengali.—গজসৈন্যসহায় কলিঙ্গাধিপ অস্ত্র দ্বারা তাঁহাকে (রঘুকে) পক্ষচ্ছেদোদ্যত ইন্দ্রকে শিলাবর্ষী পর্বতের ন্যায় আক্রমণ করিলেন। ৪০।

English rendering.—The lord of the Kalingas, equipt with an army consisting of elephants, encountered him with (a multitude of) weapons, like a rock-hurling mountain (encountering) S'akra bent on clipping its wings (in days of yore). 40.

Grammatical notes, &c., &c.

Sama'sa.—(1) गजा एव साधनं (सैन्यं) यस्य सः गजसाधनः (बहु) (2) पक्षाणाम् (पार्श्वानाम् इति पर्व्वतपक्षे बलानां सहायानां वा इति कलिङ्गपक्षे) उच्छेदः पक्षच्छेदः (षष्ठीतत) तस्मिन् उद्यतः पक्षच्छेदोद्यतः (सप्तमीतत्) तम् (3) शिलाः (प्रस्तरखण्डानि) वर्षति इति शिलावर्षी (उपपदतत्)

Case-ending.—(1) अस्त्रैः—करणे तृतीया (2) कालिङ्गः—उद्देश्य and उपमेय कर्त्ता। 'पर्व्वतः' is its विधेय and उपमानकर्त्ता (3) शक्रम्—विधेय and उपमानकर्म। 'तम्' is its उद्देश्य and उपमेय कर्म।

Synonyms.—(1) पर्व्वत—(V. Sl. 34, C. II.) (2) गज—(V. द्विप, Sl. 7, C. II.) (3) शक्र—(V. मघवन्, Sl. 26, C. I.)

Different meanings.—(1) पक्ष—(V. Sl. 42, C. III.) (2) साधन—(V. Sl. 36, C. IV.) (3) शक्र—'शक्रः पुंमान् देवराजे कुटजार्जुनभूरुहोः' (मे.)

Derivation.—(1) प्रतिजग्राह—प्रति + ग्रह् + लिट्—णल् (2) कालिङ्गः—कलिङ्ग + अण्। कलिङ्गानां राजा इत्यर्थः। (3) साधनम्—साध् + ल्युट् (करणे) (4) उद्यतम्—उत् + यम् + क्तः (कर्त्तरि, 2nd c. s.) (5) शक्रम्—शक् + रक् (कर्त्तरि 2nd c. s.) 'स्फायितञ्चि—' (उ. २।१३।) (6) शिलावर्षी—शिला + वृष् + णिनिः (कर्त्तरि 1st c. s.) (7) पर्वतः—पर्वन् + तप्।

Conjugation.—(1) ग्रह्—(V. I, 18).

Rhetoric.—The figure of speech is simile. The lord of the Kalingas is compared to a mountain, and Raghu to Indra. As the deity essayed to cut off the wings of the mountain so Raghu tried to crush the forces of the lord of the Kalingas. The mountain opposed Indra with the shower of stones. The Kalinga king opposed Raghu with his forces—specially his army of elephants—that showered upon Raghu shafts and missiles.

Allusion.—पक्षच्छेदोद्यतं शक्रम्—see Allusion under III, 42.

द्विषां विषह्य काकुत्स्थस्तत्र नाराचदुर्दिनम्।
सन्मङ्गलस्नात इव प्रतिपेदे जयश्रियम्॥ ४१॥

Prose order.—काकुत्स्थः तत्र द्विषां नाराचदुर्दिनं विषह्य सन्मङ्गलस्नातः इव जयश्रियं प्रतिपेदे।

Explanation by use of synonyms.—काकुत्स्थः (ककुत्स्थगोत्रोत्पन्नः रघुः) तत्र (महेन्द्रगिरौ) द्विषां (विपक्षाणां) नाराचदुर्दिनं (बाणविशेषाणां वर्षणं) विषह्य (सहित्वा) सन्मङ्गलस्नात इव (विजयमङ्गलार्थमभिषिक्त इव) जयश्रियं (विजयलक्ष्मीं) प्रतिपेदे (प्राप)।

Substance.—कलिङ्गैः सह रघोर्घोरं युद्धमभूत्। रघुस्तु शत्रुबाणविद्ध-

वाणवर्षं सहित्वा तान् पराजिग्ये । एतदेवोत्प्रेक्षयाह । राज्याभिषेके यथा प्राक् सर्व्वौषधिसलिलेन स्नात्वा रघुः सिंहासनमारुरोह तथा विपक्षाणां वाणवर्षेण स्नातः स पुनः सश्रिव जयश्रियम् प्राप ।

Change of voice.—काकुत्स्थेन—...सन्मङ्गलस्नातेन...जयश्रीः... ।

Sanjivani.—इषामिति । (काकुत्स्थः) रघुः (तत्र) महेन्द्राद्रौ (द्विषां) (नाराचदुर्दिनं) नाराचानां, वाणविशेषाणां ; दुर्दिनं—लक्षणया वर्षमुच्यते—(विषह्य) सहित्वा—सन्, यथाशास्त्रं (मङ्गलस्नातः [सन्मङ्गलस्नातः]) (इव) विजयमङ्गलार्थम् अभिषिक्तः इव (जयश्रियं (प्रतिपेदे) प्राप । "स्नानं सर्व्वौषधिस्नानं तन्माङ्गल्यमुदीरितम्" इति यादवः ॥ ४१ ॥

Sanjivani Explained.

दुर्दिन literally a foul, i. e., a rainy day. It is used here secondarily to mean a shower. For लक्षणा see Peculiarities I. 5—9.

स्नानं ० ०°मुदीरितम्—The bath in waters in which have been steeped the drugs known as सर्व्वौषधिगण, is technically called माङ्गल्य or मङ्गलस्नान.

सर्व्वौषधिगण consists of the drugs—मुरामांसी (*Murraya exotica*), वचा (Orris root), कुष्ठ (*Aplotaxis auriculata,*) शैलेय (a species of lichen) रजनी (*Indigofera tinctoria*), शठी (*Curcuma Zerambet*), चम्पकमुस्त (a variety of *Cyperus rotundus*). The group सर्व्वौषधि consists of other drugs according to other authorities.

(For those drugs see आयुर्व्वेदार्थचन्द्रिका ।)

Bengali.—ककुत्स्थগোত্রসম্ভব রঘু মহেন্দ্রপর্ব্বতে রিপক্ষগণের বাণবর্ষণ সহ্য করিয়া যেন যথাশাস্ত্র মঙ্গলস্নাত হইয়াই জয়শ্রীলাভ করিলেন । ৪১ ।

English rendering.—Enduring there the arrowy shower of foes, the descendant of Kakusthu having, as it were, duly undergone an auspicious bath, received the goddess of victory.—41.

Grammatical notes, &c., &c.

Sama'sa.—(1) नराणां समूहः नारम्—नारम् आचामन्ति (भक्षयन्ति, नाशयन्ति इत्यर्थः) इति नाराचाः (उपपदतत्) (सुपसुपा) [V. R. T. of Amarakosha,—N. S. P. Ed. P. 39] नाराचानां दुर्दिनं नाराचदुर्दिनम् (षष्ठीतत्) तत (2) मङ्गलाय स्नातः मङ्गलस्नातः (सुपसुपा। चतुर्थीसमास is impossible here. See धर्मपत्नी in II, 2.) सत् (यथाशास्त्रं) मङ्गलस्नातः सन्मङ्गलस्नातः (सुपसुपा)। "आदरानादरयोः सदसती" (१।४।६३ पा० ७६४ सि.) sanctions गतिसमास of सत् and असत् with a verb E. g. सत्कृत्य ; असत्कृत्य। There is no need of this Sutra in the present case. (3) जयस्य श्रीः जयश्रीः (षष्ठीतत्)।

Case-ending.—(1) द्विषाम्—शेषे षष्ठी (2) तत्र—आधाराधिकरणे सप्तमी, अव्ययम्।

Synonyms.—(1) नाराच—'प्रक्ष्वेडनास्तु नाराचाः' (अ०)।

Different meanings.—(1) मङ्गल—'मङ्गलं पुनः। कल्याणे, मङ्गलो भौमे मङ्गला श्वेतदूर्विका।' (मे.) (2) श्री—(V. Sl. 14, C. IV.)

Derivation.—(1) द्विषाम्—द्विष् + क्विप् (कर्तरि, 6th c. p.) (2) विषह्य—वि + सह् + ल्यप् (३) काकुत्स्थः—ककुद् + स्था + कः—"सुपि स्थः" (३।२।४।पा० २९१६ सि.)। काकुत्स्थः—ककुत्स्थ + अण् (गोत्रापत्ये) (4) नाराचः—नर + अण् (समूहार्थं) = नारम्। नार + आ + चम् + डः (कर्तरि) "अन्येष्वपि दृश्यते" (३।२।१०१।पा० ३०११ सि०) (V. परिखीकृत— in Sl. 30, C. I.) or नर + चम् + डः = नराचः—नराच एव नाराचः।—"प्रज्ञादिभ्यश्च" इति सूत्रात् स्वार्थे अण्। [Words of the group प्रज्ञ admit अण् in स्वार्थ। E. g., प्रज्ञ एव प्राज्ञः] See R. T. of Amarakosha, N. S. P. Ed. p. 336. (5) स्नातः—स्ना + क्तः (कर्तरि) (6) प्रतिपेदे—प्रति + पद् + लिट्—ए।

Conjugation.—(1) पद्—(V. Sl. 1, C. I.) (2) सह्—(V. Sl. 63, C. III.)

Allusion. in the name of काकुत्स्थ—पुराकिल असुरपीड़िता इन्द्रप्रमुखा देवा विष्णोरादेशेन तदंशभूतस्य सूर्य्यवंशीयक्षत्रियवर्य्यस्य पुरञ्जयस्यान्तिकं गत्वा तमसुरविनाशनं ययाचिरे। पुरञ्जयस्तु महेन्द्रं महोक्षरूपं धारयितुमदिदेश। धृते च तद्रूपे स क्षत्रियवरो वृषभरूपधारिण इन्द्रस्य ककुदि अवस्थाय सर्वान् असुरान् विष्णुतेजसा लीलया निजघान। ततःप्रभृति स ककुत्स्थसंज्ञां लेभे—तस्मात् तस्य गोत्रसम्भवाः सर्वे काकुत्स्था इत्याख्ययाभिहिताः। (V. Vishnu puránam.)

[Once upon a time the gods including Indra, much oppressed by the Asuras, sought the help of Vishnu. He bade them to see Puranjaya of the solar race who had the His parts in him. They obeyed him. Puranjaya promised help but demanded that Indra should carry him in the shape of a large bull on the battle field. Indra did it and Puranjaya slew the Asuras. For this reason Puranjaya received the name of ककुत्स्थ and his race came to be called काकुत्स्थ। ककुद means the hump of a bull.]

Rhetoric.—The figure of speech is उत्प्रेक्षा। Raghu got victory after a severe struggle. He had to bear the terrible shower of the enemy's shafts. The poet fancies that he bathed in that shower. Why? To purify himself for becoming fit to approach the goddess of victory. Thus the poet means to say that it was no hard game for Raghu to conquer the heroic Kalingas.

Remark.—Between the 41th and the 42nd verse, Cháritravardhana and others read :—

वायव्यास्त्रविनिर्धूतात् पक्षविक्षान् महोदधेः।
गजानीकात् स कालिङ्गं तीक्ष्णः सर्पमिवाददे॥

ताम्बूलीनां दलैस्तत्र रचितापानभूमयः।
नारिकेलासवं योधाः शात्रवञ्च पपुर्यशः॥ ४२॥

Prose order.—तत्र योधाः रचितापानभूमयः ताम्बूलीनां दलैः नारि-

केलासवं शात्रवं यशः च पपुः। Mallinátha places 'नारिकेलासवम्' before 'ताम्बूलीनाम्'।

Explanation by use of synonyms.—तत्र (महेन्द्रगिरौ) योधाः (सैनिकाः) रचितापानभूमयः (कल्पितमधुपानप्रदेशाः सन्तः) ताम्बूलीनां (नागवल्लीनां) दलैः (पत्रपुटैः) नारिकेलासवं (नारिकेलमद्यं) शात्रवं (विपक्षसम्बन्धीयं) यशः (कीर्त्तिं च) पपुः (मद्यपक्षे—पीतवन्तः,—यशःपक्षे,—आजह्रुः)।

Substance.—एवं दुर्जयान् कलिङ्गान् विजित्य हृष्टाः रघोः वीरासैनिकाः तत्र महेन्द्रपर्व्वते प्रसिद्धं कालिङ्गं नारिकेलासवं पपुः। रम्याणि सानूनि पानभूमयः ताम्बूलीपत्राणि च तेषां चषका बभूवुः। कविरुत्प्रेक्षते न इमे सुरां पपुः कलिङ्गानां चिरार्ज्जितं प्रथितं यश एव ते पपुः। कलिङ्गान् विजित्य तेषां गर्व्वं रघुः चूर्णयामासेति स्वरसम्।

Change of voice.—...योधैः रचितापानभूमिभिः...नारिकेलासवः ...पपे।

Sanjivani.—ताम्बूलीनामिति। (तत्र) महेन्द्राद्रौ—युध्यन्ते इति योधाः—पचाद्यच्—रचिताः, कल्पिताः; आपानभूमयः, पानयोग्यप्रदेशाः यैः ते तथोक्ताः [रचितापानभूमयः] सन्तः (नारिकेलासवं) नारिकेलमद्यं (ताम्बूलीनां) नागवल्लीनां (दलैः) पपुः, तत्र विजह्रुरित्यर्थः—(शात्रवं यशश्च) (पपुः) जह्रुरित्यर्थः॥ ४२॥

Sanjivani Explained.

नारिकेलासव—Wine is of eighty four varieties according to Charaka. Of these, six and twenty are distilled from fruits, eleven from roots, twentysix from piths of trees, ten from flowers, two from leaves of plants, four from stems of plants, four from bark and one from sugar. Yet Charaka does not mention that wine is prepared from cocoanut. (V. Charaka Sanhita, Sutrasthána, Ch. 25). By नारिकेलासव is meant, the juice of cocoanut tree, fermented with such intoxicants as Dhuturá, sugar &c.

It is extracated just as the juice of the date-tree or the palmyra is extracated. So it is a kind of toddy. It is very current in Madras and Ganjum.

Bengali.—সেই স্থলে (মহেন্দ্র পর্বতে) যোধগণ পানযোগ্য ভূমি কল্পনান্তে তাম্বুলীলতার পত্রে নারিকেলমদ্য পান করায় (বোধ হইল যেন) তাহারা শত্রুগণের যশঃ পান করিল। ৪২।

English rendering.—There the warriors (of Raghu) preparing wassail-grounds, drank, in cups of) betel leaves, fermented cocoanut-juice as also the fame of the enemy.—42.

Grammatical notes &c., &c.

Sama'sa.—(1) (आ सम्यक्) पिबन्ति अत्र इत्यापानम्, (V. R. T. of Amarakosha, N. S. p. Ed. 405.) तस्य भूमयः आपानभूमयः (षष्ठीतत्) रचिताः आपानभूमयः यैः ते रचितापानभूमयः (बहु) (2) नारिकेलस्य आसवः नारिकेलासवः (षष्ठीतत्) तम् ।

Case-ending.—(1) ताम्बूलीनाम्—सम्बन्धे षष्ठी (2) दलैः—करणे तृतीया (3) तत्र—आधाराधिकरणे सप्तमी (4) शात्रवम्—Adjective of 'यशः' ।

Synonyms.—(1) 'ताम्बूली'—'ताम्बूलवल्ली ताम्बूली नागवल्ल्यपि' (अ.) (2) यशस्—'यशः कीर्तिः समज्ञा च' (अ.) (3) दल—'पत्रं पलाशं छदनं दलं पर्णं छदः पुमान्' (अ.) (4) आसव—'मध्वासवो माधवको मधु माध्वीकमद्ययोः । मैरेयमासवः शीधुः ।' (अ.)

Different meanings.—(1) दल—'दलमुत्सेधवज्जर्योः । शस्त्रीच्छदेऽप्यदूष्ये पत्रे ।' (मे.) (2) ताम्बूली—'ताम्बूलीनागवल्ल्यां स्त्री क्रमुके तु नपुंसकम्' (मे.)

Derivation.—(1) ताम्बूलीनाम्—तम् + क्विप् (कर्मणि)—ताम् by the rule "अनुनासिकस्य क्विझलोः क्ङिति" (६।४।१५। पा. २६६६ सि.) । बुल् + क.—"इगुपधज्ञाप्रीकिरः कः" (३।१।१३५। पा. २८९० सि. V. notes on

क्रमुकाणाम्, Sl. 59, C. I) + ङीष् = कर्षी—पृषोदरादित्वात् दीर्घ—ताम् वार्सी वृक्षी च — ताम्बूलम् (6th c. p.) [V. R. T. of Amarakosha. N. S. P. Ed. p. 193] (2) दलं — दल् + अच् (3rd c. p.) (3) आपानम्— आ + पा + ल्युट् (अधिकरणे) (4) आसव—आ + सु + अप् (कर्मणि) It is called आसव because it is prepared by सव (distillation) (5) योधा —युध् + अच् कर्तरि 1st c. p.) (6 शात्रवम्—शत्रु + अण् (तस्येद मित्यर्थे, 2nd c. p. (7) पा लिट् –उस।

Conjugation. – 1 पा—(V. Sl. 1, C. I)

वप — As regards enemies it is figurative. Raghu's troops tarnished the fame of the Kalingas.

Spelling.—नारिकेल is spelt also as नालिकेर or नालिकेल।

Remark. In the days of Rámáyana the sea-coast near Guzrat and not Kalinga was famous for forests of cocoanuts (V. किष्किन्ध्याकाण्ड, Ch. 42)

गृहीतप्रतिमुक्तस्य स धर्मविजयी नृपः।
श्रियं महेन्द्रनाथस्य जहार न तु मेदिनीम् ॥ ४३ ॥

Prose order.—धर्मविजयी स नृपः गृहीतप्रतिमुक्तस्य महेन्द्रनाथस्य श्रियं जहार, मेदिनीं तु न (जहार)।

Explanation by use of synonyms.—धर्मविजयी (धर्मार्थे विजयशील) स (पूर्वोक्त) नृपः (रघुः) गृहीतप्रतिमुक्तस्य (वन्दीकृत- परित्यक्तस्य, महेन्द्रनाथस्य (महेन्द्राधिपतेः) श्रियं (सम्पत्तिं) जहार (बलाद्- गृहीतवान्) मेदिनीं (राज्यं) तु (किन्तु) न (न गृहीतवान्)।

Substance.—यो राजा विपक्षान् जित्वापि केवलं तेषां कोषं गृहीत्वा तान् पुनः स्वपदे स्थापयति स धर्मविजयीति कथ्यते। रघुस्तादृशधर्माक्रान्तः। नासौ राज्यगृध्नुः। आदौ स महेन्द्रनाथं वन्दीचकार, ततः शरणागतं तं बन्धनाद् मोचयित्वा केवलं तस्य कोषं गृहीत्वा च पुनः स्वसिंहासने स्थापयामास।

Change of voice.—धर्मविजयिना तेन नृपेण...श्रीः जह्रे, मेदिनी... (जह्रे)।

Sanjivani.—गृहीतेति। (धर्मविजयी) धर्मार्थं विजयशीलः (सः नृपः) रघुः—गृहीतोऽसौ प्रतिमुक्तश्च—गृहीतप्रतिमुक्तः, तस्य—[गृहीतप्रतिमुक्तस्य] (महेन्द्रनाथस्य) कालिङ्गस्य (श्रियं जहार)—धर्मार्थम् इति भावः—(मेदिनीं तु न जहार)—शरणागतवात्सल्यात् इति भावः॥ ४३॥

Sanjivani Explained.

शरणागतवात्सल्यात्—Because he was kind to those who sought his help. The lord of the Kalingas sought it. He, through kindness, installed him again on the throne.

धर्मविजयी—Mallinátha understands by it a king who undertakes campaign of conquest for the sake of religion and not prompted by earth-hunger. Vallabha divides invading kings into three classes, 1. धर्मविजयी, 2. लोभविजयी and 3. असुरविजयी। He is धर्मविजयी who returns unto the vanquished king his kingdom, and is satisfied only by making him his vassal. लोभविजयी is he who does not return the kingdom unto the defeated foes. That vile invader is called असुरविजयी who not only snatches away the kingdom but also kills the foe seeking quarters.

Bengali.—ধর্ম্মবিজয়ী সেই রাজা (প্রথমে) বন্দীকৃত (পশ্চাৎ) বিমুক্ত মহেন্দ্রনাথের ধনসম্পত্তি গ্রহণ করিলেন, কিন্তু রাজ্য গ্রহণ করিলেন না। ৪৩।

English rendering.—That king who was a righteous conqueror, took away the splendour of the lord of Mahaendra and not his lands. 43.

Grammatical notes, &c. &c.,

Sama'sa.—(1) पूर्वं गृहीतः पश्चात् प्रतिमुक्तः गृहीतप्रतिमुक्तः (कर्मधा.) तस्य—by "पूर्वकालैकसर्व"&c.—(V. सुधोभितााम् in Sl. 24, C. II.)

(2) विशेषेण जयी विजयी (प्रादिः) धर्माय विजयी धर्मविजयी (चतुर्थीतत्) (3) नॄन् पातीति नृपः (उपपदतत्) (4) महेन्द्रस्य नाथः महेन्द्रनाथः (षष्ठीतत्) तस्य ।

Case-ending.—(1) महेन्द्रनाथस्य—शेषे षष्ठी—'श्रियम्' इत्यनेन सम्बन्धः ।

Different meanings.—(1) श्री—(V. Sl. 14, C. IV.)

Derivation.—(1) गृहीत:—ग्रह् + क्तः (कर्मणि) (2) प्रतिमुक्तस्य—प्रति + मुच् + क्तः (कर्मणि, 6th c. s.) (3) विजयी—वि + जि + इनिः (शीलार्थे 1st c. s.) (4) जहार—हृ + लिट्-णल् (5) मेदिनीम्—मेदस् or मेद + इनिः + ङीष् (2nd c. s.) The स् of मेदस् drops by निपातन ।

Conjugation.—(1) हृ—(III, 39).

ततो वेलातटेनैव फलवत्पूगमालिना ।
अगस्त्याचरितामाशामनाशास्यजयो ययौ ॥ ४४ ॥

Prose order.—ततः अनाशास्यजयः (रघुः) फलवत्पूगमालिना वेलातटेन एव अगस्त्याचरिताम् आशां ययौ । Mallinátha places 'अनाशास्यजयः' after 'आशाम्' ।

Explanation by use of synonyms.—ततः (प्राचीविजयानन्तरम्) अनाशास्यजयः (अयत्नसिद्धत्वादप्रार्थनीयविजयः) रघुः—फलवत्पूगमालिना (फलितक्रमुकश्रेणीमता) वेलातटेन एव (समुद्रकूलस्योपान्तेनैव) अगस्त्याचरितां अगस्त्येनाध्युषितां दक्षिणामित्यर्थः) आशां (दिशं) ययौ (प्रतस्थे) ।

Substance.—इत्थमधीनविजयो रघुः प्राचीविजयानन्तरं दाक्षिणात्यविजयाय समुद्रतटेनैव अगस्त्येनाध्युषितां दक्षिणां दिशं चचाल । तस्य पन्थाः रम्य आसीत् । फलिता पूगतरवस्तस्य सैनिकानां नयनानि ह्लादयामासुः ।

Change of voice.—अनाशास्यजयेन......अगस्त्याचरिता आशा यये ।

Sanjivani—तत इति । (ततः) प्राचीविजयानन्तरं (फलवत्पूगमालिना) फलितक्रमुकश्रेणीमता—व्रीह्यादित्वाद इनिप्रत्ययः—वेलायाः समुद्रकूलस्य ; तटेन,

उपान्तेन [अगस्त्याचरिताम्] (आशां) दक्षिणां दिशम् (अनाशास्यजयः) जयस्य सिद्धत्वात् अप्रार्थनीयजयः सन् (ययौ) "अगस्त्यो दक्षिणामाशाम् आश्रित्य नभसि स्थितः । वरुणस्यात्मजो योगी विन्ध्यवातापिमर्दनः ॥" इति ब्रह्मपुराणे ॥ ४४ ॥

Sanjivani Explained.

व्रीह्यादित्वात् इनिप्रत्ययः--The इनि is added to पूगमाल because माला belongs to the group व्रीहि &c. The Sutra which enjoins इनि to words of the group व्रीहि &c., is "व्रीह्यादिभ्यश्च" (५।२।११६पा० १९२३ सि०) । इनि and ठन are added to the words of the group व्रीहि &c. The Várttikas 'शिखामालासंज्ञादिभ्य इनिः' ; and 'यवखदादिभ्य इकः' enjoins that शिखा, माला, and संज्ञा &c. admit इनि ; यव, खद &c., इक । Other words of the group admit both इनि and ठन ।

अनाशास्यजय means that as Raghu was sure to get victory, he had no need for hankering after it.

अगस्त्यो दक्षिणाम् * * विन्ध्यवातापिमर्दनः—अगस्त्य dwells on the firmament in the Southen direction. He is the son of Varuna. He is a great Yogin who checked the growth of the Vindhya-mountains and slew the Asura named Vátápi.

Here we find the ideas that he was a Rishi and that there is a star of the name, are confused.

Bengali.—পূর্ব্বদিগ্‌জয়ের পর অনায়াসলভ্যবিজয় রঘু, ফলিতপূগ-বৃক্ষশ্রেণীশোভিত সমুদ্রতটদ্বারা, যে দিকে অগস্ত্যমুনির অবস্থান, সেই-দিকে যাত্রা করিলেন। ৪৪।

English rendering.—Then by the sea-coast garlanded with fruit-burthened arica trees he who had no need of longing for victory (wedded as he was to it), proceeded towards the quarter wherein Agastya lived. 44.

Grammatical notes, &c., &c.

Sama'sa.— 1) वेलायाः (समुद्रकूलस्य) तटं वेलातटम् (षष्ठीतत्)

तेन (2) फलानि विद्यन्ते येषां ते फलवन्तः । फलवन्तः पूगाः फलवत्पूगाः (कर्मधा) तेषां माला फलवत्पूगमाला' (षष्ठीतत्) सा विद्यते अस्य इति फलवत्पूगमाली (सर्वधनीतिवत् इन्नन्तो बहु) तेन (V. शालनिर्यासगन्धिभिः in I 38, and तल्पगन्धिषु in IV, 47) (3) अग (विन्ध्याचलं) स्त्यायति (स्तम्नाति) इति अगस्त्यः (उपपदतत्) तेन आचरिता अगस्त्याचरिता (तृतीया तत्) ताम् (4) न आशास्यः अनाशास्यः (नञ्तत्) अनाशास्यः जयः यस्य अनाशास्यजयः (बहु) ।

Case-ending.—(1) ततः—अव्यय, आनन्तर्ये पञ्चमी (2) वेलातटेन—करणे तृतीया (3) फलवत्पूगमालिना—Adjective of वेलातटेन (4) आशाम्—object of ययौ ।

Synonyms.—(1) आशा—'दिशस्तु ककुभः काष्ठा आशाश्च हरितश्च ताः । (अ.) (2) पूग—'घोण्टा तु पूगः क्रमुको गुवाकः खपुरः' (अ.)

Different meanings.—(1) 'पूगः क्रमुकसंघयोः.' (हे.) (2) वेला—(V. Sl. 30, C. I.) आशा—'आशा तृष्णादिशोः स्त्रियाम्' मे.)

Derivation—(1) वेला—(V. Sl. 30, C. I.) (2) फलवत्पूगमालिना फल + मतुप् = फलवत् । पू + गन्—'छापूखडिभ्यः कित्' (उ० १।१२४) फलवत्पूगमाला + इनिः (मत्वर्थ, 3rd c. s.) (3) अगस्त्यः—अग + स्त्यै + कः—"आतोऽनुपसर्गे कः" (३।२।३ पा. २९१५ सि.) । (4) अनाशास्यः—आ + शास् + क्यप् (कर्मणि) = आशास्यः । न + आशास्यः । Here the root शास् should be either भ्वादि or अदादि आत्मनेपदी meaning 'to wish'. शास् which is अदादि परस्मैपदी and which means 'to govern', 'to instruct' &c. takes the from शिष्य by the addition of the affix क्यप् । When it is भ्वादि and अदादि आत्मनेपदी it gets the form शास्य । The affix क्यप् in this case, is not कित् and tho root is frequently used with the prefix आ । (5) ययौ—या + लिट्—णल् ।

Conjugation.—(1) शास् (to wish for, to bless) आशासते (भ्वा. लट्) आशास्ते (अदा. लट्) आशासताम् (भ्वा लोट्) आशास्ताम् (अदा०

लोट्) आश्शासत (भ्वा. लङ्) आशास्त (अदा. लङ्) आशासेत (भ्वा. वि. लिङ्) आशासीत (अदा. वि. लिङ्) आशशासे (लिट्) आशासिता (लुट्) आशासिष्यते (लृट्) आशासिष्ट (लुङ्) आशास्यते (कर्मणि — लट्) आशासि (कर्मणि —लुङ्) आशासिषीष्ट (आ. लिङ्) आशास्तः (क्तः) (V. आसितवान्, Sl. 30. C. I.) ल्यप् should not be added to शास् if it is preceded by आ। The affix, in that case, is क्त्वा। आशासित्वा, आशास्त्वा। Govinda Bhatta remarks :—'पञ्चमस्वरानुबन्धसामर्थ्यात् न ल्यप्'। 'उदनुबन्धफलं छन्दस्येव'—Dhátupradipa. (2) या—(V. Sl. 3, C. III.)

Allusion of अगस्त्य—कदाचित् गिरिवरो विन्ध्यः सूर्य्यमादिदेश यत् यथा त्वं मेरुं परिवर्त्तसे तथा मामपि परिवर्त्तस्व। सूर्य्यो न तत् श्रोचकार। तेन क्रुद्धः विन्ध्यो सूर्य्यस्य गतिरोधार्थं वर्धितुमारेभे। भानोरुदयास्तपथे रुद्धप्राये सर्व्वे जीवाः व्याकुला बभूवुः। महर्षिरगस्त्यो देवैरनुरुद्धोऽखिललोकहितेच्छया विन्ध्यस्य गर्व्वं खर्व्वीकर्त्तुं दक्षिणां दिशं प्रतस्थे। स हि पर्व्वतानां गुरुः। तमागतं वीक्ष्य विन्ध्यः प्रणनाम। शिरसि तेनावनमिते कुम्भयोनिस्तमुवाच 'वत्स यावदहं दक्षिणस्या दिशः प्रत्यावर्त्ते तावत् त्वमेवमवनतशिरास्तिष्ठ'। अथ स दक्षिणांदिशं जगाम ततो न प्रत्यावव्रते च। विन्ध्योऽपि गुरुगौरवात् नतमूर्द्धा तस्थौ। (महाभारते वनपर्व्वणि १०४ अध्याये) See Allusian under IV, 12.

[Once on a time the Vindhya mountain ordered the sun "Circumambulate me as you circumambulate the mountain Meru'. The sun paid no heed to his words. There-upon Vindhya highly enraged began to grow, for checking the sun's course from the east to the west. The world became agitated.The very gods could not check Vindhya. They sought the help of Agastya who was the *gura* of the mountains. Agastya promised them aid. He proceeded towards Vindhya. The mountain could not but lower his head at the sight of the preceptor. Agastya, after giving his blessings, said unto him—"Child ! I am going further down. Stay with thy head lowered

as long as I do not return." He proceeded to the southern region and never returned. Vindhya could not raise his head because of his obedience to the Guru.]

स सैन्यपरिभोगेण गजदानसुगन्धिना ।
कावेरीं सरितां पत्युः शङ्कनीयामिवाकरोत् ॥ ४५ ॥

Prose order.—सः गजदानसुगन्धिना सैन्यपरिभोगेण कावेरीं सरितां पत्युः शङ्कनीयाम् इव अकरोत् ।

Explanation by use of Synonyms.—सः (रघुः) गजदानसुगन्धिना (गजमदसुरभिगन्धिना) सैन्यपरिभोगेण (सैन्यसम्भोगेन) कावेरीं (तन्नाम्नीं सरितं) सरितां (नदीनां) पत्युः (स्वामिनः, समुद्रस्येति यावत्) शङ्कनीयाम् इव (अविश्वसनीयामिव) अकरोत् (विदधे)।

Substance.—क्रमात् रघुः कावेरीं जगाम । तत्र गजादिसैन्याः सानन्दं जलक्रीडां चक्रुः तेन च तस्याः जलमालोडितं गजमदेन च सुवासितञ्च जातम् । सगन्धीर्यगन्धवदेव । स च यथेष्टं समुद्रं यावत् प्रसृतः । अतः कविरुत्प्रेक्षते यथा काचिदङ्गना परपुरुषसङ्गमेन विपर्यस्तकेशत्वात् तदङ्गलग्नसुरभिगन्धत्वाच्च स्वपतेर्मनसि शङ्कामुत्पादयति तथा कावेरी गजमदवासिता सती स्वस्याः पत्युः समुद्रस्य अन्यैरुपभुक्तेति संशयं जनयामास ।

Change of voice.—तेन......कावेरी......शङ्कनीया अक्रियत ।

Sanjivani.—स इति । सः रघुः—गजानां दानेन, मदेन; सुगन्धिना सुरभिगन्धिना [गजदानसुगन्धिना]—"गन्धस्य—" (५।४।१३५। पा. ८७४ सि.) इत्यादिना इकारादेशः समासान्तः—यद्यपि गन्धस्येत्वे तदेकान्तग्रहणं कर्तव्यमिति नैसर्गिकगन्धविवक्षायामेवेकारादेशस्तथापि निरङ्कुशाः कवयः—तथा माघकाव्ये—"वधूरयुक्छदगुच्छसुगन्धयः सततगास्ततगानगिरोऽलिभिः ।" (V. S'isupala-badham, Sl. 50, C. VI.) ; नैषधे च—"अपांहि तृप्ताय न वारिधारा स्वादुः सुगन्धिः स्वदते तुषारा ।" (V. Naishadhacharitam, Sl. 93, C. III.) इति—'न कर्मधारयान्मत्वर्थीय—' (V. Bháshyam) इति निषेधादिनिप्रत्यय-

पर्यायोऽपि जघन्य एव—सेनायां समवेताः सैन्याः—"सेनायां समवेता ये सैन्यास्ते सैनिकाश्चते" इत्यमरः (Cole. p. 207)—"सेनाया वा" (४।४।४५। पा. १५९५ सि.) इति ण्यप्रत्ययः—तेषां परिभोगेण [सैन्यपरिभोगेण] (कावेरीं) नाम सरितं (सरितां पत्युः) समुद्रस्य (शङ्कनीयाम्) अविश्वसनीयाम् (इव अकरोत्)। सम्भोगलिङ्गदर्शनात्पत्युरविश्वासो भवति इति भावः ॥ ४५ ॥

Sanjivani Explained.

"गन्धस्येत्—" इत्यादिना इकारादेशः समासान्तः—The बहुव्रीहि compound सुगन्ध receives the samása ending इ by the Sutra "गन्धस्येदुत्पूतिसुसुरभिभ्यः". It means 'If उत्, पूति, सु or सुरभि forms a बहुव्रीहि compound with गन्ध, the whole word ending in गन्ध admits an इ as the समासान्त.' E. g., उद्गन्धि, पूतिगन्धि, सुगन्धि सुरभिगन्धि। Várttikakára adds a proviso to the Sutra *viz.*, "गन्धस्येत्वे तदेकान्तग्रहणम्". this Várttika has been interpreted in two ways. One is 'गन्ध, to admit the samása-endnig, should be inherent naturally to the object of which it is attributed.' In other words, 'to adopt the form उद्गन्धि, पूतिगन्धि, सुरभिगन्धि or सुगन्धि, the गन्ध must be natural to the object which it qualifies.' Hence, we cannot have the form सुगन्धि जलम्, सुगन्धिर्वायुः, because वायु or जल has no sweet odour natural to it. Its गन्ध is आगन्तुक or artificial. Mallinátha follows this view. According to him, गजदानसुगन्धिः सैन्यपरिभोगः is not grammatical, because the odour of ichor is not natural to the enjoyment by the army.

Mallinátha, therefore, justifies the from सुगन्धि here on the desperate plea that it is a case of poetic license. He quotes similar instances from Mágha and Sreeharsha. "ववुः * * अलिभिः"—"Breezes, charged with the sweet scent of the clumps of सप्तच्छद trees, then blew, wafting the songs of humming bees". Sweet scent is not natural to the wind, yet the form सुगन्धि is used as its adjective. "अपां हि * * तुषारा"—water though cool, sweet-scented, and sweet to the taste, does not taste well to one satiated with it. सुगन्धि is used as an adjective of जल which has naturally no sweet odour.

Another explanation of the Várttika given by the whole host of commentators, *viz.*, Kaiyata, Haradatta, Bhattoji. &c., is that 'गन्ध should be perceived not in a part but in the whole of the thing to which it is attributed.' By एकान्त, they mean "एकदेश इव अविभागेन लक्ष्यमाणः।" According to them सुगन्धिजलम्, or सुगन्धिवायुः ,is not ungrammatical, because the water or the wind spoken of cannot be partly fragrant and partly of disagreeable odour. The present instance is also correct inasmuchas the enjoyment which is here alluded to is wholly and not partly charged with the odour of ichor.

"न कर्मधारयात्—" * * जघन्य एव—गजदानसुगन्धि may be thus derived :—गजदानस्य + सुगन्धः = गजदानसुगन्धः। गजदानसुगन्ध + इनिः अस्त्यर्थे तेन गजदानसुगन्धि। But this view is bad because of the dictum "न कर्मधारयात् मत्वर्थीयः बहुव्रीहिश्चेत् अर्थप्रतिपत्तिकरः"। (For its Expl. see शालनिर्यासगन्धिभिः in I, 38).

"सेनाया वा"—ण्य is optionally affixed to सेना to mean 'a collection'. The alternative affix is ठक्। सैन्य or सैनिक means 'army', while सेना means a soldier.

"सेनायां समवेताः * * ते" सैन्य and सैनिक mean 'the soldiers collected in a head'.

Bengali.—তিনি (রঘু) গজমদসুরভিত সৈন্যসম্ভোগদ্বারা কাবেরীকে নদীপতি (সমুদ্রের) অবিশ্বাসিনী করিলেন। ৪৫।

English rendering.—Through the free use by his army (of her watery body) that imparted unto it the fragrance of the elephant's ichor, he made Káveri an object, as it were, of suspicion to the lord of the rivers.—45.

Grammatical notes, &c., &c.

Sama'sa.—(1) परि (विशेषेण) भोगः परिभोगः (प्रादिः) सैन्यानां परिभोगः सैन्यपरिभोगः (षष्ठी तत्) तेन (2) शोभनः गन्धः यस्य स सुगन्धिः (बहु)

ह is the Samása ending by "गन्धस्येत्—" गजानां दानं गजदानम् (षष्ठी तत्) तेन सुगन्धिः गजदानसुगन्धिः (तृतीयातत्) तेन (3) ईषत् वेर (शरीर) यस्याः सा कावेरी, ईषत् is changed in to का in samása—"ईषदर्थे" (६।३।१०५ पा. १०३१ सि.) see L 67.

Case-ending.—(1) सैन्यपरिभोगेण—करणे तृतीया (2) गजदानसुगन्धिना—Adjective of सैन्यपरिभोगेण (3) सरिताम्—शेषे षष्ठी, 'पत्युः' इत्यनेन सम्बन्धः (4) पत्युः—कृद्योगे ऽनुक्ते कर्त्तरि षष्ठी। The alternative form is पत्या "कृत्यानां कर्त्तरि वा" (V. मनीषिणाम्, in Sl. 11. C. I.)

Synonyms—सरित—'अथ सरित् । तरङ्गिणी शैवलिनी तटिनी ह्रदिनी धुनी । स्रोतस्वती द्वीपवती स्रवन्ती निम्नगापगा ॥' (अ.)

Different meanings.—(1) दान—V. Sl. 7, C. II.; (2) कावेरी—'कावेरीस्यात् सरिद्भेदे पण्यनार्यां हरिद्रयोः' (मे.)

Derivation.—(1) सैन्य—सेना + ष्यञ् (समवेतार्थे,) पक्षे—ठक् = सैनिका—when neuter सैन्य is to be derived as—सेनैव सैन्यम्; सेना + ष्यञ्—चातुर्वर्ण्यादित्वात् ष्यञ् स्वार्थे। (2) परिभोगेण—परि + भुज् + घञ् (भावे, 3rd c. s. (3) दानम् (V. Sl. 7, C. II.) (4) कावेरीम्—कस्य (जलस्य) वेरं (शरीरम्) इति कवेरम् । कवेर + अण (तस्येदमित्यर्थे) = कावेरम् । कावेर + ङीष् (2nd c. s.) (5) सरिताम्—सृ + इतिः (औणादिकः, 6th c. p. ; (6) अङ्गनायाम्—अङ्ग + अनीयर् (कर्मणि) + टाप् (2nd c. s.) (7) अकरोत्—कृ + लङ्—दिप्।

Conjugation.—(1 कृ... V Sl. 15, C. I.)

Rhetoric.—The figure of speech is उत्प्रेक्षा। Raghu crossed the river Káveri., with his army. His elephants necessarily plunged into it. They were in rut. Their ichor gave its scent to the river. Sanskrit poets represent rivers to be the wives of the Ocean. The ichor has an odour similar to that of semen. Kálidása, therefore, puts the fact of the elephants' plunge into

Káveri, poetically, as the enjoyment of the river by the elephants. The sign of congress is manifest in the odour of ichor. She, Káveri, was as if afraid that she would be detected by her lord, the Ocean.

Geography.—The position of Káveri is well known. It rises from the southernmost portion of the Eastern Ghats, flows through Trichinopoli, Tanjore, and falls in to the Bay of Bengal.

Remark.—Between 45—46, Cháritravardhana and others read the verse 54.

बलैरध्युषितास्तस्य विजिगीषोर्गताध्वनः।
मारीचोद्भ्रान्तहारीता मलयाद्रेरुपत्यकाः॥ ४६ ॥

मल्लस्य पाठान्तरम्।

मारीचोद्भ्रान्त—मरीचोद्भ्रान्त—चा. दि. हारीतोत्सृष्टमारीचाः (म.)।

Prose order.—विजिगीषोः गताध्वनः तस्य बलैः मारीचोद्भ्रान्तहारीताः मलयाद्रेः उपत्यकाः अध्युषिताः।

Explanation by use of synonyms.—विजिगीषोः (विजेतुमिच्छोः) गताध्वनः (अतिक्रान्तमार्गस्य) तस्य (रघोः) बलैः (सैन्यैः) मारीचोद्भ्रान्तहारीताः (मरीचवनोड्डीयमानपक्षिविशेषाः) मलयाद्रेः (मलयपर्वतस्य) उपत्यकाः (सन्निहितभूमयः) अध्युषिताः (विश्रामार्थमधिष्ठिताः)।

Substance.—ततो विजिगीषुः ससैन्यो रघुः बहुदूरं पन्थानमतिक्रम्य मलयगिरेरुपत्यकायामुपतस्थे। तत्र बहुलेषु मरीचवनेषु हारीता इतस्ततः उड्डीयमाना आसन्। तादृश्यां मलयगिरेरुपत्यकायां रघुसैनिका अध्वखेदापनयनार्थमूषुः।

Change of voice.—...बलानि... अध्युषितवन्ति।

Sanjivani.—बलैरिति। (विजिगीषोः) विजेतुमिच्छोः (गताध्वनः) (तस्य) रघोः (बलैः) सैन्यैः—"बलं शक्तिर्बलं सैन्यम्" इति यादवः—मारीचेषु,

मरीचवनेषु . उद्भ्रान्ताः हारीताः, पक्षिविशेषाः ; यासु ताः [मारीचोद्भ्रान्तहारीताः] —"तेषां विशेषा हारीतो मद्गुः कारण्डवः प्लवः" इत्यमरः (Cole. p. 134)— (मलयाद्रेः) (उपत्यकाः) आसन्नभूमयः—"उपत्यकाद्रेरासन्ना भूमिरूर्द्ध्वमधित्यका" इत्यमरः (Cole. p. 15)—"उपाधिभ्यां त्यकन्—" (५।२।३४ पा. १८३५ सि.) इत्यादिना त्यकन् प्रत्ययः—(अध्युषिताः) उपत्यकासु उषितम् इत्यर्थः। "उपान्वध्याङ्वसः" (१।४।४८ पा. ५४४ सि.) इति कर्मत्वम्॥ ४६॥

Sanjivani Explained.

तेषां विशेषाः * * यासु ताः—The distirctive ones among them (the birds) are हारीत, मद्गु, कारण्डव and प्लव।

"उपत्यकाद्रेः * * * अधित्यका"—and "उपाधिभ्यां त्यकन्—" V. Sanjivani Explained, under II. 29.

"उपान्वध्याङ्वसः"—इति कर्मत्वम्—The आधार of वस, *viz.*, उपत्यका has become its कर्म by the Sutra "उपान्वध्याङ्वसः।" It means "The आधार of वस becomes its कर्म if prefixed by उप, अनु, अधि or आङ्।" The Vârttika 'अभुक्त्यर्थस्य न' lays down that उप + वस् does not change its आधार to कर्म if it means 'to fast'. E. g., वने उपवसति।

Bengali.—(তৎপরে) সেই বিজিগীষু অতিক্রান্তমার্গ রঘুর সৈন্যনিকর মরীচবনে উড্ডীয়মান হারীতপক্ষিগণব্যাপ্ত মলয়পর্ব্বতের উপত্যকা সমূহে অধিষ্ঠান করিল। ৪৬।

English rendering.—By the troops of him who was bent on conquest and who had marched a (long) way, were (then) occupied the valleys of mount Malaya, abounding in forests of peppers over which hovered flights of parrots. 45.

Grammatical, notes &c., &c.

Sama'sa.—(1) विशेषेण जिगीषुः विजिगीषुः (प्रादिः) तस्य (2) गतः (अतिक्रान्तः) अध्वा येन स गताध्वा (बहु) तस्य (3) मरीचस्य इमानि मारीचानि (मरीचवनानीत्यर्थः) ऊर्द्ध्वं भ्रान्ताः उद्भ्रान्ताः (नित्यसमासः) मारीचेषु उद्भ्रान्ताः मारीचोद्भ्रान्ताः (सप्तमीतत्) तादृशाः हारीताः यासु ताः मारीचोद्भ्रान्तहारीताः

(बहु) (4) मलयनामा अद्रिः मलयाद्रिः (शाकपार्थिवादित्वात् मध्यपदलोपि—कर्मधा) तस्य (5) हारि (मनोहरम्) इतं (गमनं) येषां ते हारीता: (बहु)।

Case-ending.—(1) बलैः—अनुक्ते कर्त्तरि तृतीया (2) तस्य—शेषे षष्ठी—'बलैः' इत्यनेन सम्बन्धः (3) मलयाद्रेः—शेषे षष्ठी 'उपत्यकाः' इत्यनेन सम्बन्धः (4) उपत्यकाः—अधिपूर्ववसधातुयोगे अधिकरणस्थले कर्म—उक्ते कर्मणि प्रथमा। See "उपान्वध्याङ्वसः" (5) विजिगीषोः and गताध्वनः are adjectives of तस्य (6) मारीचोद्भ्रान्तहारीताः—Adjective of उपत्यकाः।

Synonyms.—(1) अध्वन्—(V. मार्ग, Sl. 33, C. IV.) (2) बल—(V. सेना, Sl. 19, C. I.)

Different meanings.—(1) बल— V. Sanjivani.) (2) हारीत—'हारीतो विहगान्तरे मुनौ कुशमि।' (हे.) (3) अद्रि—'अद्रयो द्रुमशैलार्काः' (अ.)

Derivation.—(1) अद्रिः—अद् + क्रिन् (6th c. s.) 'अदिशदि—' (उ. ४।६५) (2) विजिगीषोः—वि + जि + सन् + उः (6th c. s.) (3) अध्युषिताः—अधि + वस् + क्त (कर्मणि) + टाप् (1st c. p.) (4) मारीचानि—मरीच + अण् (तस्येदमित्यर्थे, 1st c. p.) मरीचानामिमानि वनानि मारीचानीत्यर्थः (5) उद्भ्रान्ताः—उत् + भ्रम् + क्तः (1st c. p.) कर्त्तरि क्तः—भ्रम् is changed into भ्राम् by the rule,—"अनुनासिकस्य क्विझलोः क्ङिति" (६।४।१५। पा. २६६६ सि.)। इट् does not come to भ्रम् by the addition of क्त, because the root is read in धातुपाठ as भ्रमु—Remark under I. 30). (6) उपत्यकाः—उप + त्यकन् + टाप् (1st c. p.)

Conjugation.—(1) वस् (to dwell) वसति (लट्) वसतु (लोट्) अवसत् (लङ्) वसेत् (वि. लिङ्) उष्यात् (आ. लिङ्) उवास, ऊषतुः, उवसिथ, उवस्थ (लिट्) अवात्सीत्, अवात्ताम्, अवात्सुः (लुङ्) वस्ता (लुट्) वत्स्यति (लृट्) उष्यते (भावे-लट्) अवासि (भावे-लुङ्) वासयति—ते (णिच्-लट्) अवीवसत्—त (णिच्-लुङ्) विवत्सति (सन्-लट्) वावस्यते

(यङ्-लट्) उषितः (क्तः) वस् is also अदादि and आत्मनेपदी—meaning 'to put on' वस्ते (लट्) ववसे (लिट्) अवसिष्ट (लुङ्) वसिता (लुट्) वसिष्यते (लृट्) वसितः (क्तः) —It is also चुरादि meaning 'to love' वासयति (लट्)—It is अदन्त too, meaning 'to dwell' वसयति (लट्)।

Geography.—मलयाद्रि—From Márkandeya Puránam, ch. 58, we see the Malaya mountain is the source of the rivers कृतमाला, ताम्रपर्णी, पुष्पजा and मुत्पलावती। Of these names of rivers, ताम्रपर्णी is still extant. This river flows through Tinnevelli, and falls in to the Gulf of Mannaar. The mountains from which it rises are named Casdamom Hills by Sir W. W. Hunter in his Atlas of India. The Casdamom range is to the south of the Nilgiris. (Casdamom is, a misprint for Cardamom.) From the next verse we understand that the Malayas were famous for Cardamom plants in the days of Kálidása. So fairly we may identify the Malayas with this range.

ससञ्जुरश्वक्षुण्णानामेलानामुत्पतिष्णवः।
तुल्यगन्धिषु मत्तेभकटेषु फलरेणवः॥ ४७॥

Prose order.—अश्वक्षुण्णानाम् एलानाम् उत्पतिष्णवः फलरेणवः तुल्यगन्धिषु मत्तेभकटेषु ससञ्जुः।

Explanation by use of synonyms.—अश्वक्षुण्णानां (वाजिपददलितानाम्) एलानां (लताविशेषाणाम्) उत्पतिष्णवः (उद्गमनशीलाः) फलरेणवः (फलरजांसि) तुल्यगन्धिषु (समसौरभशालिषु) मत्तेभकटेषु (मदमत्तकरिगण्डेषु) ससञ्जुः (सक्ताः)।

Substance.—मलयाद्रेरुपत्यका एलालतानां प्रभवः। तासां फलानि निपतन्ति नित्यं भवन्त्यवनिं शकलीकुर्वन्ति। रघोरश्वैः एलाफलानि दलितानि—सुतरां चूर्णितानि बभूवुः। तथा रेणवः पवनवेगेन उत्पेतुः। रघोः समानां गजानां मदस्राविकटेषु ते लग्नाः जाताः।

Change of voice.—...उत्पतिष्णुभिः...फलरेणुभिः...मसम्ले।

Sanjivani.—मनसृम्दिरिति। अर्थैः सुमानाम् [अश्वसुमानाम्] (एलानाम्) एलालतानाम् (उत्पतिष्णवः) उत्पतनशीलाः—"अलंकृञ्—" (३।२।१३६। पा. ३।१।६ मि.) इत्यादिना इष्णुच् प्रत्ययः—(फलरेणवः) फलरजांसि (तुल्यगन्धिषु) समानगन्धिषु—सर्वधनीतिवत् इन्यन्तो बहुव्रीहिः—मत्तमातां कटेषु [मत्तभकटेषु] (समसृः) सक्ताः। "गजगण्ड कटौकटौ" इति कोषः॥ ४७॥

Sanjivani Explained.

गजगण्ड कटौकटौ—कटौ and कट means the temple of the elephant.

सर्वधनीतिवत इन्यन्तो बहुव्रीहिः—Mallinátha expounds the samása of तुल्यगन्धि। He canaot make a कर्मधारय of तुल्य and गन्ध and then add to the compounded form, तुल्यगन्ध, the affix इनि bearing the sense of मतुप: because the dictum 'न कर्मधारयान्मत्वर्थीयो बहुव्रीहिश्चेदर्थप्रतिपत्तिकरः' stands in the way. (For its explanation, see notes on शालनिर्य्यासगन्धिभिः in I, 38). He must make a बहुव्रीहि of तुल्य and गन्ध। But then the form would be तुल्यगन्धि and not तुल्यगन्धिन्। How to defend the form तुल्यगन्धिन् in बहुव्रीहि समास? He justifies it by such formations as सर्व्वधनिन्, सर्व्वबीजिन्।

सर्व्वधनिन् is formed by the Várttika 'सर्वादेश्च' which may be explained as बहुव्रीहि compounds beginning with सर्व्व as well take इनि। 'च' in Várttika indicates that some बहुव्रीहि compounds, not beginning with सर्व्व, may admit इनि। A Calcutta editor, without understanding the sense of 'च', characterises Mallinátha's defence as untenable. Another बहुव्रीहि compound, admitting इनि yet not beginning with सर्व्व, is शालनिर्य्यासगन्धिन्।

"अलंकृञ्—" इत्यादिना इष्णुच् प्रत्ययः। The aphorism in full is—"अलंकृञ्निराकृञ्प्रजनोत्पचोत्पतोन्मदरुच्यपत्रपवृतुवृधुसहचर इष्णुच्" [कृ preceded by अलम्, or the prefixes निर् and आ combined, जन् preceded by प्र, पच preceded by उत्, पत् by उत्, मद by उत्, रुच् (चि),

वप् preceded by अव, अन्, अध, सम or अर् admits इष्णुच् in कर्तृवाच्य।
E. g. अलंकरिष्णु, निराकरिष्णु, प्रजनिष्णु, उत्पचिष्णु &c.]

Bengali.—অশ্বখুরক্ষুণ্ণ এলালতাসমূহের ফলরেণুসকল (বায়ুবেগে) উৎপাতিত হইয়া সমসৌরভশালি-মত্তকরিগণের গণ্ডসমূহে সংসক্ত হইল। ৪৭।

English rendering.—The pollens wafted up, of the fruits of cardamom plants trampled by (his) steeds, settled upon the temples, bearing a similar odour, of (his) excited elephants. 47.

Grammatical notes, &c., &c.

Sama'sa.—(1) अश्वैः क्षुण्णाः अश्वक्षुण्णाः (तृतीयातत्) तासाम्। (2) तुल्यः गन्धः अस्ति एषामिति तुल्यगन्धिनः (सर्वधनीतिवत् इन्नन्तो बहु) तेषु। (3) मत्ताः इभाः मत्तेभाः (कर्मधा) तेषां कटाः मत्तेभकटाः (षष्ठीतत्) तेषु (4) फलरेणवः—फलानां रेणवः फलरेणवः (षष्ठीतत्)

Case-ending.—(1) एलानाम्—शेषे षष्ठी—'फल' इत्यनेन सम्बन्धः (2) मत्तेभकटेषु—औपश्लेषिकाधाराधिकरणे सप्तमी।

For the different kinds of आधार, see notes on स्थलौ in I, 27.

Synonyms.—(1) एला—'पृथ्वीका चन्द्रबालैला निष्कुटिर्बहुला' (अ.) (2) इभ—(V. द्विप, Sl. 7, C. II.) (3) रेणु—(V. पांशु in II, 2).

Different meanings.—(1) रेणु—'रेणुः स्त्रीपुंसयोर्धूलौ पुंलिङ्ग पर्पटे पुनः।' (वि. मे.) (2) फल—(V. Sl. 33, C. IV.)

Derivation.—(1) इभः—इ (ण) + भः—'इणः कित्' (उ. ३।१५३) (2) ससञ्जुः—सञ्ज् + लिट्—उस्। (3) क्षुण्णानाम्—क्षुद् + क्तः (कर्मणि) + टाप् (6th c. p.)—(V. notes on क्षुण्ण in I, 17). (4) एलानाम्—इल् + अच् + टाप् (6th c. p.). (5) उत्पतिष्णवः—उत् + पत् + इष्णुच् (शीलार्थे कर्तरि 1st c. p.) (6) रेणवः—री + णुः (1st c. p.) 'अजि-

हरीभ्यो नित्य' (उ. ३।३८) रेणु is both masculine and feminine—'रेणु-र्द्वयोः' इत्यमरः।

Conjugation.—(1) सम्र—(V. I, 22).

Remark:—Between the 46th and the 47th verse, Chāritravardhana and others read,—

> आजनियखरखुरपरैर्नालाचिवसंभवम्।
> व्यानशे सपदि व्योम कौटकोशावलिं रजः॥

भोगिवेष्टनमार्गेषु चन्दनानां समर्पितम्।
नास्रसत् करिणां ग्रैवं त्रिपदीच्छेदिनामपि॥ ४८॥

Prose order.—चन्दनानां भोगिवेष्टनमार्गेषु समर्पितं त्रिपदीच्छेदिनाम् अपि करिणां ग्रैवं न अस्रसत।

Explanation by use of synonyms.—चन्दनानां (श्रीखण्ड-द्रुमाणां) भोगिवेष्टनमार्गेषु (सर्पवेष्टनात् गभीरनिम्नरेखाकारस्थलेषु) समर्पितं (सज्जितं) त्रिपदीच्छेदिनामपि (पादशृङ्खलच्छेदकानामपि) करिणां (वन-गजानां) ग्रैवं (कण्ठबन्धनं) न अस्रसत् (न सस्तमभूत्)।

Substance.—मलयपर्वते चन्दनवृक्षा उत्पद्यन्ते। तद्गन्धविह्वलाः सर्पास्तान् परिवेष्टयन्ति। तेषां वेष्टनेन तत्र तरुषु गभीरनिम्नरेखाः सञ्जायन्ते। रघोर्गजास्तेषु तरुषु बद्धाः आसन्। गजानां ग्रीवाबन्धनानि तत्रैव दृढमाबद्धानि —यत् तैः पादशृङ्खले चोट्रितेऽपि ग्रीवाबन्धन छेत्तुं न शेके।

Change of voice.—...समर्पितेन...ग्रैवेण...अस्रंसि।

Sanjivani.—भोगीति। (चन्दनानां) चन्दनद्रुमाणां (भोगिवेष्टन-मार्गेषु) सर्पवेष्टनात् निम्नेषु (समर्पितं) सज्जितं (त्रिपदीच्छेदिनां) पादशृङ्खल-च्छेदकानाम् (अपि)—'त्रिपदी पादबन्धनम्' इति यादवः—(करिणां)—ग्रीवासु भवं (ग्रैवं) कण्ठबन्धनम्—"ग्रीवाभ्योऽण् च" (४।३।५७। पा. १४३४ सि.) इति अण् प्रत्ययः—(न अस्रसत्) न सस्तमभूत्—"द्युद्भ्यो लुङि" (१।३।९१। पा.

२३४५ सि. इति परस्मैपदं—पुषादित्वादङ्—"अनिदिताम्—" (६।४।२४। पा. ४१५ सि.) इति नकारलोपः॥ ४८॥

Sanjivani Explained.

त्रिपदी पादबन्धनम्—त्रिपदी means the leg-bands or chains that encricle an elephant's feet.

"ग्रीवाभ्योऽण् च"—अण् is also added to ग्रीवा। 'च' indicates that to 'mean 'the neck-band.' ढञ् should be also added to ग्रीवा। The forms are ग्रैव and ग्रैवेय।

"द्युद्भ्यो लुङि"—The roots द्युत, &c., admit परस्मैपद optionally in लुङ्। स्रन्स falls in the group of द्युतादि। So in लुङ् it should adopt परस्मैपद form optionally.

पुषादित्वादङ्—In लुङ्, स्रन्स admits अङ् instead of सिच् because it falls in the group of पुषादि। The Sutra hinted at here is "पुषादिद्युताद्यृदितः परस्मैपदेषु" (३।१।५५ पा. २३४३ सि.)

अस्रसत is thus to be derived. स्रन्स्। लुङ्—तिप्। An अ (ट्) comes before and अङ् after स्रन्स। The form would be अ + स्रन्स + अङ् + त। The न् of स्रन्स elides by the Sutra "अनिदितां हल उपधायाः क्ङिति"। It means the penultimate न of a stem which has no इ for इत and which ends in a consonant, drops if a कित or ङित् affix is added to it.

स्रन्स is a stem ending in a consonant and has no इ in it which is इत्। अङ् is a ङित् affix, is added to it. So the न् of स्रन्स elides and the resultant becomes अस्रसत।

Bengali.—(অবিরত) চন্দনবৃক্ষসমূহে সর্পবেষ্টনহেতু যে গভীর নিম্নরেখা পড়িয়াছিল তাহাতে করিগণের গ্রীবাবন্ধন আবদ্ধ থাকায়, উহাদের পাদবন্ধন ছিন্ন হইলেও ঐ গ্রীবাবন্ধন স্খলিত হয় নাই। ৪৮।

English rendering.—Fastened to the grooves, caused by the coilings of serpents, of sandal trees, the neck-chains of elephants that snapped their foot-chains, did not slip.—48.

Grammatical notes, &c., &c.

Sama'sa.—(1) भोगिनां वेष्टनं भोगिवेष्टनम् (षष्ठीतत्) तस्य मार्गाः भोगिवेष्टनमार्गाः (षष्ठीतत्) तेषु (2) त्रयः पादाः अस्याः इति त्रिपदी। Here पाद is changed into पद् by निपातन in feminine, by the Sutra "कुम्भपदीषु च" (५।४।१३९ पा. ८०८ सि.) [It means—"In the compounds कुम्भपदी &c., पाद is changed into पाद् and ङीप् comes to it by निपातन] The other compounds are एकपदी, शतपदी, विपदी, द्विपदा, त्रिपदी &c. [पाद is changed into पद् when it forms the last component of a word technically called भ। त्रिपाद् is भ when ङीप् follows it.] त्रिपदीं छिन्दन्ति इति त्रिपदीच्छिदिनः (उपपदतत्) तेषाम् (3) सम्यक् अर्पितं समर्पितम् (सुप्सुपा)

Case-ending.—(1) भोगिवेष्टनमार्गेषु—आधाराधिकरणे सप्तमी (2) चन्दनानाम्—शेषे षष्ठी 'मार्ग' इत्यनेन सम्बन्धः (3) करिणाम्—शेषे षष्ठी 'ग्रैवम्' इत्यनेन सम्बन्धः (4) त्रिपदीच्छिदाम्—adjective of करिणाम्।

Synonyms.—(1) भोगिन्—(V. आशीविष, Sl. 57, C. III.) (2) चन्दन—'गन्धसारो मलयजो भद्रश्रीश्चन्दनोऽस्त्रियाम्' (अ.)

Different meanings.—(1) भोगिन्—'भोगी भुजङ्गमेऽपिस्याद्ग्राम-पाले नृपे पुमान्। त्रिषाय वाच्यवीभन्धराजयोषिति भोगिना ॥' मे.

Derivation.—(1) भोगी—भोग (फणः) + इनिः (2) चन्दनानाम्—चन्द् + णिच् + ल्युट् (6th c. p.) चन्दयति, आह्लादयतीति चन्दनम्। The word चन्दन is both masculine and neuter (3) समर्पितम्—सम् + (ऋ + णिच् =) अर्पि + क्त (कर्मणि) (4) अस्रसत्—स्रन्स् + लुङ्—दिप्। (V. Sanjivani Explained.). (5) ग्रैवम्—ग्रीवा + अण् (भवार्थे) (6) त्रिपदीच्छिदाम्—त्रिपदी + छिद् + णिनिः (शीलार्थे, 6th c. p.)

Conjugation.—(1) स्रन्स् (to slip off) स्रंसते (लट्) स्रंसताम् (लोट्) अस्रंसत (लङ्) स्रंसेत (वि. लिङ्) सस्रंसे (लिट्) स्रंसिता (लुट्)

संविष्यते (लृट्) असस्रत्, असंसिष्ट (लुङ्) स्रंसयति (णिच्-लट्) असस्रंसत् (णिच्-लुङ्) स्रस्यते (भावे-लट्) अस्रंसि (भावे-लुङ्) सिस्रंसिषते (सन्-लट्) सनीस्रस्यते (यङ्-लट्) स्रस्तः (क्तः)

Force of अपि is सम्भावना।

दिशि मन्दायते तेजो दक्षिणस्यां रवेरपि।
तस्यामेव रघोः पाण्ड्याः प्रतापं न विषेहिरे॥ ४९॥

Prose order.—दक्षिणस्यां दिशि रवेः अपि तेजः मन्दायते, तस्याम् एव पाण्ड्याः रघोः प्रतापं न विषेहिरे।

Explanation by use of synonyms.—दक्षिणस्यां दिशि (दक्षिणाशायां) रवेः अपि (सूर्यस्यापि) तेजः (अर्चिः, किरणतीव्रता इत्यर्थः) मन्दायते (मन्दं भवति) तस्यामेव (तत्र दक्षिणदिश्येव) पाण्ड्याः (पाण्ड्जनपदाधिपतयः) रघोः (दिलीपनन्दनस्य) प्रतापं (प्रभावं) न विषेहिरे (न सोढ़वन्तः)।

Substance.—अद्भुतो हि रघोः प्रतापः। दक्षिणस्यां दिशि सूर्यस्य प्रभावो मृदुतां भजते रघोस्तु तस्यामेव दिशि अवर्द्धत। पाण्ड्देशाधिपतयस्तथा पराक्रान्ताः यत्र सूर्यस्यापि तेजस्तेषां तेजसा मलिनीभवति। ते पाण्ड्या अपि रघोस्तेजः सोढ़ुं न शशाक इति कविः स्वरसम्। रघुः पाण्ड्यान् विजिग्ये इति सरलार्थः।

Change of voice.—...तेजसा मन्दाय्यते...पाण्ड्यैः...प्रतापः... विषेहे।

Sanjivani—दिशीति। (दक्षिणस्यां दिशि, रवेः अपि तेजः) (मन्दायते) मन्दं भवति—लोहितादित्वात् क्यष् प्रत्ययः—"वा क्यषः" (१।३।९० पा. २६६९ सि.) इत्यात्मनेपदम्—दक्षिणायने तेजोमान्द्यादिति भावः—(तस्याम् एव) दिशि (पाण्ड्याः)—पाण्डूनां जनपदानां राजानः पाण्ड्याः—'पाण्डोर्ड्यण्' (४।१।१६८ पा. वा. ११८६ सि. वा.) वक्तव्यः—(रघोः प्रतापं) (न विषेहिरे) न सोढवन्तः। सूर्यविजयिनोऽपि विजितवान् इति नायकस्य महानुत्कर्षो गम्यते॥ ४९॥

Sanjivani Explained.

लोहितादित्वात् क्यष् प्रत्ययं—मन्द gets the affix क्यष् and forms the नामधातु, मन्दाय, because it belongs to the group लोहित &c. The group is unlimited (आकृतिगण). The words specially mentioned are लोहित, चरित, नील, फेन, मद्र, हरित, दास and मन्द। The Sutra enjoining क्यष् to लोहित &c. is "लोहितादिडाज्भ्यः क्यष्" (३।१।१३ पा. २६६८ सि.) For its Expl., see II, 17. "वा क्यषः" V. II, 17.)

N. B. Thus, according to Mallinátha, मन्दाय has received क्यष् and मन्दाय can be both परस्मैपदी and आत्मनेपदी। In other words, both forms मन्दायते and मन्दायति are admissible according to Mallinátha. But this view is opposed to that entertained by the Várttikakára and the Bháshykára. The Várttikakára says that only लोहित and words affixed with डाच् should receive क्यष्। The rest of the group लोहित &c. should receive क्यङ् by the Sutra "भृशादिभ्यो भुव्यच्वेर्लोपश्च हलः" (३।१।१२ पा. २६६७ सि. [It means क्यङ् is affixed to भृश, &c., which fall within the scope of अभूततद्भाव, to signify the sense of भवति (it is) ; and the last consonant, if any, of a word of the group, drops. E. g., अभृशो भृशो भवति भृशायते। असुमनायते, the स् of असुमनस् drops.] In other words, Kaiyata says that all the words of the group लोहित except लोहित itself, should fall in the group भृशादि। So he frames the Várttika,—'लोहितडाज्भ्यः क्यष्वचनं भृशादिष्वितराणि'। Bháshyakára approved it. Nagesá, Bhattoji and others follow the Bháshya.

If मन्द gets क्यङ्, मन्दाय should be only आत्मनेपदी। "वा क्यषः" would not apply.

Mallinátha does not, it seems, follow Bháshyavárttika in the explanation of these Sutras. He takes श्यामाय as well to fall in the group लोहितादि। The reason that led him to differ from Bháshya is probably this:—

The group भृशादि is limited and लोहितादि is unlimited.

If all the words, except लोहित, of the group लोहितादि be incorporated in the group भृशादि, the intention of Panini is baffled. Pánini is of opinion that चरित, नील &c. get both आत्मनेपद and परस्मैपद when they form the substantive roots चरिताय, नीलाय। Why should we restrict the author, if we actually find that the substantive roots चरिताय and नीलाय adopt both the आत्मनेपद and the परस्मैपद forms?

पाण्डूनां जनपदानां राजानः पाण्ड्याः 'पाण्डोर्ड्यण् वक्तव्यः'—पाण्ड्याः means the kings of the countries called पाण्डु। It is derived form पाण्डु and the affix ड्यण्। The várttika "पाण्डोर्ड्यण् वक्तव्यः" enjoines that the word पाण्डु, a country as well as a Kshatriya chief, admits ड्यण् to mean 'the child or the king पाण्डु'।

N. B. Bhattoji says that the patronymic ड्यण् being a तद्राज affix, it should elide when the male descendants of the king of पाण्डु are signified; i.e., to mean पाण्ड्यः अपत्यानि पुमांसः or 'पाण्डूनां जनपदानां राजानः', the form should be पाण्डव, and not पाण्ड्याः। He, therefore, first derives the singular form पाण्ड्य which means 'the son of पाण्डु who is the king of the Pándus' or 'the king of the Pandus'. Now he adds अण् to पाण्ड्य to mean the adherents of पाण्ड्य by the Sutra "तस्येदम्"।

Thus Mallinátha and Bhattoji do not agree in the derivation of the word. A Calcutta editor remarks that the text of Sanjivani is wrong because to mean पाण्डूनां जनपदानां राजानः, ड्यण् must elide. We think the text is quite correct. Mallinatha, for good reasons, does not take ड्यण् to be a तद्राज affix that it should elide in the masculine plural of a word formed with it. The fact is, ड्यण् is not an affix mentioned by Pánini. So when he says "न तद्राजः" (४।१।१७४ पा. ११८१ सि.) he means that the affixes mentioned by him before, *viz.*, अञ्, अण्, ञ्यङ्, ण्य; and ञ्य are तद्राज। An affix which he does not even mention cannot possibly be intended by him to be taken as falling within the Sutra "न तद्राजः"।

The truth is, it is the Várttikakára who mentions the affix डण् after the Sutra "जनपदशब्दात् क्षत्रियादञ्" (४।१।१६८ पा. ११८६ सि.) Even he does not say that डण् should be taken as included in the तद्राज affixes. Mallinátha follows Pánini. Bhattoji, having created a needless difficulty by supposing डण् to be included in the तद्राज group, gets out of it, no doubt, with ingenuity. For all that, Mallinátha cannot be regarded as having erred in the derivation. We may also remark that the form पाण्ड्व:, in the sense of पाण्डूनां जनपदानां राजान:, is nowhere to be met. In both Rámáyana and Mahábhárata and other classical works we find the form पाण्ड्या: in the same sense.

Bengali—দক্ষিণদিকে (দক্ষিণায়নকালে) সূর্য্যেরও তেজঃ পরিক্ষীণ হয়, (কিন্তু) রঘু সেই দক্ষিণদিগ্‌গামী হওয়াতে পাণ্ড্যনৃপতিগণ তাঁহার প্রতাপ সহ্য করিতে পারিল না। ৪৯।

English rendering.—The energy of even the sun diminishes in the southern regions, but in those very regions, the Pándyas were unable to bear Raghu's prowess. 49.

Grammatical notes, &c., &c.

Samása.—(1) प्रकृष्ट: ताप: प्रताप: (प्रादि:) तस्।

Case-ending.—(1) दिशि—औपश्लेषिकाधारे सप्तमी (2) रवे:—शेषे षष्ठी 'तेज:' इत्यनेन सम्बन्ध: (3) रघो:—कृद्योगेऽनुक्ते कर्त्तरि षष्ठी—रघु: प्रतपति,—रघो: प्रताप:। शेषे षष्ठी वा।

Synonyms.—(1) रवि—(V. सूर्य्य, Sl. 13, C. III.)

Different meanings.—(1) तेजस्—'तेजोदीप्तौ प्रभावे च स्यात् पराक्रमरेतसो:' (मे.)

Derivation.—(1) मन्दायते—मन्द + क्यष् (भवत्यर्थे) = मन्दाय (नामधातु) + लट्—ते। The alternative form is मन्दायति by the rule "वा क्यष:"। अमन्दो मन्दो भवति इत्यर्थे वा मन्द + क्यङ्, in which

case it would be only आत्मनेपदी । (2) तेजः—तिज् + असुन् (उ. ४।१८९ ।) (3) रवेः—रु + इः (6th c. s.) 'अच इः' (उ. ४।१३९ ।) (4) पाण्ड्याः—पाण्डु + अण्—पाण्डूनां जनपदानां राजानः इत्यर्थे ; or पाण्डूनां जनपदानां राजा इत्यर्थे पाण्ड्यः तस्मिन् साधवः इत्यर्थे पाण्ड्य + यत् पाण्ड्याः पाण्ड्यदेशीयाः इत्यर्थः (5) प्रतापम्—प्र + तप् + घञ् (भावे, 2nd c. s.) (6) विषेहिरे—वि + सह् + लिट—इरे ।

Conjugation.—(1) मन्दाय (to be weakened)—मन्दायते (लट्) मन्दायताम् (लोट्) अमन्दायत (लङ्) मन्दायेत (वि. लिङ्) मन्दायाञ्चक्रे &c. (लिट्) अमन्दयत (लुङ्) मन्दायिता (लुट्) मन्दायिष्यते (लृट्) मन्दायितः (क्तः) (2) सह—(V. Sl. 63, C. III.)

Force of एव—अयोगव्यवच्छेद । It means in the southern quarter as well, and not in that quarter only. So एव should be connected with the विशेष्य दक्षिणस्याम् and not with the adjective (V. I, 18.)

Force of अपि—सम्भावना ।

Rhetoric.—The figure of speech is व्यतिरेक because उपमेय is represented as more excellent than उपमान । Generally a powerful king is compared to the sun ; here Raghu is represented to exceed the sun in energy. The sun's energy is dimmed in the southern region. But Raghu's energy did not suffer a jot. (See Rhetoric I, 24.) The sun's energy was dimmed because the time was autumn or the advent of winter.

Geography.—The kingdom of the Pándyas can be traced to a very remote period. It was well-known in the days of Rámáyana, and Mahábhárata. Válmiki mentions the golden gates of its capital situate on the southern site of the Támraparni.* Thus it seems to correspond with the southernmost

* किष्किन्ध्याकाण्ड, C. XLI, 19.

*• Mahábhárata, Sabhá Parvan, Ch. XXXL, 17-18.

part of the Madras Presidency. Vyása places it to the north of Kishkindhyá. Sahadeva, in his campaign of conquest, is said to conquer the Pándyas first and then to proceed towards दक्षिणापथ and reach the celebrated mountain-cave of किष्किन्धा। But Vyása does not mention the Pándyas in the list of races which Sanjaya narrates unto Dhritaráshtra. Probably, it was due to the fact that the Pándyas had lost their ancient glory. Márkandeya Purána does not mention them as well. Kálidása's description enables us to identify the Pándya principality with the portion of the Madras Presidency bounded by Káveri on the north, Bay of Bengal on the East, and the Indian Ocean on the South and the West.

ताम्रपर्णीसमेतस्य मुक्तासारं महोदधेः।
ते निपत्य ददुस्तस्मै यशः स्वमिव सञ्चितम् ॥ ५० ॥

Prose order.—ते ताम्रपर्णीसमेतस्य महोदधेः (सञ्चितं) मुक्तासारं स्वं सञ्चितं यशः इव तस्मै निपत्य ददुः।

Explanation by use of synonyms.—ते (पाण्ड्याः) ताम्रपर्णीसमेतस्य (तन्नामकनदीसङ्गतस्य) महोदधेः (महार्णवस्य) सम्बन्धि सञ्चितं मुक्तासारं (मौक्तिकवरं) स्व (स्वकीयं) सञ्चितम् (अर्जितं) यशः इव (कीर्त्तिमिव) तस्मै (रघवे) निपत्य (प्रणम्य) ददुः (दत्तवन्तः)।

Substance.—पाण्ड्याः पराभूताः सन्तः रघोर्वशमाजग्मुः ; सम्माननार्थं च तस्मै रत्नानि ददुः। नैतानि यानि कानिचिदेव रत्नानि। सागरताम्रपर्णीसङ्गमे यानि मौक्तिकवराणि तैश्चिरायार्ज्जितानि तानि ते रघवेऽर्पयामासुः। कविरुत्प्रेक्षते नैताः शुभ्राः मुक्ताः अपितु महाप्रभावानां पाण्ड्नां चिरार्ज्जितानि धवलयशांसि यानि रघुराजाय। तेषां यशो रघुणाहृतमिति निष्पीडितोऽर्थः।

Change of voice.—तैः.........ददे।

Sanjivani.—ताम्रपर्णीति। (ते) पाण्ड्याः—ताम्रपर्ण्या नद्या समेतस्य, सङ्गतस्य [ताम्रपर्णीसमेतस्य] (महोदधेः) समुद्रस्य—सञ्चितं (मुक्तासारं) मौक्तिकवरम्—"सारो बले स्थिरांशे च न्याय्ये क्लीबं वरे त्रिषु" इत्यमरः (Cole p. 349)—(स्वं) स्वकीयं (सञ्चितं यशः इव) (तस्मै) रघवे (निपत्य) प्रणिपत्य (ददुः)। यशसः शुक्लत्वादौपम्यम्। ताम्रपर्णीसङ्गमे मौक्तिकोत्पत्तिरिति प्रसिद्धम् ॥ ५० ॥

Sanjivani Explained.

सारो बले स्थिरांशे च न्याय्ये * * त्रिषु—सार when masculine, means बल (strength), as well as स्थिरांश (essence). When neuter, it means न्याय्य (proper). To mean वर (superior), it admits of all genders.

यशसः शुक्लत्वादौपम्यम्—See Rhetoric.

ताम्रपर्णीसङ्गमे * * इति प्रसिद्धम्—The confluence of Támraparni and the sea is celebrated for its pearl-fishery.

N. B. Even to this day the pearl-fisheries near Ceylon compare favourably with those of the Persian gulf.

Bengali—তাম্রপর্ণী এবং মহাসমুদ্রের সঙ্গমস্থল হইতে আহৃত, উৎকৃষ্ট মুক্তানিকর সেই পাণ্ড্যনৃপতিগণ প্রণত হইয়া তাঁহাকে দান করায় বোধ হইল যেন তাঁহারা স্বকীয় চিরকাল হইতে অর্জ্জিত যশোরাশিও তাঁহাকে প্রদান করিল। ৫০।

English rendering.—Falling (at his feet), they gave unto him the choicest pearls, like unto their own hoarded fame, of the great ocean where it meets the Támraparni. 50.

Grammatical notes, &c., &c.

Sama'sa.—(1) सम्यक् इतः समितः (सुप्सुपा) ताम्रपर्ण्या समेतः ताम्रपर्णीसमेतः (तृतीयातत्) तस्य (2) मुक्तानां सारं मुक्तासारम् (षष्ठीतत्) (V. त्रिपिष्ट, Sl. 7, C. II.) (3) महोदधेः—(V. Sl. 17, C. III.) (4) सम्यक् चितं सञ्चितम् (सुप्सुपा)।

Case-ending.—(1) मलयोदरे:—शेषे षष्ठी 'मुक्तासारम्' इत्यनेन सम्बन्ध: (2) यश:—विधेय and उपमान कर्म। The उद्देश्य and उपमेयकर्म is 'मुक्तासारम्' (3) तस्मै—सम्प्रदाने चतुर्थी।

Different meanings.—(1) मुक्ता—'मुक्ता मौक्तिकपुंश्चल्यो:' (हे.) पुंश्चली—An unchaste woman.

Derivation.—(1) मुक्ता—मुच + क्त (कर्मणि) + टाप् (2) सारम्—(V. Sl. 14, C. I.) (3) समेतस्य—सम् + इ(ण्) + क्त: (कर्त्तरि, 6th c, s.) (4) मलयोदरे:—(V. Sl. 17, C. III.) (5) निपत्य—नि + पत + ल्यप् (6) ददु:—दा + लिट्—उस (7) यश:—अश् (ग) + असुन्—'अशेर्देवने युट् च' (उ. ४।१९१।) (8) सञ्चितम्—सम् + चि + क्त (कर्मणि, 2nd c.s.)

Conjugation.—(1) पत्—(V. Sl. 60, C. II.) (2) दा—(V. Sl. 18, C. I.)

Rhetoric.—The figure of speech is उपमा। Pearls are compared to the fame of the Pándya kings. The common point is their whiteness. Pearls are naturally white. Fame is also described by the Indian poets as white. "यशसि धवलता वर्ण्यते हासकीर्त्यो:" (V. Sáhityadarpana, Ch. VII).

Geography.—The name, Támraparni, is still extant. The river rises from the southernmost part of the Western Ghâts, flows through Tinnevelli and falls in to the Gulf of Manaar.

स निर्विश्य यथाकामं तटेष्वालीनचन्दनौ।
स्तनाविव दिशस्तस्या: शैलौ मलयदर्दुरौ॥ ५१॥
असह्यविक्रम: सह्यं दूरान्मुक्तमुदन्वता।
नितम्बमिव मेदिन्या: स्रस्तांशुकमलङ्घयत्॥ ५२॥

मूलस्य पाठान्तरम्।

आलीनचन्दनौ—आलीढचन्दनौ (चा.)
दूरान्मुक्तम्—दूरमुक्तम् (चा. दि.)

Prose order.—असह्यविक्रम: स: तटेषु आलीनचन्दनौ तस्या: दिश:

स्तनौ इव मलयदर्दुरौ शैलौ यथाकामं निर्विश्य, उदन्वता दूरान्मुक्तं स्रस्तांशुकं मेदिन्याः नितम्बम् इव सह्यम् अलङ्घयत्।

Explanation by use of synonyms.—असह्यविक्रमः (असहनीयप्रतापः) सः (रघुः) तटेषु (सानुषु, पर्वतोपरिस्थितसमतलभूमिषु इत्यर्थः) आलीनचन्दनौ (पर्वतपक्षे—व्याप्तचन्दनद्रुमौ,—स्तनपक्षे,—प्रान्तेषु व्याप्तचन्दनावलेपौ) तस्याः (दक्षिणस्याः) दिशः (आशायाः) स्तनौ इव (पयोधराविव) मलयदर्दुरौ (तन्नामकौ) शैलौ (पर्वतौ) यथाकामं (यथेच्छं) निर्विश्य (उपभुज्य) उदन्वता (समुद्रेण) दूरान्मुक्तं (दूरतः परित्यक्तं) स्रस्तांशुकं (विगलितवसनं) मेदिन्याः (पृथिव्याः) नितम्बमिव (कटिपश्चाद्भागमिव) सह्यं (सह्यनामकाद्रिम्) अलङ्घयत् (अतिक्रान्तवान्)।

Substance.—असहनीयप्रतापो रघुर्दक्षिणदिगङ्गनायाः पयोधराविव तटेषु व्याप्तचन्दनद्रुमौ मलयदर्दुरनामानौ शैलौ यथेच्छम् उपभुज्य पृथिव्याः गलितवसनं नितम्बमिव दूरात् समुद्रजलपरित्यक्तं सह्याद्रिं विलङ्घ्य प्रतस्थे। पाण्ड्यान् विजित्य असहनीयप्रतापः स रघुश्चन्दनैकपशोभिते मलये दर्दुराचले च यथाकाममुवास। तत्र च रमणीयैर्बहुभिर्द्रव्यैः मुमुदे। ततो दुर्लङ्घं सह्यपर्वतमलङ्घयत्। समुद्रो न सह्याद्रिः। तयोरन्तरे विशाला भूखण्डा विराजते। तत् कविकल्पितं यत् उभौ मलयदर्दुरौ दक्षिणदिगङ्गनायाः स्तनस्वरूपौ। तयोः प्रान्तेषु शोभमानाश्चन्दनद्रुमाः मेदिनीनायिकायाः स्तनप्रान्तेषु चन्दनावलेप इवाशोभत। रघुः कामीव तौ यथेच्छमुपबुभुजे। तथा सह्यः पृथिव्या नितम्ब इव, अपरश्च स्रस्तांशुकमिवादृश्यत। समुद्रादपसर्पन्नर्णवो मेदिनीनायिकाया नितम्बाद्गलितं वसनमिव रेजे।

Change of voice.—असह्यविक्रमेण तेन...दूरान्मुक्तः स्रस्तांशुकः...नितम्बः...सह्यः अलङ्घ्यत।

Sanjivani.—स इति। असह्येति च। युग्ममेतत्। (असह्यविक्रमः) (सः) रघुः (तटेषु) सानुषु (आलीनचन्दनौ) व्याप्तचन्दनद्रुमौ—"गन्धसारो मलयजो भद्रश्रीश्चन्दनोऽस्त्रियाम्" इत्यमरः (Cole. p. 172) स्तनपक्षे—प्रान्तेषु व्याप्तचन्दना-

तुलिपी—(तस्याः) दक्षिणस्याः (दिशः स्तनौ इव) स्थितौ (मलयदर्दुरौ) नाम (शैलौ) (यथाकामं) यथेच्छ (निर्विश्य) उपभुज्य—"निर्वेशो भृतिभोगयोः" इत्यमरः (Cole. p. 362)—उदकानि अस्य सन्तीति उदन्वान्, "उदन्वानुदधौ च" (८।२।१३ पा. १८०१ सि.) इति निपातः—(उदन्वता) (दूरान्मुक्तम्) दूरतः त्यक्तम्—"स्तोकान्तिकदूरार्थकृच्छ्राणि क्तेन" (२।१।३९ पा. ७०१ सि.) इति समासः—"पञ्चम्याः स्तोकादिभ्यः" (६।३।२ पा. ९५८ सि.) इत्यलुक्—(सत्तांशुकं, मेदिन्याः नितम्बम् इव)—स्थितं—(सह्य) सह्याद्रिम् (अलङ्घयत्) प्राप्तः, अतिक्रान्तो वा ॥ ५१ ॥ ५२ ॥

Sanjivani Explained.

गन्धसारो * * * * अस्त्रियाम्—गन्धसार, मलयज, भद्रश्री and चन्दन are synonymous of which चन्दन is अस्त्री ।

निर्वेशो भृतिभोगयोः—निर्वेश means भृति (maintenance) as well as भोग (enjoyment).

"उदन्वानुदधौ च"—To mean उदधि and a proper name, उदक् adopts the form उदन् when मतुप् is added to it. उदक् + वत् = उदन् + वत् = उदन्वत् ।

"स्तोकान्तिकदूरार्थकृच्छ्राणि क्तेन"—[A word bearing the sense of स्तोक, अन्तिक, or दूर, as well as the word कृच्छ्र is compounded with a क्तान्तपद] । That compound is पञ्चमीतत्पुरुष । E. g., स्तोकान्मुक्त, अल्पान्मुक्त, अन्तिकादागत &c.

"पञ्चम्याः स्तोकादिभ्यः" इत्यलुक्—The पञ्चमी of दूर which is compounded with the क्तान्त word मुक्त does not elide because of the Sutra "पञ्चम्याः—" । It means 'when a word follows it and is compounded with स्तोक, &c., the पञ्चमी ending after स्तोक, &c., elides'. E. g. स्तोकान्मुक्त &c.

Bengali.—অসহনীয়প্রতাপ সেই রঘু তটপ্রদেশে ব্যাপ্তচন্দনতরু, দক্ষিণদিগঙ্গনার চন্দনাবলিপ্ত স্তনদ্বয়ের ন্যায় প্রতীয়মান মলয় এবং দর্দুর নামক শৈলদ্বয় যথেচ্ছ উপভোগ করিয়া, দূর হইতে সমুদ্রজলপরিত্যক্ত (অতএব) বিগলিতবসন মেদিনীর নিতম্বের ন্যায় প্রতীয়মান সহ্যপর্ব্বতকে অতিক্রম করিলেন। ৫১। ৫২।

English rendering.—Enjoying, according to his pleasure, the mountains, Malaya and Dardura, with (rows of) sandal trees standing on the grounds stretching at their feet, and looking like the bosoms of that (southern) region, he of unbearable prowess crossed the Sahya mountains from which the sea had receded far and which looked like the hips of the Earth from which the (covering) cloth had fallen off. 51—52.

Grammatical notes, &c., &c.,

Sama'sa.—(1) कामम् अनतिक्रम्य यथाकामम् (अव्ययीभावः) (2) आ (समन्तात् लीनाः) आलीनाः (प्रादिः) आलीनाः चन्दनाः ययोः तौ आलीनचन्दनौ (बहु—पर्वतपक्षे)—स्तनपक्षे तु—आ (समन्तात्) लीनः (व्याप्तः) चन्दनः (चन्दनानुलेपः) ययोः तौ (बहु) (3) मलयश्च दर्दुरश्च तौ मलयदर्दुरौ (द्वन्द्वः) तौ (4) न सह्यः असह्यः नञ्तत्; असह्यः विक्रमः यस्य सः असह्यविक्रमः (बहु) (5) दूरात् मुक्तः दूरान्मुक्तः (पञ्चम्या अलुक्-समासः) तम्। स्रस्तं (विगलितम्) अंशुकं (वस्त्रं) यस्मात् स स्रस्तांशुकः (बहु) तम्।

Case-ending.—(1) यथाकामम्—अव्ययं, क्रियाविशेषणम् (2) तटेषु—औपश्लेषिकाधारे सप्तमी (3) स्तनौ—विधेय and उपमानकर्म, 'शैलौ' उद्देश्य and उपमेयकर्म (4) दिशः—शेषे षष्ठी—'स्तनौ' इत्यनेन सम्बन्धः (5) नितम्बम्—विधेय and उपमानकर्म—'सह्यम्' is its उद्देश्य and उपमेयकर्म (6) उदन्वता—अनुक्ते कर्तरि तृतीया—'मुक्तम्' इत्यस्य (7) मेदिन्याः—शेषे षष्ठी 'नितम्ब' इत्यनेन सम्बन्धः।

Synonyms.—(1) उदन्वत्—(V. समुद्र, Sl. 5-9, C. I.) (2) मेदिनी—(V. I, 65) (4) शैल—(V. अचल, Sl, 68, C. I.) (5) अंशुक—'वस्त्रमाच्छादनं वासश्चैलं वसनमंशुकम्।' (अ.)

Different meanings.—(1) अंशुक—'अंशुकं स्यादुत्तरीयवस्त्रमात्रोत्तरीययोः' (मे.) (2) विक्रम—(V. Sl. 22, C. IV.)

Derivation—(1) निर्विश्य—निर्+विश्+ल्यप् (2) आलीनः—आ+ली+क्तः (कर्मणि) (3) चन्दनः—(V. Sl. 48, C. IV.) (4) सर्गो—सृज्+अच् or घः (2nd c. d.)—"पुंसि संज्ञायां घः प्रायेण" (३।३।११८ पा. सि.) भ्रमतः (कथयतः) यौवनोदयम्—(5) शैलौ—शैल+अण् (संघातार्थे, 2nd c. d.) (6) असह्यः—सह+यत् (कर्मणि) = सह्यः (न+सह्यः) (7) उदन्वता—उदक+मतुप् (निपात्यते, 3rd c. s.) उदक is changed into उदन्। (8) नितम्बम्—नि+तम्ब्+अप् or घञ् (2nd c. s.) or निभृतं तम्यते (काङ्क्ष्यते) कामुकैः यः सः—or, नितरां ताम्यति (ग्लायति) सुरतसंमर्दात् इति—नि+तम्+बन्—निपात्यते—'उल्वादयश्च' (उ. ४।९५) (9) स्रस्तम्—स्रंस्+क्तः (कर्मणि)। इट् does not come to the root in क्त, because this root is read in धातुपाठ as स्रंसु। See "उदितो वा" and "यस्य विभाषा" under Sl. 30, C. I. (10) अंशुकम्—अंशु+कै+डः or, अंशु+काश्+डः—"अन्येष्वपि दृश्यते" (V. notes on परिखीकृत—, Sl. 30, C. I.) (11) अलङ्घयत्—लङ्घ+लङ्-तिप्।

Conjugation.—(1) लङ्घ—(V. Sl. 2, C. III.) (2) विश्—(V. Sl. 28, C. III.)

Rhetoric.—The figure of speech in each of these verses is simile. In one, मलय and दर्दुर are compared to the breasts of the southern region which is thus implicitly represented as a young lady and Raghu is suggested to be her lover.

In the other, सह्य is compared to the hips and the sea to the cloth of the Earth which is thus implicitly represented as a woman having Raghu for her lord. Ocean is often represented as the cloth worn by the Earth. Cf. सागराम्बरा।

Geography. दर्दुर—Evidently a mountain near the Malaya. We read the name in Mahábhárata and the other

Puránas, but cannot identify it. Is it identifiable with the nameless range to the south of the Cardamom hills ?

सह्य—It is the Western Ghat range. Káveri, Tunngabhadrá; Krishná, &c., are said to rise from it. *

दूरान्मुक्तमुद्रस्वता—By this is meant the narrow strip of land lying between the Sea and the Western Ghat range. The strip is named at present Konkan, Kanara &c. Perhaps, it did not get any name in the days of our poet ; or even if it had any appellation the country did not rise into prominence.

तस्यानीकैर्विसर्पद्भिरपरान्तजयोद्यतैः।
रामास्त्रोत्सारितोऽप्यासीत् सह्यलग्न इवार्णवः॥५३॥

अपसर्पद्भि.—विसर्पद्भि. (च.)
रामास्त्रोत्सारितः—रामेषूत्सारितः (चा.)

Prose order.—अपरान्तजयोद्यतैः विसर्पद्भिः तस्य अनीकैः अर्णवः रामास्त्रोत्सारितः अपि सह्यलग्नः इव आसीत्।

Explanation by use of synonyms.—अपरान्तजयोद्यतैः (पाश्चात्यविजयोद्युक्तैः) विसर्पद्भिः (गच्छद्भिः) तस्य (रघोः) अनीकैः (सैन्यैः) अर्णवः (समुद्रः) रामास्त्रोत्सारितः अपि (जामदग्न्यास्त्रैरपसारितोऽपि) सह्यलग्न इव (सह्यसंयुक्त इव) आसीत् (अभवत्)।

Substance.—पुरा परशुरामः अस्त्रनिक्षेपेण समुद्रं सह्यपर्वतात् दूरम् अपसारयामास। रघोस्तु विपुलसैन्यानि यदा तत्पर्वतात् विनिर्गत्य [illegible] समुद्रतीरेषु अपरान्ताभिमुखं प्रतस्थिरे—तदा अविच्छिन्नसंसक्तैस्तैः प्रतीयते स्म यत् सह्याद्रिः पुनरपि समुद्रेण सह संसृष्टोऽभूत्।

Change of voice.—...अर्णवेन रामास्त्रोत्सारितेन...सह्यलग्नेन... अभूयत।

---

* Markandeyapuranam, Ch. 58.

Sanjivani.—संप्रति प्रतीचीं दिशमभिययाविल्याह—तस्येति। अपरान्तानां, पाश्चात्यानां ; जये उद्यतैः, उद्युक्तैः [अपरान्तजयोद्यतैः]—"अपरान्तास्तु पाश्चात्याः ते च मूर्ध्वरिकादयः" इति यादवः—(विसर्पद्भिः) गच्छद्भिः (तस्य) रघोः (अनीकैः) सैन्यैः—"अनीकन्तु रणे सैन्ये" इति विश्वः—(अर्णवः) रामस्य, जामदग्न्यस्य ; अस्त्रैः ; उत्सारितः, परिसारितः [रामास्त्रोत्सारितः] (अपि) (सह्यलग्नः इव आसीत्)। सैन्यं द्वितीयोऽर्णव इव अदृश्यत इति भावः ॥ ५३ ॥

Sanjivani Explained.

अपरान्तास्तु * * मूर्ध्वरिकादयः—Aparántas are also called पाश्चात्य or inhabitants of the west. They are the tribes known as मूर्ध्वरिक, &c.

These tribes are thus enumerated in Márkandeya Purána:

* * अपरान्तान् निबोध मे।

मूर्ध्वरिकाः कालिवनाः दुर्गाश्चानीकटैः सह ॥

पुलिन्दाश्च सुमीनाश्च रूपपाः स्वापदैः सह।

तथा कुरुमिनाश्चैव सर्व्वे चैव कटाचराः ॥

काश्मीराश्च सुराष्ट्राश्च आवन्त्याश्चार्व्वुदैः सह।

Ch. LVII.

सैन्यं द्वितीयोऽर्णव इवादृश्यत—His vast army looked like the vasty sea.

Bengali.—যখন রঘুর সৈন্যপ্রবাহ পাশ্চাত্যদেশসমূহজয়ে উদ্যত হইয়া গমন করিতে লাগিল, তখন বোধ হইল, যেন, সমুদ্র পরশুরামের অস্ত্র দ্বারা (পূর্ব্বে) অপসারিত হইলেও, (এক্ষণে পুনরায় সহ্যপর্ব্বতে আসিয়া সংলগ্ন হইয়াছে। ৫৩।

English rendering.—With his troops marching, bent upon the conquest of Aparánta, the ocean, though (it had been) driven off by the weapons of Paraśuráma, seemed to become reunited with the Sahya mountain.

Grammatical notes, &c., &c.

Sama'sa.—(1) विशेषेण सर्पन्ति विसर्पन्ति (प्रादि:) तै: (2) अपरान्तानां जय: अपरान्तजय: (षष्ठीतत्) तस्मिन् उद्यतानि अपरान्तजयोद्यतानि (सप्तमीतत्) तै: (3) रामस्य अस्त्राणि रामास्त्राणि (षष्ठीतत्) तै: उत्सारित: रामास्त्रोत्सारित: (तृतीयातत्) (4) सह्येन लग्न: सह्यलग्न: (तृतीयातत्)।

Case-ending.—(1) तस्य—शेषे षष्ठी 'अनीकै:' इत्यनेन सम्बन्ध: (2) अनीकै:—इत्थं तृतीया (3) विसर्पद्भि: and अपरान्तजयोद्यतै: are adjectives of अनीकै: (4) रामास्त्रोत्सारित: and सह्यलग्न: are adjectives of अर्णव:।

Synonyms.—(1)अनीक—(V. सेना, Sl. 19, C. I.) (2) अर्णव—(V. समुद्र, Sl. 5-9, C. I.)

Different meanings.—(1) अनीक—(V. Sanjivani.) (2) राम—'रामा योषाहिङ्गुलिन्यो: क्लीबं वास्तुककुष्ठयो:। ना राघवे च वरुणे रैणुकेये हलायुधे। हये च पशुभेदे च त्रिषु चारौ सितेऽसिते॥' (मे.)

Deivation.—(1) अनीक:—अन् + ईकन् (3rd c. p.) (4) राम:—रम् + ण (कर्तरि) "ज्वलितिकसन्तेभ्यो ण." (3।1।140 पा. २८०२ सि.) [ण is affixed to ज्वल् &.c. as well as to a root ending in कस्] or, रम् + घञ् (अधिकरणे) रमन्तेऽस्मिन् योगिन:—"हलश्च" (३।३।१२१।पा. ३३०० सि.) [A root ending in हल् admits of घञ् in any वाच्य] (5) उत्सारित:—उत् + (सृ + णिच्—) सारि + क्त: (कर्मणि) (6) आसीत्—अस् + लङ्—दिप् (7) लग्न:—लग् + क्त: (कर्तरि)—The affix क्त is changed into न by निपातन and इट् does not come to it by the rule:—"क्षुब्धस्वान्तध्वान्तलग्नम्लिष्टविरिब्धफाण्टबाढानि मन्थमनस्तम:सक्ताविस्पष्टस्वरानायासभृशेषु। (७।२।१८ पा. ३०५८ सि.) (8) अर्णव:—(V. I, 16.)

Conjugation.—(1) सृप्—सर्पति (लट्) सर्पतु (लोट्) असर्पत् (लङ्) सर्पेत् (वि. लिङ्) ससर्प, ससृपतु:, ससर्पिथ (लिट्) सर्प्ता, स्रप्ता

(लुट्) सर्प्स्यति, सर्प्स्यति (लृट्) असृपत्, असार्प्सीत्, असाप्सीत् (लुङ्) सर्पयति (णिच्-लट्) असीसृपत्, असमर्पत् (णिच्-लुङ्) असर्पि (भावे-लुङ्) सिसृप्सति (सन्-लट्) सरीसृप्यते (यङ्-लट्) सृप्तः (क्तः) (2) अस्—(V. Sl. 16, C. III.)

Force of अपि—सम्भावना।

Allusion.—सप्तद्वीपामिमां पृथिवीं परशुरामः अश्वमेधान्ते कश्यपाय दक्षिणां ददौ। कश्यपोऽपि भार्गवं मेदिनीं विहातुमनुरुरोध। तदनुरोधेन स समुद्रसमीपं गत्वा तं स्ववासार्थं किञ्चित्स्थानं ययाचे। समुद्रस्तु जलमपसार्य्य स्थलं लभताम् इति भार्गवं प्रोवाच। तच्छ्रुत्वा स बाणतेजसा सह्यपर्वतात् समुद्रमपसार्य्य तस्य गिरेः पश्चिमभागे शूर्पारकं नाम देशं स्ववासाय निर्ममे। (V. Mahábháratam, Rájadharmaparvan, ch. 87.)

[Parasuráma denued the Earth of Kshatriyas for one and twenty times. He became its sole lord, and after ruling over it for many years gave it away unto Kas'yapa in a horse-sacrifice. Thereupon Kas'yapa bade him leave the Earth. He went to Ocean and asked him for a site because that would be a new one, not included in the Earth he had given away. Ocean replied him,—"Do thou ward off my waters and get a site." Hearing this, Ráma warded off the sea with his shaft and created a new country to live in, called S'urpáraka.

Geography.—अपरान्त। Evidently it is on the north of the Western Ghats. It was well-known in the days of Vyása. Markandeya Purána takes it to be Western India including Guzrat, and even Kasmir, bounded by Narmada on the south, and Vindhya on the east. Kálidása takes it to mean only the tract bounded on the south by सह्य and north by सहिय। Thus his अपरान्त comprises modern Surat Baroda, Guzrat, &c.

Mahábháratam, BhishmaParvan, Ch. IX.

भयोत्सृष्टविभूषाणां तेन केरलयोषिताम्।

अलकेषु चमूरेणुश्चूर्णप्रतिनिधीकृतः॥ ५४॥

Prose order.—तेन भयोत्सृष्टविभूषाणां केरलयोषिताम् अलकेषु चमूरेणुः चूर्णप्रतिनिधीकृतः।

Explanation by use of synonyms.—तेन (रघुणा) भयोत्सृष्टविभूषाणां (भयपरित्यक्तालङ्काराणां) केरलयोषितां (केरलाङ्गनानाम्) अलकेषु (चूर्णकुन्तलेषु) चमूरेणुः (सेनारजः) चूर्णप्रतिनिधीकृतः (कुङ्कुमादि-रजसः प्रतिनिधित्वेन स्थापितः)।

Substance.—ततो रघुः केरलानाचक्राम। ते सर्व्वे पराभूताः। तेषा-मङ्गनाः तस्य सैन्यागमनभयेनातिभीताः पलायामासिरे। भयेन ते प्रियाण्यपि भूषणानि विजहुः। रघोस्तु विपुलैः सैन्यैः ईदृशं रजः समुत्थितम् यत् दिशो तेन व्यताः। केरलवनितानां शिरसि तदपतत्। यान् कुन्तलान् ताः कुङ्कुमादीनां परागैः संस्कारयामासुः, इदानीं तेषु कुन्तलेषु रजोधुना पदं निदधे।

Change of voice.—सः...चमूरेणुं चूर्णप्रतिनिधीकृतवान्।

Sanjivani.—भयेति। (तेन) रघुणा—भयेन उत्सृष्टविभूषाणां [भयोत्सृष्टविभूषाणां] (केरलयोषितां) केरलाङ्गनानाम् (अलकेषु) (चमूरेणुः) सेनारजः; चूर्णस्य, कुङ्कुमादिरजसः; प्रतिनिधीकृतः [चूर्णप्रतिनिधीकृतः]। एतेन योषितां पलायनं चमूनाञ्च तदनुधावनं ध्वन्यते॥ ५४॥

Bengali.—ভয়হেতু পরিত্যক্তভূষণা কেরলাঙ্গনাগণের চূর্ণকুন্তলে কুঙ্কুমাদিচূর্ণের পরিবর্ত্তে রঘু সৈন্যোত্থিত ধূলি স্থাপন করিলেন। ৫৪।

English rendering.—The dust raised by (his) army was made by him, the substitute of the (perfumed) powder on the tresses of the Kerala women, who had flung their ornaments aside through fear.—54.

Grammatical notes, &c., &c.

Sama'sa.—(1) भयेन उत्सृष्टा भयोत्सृष्टा (तृतीयातत्) भयोत्सृष्टा

विभूषा याभिः ताः भर्यात्सृष्टविभूषाः (बहु) तासाम् (2) केरलानां (केरलदेशानां तद्देशीयानां राज्ञां वा) योषितः केरलयोषितः (षष्ठीतत्) तासाम् (3) चमूत्थितः रेणुः चमूरेणुः (शाकपार्थिवादित्वात् मध्यपदलोपी कर्मधा) (4) चूर्णस्य चूर्णात् वा प्रतिनिधिः चूर्णप्रतिनिधिः (षष्ठी वा पञ्चमी तत्) अचूर्णप्रतिनिधिः चूर्णप्रतिनिधिः कृतः = चूर्णप्रतिनिधीकृतः (पतिसमासः) । "प्रतिनिधिप्रतिदाने च यस्मात्" (२।३।११। पा. ६०० सि.), meaning that in alliance with प्रति bearing the sense of प्रतिनिधि (representative) or प्रतिदान (return) a word gets पञ्चमी, is a ज्ञापक सूत्र। Pánini, by using पञ्चमी 'यस्मात्' in alliance with प्रतिनिधि and प्रतिदान, suggests that the fifth case is possible in alliance with these words. A ज्ञापक सूत्र is not obligatory, so षष्ठी is also possible in alliance with प्रतिनिधि and प्रतिदान।

Case-ending.—(1) केरलयोषिताम्—शेषे षष्ठी 'अलकेषु' इत्यनेन सम्बन्धः (2) तेन—अनुक्ते कर्त्तरि तृतीया (3) अलकेषु—आधाराधिकरणे सप्तमी (4) चमूरेणुः—उक्ते कर्मणि प्रथमा।

Synonyms.—(1) अलक—'अलकाश्चूर्णकुन्तलाः' (अ.) (2) चमू—(V. सेना, Sl. 19, C. I.) (3) योषित्—'स्त्री योषिदबला योषा नारी सीमन्तिनी वधूः। प्रतीपदर्शिनी वामा वनिता महिला तथा॥' (अ.)

Different meanings.—(1) चूर्ण—'चूर्णानि वासयोगाः स्युश्चूर्णो धूलिः सशर्करा' (शाश्वत.) (2) अलक—'अलका कुवेरपुर्यामस्त्रियां चूर्णकुन्तले।' (मे.)

Derivation.—(1) अलकेषु—अल् + वुन् (7th c. p.) 'कृञादिभ्यो वुन्' (उ. ५।३५।) (2) भयम्—भी + अच् (3) उत्सृष्टा—उत् + सृज् + क्तः (कर्मणि) + टाप् (3) विभूषा—वि + भूष + अ (भावे) (5) योषिताम्—युष् + इतिः (6th c. p.) 'हृसृरुहियुषिभ्य इतिः' (उ. ११९७।) (6) चमूः—(V. Sl. 30, C. IV.) (7) रेणुः—(V. Sl. 47, C. IV.) (8) प्रतिनिधी-

क्रत:—प्रतिनिधि + कृ + क्त (अभूततद्भावे च्वि., कर्मणि) [For, अभूततद्भावे च्वि:, see पयोधरीभूत—, Sl. 3, C. II.] (9) केरल—केरल + अण् केरलानां राजा = केरल: । ते । अण् elides by the Várttika 'कम्बोजादिभ्य: इति वक्तव्यम्' (४।१।१७५ पा. वा ११८४ सि.) which means that the तद्राज affix elides not only when it is added to कम्बोज as Pánini says but when it is added to other words as चोल, शक, यवन, केरल । See काम्बोजा: in IV, 69.

Conjugation.—(1) कृ—V. Sl. 8, C. III.) (2) भूष्—(V. Sl. 18, C. I.)

Remark.—One of the Calcutta editors derives विभूषा as 'वि + भूष् + अङ्' । It is wrong. The proper affix is अ because the Sutra "गुरोश्च हल:" (३।३।१०३। पा. ३२८० सि.) is applicable here. It means a root ending in हल् and having a गुरु vowel admits the affix अ if the resultant be a feminine.

Geography.—केरल—The Kerals, Márkandeya Purána says, were one of the tribes living on the Vindhya range.* Mahábhárata † mentions two केरल's, one western, and the other south-eastern. Márkandeya Purána mentions only one and that the southern, near Mahárashtra. Evidently, Kálidása's Keralas, reside just on the north of the Western Ghats. So his Keralas are the southern tribe near Mahárashtra. Prof. Wilson, however, indentifies the country of the Keralas with Malabar, on what authority we do not know.

मुरलामारुतोद्धूतमगमत् कैतकं रज: ।
तद्योधवारबाणानामयत्नपटवासताम् ॥ ५५ ॥

Prose order.—मुरलामारुतोद्धूतं कैतकं रज: तद्योधवारबाणानाम् अयत्नपटवासताम् अगमत् ।

* Márkandeyapuránam, Ch. 57.

† भीष्मपर्व्वणि ९म अध्याये ।

Explanation by use of synonyms.—मुरलामारुतोद्धूतं (मुरलावायूत्थापितं) केतकं (केतकसम्बन्धि) रजः (परागः) तद्योधवारवाणानां (रघुभटकञ्चुकानाम्) अयत्नपटवासताम् (अनायाससिद्धसुरभिवस्त्रवासनाद्रव्यत्वम्) अगमत् (प्राप)।

Substance.—तत्र केरलेषु केतकीकुसुमवनानि बहुलानि सन्ति; मुरला नाम च नदी प्रवहति। विहितवर्मणां रघुयोधानां वर्मसु केतकीपुष्परजः मुरलायाः वायुभरेणोड्डीयमानं न्यपतत्। तेन च तेषां वर्माणि विनायासं रञ्जितानि भूत्वा स्वर्णमयानीव बभुः। सुवर्णमयैर्भ्यां वर्मभ्यस्तपामयमुत्कर्षः यत् तेषां मनोरमं सौरभमप्यभूत्। अतः कविराह यत् केतकं रजः रघुभटानां वर्मसु अयत्नसिद्धं सौरभान्वितं च वासनं बभूव।

Change of voice.—मुरलामारुतोद्धूतेन केतकेन रजसा...अयत्नपटवासता अगामि।

Sanjivani.—मुरलेति। मुरला नाम केरलदेशेषु काचित् नदी—मुरवीति केचित् पठन्ति—तस्याः मारुतेन उद्धूतम्, उत्थापितं [मुरलामारुतोद्धूत] (केतकं) केतकीसम्बन्धि (रजः) (तद्योधवारवाणानां) रघुभटकञ्चुकानाम्—"कञ्चुको वारवाणोऽस्त्री" इत्यमरः (Cole. p. 20) (अयत्नपटवासताम्) अयत्नसिद्धवस्त्रवासनाद्रव्यत्वम् (अगमत्)। "पिष्टातः पटवासकः" इत्यमरः (Cole. p. 174)॥ ५५॥

Sanjivani Explained.

मुरवीति केचित् पठन्ति—Some read मुरवी for मुरला। We think मुरला to be the correct reading. We see मुरला and not मुरवी in Uttaracharita.

"कञ्चुको वारवाणोऽस्त्री"—कञ्चुक as well as वारवाण means 'mail'. कञ्चुक is masculine and वारवाण is not feminine *i.e.* both masculine and neuter.

"पिष्टातः पटवासकः"—पिष्टात and पटवासक are synonymous. Each means 'perfumed powder used for guilding'.

Bengali.—মুরলা নদীর সমীরণোত্থাপিত কেতকীপুষ্পের পরাগ-নিকর রঘুযোধগণের বর্ম্মসমূহে নিপতিত হইয়া তাহাদিগের অক্লেশলব্ধ ও সুরভি বস্ত্ররঞ্জকদ্রব্যের কার্য্য সাধন করিল। ৫৫।

English rendering.—The pollens of *Ketaka* (*Pandanus odoratissimus*) flowers, borne by the breezes of Murala, became a perfumed gift, obtained without effort, of the armour of his troops.—55.

Grammatical notes, &c., &c.

Sama'sa.— 1) मुरं (वेष्टन) लाति प्राप्नोति इति मुरला (उपपदतत्) उत् (ऊर्द्ध) धूतम् (प्रादितत्) मुरलायाः मारुतः मुरलामारुतः (षष्ठीतत्) तेन उद्धूत मुरलामारुतोद्धूतम् (तृतीयातत्) (2) वारयन्ति इति वाराः, बाणानां वाराः वारबाणाः (मयूरव्यंसकादित्वात् समासः) वारबाण does not fall under any rule of तत्पुरुष। So Bhánuji classes it under मयूरव्यंसकादि। He expounds it also thus :—बाणं वारयति or वृणोति इति वारबाणः (मयूरव्यंसकादित्वात् समासः) "कर्मण्यण्" (३।२।१।पा. २९१२ सि.)। Further, he says if it does not fall under मयूरव्यंसकादि then वार should be placed first by the rule "राजदन्तादिषु परम्" (२।२।३१ पा. ९०२ सि.)। But then the difficulty is that वारबाण is not found in the राजदन्तादि list. विष्णुमिश्र, the annotator of सुपद्म, answers it thus : आदि being प्रकारवाची, any word of the type of राजदन्त which cannot, ofcourse, be explained in any other way, should fall in the list, and वारबाण, therefore, should be incorporated in it. Bhánuji expounds it in a third way—वारम् (आच्छादकं) बाणमस्य इति वारबाणः—"पूर्वपदात् संज्ञायाम्" (८।४।३। पा. ८५७ सि.) इति णत्वम्—[V. R. T. of Amarakos'a, N. S. p. Ed. p. 328.] तस्य योधाः तद्योधाः (षष्ठीतत्) तेषां वारबाणाः तद्योधवारबाणाः (षष्ठीतत्) तेषाम् (3) न यत्नः अयत्नः (नञ्तत्) पटानां

वास: पटवास: (षष्ठीतत्) , अयवमिश्र: पटवास: अयवपटवास: (शाकपार्थिवादित्वात् मध्यपदलोपिकर्मधारय:) तस्य भाव: अयवपटवासता—ताम् ।

Case-ending.—(1) तद्योधवारवाणानाम्—शेषे षष्ठी 'पटवासता'—इत्यनेन सम्बन्ध: ।

Synonyms.—(1) रजस्—(V. Sl. 29, C. IV.) (2) वारवाण—(V. Sanjivani.) (3) मारुत—(V. Sl. 10, C. II.)

Different meanings.—(1) रजस्—(V. Sl. 29, C. IV.)

Derivation.—(1) वारवाणानाम्—वाण + (वृ + णिच्=) वारि or (चुरादि) वारि + अण् = वारवाण:—"राजदन्तादिषु परम्" इति वाणशब्दस्य परनिपात: । (V. Remark on वागर्थौ, Sl. 1, C. I.) or, (वृ + णिच = or चुरादि: वारि + अच् = वार: । वाणस्य वार: वारवाण: (6th c. p.) (2) रज:—(V. Sl. 29, C. IV.) (3 उद्धृतम्—उत् + धृ + क्त: (कर्मणि) (4) कैतकम्—केतकी + अण् (तस्येदमित्यर्थे) (5) मारुत:—(V. Sl. 12, C. II.) (6) अगमत्—गम् + लुङ्—दिप् (7) मुरला—मुर + ला + क: + टाप्—"आतोऽनुपसर्गे क:" (३।२।३। पा. २९१५ सि.) । [Roots ending in आ, when not preceded by any prefix, take क, provided कर्म is their उपपद] (8) योध—युध् + अच् (कर्त्तरि) (9) वासताम्—वास + घ: (करणे) = वास: । वास + तल् (भावार्थे, 2nd c. s.)

Conjugation.—(1) गम्—(V. Sl. 1, C. I.) (2) धृ—(V. Sl. 53, C. I.)

Geography.—मुरला—It is very difficult to indentify it. Márkandeya Purána does not mention it. Neither do we find it in Mahábhárata or Rámáyana. Kálidása undoubtedly means by it a river in the country of the Keralas near Maháráshtra. Can we, therefore, identify it with Mulá, a tributary of Godávari, which rises from the Kalsubam Hills and flows by Ahmadnagar? H. H. Wilson, however, identifies it with नर्मदा। We know not his authority. If Muralá be Narmadá, Kerala cannot be Malabar as that scholar says.

(2) वर्मभिः—अनुक्ते कर्तरि तृतीया (3) पवनोद्धतराजतालीवनध्वनिः—उक्ते कर्मणि प्रथमा (4) गात्रशिञ्जितैः—Adjective of 'वर्मभिः'।

Synonyms—(1) वाह—(V. Sl. 38, C. III.) (2) वर्मन्—'अथ तनुत्रं वर्मदंशनम्। उरश्छदः कङ्कटको जगरः कवचोऽस्त्रियाम्।' (अ.)

Different meanings.—(1) वाह—'वाहो भुजे पुमान् मानभेदाश्वव्रषवायुषु' मे.) (2) तन—(V. Sl. 1, C. II.)

Derivation.—(1) अभ्यभयत—अभि + भ + लङ्—त (कर्मणि) (2) वाहानाम्—वह् + घञ् (कर्तरि; करणे वा, 6th c. p.) or, वाह् + अच् (कर्तरि) (3) चरताम्—चर् + शतृ (कर्तरि 6th c. p.) (4) शिञ्जितैः—शिञ्ज् + क्तः (कर्तरि, 3rd c. p.) (5) वर्मभिः—वृ (ञ) + मनिन् (कर्तरि, 3rd c. p.) वृणोति देहमिति वर्म। It is neuter and is declined like कर्मन् (6) पवन—पू + युच् (कर्तरि; 'बहुलमन्यत्रापि' (उ. २.७८) (7) ध्वनिः—ध्वन् + इः—'खनिकषि—' (उ. ४।१४०) इत्यादिना 'इ' प्रत्ययः।

Conjugation.—(1) चर्—V. Sl. 8, C. II. (2) भ—V. Sl. 15, C. III.) (3) शिञ्ज (to make a jingling sound) शिङ्क्ते (लट्) शिङ्क्ताम् (लोट्) अशिङ्क्त (लङ्) शिञ्जीत (वि. लिङ्) शिशिञ्जे (लिट्) शिञ्जिता (लुट्) शिञ्जिष्यते (लृट्) अशिञ्जिष्ट (लुङ्) शिञ्जयति (णिच्-लट्) अशिशिञ्जत (णिच्-लुङ्) शिञ्जितः (क्त) This is also चुरादि and आत्मनेपदी—शिञ्जयते (लट्)।

Remark.—Mallinátha takes चरताम् to mean 'marching'. A Calcutta editor differs from him unnecessarily. He means by it 'grazing'. According to him, the poet describes a halt and not a march. To us this is unintelligible. Why should the horses graze with mails on their back? The clank of the armour, again, of merely grazing horses cannot be so great as to drown the murmur of the forest. True, the next verse denotes the halt of the army. But that is no reason why this also should be construed as describing a halt.

खर्जूरीस्कन्धनद्धानां मदोद्गारसुगन्धिषु।
कटेषु करिणां पेतुः पुन्नागेभ्यः शिलीमुखाः॥ ५७॥

मूलस्य पाठान्तरम्।

नद्धानाम् - बद्धानाम् (चा दि)।

Prose order. शिलीमुखाः पुन्नागेभ्यः खर्जूरीस्कन्धनद्धानां करिणां मदोद्गारसुगन्धिषु (कटेषु पेतुः)। Mallinatha places 'शिलीमुखाः' before 'पेतुः' and 'पुन्नागेभ्यः' after 'कटेषु'।

Explanation by use of synonyms. - शिलीमुखाः (अलयः) पुन्नागेभ्यः (नागकेसरेभ्यः) खर्जूरीस्कन्धनद्धानां (तरुविशेषाणां स्कन्धेषु बद्धानां) करिणां (गजानां) मदोद्गारसुगन्धिषु (मदजलस्रावेण सुगन्धयुक्तेषु) कटेषु (गण्डेषु) पेतुः (पतिताः)।

Substance. वन्यगजा खर्जूरीस्कन्धेषु आबद्धा आसन्। अविरतमदजलस्रावेण तेषां गण्डस्थलानि पुन्नागेभ्योऽपि सुगन्धीनि जातानि। पुन्नागपुष्पोपविष्टा भ्रमरा मदजलवासितानां गजगण्डानामाघ्राणं प्राप्य नागकेसरपुष्पाणि परित्यज्य गजगण्डेषु पेतुः। मदोन्मत्ता भ्रमराः तत्र यथा सानन्दमभवन् इति भावः।

Change of voice. -शिलीमुखैः पेते।

Sanjivani. खर्जूरीति। खर्जूरीणां तरुविशेषाणाम्— "खर्जूरः केतकी ताली खर्जूरी च तृणद्रुमाः" इत्यमरः (Cole p 120) स्कन्धेषु, प्रकाण्डेषु—'अस्त्री प्रकाण्डः स्कन्धः स्यात् मूलाच्छाखावधिस्तरोः' इत्यमरः (Cole p 89) नद्धानां, बद्धानां—[खर्जूरीस्कन्धनद्धानां] (करिणां) मदोद्गारेण, मदस्रावेण, सुगन्धिषु [मदोद्गारसुगन्धिषु] 'गन्धस्य—' (५।४।१३५। पा ८७४ सि) इत्यादिना इकारः—(कटेषु) गण्डेषु (पुन्नागेभ्यः) नागकेसरेभ्यः—पुन्नागपुष्पाणि—ल्यब्लोपे पञ्चमी—(शिलीमुखाः) अलयः (पेतुः)—"अलिबाणौ शिलीमुखौ" इत्यमरः (Cole p. 304)—ततोऽपि सौगन्ध्यातिशयादिति भावः॥ ५७॥

Sanjivani Explained.

"खर्जूर: * * तृणद्रुमा:"—खर्जूर, केतकी ताली and खर्जूरी are known as तृणद्रुम।

"अलिवाणौ शिलीमुखौ"—शिलीमुख means a bee as well as a shaft.

ततोऽपि * * इति भाव:—The purport is that the bees fell upon the temples of the elephants having the scent of *Nagakesara* flowers because the former were more fragrant than the latter.

"गन्धस्य—"—"गन्धस्वेदुत्पूतिसुरभिभ्य:"। See IV, 45.

ल्यब्लोपे पञ्चमी—See 'ल्यब्लोपे कर्मण्यधिकरणे च' under अन्यत: in II, 4.

"अस्त्री प्रकाण्ड: स्कन्ध:"—प्रकाण्ड as well as स्कन्ध means the part of a tree between its roots and the nearest branch, *i.e.*, the trunk of a tree. Mallinátha takes स्कन्ध to mean 'trunk'. A Calcutta editor takes it to mean 'top', because, he says 'खर्जूरी being a तृणद्रुम, has, properly speaking, only a stalk and leaves; it does not branch off'. We say that as the top of the date tree means the very leaves and not the part of the trunk immediately below its leafy crown; no elephant can be tied to the top. Trunk of the date tree means any part, be it the top-most, between the root and the leafy crown. So there is no need of differing from Mallinátha. Any deviation from him would simply mar the sense.

Bengali.—ভ্রমরনিকর পুন্নাগপুষ্প হইতে খর্জ্জুরবৃক্ষস্কন্ধে আবদ্ধ গজসমূহের মদস্রাবসুবাসিতগণ্ডদেশে পতিত হইতে লাগিল। ৫৭।

English rendering.—Upon the temples, fragrant with the discharge of ichor, of (his) elephants tied to the trunks of wild date palms (*Phœnix sylvestris*), bees dropped from the flowers of Punnága (*Calophyllum inophyllum*).—57.

Grammatical notes, &c., &c.

Sama'sa.—(1) खर्जूरीणां स्कन्धाः खर्जूरीस्कन्धाः (षष्ठीतत्) तेषु मग्नाः खर्जूरीस्कन्धमग्नाः (सप्तमीतत्) तेषाम् (2) शोभनः गन्धः येषां ते सुगन्धयः (बहु) "गन्धस्येदुत्पूतिसुसुरभिभ्यः" इति बहुव्रीहौ समासान्त इकारः मदस्य उद्गारः मदोद्गारः (षष्ठीतत्) तेन सुगन्धयः मदोद्गारसुगन्धयः (तृतीयातत्) तेषु (3) पुमान् नाग इव पुन्नागः (उपमितसमासः) "उपमितं व्याघ्रादिभिः सामान्याप्रयोगे" (V. notes on राजेन्द्, Sl. 12, C. I.) पुन्नागो नृश्रेष्ठः—प्राधान्यात् स इव प्रधानतरुः (पुन्नाग means, literally, नृश्रेष्ठ—chief of men. Secondarily, it means a tree of that name because of its superiority to other trees.) [V. R. T. of Amarakosha, N. S. P. Ed., p. 155.] पुन्नागानां पुष्पाणि पुन्नागानि तेभ्यः। Here the affix अण् drops by the Várttika—'पुष्पमूलेषु बहुलम्' (४।३।१६६। पा. वा. २५४५ सि.) [The affix significatory of पुष्प (flower) or मूल (root of a tree) drops many a time]. By the word बहुलम् it is indicated that sometimes अण् drops and sometimes it does not drop. In the case of पुन्नाग, the affix अण् drops. So we get पुन्नागानि] (4) झिल्ली (शल्य) मुखं येषां ते झिल्लीमुखाः (बहु) or झिल्लो (शल्य) मुखं येषां ते (इति वाचस्पत्ये)

Case-ending.—(1) करिणाम्—शेषे षष्ठी 'कटेषु' इत्यनेन सम्बन्धः (2) कटेषु—आधाराधिकरणे सप्तमी (3) पुन्नागेभ्यः—ल्यब्लोपे पञ्चमी—पुन्नागपुष्पाणि विहायेत्यर्थः (Mallinátha) or "ध्रुवमपायेऽपादानम्" इति अपादाने पञ्चमी—[V. वनान्तरात्, Sl. 49, C. I.] (4) खर्जूरीस्कन्धमग्नानाम् and मदोद्गारसुगन्धिषु are the adjectives of करिणाम् and कटेषु respectively.

Synonyms.—(1) पुन्नाग—'पुन्नागे पुरुषस्तुङ्गः केसरो देववल्लभः।' (अ.) (2) स्कन्ध—'स्कन्धो भुजशिरोऽंसोऽस्त्री' (अ.)

Different meanings.—(1) स्कन्ध—'स्कन्धः प्रकाण्डे कायेंऽंसे विज्ञानादिषु पञ्चसु। नृपे समूहे व्यूहे च।' (हे.) (2) शिलीमुख—'अलि-बाणौ शिलीमुखौ' (अ.) (3) पुन्नाग—'पुन्नागस्तु सितोत्पले। जातीफले नरश्रेष्ठे पाण्डुनागे द्रुमान्तरे।' (मे.)।

Derivation.—(1) नद्धानाम्—नह्+क्तः (कर्मणि, 6th c. p.) (2) उद्गारः—उत्+गृ+घञ् (भावे). The root गृ takes घञ् when it is allied with the prefixes उत् or नि। When not preceded by any prefix, it takes अप्। E. g., गरः—"ऋदोरप्" (३।३।५७। पा. ३२०० सि.) (3) पेतुः—पत्+लिट्—उस् (4) स्कन्धः—स्कन्द्+घञ् (करणे) The द् of the root is changed into ध्—'स्कन्देः सार्के' (उ. ४।२०७।) इति बाहुलकादनस्यपि धः।

Conjugation.—(1) पत्—(V. Sl. 60, C. II.)

अवकाशं किलोदन्वान् रामायाभ्यर्थितो ददौ।
अपरान्तमहीपालव्याजेन रघवे करम्॥ ५८॥

Prose order.—उदन्वान् अभ्यर्थितः (सन्) रामाय अवकाशं ददौ किल रघवे (तु) अपरान्तमहीपालव्याजेन करं ददौ। Mallinátha places 'अभ्यर्थितः' after 'रामाय'।

Explanation by use of synonyms.—उदन्वान् (समुद्रः) अभ्यर्थितः (याचितः सन्) रामाय (भार्गवाय) अवकाशं (स्थानं) ददौ (दत्तवान्) किल (प्रसिद्धौ) रघवे (दिलीपसनवे तु) अपरान्तमहीपालव्याजेन (पाश्चात्त्यनरपतिच्छलेन) करं (बलिं)—ददौ।

Substance.—अपरान्ताः रघुणा पराभूताः तस्मै समुद्रस्यसारं मणिमुक्तादिकं करं ददुः। समुद्रदेशसन्निवेशित्वात् तेषां पराभवः समुद्रस्य पराभव एव, तेषां करदानं च समुद्रस्य करदानमेवेति कविर्मन्यते। सतोऽयं ब्रूते यत् पुरा परशुरामेण याचितः सन् सागरः सह्याद्रेरपसृत्य तस्मै वासस्थानं ददौ। अधुना रघुणा

पराभूत: अपरान्तनृपतिच्छलेन करमप्रार्थितोऽपि ददौ। परशुरामः समुद्रस्य प्रसादाकाङ्क्षी बभूव। समुद्रस्तु रघोः प्रसादाभिलाषी अभवत् इति परशुरामात् रघोरुत्कर्षो महान्।

Change of voice.—उदन्वता अभ्यर्थितेन...अवकाशः ददे...करः (ददे)।

Sanjivani—अवकाशमिति। (उदन्वान्) उदधिः (रामाय) जामदग्न्याय (अभ्यर्थितः) याचितः सन् (अवकाशं) स्थानं (ददौ) (किल) इति प्रसिद्धौ—(रघवे) तु (अपरान्तमहीपालव्याजेन) (करं) बलिं—ददौ—"बलिहस्तांशवः कराः" इत्यमरः (Cole. p. 347) अपरान्तानां समुद्रमध्यदेशवर्त्तित्वात् तैर्दत्ते करे समुद्रदत्तत्वोपचारः। करदानञ्च भीत्या न तु याञ्चयेति रामात् रघोरुत्कर्षः ॥ ५८ ॥

Sanjivani Explained.

किल इति प्रसिद्धौ—किल here records a tradition.

अपरान्तानां * समुद्रदत्तत्वोपचारः—Really, the Aparántaka kings gave tribute unto Raghu. The poet, by transference of epithet, attributes unto the sea the act of paying tribute. Thus the sea and the kings are treated as the same. Why? Because the kings lived in a country in the midst of the sea.

करदानञ्च * * उत्कर्षः—A vassal pays tribute to his suzerain through fear and not through the supplications of the suzerain. So Raghu's superiority to Ráma is suggested here.

Benali.—ইহা প্রসিদ্ধ আছে, যে, সমুদ্র প্রার্থিত হইয়া পরশুরামকে স্থান প্রদান করিয়াছিলেন—(কিন্তু অধুনা) পাশ্চাত্য নরপতিচ্ছলে রঘুকে কর দান করিলেন। ৫৮।

English rendering:—The Ocean, it is well-known, being solicited, gave space to Paras'uráma: in the guise of princes of *Aparánta*, he (now) gave tribute to Raghu.—58.

Grammatical notes, &c., &c.

Sama'sa.—(1) महीं पालयन्ति इति महीपाला: (उपपदतत्) अपरे अन्ता: अपरान्ता: (कर्मधा) तेषां महीपाला: अपरान्तमहीपाला: (षष्ठीतत) ते एव व्याज: अपरान्तमहीपालव्याज: (रूपककर्मधा) तेन।

Case-ending.—(1) रामाय—सम्प्रदाने चतुर्थी (2) अपरान्तमहीपालव्याजेन—करणे तृतीया (3) रघवे—सम्प्रदाने चतुर्थी।

Synonyms.—(1) राम—'बलभद्र: प्रलम्बघ्नो बलदेवोऽच्युताग्रज:। रेवतीरमणो राम: कामपालो हलायुध:॥ नीलाम्बरो रौहिणेयस्तालाङ्को मुसली हली। संकर्षण: सीरपाणि: कालिन्दीभेदनो बल:॥' (अ.)

Different meanings.—(1) कर—'करो वर्षोपले रश्मौ पाणौ प्रत्यायशुण्डयो:।' मे.) Also V. Sanjivani. (2) राम—(V. Sl. 53, C. IV.) (3 व्याज:— V. Sl. 25, C. IV.)

Derivation.—(1) अवकाशम्—अव+काश्+अच् (कर्त्तरि, 2nd c. s.) (2) उदन्वान्—(V. Sl 51-52, C. IV.) (3) रामाय—(V. Sl. 53, C. IV.) (4 अभ्यर्थित:—अभि+अर्थ+क्त. (कर्मणि) (5) ददौ—दा+लिट्—णल (6) महीपाल:—मही+पालि+अण्—"कर्मण्यण्" (V. notes on वारबाण, Sl. 55, C. IV.) (7) व्याजेन—(Sl. 25, C. IV.) (8 करम्—कृ+अच् (कर्मणि 2nd c. s.) कीर्य्यते (दीयते) इति कर:।

Conjugation.—(1) दा—(V. Sl. 18, C. I) (2) अर्थ—(Sl. 1, C. I.)

Force of किल is प्रसिद्धि (story of Paras'uráma is known to all) or वार्त्ता (this story is heard from all). "वार्त्तासंभाव्ययो: किल" (अ.)

The allusion in the sloka.—(V. Sl. 53, C. IV.).

Rhetoric.—The figures of speech are रूपक and व्यतिरेक। (*V.* I, 4, and 24.). See Sanjivani Explained.

मत्तेभरदनोत्कीर्णव्यक्तविक्रमलक्षणम्
त्रिकूटमेव तत्रोच्चैर्जयस्तम्भं चकार सः ॥ ५९ ॥

Prose order.—तत्र सः मत्तेभरदनोत्कीर्णव्यक्तविक्रमलक्षणं त्रिकूटम् एव उच्चैः जयस्तम्भं चकार ।

Explanation by use of synonyms.—तत्र (तस्मिन् प्रदेशे, अपरान्तप्रदेशे इत्यर्थः) सः (रघुः) मत्तेभरदनोत्कीर्णव्यक्तविक्रमलक्षणं (मदोन्मत्तगजदशनक्षतस्फुटवीर्यचिह्नं) त्रिकूटमेव (तन्नामकपर्वतमेव) उच्चैः (समुच्चं) जयस्तम्भं (विजयस्थूणां) चकार (रचितवान्) ।

Substance.—अपरान्तेषु त्रिकूटपर्वते रघोर्मदोन्मत्ता गजा वप्रक्रीडामाचरितवन्तः । दशनप्रहारेण ते गजास्तस्मिन् पर्वते यानि क्षतानि विदधिरे तान्येव रघोर्विजयविज्ञापकानि लिखितान्यक्षराणीवासन् । एवं मत्तगजदशनाङ्कविज्ञापितरघुवीर्यस्त्रिकूटस्तस्य विजयसूचकः स्तम्भ इव बभौ । विजेता विजितदेशे जयस्तम्भं विरचति रघुस्त्रिकूटमेव जयस्तम्भमकरोत् ।

Change of voice.—......तेन मत्तेभरदनोत्कीर्णव्यक्तविक्रमलक्षणः त्रिकूटः...जयस्तम्भः चक्रे ।

Sanjivani.—मत्तेति । (तत्र) (सः) रघुः—मत्तानाम् इभानां रदनोत्कीर्णानि, दन्तक्षतानि, एव—भावे क्तः—व्यक्तानि, स्फुटानि; विक्रमलक्षणानि, पराक्रमचिह्नानि, विजयवर्णावलिस्थानानि यस्मिन् तं तथोक्तं [मत्तेभरदनोत्कीर्णव्यक्तविक्रमलक्षणं] (त्रिकूटम् एव उच्चैः जयस्तम्भं चकार)। गाढप्रहारस्त्रिकूटोऽद्रिरेवोत्कीर्णवर्णस्तम्भ इव रघोर्जयख्यापकोऽभूत् इत्यर्थः ॥ ५९ ॥

Sanjivani Explained.

गाढप्रहारः * * * इत्यर्थः—The mountain, *Trikuta*, bearing the deep indents due to the strokes of his elephants, proclaimed Raghu's victory like a column with a story inscribed upon it.

Bengali.—সেই দেশে মত্তগজসমূহের দন্তাঘাতচিহ্নরূপস্বকীয় শৌর্য্যলক্ষণের প্রকাশক ত্রিকূট পর্ব্বতকেই রঘু উন্নত বিজয়সূচক স্তম্ভ করিলেন। ৫৯।

English rendering.—There he made *Trikuta* itself,—bearing (as it did) incissions of the tusks of excited elephants as indications of (his) prowess—his lofty column of victory.—59.

Grammatical notes, &c., &c.

Samasa.—(1) मत्ताः इभाः मत्तेभाः (कर्मधा) तेषां रदनाः मत्तेभरदनाः (षष्ठीतत्) तैः उत्कीर्णानि (भावे क्त) मत्तेभरदनोत्कीर्णानि (तृतीयातत्) विक्रमस्य लक्षणानि विक्रमलक्षणानि (षष्ठीतत्) व्यक्तानि विक्रमलक्षणानि व्यक्तविक्रमलक्षणानि (कर्मधा) मत्तेभरदनोत्कीर्णान्येव व्यक्तविक्रमलक्षणानि यस्मिन् स मत्तेभरदनोत्कीर्णव्यक्तविक्रमलक्षण. (बहु) तम् (2) त्रयः or त्रीणि कूटाः or कूटानि यस्य स त्रिकूटः (बहु) (3) जयस्तम्भम्—(V. Sl. 36, C. IV.)

Case-ending—(1) उच्चैः—अव्ययं विशेषणं 'स्तम्भम्' इत्यस्य (2) तत्र—आधाराधिकरणे सप्तमी, अव्ययम्।

Synonyms.—(1) कूट—'कूटोऽस्त्री शिखरं शृङ्गम्' (अ.) (2) रदन—'रदना दशना दन्ता रदाः' (अ.)

Different meanings.—(1) कूट—'माया निश्चलयन्त्रेषु कैतवानृत-राशिषु। अयोघने शैलशृङ्गे सीराङ्गे कूटमस्त्रियाम्॥' (अ.)

Derivation—(1) रदनः—रद+ल्युट् (करणे) (2) उत्कीर्ण—उत्+कॄ+क्त (भावे or कर्मणि) (3) चकार—कृ+लिट्—णल्।

Conjugation.—(1) कृ—(V. Sl. 10, C. II.)

Force of एव—अन्यव्यावर्त्तकत्वम्। He made त्रिकूट only, and nothing else, his जयस्तम्भ (V. I, 18.).

Rhetoric.—The figure of speech is रूपक। The indents on Trikuta, due to the strokes of the elephants' tusk are spoken of as marks of Raghu's prowess. Trikuta served as his column of victory. The marks on it were like letters recording the story of the campaign.

Geography.—It is difficult to ascertain the position of त्रिकूट। Wilson has not been able to identify it. He simply calls it a mountain in the Peninsula. Literally, it means a three-peaked mountain. We have not found this name in Mahábharata or Rámáyana. It is, however, associated with Bappa Rao, the celebrated founder of the Chitore family. "The infant Bappa," says Colonel Tod, "then only three years old, was conveyed to the fortress of Bhandere, where he was protected by a Bhil of Yadu descent. Thence he was removed for greater security to the wilds of Parassur. Within its impervious recesses rose the three-peaked *(tricuta)* mountain, at whose base was the town of Nagindra." The Colonel indentifies Nagindra with Nagda, still a place of pilgrimage; ten miles north of Oodipur (Udayapura).

पारसीकांस्ततो जेतुं प्रतस्थे स्थलवर्त्मना ।
इन्द्रियाख्यानिव रिपूंस्तत्त्वज्ञानेन संयमी ॥ ६० ॥

Prose order.—ततः (सः), संयमी तत्त्वज्ञानेन इन्द्रियाख्यान् रिपून् इव, पारसीकान् जेतुं स्थलवर्त्मना प्रतस्थे ।

Explanation by use of synonyms.—ततः (तदनन्तरं तस्मात् स्थानाद्वा) (सः—रघुः) संयमी (योगी) तत्त्वज्ञानेन (ब्रह्मज्ञानेन) इन्द्रियाख्यान् (कामक्रोधलोभादिनामकान्) रिपून् इव (शत्रूनिव) पारसीकान् (तन्नामकान् यवननृपतीन्) जेतुं (पराभवितुं) स्थलवर्त्मना (स्थलपथेन) प्रतस्थे (ययौ) ।

Substance.—अपरान्तान् विजित्य रघुः पारसीकान् विजेतुं प्रतस्थे। समुद्रयानस्य निषिद्धत्वात् निकटवर्तिनापि जलपथेन न ययौ अपि तु स्थलपथेन

सर्वैन्यश्चाल। पारसीका दुष्टान्ता: तेषां जयो दुष्कर: इति उपमया स्फुटी-करोति। ब्रह्मज्ञानेन योगी यथा कामक्रोधादीन् रिपून् जेतुं यतते तथा स रघुः पारसीकान् जेतुमुद्यतः।

Change of voice.—...(तेन), संयमिना...।

Sanjivani.—पारसीकानिति। (ततः) सः रघुः—(संयमी योगी (तत्त्वज्ञानेन) (इन्द्रियाख्यान्) इन्द्रियनामकान् (रिपून् इव) शत्रुः (जेतुं स्थलवर्त्मना प्रतस्थे)—न तु नैदिष्टेनापि जलपथेन—समुद्रयानस्य निषिद्धत्वात् इति भाव:॥ ६०॥

सञ्जीवन्या: पाठान्तरम्।

नैदिष्टेन—निर्दिष्टेन Nand.

नैदिष्ट is, perhaps, better. Mallinátha shows the significance of स्थलवर्त्मना। The route by water was avoided, he says, because of the prohibition of the Sástra that no one should cross the sea. The contrast becomes more vivid if we read नैदिष्ट। निर्दिष्टेन would mean that though the route by water was pointed out to Raghu, yet he did not take it, because of sea-voyage being prohibited. नैदिष्टेन would yield the sense that though the route by the water was shorter, yet he avoided it because of the prohibition. We may not accept the reason, which Mallinátha assigns, of Raghu's marching along the land route. But it is clear that नैदिष्टेन would better support the reason he assigns than निर्दिष्टेन।

Sanjivani Explained.

तत्त्वज्ञानेन—तत्त्वम्, literally, means तस्य भाव: (its status). Brahman or the Supreme Being is signified by तत्। So तत्त्व means 'the status of Brahman'. As Brahman alone is सत् and everything else is असत्। So तत् came to mean सत् and तत्त्व to mean सत्य।

Bengali—যোগী যেরূপ তত্ত্বজ্ঞান দ্বারা (কামক্রোধাদি) ইন্দ্রিয়াখ্য-রিপুগণকে জয় করিতে অগ্রগামী হয়েন, সেইরূপ রঘুও পারসীক-রাজগণকে জয় করিবার জন্য স্থলপথ অবলম্বনে গমন করিলেন। ৬০।

English rendering.—He then (or thence) proceeded by nland route to conquer the Párasikas, even as a person of self-restraint (essays to conquer) by knowledge of Truth, those enemies called by the name of the senses.—60.

Grammatical notes, &c. &c.

Samas'a.—(1) स्थलमेव वर्त्म स्थलवर्त्म (रूपककर्मधा) तेन (2) इन्द्रियाणि आख्या येषां ते इन्द्रियाख्याः (बहु) तान् (3) तत्त्वस्य ज्ञानं तत्त्वज्ञानम् (षष्ठीतत्) तेन (4) यमोऽस्ति अस्य यमी, सन् (सम्यक्) यमी संयमी (प्रादि)।

Case-ending.—(1) ततः—अव्यय, आनन्तर्ये पञ्चमी (2) स्थलवर्त्मना—This is उद्देश्य and उपमेयपद। 'तत्त्वज्ञानेन' is its विधेय and उपमानपद। Both are in करणे तृतीया (3) रिपून्—विधेय and उपमानकर्म 'पारसीक' is its उद्देश्य and उपमेयकर्म। (4) योगी—विधेय and उपमानकर्त्ता; 'रघु' (understood) is उद्देश्य and उपमेयकर्त्ता।

Synonyms.—(1) वर्त्मम्—(V. मार्ग, I, 45.)

Different meanings.—(1) तत्त्व—'तत्त्वं परात्मनि। वाद्यभेदे स्वरूपे च।' (है.) (2) इन्द्रिय—'इन्द्रियं तु चक्षुरादिषु रेतसि'। (है.)

Derivation.—(1) पारसीकान्—पारसीक + अण् (2nd c. p.) पारसीकानां राजानः इति वाक्ये, अण् elides by the Várttika "कम्बोजादिभ्यः इति वक्तव्यम्" (४।१।१७५ पा. ११८४ सि.) [The तद्राज affixes elide after कम्बोज, &c. E. g., कम्बोजः, चोलः, शकः, केरलः] Bháshya does not explicitly mention पारसीक in illustration of this Várttika. It does not matter even if the तद्राज affix does not elide for the vowel after प is itself elongated. (2) जेतुम्—जि + तुमुन्—future tense. "तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्" (३।३।१०। पा. ३१७५ सि.) जि is a क्रियार्थक्रिया। It, therefore, admits तुमुन्। For क्रियार्थक्रिया see vol. 1. p. 52. (3) प्रतस्थे—प्र + स्था + लिट्—ए (4) वर्त्मना—वृत्

+ मनिन् (औणादिकः, 3rd c. s.) The word धर्मन् is neuter and is declined like कर्मन् (5) इन्द्रियम्—(V. Sl. 55, C. I.) (6) रिपुम् —रप् + कुः (2nd c. p.) The penultimate अ of the root is changed into इ—'रपेरिच्चोपधायाः' (उ. १।२६।) (7) संयम + इनिः (मत्वर्थे) ।

Conjugation.—(1) जि—(V. Sl. 52, C. III.) (2) स्था—(V. Sl. 43, C. I.) There occurs the Sutra for आत्मनेपद of प्रतस्थे ।

Rhetoric.—The figure of speech is simile. Raghu is compared to an ascetic ; पारसीकाः to the senses ; the inland route to the knowledge of Brahma. As the ascetic tries to control the passions by his knowledge of Brahma, so Raghu advanced to defeat the Párasika kings by adopting the inland route. As the passions are difficult of control, the Párasika kings were so. As तत्त्वज्ञान of the Yogins is the best means for controlling the passions so was the inland route for subduing the Párasikas. The comparison of Raghu with an ascetic suggests his patience, sense of righteousness, and vast knowledge.

Remark.—Mallinátha writes 'समुद्रयानस्य निषिद्धत्वात्' । But in त्रेता there was no restriction to sea voyage. In Kali it is prohibited. cf.—'समुद्रयात्रा स्वीकारः कमण्डलुविधारणम् । द्विजानाम-सवर्णासु कन्यासूपयमस्तथा ॥ देवरेण सुतोत्पत्तिर्मधुपर्के पशोर्वधः । दत्तायाश्चैव कन्यायाः पुनर्दानं परस्य च ॥ दीर्घकालं ब्रह्मचर्यं नरमेधाश्वमेधकौ । महाप्रस्थान-गमनं गोमेधं च तथा मखम् । इमान् धर्मान् कलियुगे वर्ज्यानाहुर्मनीषिणः ॥' (V. बृहन्नारदीयपुराणे) ।

Geography.—पारसीकाः—We have shown in the Introduction that the Párasikas cannot be the modern Persians. (See p. LXVII). The Párasikas were known to Vyása.* He names them with Kuluٹthas and Hunas. This justifies the inference

* भीष्मपर्व्वणि ९म अध्याय ।

that the Párasikas were a race of Mlechcchas residing on the banks of the Indus. They were neighbours of the Hunas, the S'akas, &c. Kálidása does not deviate from the Puránas in assigning their habitat. Sumativijaya, of the 17th century, paraphrases पारसीकान् as सिन्धुतटनिवासिनो राज्ञः । Kálidása does not mention the S'akas who play a more important part in the Bhárata war than the Hunas or the Párasikas mentioned by Kálidása. The reason is probably that the S'akas, discomfitted by his patron, Vrikramáditya, came to be looked down in the age of our poet. This is as good an argument in favour of the traditional age of Kálidása as any adduced by the theorists who have been examined by us in the Introduction.

यवनीमुखपद्मानां सेहे मधुमदं न सः ।
बालातपमिवाब्जानामकालजलदोदयः ॥ ६१ ॥

Prose order.—अकालजलदोदयः अब्जानां बालातपम् इव, स यवनीमुखपद्मानां मधुमदं न सेहे ।

Explanation by use of synonyms.—अकालजलदोदयः (प्रावृड्व्यतिरिक्तकाले मेघसञ्चारः) अब्जानां (पद्मानां) बालातपमिव (तरुणसौरकिरं इव) सः (रघुः) यवनीमुखपद्मानां (यवननारीणांमुखकमलानां) मधुमदं (मदरागं) न सेहे (न चक्षमे) ।

Substance.—रघौ पारसीकेष्वेवं सहसोपस्थिते सति पारसीकरमण्यः चिन्तिता अभूवन् । 'संग्रामोऽवश्यम्भावी, स्वामिनोऽस्माकं राजाधिराजेन रघुणा किं योद्धुं शक्ष्यन्ते ? नूनमस्माकं भाग्यविपर्य्ययो जातः' इत्थं पतिप्राणेषु शङ्कितवत्स्ता मद्यादिविलासान् सर्व्वान् जहुः । मदजनितो तेषां मुखेषु रागो लुप्तः । विषादच्छाया तासां प्रफुल्लानि मुखान्यधिचकार । तद् उपमयाह यथाहि असमयोदिता धनराजिः सरोवरस्थितानां प्रफुल्लकमलानां तरुणभानुकिरणजनितां रक्ताभां नाशयति, तथा स रघुर्यवनदेशेऽप्यतर्कितमुपस्थाय रमणीवृन्दानां मद्यपानजनितामारक्तां प्रफुल्लमुखप्रभां विलोपयामास ।

Change of voice.—अकालजलदोदयेन......बालातपः......तेन...मधुमदः...

Sanjivani.—यवनीति । (सः) रघुः, यवनीनां यवनस्त्रीणाम्—"जाते-रस्त्रीविषयादयोपधात्" (४।१।६३ पा., ५१८ सि.) इति ङीष्—मुखानि पद्मानि इव मुखपद्मानि—उपमितसमासः—तेषां [यवनीमुखपद्मानां], मधुना, मद्येन ; यः मदः, मदरागः—कार्य्यकारणभावयोरभेदेन निर्द्देशः—तं [मधुमदं] (न सेहे)—कथमिव ?—अकाले, प्रावृड्व्यतिरिक्ते काले ; जलदोदयः [अकालजलदोदयः] प्रावृषि पद्मविकासस्याप्रसङ्गत्वात्—(अब्जानां) सम्बन्धिनं (बालातपम् इव) । अब्जहितत्वादब्जसम्बन्धित्वं सौरातपस्य ॥ ६१ ॥

Sanjivani Explained.

कार्य्यकारणभावयोरभेदेन निर्द्देशः—मधुमद is explained as मद्यराग । मधु means मद्य, and मद is taken to mean राग । मद really means intoxication'. But intoxication cannot be seen. We infer it from its effects. Its effect on the face is the ruddy glow it lends. So if मद be not meaningless, it should mean राग । Mallinátha remarks that the poet speaks indifferently of मद and its effect राग । They are treated as the same. मद by लक्षणा means राग ।

प्रावृषि * * अप्रसङ्गत्वात्—As in the rainy season the lotus does not bloom, so अकाल means प्रावृड्व्यतिरिक्त काल or time other than the rainy season when alone the clouds intercept the sun from these blossoms.

अब्जहितत्वात् * * * सौरातपस्य—The poet speaks of the relation between the lotuses and sunshine. Mallinátha shows the reasonableness of the relation. Solar beams being beneficial to the lotuses, they cannot, he says, but be related to them.

"जातेरस्त्रीविषयादयोपधात्"—A word, which is significatory of जाति and is not confined to females, gets ङीष् in its feminine form, provided य् be not its penultimate letter. यवन signifies a race. It includes both males and females. य् is not its last

but one letter. So in feminine it becomes यवनी। बलाका being feminine, cannot admit ङीष्। We have both क्षत्रिया and क्षत्रियी because य् is उपधा (penultimate letter) of the word. For the explanation of जाति, see सिद्धान्तकौमुदी and तत्त्वबोधिनी।

Bengali—অকালমেঘোদয় যেরূপ কমলসমূহের (উপরি নিপতিত) তরুণসূর্য্যকান্তিকে (বিনষ্ট করে), তদ্রূপ রঘু, যবনীমুখকমলসমূহের মদ্যপানজনিত (আরক্ত) কান্তিকে বিলুপ্ত করিলেন। ৬১।

English rendering.—He brooked not the glow, caused by wine, of the lotus-like faces of Yavana women, even as an untimely apparition of clouds (brooks not) the beams of the morning sun (shed) on lotuses. 61.

Grammatical notes, &c., &c.

Sama'sa.—(1) मुखानि पद्मानीव मुखपद्मानि (उपमितकर्मधा) यवनीनां मुखपद्मानि यवनीमुखपद्मानि (षष्ठीतत्) तेषाम् (2) मधुना (मद्येन) मदः (रागः) मधुमदः (तृतीयातत्) तम् (3) बालः आतपः बालातपः (कर्मधा) तम् (4) अप्सु जायन्ते इति अब्जानि (उपपदतत्) तेषाम्। Here the case-ending is not retained as it is retained in सरसिज, because the Sutra "तत्पुरुषे कृति बहुलम्", enjoining the retention of the 7th case-ending in तत्पुरुष समास having a कृदन्त component, has the word बहुलम् which makes its application optional in certain cases. (5) न कालः अकालः (नञ्तत्) जलं ददाति जलदः (उपपदतत्) जलदस्य उदयः जलदोदयः (षष्ठीतत्) अकाले जलदोदयः (७मी तत्)।

Case-ending.—(1) यवनीमुखपद्मानाम्—शेषे षष्ठी 'मधुमदम्' इत्यनेन सम्बन्धः (2) अब्जानाम्—शेषे षष्ठी 'बालातपम्' इत्यनेन सम्बन्धः (3) अकालजलदोदयः—विधेय and उपमान कर्त्ता—'सः' is its उद्देश्य and उपमेयकर्त्ता।

Different meanings.—(1) अब्ज—'अब्जोऽस्त्री शङ्खे, ना निचुले धन्वन्तरौ च हिमकिरणे। क्लीबं पद्मे।' (मे.) (2) पद्म—(V. पद्मा, Sl. 5, C.

IV.) (3) मधु—'मधु क्षौद्रे जले क्षीरे मद्ये पुष्परसे मधुः। दैत्ये चैत्रे वसन्तेच जीवाशाके मधुद्रुमे॥' (वि.)

Derivation.—(1) यवनी—यु + युच् (कर्त्तरि) = यवनः। यवन + ङीष् —"जातेरस्त्रीविषयादयोपधात्" (V. Exp. under the heading of Grammar.) (2) सेहे—सह् + लिट्—ए (3) मधु—मन् + उः—'फलिपाटि—' (उ. १।१८।) न् of the root is changed into ध् (4) मदम्—मद् + णिच् + अच् (2nd c. s.) मदयति इति मदः or मद् + अप् (करणे) "मदोऽनुपसर्गे" (३।३।६७ पा. ३२४४ सि.) [The root मद् admits of अप् if it is not preceded by an उपसर्ग। E. g., मदः। उपसर्गे तु उन्मादः।] (5) अब्जानाम् —अप् + जन् + डः (अधिकरणे, 6th c. p.)—"सप्तम्यां जनेर्डः." [V. notes on परिखीकृत—' Sl. 30, C. I.] (6) अलदः—जल + दा + क—"आतोऽनुपसर्गे कः (३।२।३। पा. २९१५ सि.) (7) उदयः—(V. Sl. 5-9, C. I.)

Conjugation.—(1) सह्—सहते (लट्) असहत (लङ्) सेहे (लिट्) असहिष्ट, असहिषाताम् (लुङ्) सहिता, सोढा (लुट्) सहिष्यत (लृट्) असीषहत् (णिच्-लुङ्) सोढः (क्तः)।

Rhetoric.—The figure of speech is simile. रघु is compared to an untimely cloud, the face of the Yavana women to lotuses, and the ruddy hue on their faces to the bright rays of the sun.

Geography.—यवन—It is a sad mistake to identify the *Yavanas* with the Ionians as some self-sufficient Orientialists do. The Pārasikas, for instance, were not Ionians though they were called *Yavanas.*

संग्रामस्तुमुलस्तस्य पाश्चात्यैरश्वसाधनैः।

शार्ङ्गकूजितविज्ञेयप्रतियोधे रजस्यभूत्॥ ६२॥

मूलस्य पाठान्तरम्।

शार्ङ्गकूजितविज्ञेयप्रतियोधे—शार्ङ्गकूजितविज्ञेयप्रतियोधः। (व.)

Prose order.—तस्य अश्वसाधनैः पाश्चात्यैः शार्ङ्गकूजितविज्ञेयप्रतियोधे रजसि तुमुलः संग्रामः अभूत्।

Explanation by use of synonyms.—तस्य (रघोः) अश्वसाधनैः (वाजिसैन्यैः) पाश्चात्यैः (पश्चिमदिग्भवैः यवनैः सह) शार्ङ्गकूजितविज्ञेयप्रतियोधे (धनुष्टङ्कारानुमेयप्रतिभटे) रजसि (धूलौ) तुमुलः (सङ्कुलः) संग्रामः (युद्धम्) अभूत् (बभूव) ।

Substance.—पाश्चात्या यवना रघुणा सह तुमुलं युद्धं चक्रुः । अश्वसाधनं तेषां प्रसिद्धम् । अश्वखुरोत्थितधूलिपटलैः रणाङ्गणं तथा व्याप्तमभूत् यत् सैनिकाः स्वकीयं परकीयं वा योधं विज्ञातुं नाशक्नन् । केवलं धनुष्टङ्कारेणैव विपक्षयोधानां परिचयोऽभूत् ।

Change of voice....तुमुलेन संग्रामेण अभावि ।

Sanjivani.—संग्राम इति । (तस्य) रघोः (अश्वसाधनैः) वाजिसैन्यैः—"साधनं सिद्धिसैन्ययोः" इति हैमः—पश्चाद्भवैः (पाश्चात्यैः) यवनैः सह—"दक्षिणापश्चात्पुरसस्त्यक्" (४।२।९८। पा. १३१८ सि.) ; सहार्थे तृतीया—शृङ्गाणां विकाराः शार्ङ्गाणि, धनूंषि ; तेषां कूजितैः, शब्दैः—"शार्ङ्गं पुनर्धनुषि शार्ङ्गिणः । जये च शृङ्गविहिते चापेऽप्याह विशेषतः ॥" इति केशवः—अथवा शार्ङ्गैः, शृङ्गसम्बन्धिभिः, कूजितैः ; विज्ञेयाः, अनुमेयाः ; प्रतियोधाः, प्रतिभटाः ; यस्मिन्, तस्मिन् [शार्ङ्गकूजितविज्ञेयप्रतियोधे] (रजसि) (तुमुलः संग्रामः) सङ्कुलं युद्धम् (अभूत्)—"तुमुलं रणसङ्कुले" इत्यमरः (Cole. p. 216) ॥ ६२ ॥

Sanjivani Explained.

साधनं सिद्धिसैन्ययोः—साधन means सिद्धि (success), as well as सैन्य (army).

"शार्ङ्गम् * * विशेषतः"—शार्ङ्ग means Vishnu's bow (made of horns), as well as victory. It is its special sense ; the general sense being any bow made of horns.

तुमुलं रणसङ्कुलम्—Mingled combat or fight *en masse* is known as तुमुल ।

"दक्षिणापश्चात्पुरसस्त्यक्"—(V. Sl. 34).

Bengali.—অশ্বারোহী পাশ্চাত্য যবনগণের সহিত রঘুর তুমুল সংগ্রাম বাধিয়া গেল—রণাঙ্গণে এরূপ ধূলিপটলসমুথিত হইল, যে, কেবল ধনুষ্টঙ্কার (অথবা শিঙ্গার শব্দ) দ্বারাই বিপক্ষযোধগণের পরিচয় পাওয়া যাইতে লাগিল। ৬২।

English rendering.—His was a fierce fight with them of the West that were equipt with a (strong) cavalry force under a ~~canopy~~ of dust where antagonists were konwn by (only) the twang of the bow (or the blare of trampets).—62.

Grammatical notes, &c., &c.

Sama'sa.—(1) अश्वा: साधनानि (सैन्यानि) येषां ते अश्वसाधना: (बहु) तै: (2) विरुद्धा: योधा: प्रतियोधा: (नित्यसमास:) or, प्रतिगता: योधा: प्रतियोधा: (प्रादि:) विशेषेण ज्ञेया: विज्ञेया: (प्रादि:) शार्ङ्गाणां (धनुषां) कूजितानि शार्ङ्गकूजितानि (षष्ठीतत्) तै: विज्ञेया: शार्ङ्गकूजितविज्ञेयप्रतियोधम् (बहु) तस्मिन्।

Case-ending.—(1) पाश्चात्यै:—सहार्थाप्रयोगेऽपि तृतीया। Even if any word having the sense of सह (with) be understood, the 3rd case takes place in alliance with it. सार्धं साकं and समम् are सहार्थ। Bhattoji says—'विनापि तद्योगं तृतीया—वृद्धो यूनेत्यादिनिर्देशात्।' (3) तस्य—शेषे षष्ठी 'संग्राम.' इत्यनेन सम्बन्ध: (3) रजसि—अधिकरणे सप्तमी or, अनादरे सप्तमी—The dust which rose in the battle-field was so thick that the warriors distinguished their rivals by only the twang of the bow or the sound of horns. Even in this condition the battle raged between both the parties. That is, the rivals fought, despising the blinding dust. शार्ङ्गकूजितविज्ञेयप्रतियोधं रज: अनादृत्य रथी: तुमुल: संग्राम: अभूत्।

Synonyms.—(1) संग्राम—'युद्धमायोधनं जन्यं प्रधनं प्रविदारणम्। मृधमास्कन्दनं संख्यं समीकं सांपरायिकम्॥ अस्त्रियां समराणीकरणा: कलहविग्रहौ। संप्रहाराभिसंपातकलिसंस्फोटसंयुगा:॥ अभ्यामर्दसमाघातसंग्रामाभ्यागमाहवा:। समुदाय: स्त्रिय: संयत्समित्याजिसमिद्युध:॥' (अ.)

Different meanings.—(1) साधन—(V. Sl. 36, C. IV.) (2) आर्द्र—(V. Sanjivani.) (3) रजस्—(V. Sl. 29, C. IV.)

Derivation.—(1) संयामः—संयाम (अदन्तः) + अच्—"एरच्" (३।३।५६। पा. ३२३१ सि.) (2) तुमुलः—तु (सौत्रः) + मुलक्—बाहुलकात् (3) पाश्चात्यैः—पश्चात् + त्यक् (भवार्थे, 3rd c. p.) (4) आर्द्राणि—मृज् + अच् (विकारार्थे, 1st c. p.) (5) कूजितम्—कूज् + तः (भावे) (6) विजेयः—वि + जि + यत् (कर्मणि) (7) प्रतियोधः—प्रति + युध् + अच् (कर्त्तरि) (8) अभूत्—भू + लुङ्-दिप् ।

Conjugation.—(1) भू—(V. Sl. 15, C. III.)

Geography.—पाश्चात्य or Western tribes seem to have their homes on the tract bounded by the Indus on the East, and Guzrat on the south. The other boundaries are difficult to trace. See सभापर्व्व ३२ अ. ।

भल्लापवर्जितैस्तेषां शिरोभिः श्मश्रुलैर्महीम् ।
तस्तार सरघाव्याप्तैः सक्षौद्रपटलैरिव ॥ ६३ ॥

Prose order.—सः भल्लापवर्जितैः श्मश्रुलैः तेषां शिरोभिः सरघाव्याप्तैः क्षौद्रपटलैः इव महीं तस्तार ।

Explanation by use of synonyms.—सः (रघुः) भल्लापवर्जितैः (भल्लनामकबाणविशेषकृत्तैः) श्मश्रुलैः (श्मश्रुयुक्तैः) तेषां (यवनानां) शिरोभिः (मस्तकैः) सरघाव्याप्तैः (मधुमक्षिकाच्छन्नैः) क्षौद्रपटलैः इव (मधुचक्रैरिव) महीं (धरणीं) तस्तार (आच्छादितवान्) ।

Substance.—रघुः भल्लास्त्रेण यवनशिरांसि निकृत्य पृथिव्यां पातयामास । तच्छिरसां श्मश्रुलत्वात् तानि मधुमक्षिकाव्याप्तमधुचक्राणि इव रेजुः । अतस्तानि भूमौ निपतितानि मधुमक्षिकाव्याप्तमधुचक्राणीव रेजाञ्चक्रुः भूमाच्छादयामासुः ।

Change of voice.—(1) तेन...मही...तस्तरे ।

Sanjivani.—भल्लेति ॥ (सः) रघुः (भल्लापवर्जितैः) भल्लैर्विशिष्टैः—"स्नुहीदलफलो भल्लः" इति यादवः—(श्मश्रुलैः) प्रवृद्धमुखरोमवद्भिः—"सिध्मादिभ्यश्च" (५।२।९७। पा. १९०४ सि.) इति लच्प्रत्ययः—(तेषां) पाश्चात्यानां (शिरोभिः) सरघाभिः मधुमक्षिकाभिः, व्याप्तैः [सरघाव्याप्तैः]—"सरघा मधुमक्षिका" इत्यमरः (Cole. p. 133) क्षुद्राः सरघाः—"क्षुद्रा व्यङ्गा नटी वेश्या सरघा कण्टकारिका" इत्यमरः (Cole. p. 350) क्षुद्राभिः कृतानि क्षौद्राणि मधूनि—"मधु क्षौद्रं माक्षिकादि" इत्यमरः (Cole p. 246)—"क्षुद्राभ्रमरवटरपादपादञ्" (४।३।११९। पा. ४१९९ सि.) इति संज्ञायाम् अञ् प्रत्ययः—तेषां पटलैः सञ्चयैः [क्षौद्रपटलैः] (इव)—"पटलं तिलके नेत्ररोगे छदिषि सञ्चये। पिटके परिवारे च।" इति हैमः—(महीं) (तस्तार) आच्छादयामास ॥ ६३ ॥

सञ्जीवन्याः पाठान्तरम्।

"क्षुद्रा * * " इत्यमरः—"क्षुद्रा * * " इत्यमरशाश्वतौ Nand.

"मधु क्षौद्रं माक्षिकादि"—"क्षौद्रं मधुनि पानीये" इति विश्वः—Nand.

Sanjivani Explained.

स्नुहीदलफलो भल्लः—भल्ल is a shaft, having a head resembling the leaves of मनसा (*Euphorbia Neriifolia*).

क्षुद्रा * * कण्टकारिका—क्षुद्रा means व्यङ्गा (a woman wanting a limb), नटी (a dancing girl), सरघा (bee) and कण्टकारिका।

'मधु क्षौद्रं माक्षिकादि'—मधु is honey generated by bees &c.

पटलं तिलके * * परिवारे च—पटल means तिलक (nasal or frontal decoration with sandal paste and other unguents of the kind), नेत्ररोग (eye-disease), छदिस् (the thatch of a roof), सञ्चय (amassing), पिटक (a boil), as well as परिवार (wife or family).

"सिध्मादिभ्यश्च"—लच् is added so सिध्म &c., and signifies the sense of मतुप्।

"क्षुद्राभ्रमरवटरपादपादञ्"—अञ् is the nominal affix added to क्षुद्रा, भ्रमर, वटर as well as पादप to mean तेन क्रतम् (its product). E. g., क्षुद्राभिः क्रतं क्षौद्रम् &c.

Bengali.—তিনি ভল্লাস্ত্রকর্ত্তিত তাহাদিগের শ্মশ্রুযুক্ত মস্তকসমূহ দ্বারা পৃথিবী আচ্ছন্ন করায় বোধ হইতে লাগিল যেন মধুমক্ষিকাব্যাপ্ত মধুচক্রের দ্বারা পৃথিতল আচ্ছাদিত হইল। ৬৩।

English rendering.—With their bearded heads severed by means of broad-headed shafts, he strewed the earth as if with heaps of honeycombs covered with bees.—63.

Grammatical notes, &c., &c.

Sama'sa.—(1) भल्लैः अपवर्जितानि भल्लापवर्जितानि (तृतीयातत्) तैः (2) सरं (गतिमन्तं) घातयन्ति इति सरघाः (उपपदतत्) or रघेण (गत्या) सह वर्त्तमानाः इति सरघाः (बहु) [V. R. T. of Amarakosha, N. S. P. Ed. p. 225] ताभिः व्याप्तानि सरघाव्याप्तानि (तृतीयातत्) तैः (3) क्षुद्राभिः (मधुमक्षिकाभिः) क्रतानि—क्षौद्राणि—(मधूनि)—तेषां पटलानि क्षौद्रपटलानि (षष्ठीतत्) तैः।

Case-ending.—(1) तेषाम्—शेषे षष्ठी 'शिरोभिः' इत्यनेन सम्बन्धः (2) शिरोभिः—करणे तृतीया एतत् उपमेयोद्देश्यपदम्, अस्य उपमानं क्षौद्रपटलैः which is also करणे तृतीया (4) भल्लापवर्जितैः and श्मश्रुलैः are the adjectives of शिरोभि. (5) सरघाव्याप्तैः—adjective of क्षौद्रपटलैः

Synonyms.—(1) सरघा—(V. Sanjivani.) (2) शिरस्—"उत्तमाङ्गं शिरः शीर्षं मूर्द्धा ना मस्तकोऽस्त्रियाम्।" (अ.)

Different meanings.—(1) शिरस्—'शिरः प्रधाने सेनाग्रे शिखरे मस्तकेऽपि च' (मे) (2) क्षुद्रा and पटल—(V. Sanjivani.)

Deivation.—(1) अपवर्जितैः—अप+(वृज् + णिच्) वर्जि + क्त (कर्मणि, 3rd c. p.) (2) श्मश्रुलैः—श्मन् + श्रि + डुः — श्मश्रु, श्म (मुखं) श्रयति—or श्मन् + श्रु + डुः—श्मनि (मुखे) श्रूयते मितद्र्वादित्वात् डुप्रत्ययः,

or श्मश्रु + श्रु + क्विप्—संपदादित्वात्—आगमशास्त्रस्य अनित्यत्वात् न तुक् [V. R. T. of Amarakosha, N. S. P. Ed., p. 272.] श्मश्रु + अच् मत्वर्थे, 3rd c. p.) The alternative form is श्मश्रुमन्ति:—"सिध्मादिभ्यश्च" (V. Sanjivani Explained) श्मश्रु is not found in the list of सिध्मादि। But as the word आदि indicates that the गण is not complete, we are to incorporate श्मश्रु also in the group. Here आदि means प्रकार (3) तस्तार—स्तृ + लिट्—णल् (4) सरघाः—सृ + अघ् = सरः। सर + हन् + णिच् = घाति + ड + टाप् (1st c. p.) (5) व्याप्तैः—वि + आप् + क्त (कर्मणि, 3rd c. p.) (6) क्षौद्राणि—क्षुद्रा + अञ् (1st c. p.)

Conjugation.—(1) स्तृ (to cover)—स्तृणोति, स्तृणुते (लट्) स्तृणोतु, स्तृणुताम् (लोट्) अस्तृणोत्, अस्तृणुत (लङ्) स्तृणुयात्, स्तृणुवीत (वि. लिङ्) स्तर्यात्, स्तरिषीष्ट, स्तृषीष्ट (आ. लिङ्) तस्तार, तस्तरिथ, तस्तर्थ तस्तरे (लिट्) स्तर्ता (लुट्) स्तरिष्यति-ते (लृट्) अस्तार्षीत्, अस्तार्ष्टाम्, अस्तार्षुः। अस्तरिष्ट, अस्तृत (लुङ्) स्तर्यते (कर्मणि-लट्) तिस्तीर्षति-ते (सन्-लट्) तास्तर्यते (यङ्-लट्) स्तारयति (णिच्-लट्) अतस्तरत्, अतिस्तरत् (णिच्-लुङ्) स्तृत. (क्तः) or स्तॄ—स्तृणाति, स्तृणीते (लट्) तस्तार, तस्तरे (लिट्) अस्तारीत्, अस्तरिष्ट, अस्तरीष्ट, अस्तीर्ष्ट (लुङ्) स्तरिता, स्तरीता (लुट्) स्तरिष्यति-ते, स्तरीष्यति-ते (लृट्) स्तारयति (णिच्-लट्) अतस्तरत् (णिच्-लुङ्) स्तीर्णः (क्तः)

Rhetoric.—The figure of speech is उपमा। The heads of the Párasikas, or, rather, the Pás'chátyas, are compared to honeycombs; the beards on them to black bees. Strewn with tawny heads having black beards, the battle field looked as if strewn with yellow honeycombs teeming with black bees. (For other particulars of the figure of speech, see Sáhitya-darpana, ch. X.).

Propriety.—Black beards and high Pagris, mentioned in the next verse, are, no doubt, the distinguishing features of the Pás'chátyas.

अपनीतशिरस्त्राणाः शेषास्तं शरणं ययुः।
प्रणिपातप्रतीकारः संरम्भो हि महात्मनाम्॥ ६४॥

Prose order.—शेषाः अपनीतशिरस्त्राणाः (सन्तः) तं शरणं ययुः, हि महात्मनां संरम्भः प्रणिपातप्रतीकारः (भवति)।

Explanation by use of synonyms.—शेषाः (हतावशिष्टाः) अपनीतशिरस्त्राणाः (अपसारितशीर्षण्याः सन्तः) शरणं (रक्षकं) ययुः (प्राप्तवन्तः) हि (यतः) महात्मनाम् (उन्नतस्वभावानां) संरम्भः (क्रोधः) प्रणिपातप्रतीकारः (प्रणतिप्रतिविधानः) भवति।

Substance.—हतावशिष्टा यवना रघौ शरणं ययुः। अतिभीताः सन्तः मस्तकेभ्य उष्णीषाण्यवतार्य्य ते तस्य चरणयोः निपेतुः, अभयं च ययाचुः। रघुरपि तेषां प्रसन्नोऽभूत्। कोपस्तस्य शमितः। स तेषां प्राणान् न जग्राह। नैतच्चित्रम्। महात्मनां स्वभाव एव यत् परेषामौद्धत्येन कुप्यन्ति तेषां विनीतत्वेन च शाम्यन्ति।

Change of voice.—शेषैः अपनीतशिरस्त्राणैः सः...ययौ,...संरम्भेण च प्रणिपातप्रतीकारेण (भूयते)।

Sanjivani.—अपनीतेति। (शेषाः) हतावशिष्टाः (अपनीतशिरस्त्राणाः) अपसारितशीर्षण्याः सन्तः—"शीर्षकं शीर्षण्यञ्च शिरस्त्रे" इत्यमरः (Cole. p. 207)—शरणागतलक्षणमेतत्—(तं) रघुं (शरणं ययुः) तथाहि (महात्मनां) (संरम्भः) कोपः—"संरम्भः सम्भ्रमे कोपे" इति विश्वः—प्रणतिरेव; प्रतीकारः यस्य सः [प्रणिपातप्रतीकारः]। महतां परकीयमौद्धत्यमेव असह्यं न तु जीवितम् इति भावः॥ ६४॥

Sanjivani Explained.

शीर्षकं, * * शिरस्त्रे—शीर्षक as well as शीर्षण्य means helmet.

संरम्भः * * * कोपे—संरम्भ means सम्भ्रम (perturbation), कोप (anger).

महताम् * * जीवितम् इति भाव:—The purport is that 'the haughtiness of a foe is unbearable to the great, and not his life.'

Bengali.—হতাবশিষ্ট যবনসমূহ স্বীয় স্বীয় উষ্ণীষপরিহারপুরঃসরঃ রঘুর শরণাপন্ন হইল—যেহেতু পাদপ্রণতি দ্বারাই মহাত্মগণের কোপ সংশমিত হয়। ৬৪।

English rendering.—With their helmets doffed, the survivors sought his protection, for the wrath of the high-souled has prostration for its alleviative.—64.

Grammatical notes, &c., &c.

Sama'sa.—(1) शिरसां त्राणं येभ्य: तानि शिरस्त्राणानि (बहु) अपनीतानि शिरस्त्राणानि यै: ते अपनीतशिरस्त्राणा: (बहु) (2) प्रकर्षेण निपात: प्रणिपात: (प्रादि:) स एव प्रतीकार: यस्य स प्रणिपातप्रतीकार: (बहु) (3) महान् आत्मा येषां ते महात्मान: (बहु) तेषाम्।

Case-ending.—(1) शरणम्—विधेय कर्मपद, same case with 'तम्' which is its उद्देश्य कर्म (2) महात्मनाम्—कृद्योगे:तृकर्म कर्त्तरि षष्ठी। Here 'घञ्' is a कृत् affix, added to the root रभ् of संरम्भ। महात्मान: संरभन्ते इति तेषां संरम्भ: (3) प्रणिपातप्रतीकार:—adjective of संरम्भ:।

Different meanings.—(1) शरण—'शरणं गृहरक्षित्रोर्वधरक्षणयोरपि' (मे.) (2) संरम्भ—(V. Sanjivani.)

Derivation—(1) अपनीतानि—अप+नी+क्त (कर्मणि, 1st c. p.) (2) त्राणम्—त्रै+ल्युट् (भावे) (3) शेषा:—शिष्+घञ् (कर्मणि, 1st c. p.) (4) शरणम्—शृ+ल्युट् (भावे, 2nd c. s.). Words that are formed by ल्युट् in भाववाच्य, are constantly neuter. So it cannot leave its own gender, even if it be a विधेयपद of a masculine word. अजहल्लिङ्गत्वात् न समानलिङ्गत्वम्। (5) ययु:—या+लिट्—

वत् (9) प्रणिपातः—प्र + नि + पत् + घञ् (भावे) The alternative form is प्रणीपातः। See "उपसर्गस्य घञ्यमनुष्ये बहुलम्" under notes on नीवार, Sl. 50, C. I. (7) प्रतीकारः—प्रति + कृ + घञ् (करणे) The optional form is प्रतिकारः। (V. Sl. 50, C. I.) (8) संरम्भः—सम् + रभ + घञ् (भावे) नुम् comes to the root by the rule—"रभेरशब्लिटोः" (V. notes on आरम्भ, Sl. 15, C. I.).

Conjugation.—(1) या—(V. Sl. 3, C. III.).

Force of हि is हेतु—'हि हेतावधारणे' (अ.)।

Rhetoric.—The figure of speech is अर्थान्तरन्यास। The general fact that submission assuages the wrath of the great supports the special fact of the Párasika's submission to Raghu. For अर्थान्तरन्यास see II, 4.

विनयन्ते स्म तद्योधा मधुभिर्विजयश्रमम्।
आस्तीर्णाजिनरत्नासु द्राक्षावलयभूमिषु ॥ ६५ ॥

Prose order.—तद्योधाः आस्तीर्णाजिनरत्नासु द्राक्षावलयभूमिषु मधुभिः विजयश्रमं विनयन्ते स्म।

Explanation by use of synonyms.—तद्योधाः (रघुभटाः) आस्तीर्णाजिनरत्नासु (प्रसारितचर्मासनवरासु) द्राक्षावलयभूमिषु (मधुरसालता: परिवेष्टितप्रदेशेषु) मधुभिः (द्राक्षाफलसम्भूतमद्यैः) विजयश्रमं (युद्धखेदं) विनयन्ते स्म (अपनीतवन्तः)।

Substance.—पारसीकेषु द्राक्षा बहुलमुत्पद्यन्ते, तथा च स्वादु मद्यं जायते। तत्र विजयानन्तरं रघुभटाः पारसीकानां द्राक्षालतापरिवेष्टितभूमिषु उत्कृष्टं चर्मासनं प्रसार्य सुखमुपविष्टाः द्राक्षाफलसम्भूतमद्यपानेन युद्धजनितं परिश्रमं दूरीचक्रुः।

Change of voice.—तद्योधैः...विजयश्रमः विनयतेस्म।

Sanjivani.—विनयन्त इति। तस्य रघोः योधाः भटाः [तद्योधाः]

चालीर्णानि अजिनरत्नानि, चर्मश्रेष्ठानि यासु तासु [चालीर्णाजिनरत्नासु] द्राक्षा-वलयानां भूमिषु [द्राक्षावलयभूमिषु]—"मृद्वीका गोस्तनी द्राक्षा स्वाद्वी मधुरसेति च" इत्यमरः (Cole. p. 111.) (मधुभिः) द्राक्षाफलप्रकृतिकैर्मद्यैः (विजयश्रमं) युद्धखेदं (विनयन्ते स्म) अपनीतवन्तः—"कर्त्तृस्थे चाशरीरे कर्मणि" (१।३।३७। पा. २०१० सि.) इत्यात्मनेपदं—"लट्स्मे" (३।२।११८। पा. २७७८ सि.) इति भूतार्थे लट्॥ ६५ ॥

Sanjivani Explained.

मृद्वीका गोस्तनी * * मधुरसा—These five words are synonyms.

लट्स्मे—In alliance with स्म, लट् takes the place of लिट्।

"कर्त्तृस्थे चाशरीरे कर्मणि"—When the object of नी inheres in its subject but does not form a part of the body of the subject, the root takes आत्मनेपद। खेद, in the present verse, is the कर्म of नी and योध is the कर्त्तृ। खेद, no doubt, inheres in योध because the fatigue of soldiers and not of others is spoken of. Yet खेद, having no physical from, does not form a part and parcel of the soldier's body. So नी is आत्मनेपद। See सिद्धान्तकौमुदी।

Bengali—রঘুযোধগণ দ্রাক্ষালতাপরিবেষ্টিত ভূমিতে অত্যুৎকৃষ্ট চর্ম্ম প্রসারিত করিয়া দ্রাক্ষাফলসম্ভূত মদ্যপানে যুদ্ধশ্রম অপনোদন করিতে লাগিল। ৬৫।

English rendering.—With wines (distilled from grapes) his warriors allayed the fatigue of victory, (seated) on grounds encircled with vines and spread over with costly skins.—65.

Grammatical notes, &c., &c.

Samas'a.—(1) तस्य योधाः तद्योधाः (षष्ठीतत्) (2) विशिष्टः जयः विजयः (प्रादिः) तस्य श्रमः विजयश्रमः (षष्ठीतत्) तम् or, विजयेन (हेतुना) श्रमः (तृतीयातत्) or, विजयसम्भूतः श्रमः (शाकपार्थिवादित्वात् मध्यपदलोपि

कर्मधा) (2) अजिनेषु रत्नानि (प्रधानानि) अजिनरत्नानि (सप्तमीतत्) आस्तीर्णानि अजिनरत्नानि यासु ताः आस्तीर्णाजिनरत्नाः (बहु) तासु (3) द्राक्षाणां वलयः द्राक्षावलयः (षष्ठीतत्) तस्य भूमयः द्राक्षावलयभूमयः (षष्ठीतत्), or, द्राक्षावलयपरिवृताः भूमयः द्राक्षावलयभूमयः (शाकपार्थिवादित्वात् मध्यपदलोपी कर्मधा—) तासु।

Case ending.—(1) मधुभिः—करणे तृतीया (2) द्राक्षावलयभूमिषु—आधाराधिकरणे सप्तमी।

Synonyms.—(1) वलय—'आवापकः परिहार्यः कटको वलयोऽस्त्रियाम्' (अ.) (2) द्राक्षा—(V. Sanjivani.) (3) अजिन—'अजिनं चर्म कृत्तिः स्त्री' (अ.)

Different meanings.—(1) मधु—(V. Sl. 61, C. IV.) (2) वलय—'वलयः कण्ठरोगे ना कङ्कणे पुंनपुंसकम्' (मे.)

Derivation.—(1) वलय—वल्+कयन्—'वलिमलितनिभ्यः कयन्' (उ. ४।९९।) (2) द्राक्षा—द्राख्+अच् (कर्मणि)+टाप्—द्राक्ष्यते (काङ्क्ष्यते) इति द्राक्षा। नुम् drops from the root, because 'आगमशास्त्रमनित्यम्' [V. R. T. of Amarakosha, N. S. P. Ed. p. 187.] (3) अजिनम्—अज्+इनच्—'अजेरज्च' (उ. २।४८।) (4) विनयन्ते स्म—वि+नी+लट्—अन्ते=विनयन्ते। स्म, added to it, makes it past tense (लिट्)। (5) योधाः—(V. Sl. 62, C. IV.) (6) विजयः—वि+जि+अच् (7) आस्तीर्णानि—आ+स्तृ+क्तः (कर्मणि, 1st c. p.)

Conjugation.—(1) नी—(V. Sl. 35, C. I.)

Propriety.—Kálidása mentions the characteristic of each country he names. Vines are, no doubt, the chief produce of Peswar and the tract to the further west.

ततः प्रतस्थे कौवेरीं भास्वानिव रघुर्दिशम् ।
शरैरुस्रैरिवोदीच्यानुद्धरिष्यन् रसानिव ॥ ६६ ॥

उदीच्यान्—औदिच्यान्—(वि. *appui* Nand.)

Prose order.—ततः रघुः भास्वान् इव शरैः उस्रैः इव उदीच्यान् (नृपान्) रसान् इव उद्धरिष्यन् कौवेरीं दिशं प्रतस्थे ।

Explanation by use of synonyms.—ततः (तदनन्तरं) रघुः दिलीपकुमारः भास्वानिव (सूर्यो यथा) शरैः (वाणैः) उस्रैरिव (किरणैर्यथा) उदीच्यान् (उत्तरदिग्भवान् नृपान्) रसानिव (जलानि यथा) उद्धरिष्यन् (उन्मूलयिष्यन्) कौवेरीं (कुवेरसम्बन्धिनीं) दिशं (ककुभं) प्रतस्थे (ययौ) ।

Substance.—एवं पाश्चात्यान् विजित्य रघुरुदीच्यान् विजेतुं प्रतस्थे । कविस्तदुपमयाह—यथा हि सूर्यः स्वकीयैः किरणैः पृथिव्या जलानि शोषयितुमिच्छन् उत्तरां दिशमाश्रयति, तथा रघुरपि स्वस्य तीक्ष्णैर्वाणैः उत्तरदिग्भवान् नृपतीन् उन्मूलयितुमिच्छन् उत्तराशां ययौ ।

Change of voice.—...रघुणा भास्वता...उद्धरिष्यता कौवेरी दिक्...।

Sanjivani.—तत इति । (ततः रघुः) (भास्वान्) सूर्यः (इव) (शरैः) वाणैः (उस्रैः) किरणैः इव,—"किरणोस्रमयूखांशुगभस्तिघृणिघृष्णयः" इत्यमरः (Cole. p. 22.) (उदीच्यान्) उदग्दिग्भवान् नृपान् (रसान्) उदकानि (इव उद्धरिष्यन्) (कौवेरीं) कुवेरसम्बन्धिनीं (दिशम्) उदीचीं (प्रतस्थे) अनेकेवशब्देनेयमुपमा—यथाह दण्डी—"एकानेकेवशब्दत्वात् सा वाक्यार्थोपमा द्विधा" (काव्यादर्शे) इति ॥ ६६ ॥

Sanjivani Explained.

अनेकेनेवशब्देन उपमा—Generally one इव is used to express that the उपमान and the उपमेय resemble each other in some respect. Here we find many इव's constituting one उपमा । This is no fault of construction. The rhetorician Dandin lays down that the उपमा, dependant upon the sense of a sentence,

can be classified under two heads according as there is one or more than one इव in the sentence.

Bengali—সূর্য্য যেরূপ কিরণ দ্বারা (পৃথিবীর) রসশোষণনিমিত্ত উত্তর দিক্ আশ্রয় করেন, সেইরূপ রঘুও বাণ দ্বারা উত্তর দিক্স্থিত নৃপতিবৃন্দকে উন্মূলিত করিবার জন্য তদনন্তর কুবেরপালিত (উত্তর) দিগভিমুখে গমন করিলেন। ৬৬।

English rendering.—Then Raghu proceeded towards the Kuvera's region for tearing up the northern princes with his shafts like the sun for sucking up moisture with his rays.—66.

Grammatical notes, &c., &c.

Case-ending.—(1) दिशम्—कर्म of प्रतस्थे which is गत्यर्थ। We may explain प्र+स्था as signifying प्राप्ति here 'सर्वे गतयाः प्राप्त्यर्थाः'—इति (2) भास्वान्—विधेय and उपमान कर्त्ता; 'रघुः' is its उद्देश्य and उपमेयकर्त्ता (3) रसान्—विधेय and उपमानकर्म; 'उदीच्यान्' is its उद्देश्य and उपमेयकर्म—शतृ प्रत्ययान्तस्य 'उद्धरिष्यन्' इति शब्दस्य योगे कर्म (4) उस्रैः—विधेय and उपमानपद—'शरैः' is its उद्देश्य and उपमेय-पद। Both are in करणे तृतीया (5) कौबेरीम्—adjective of दिशम्।

Synonyms.—(1) शर—(V. पत्रिन्, Sl. 53, C. III.) (2) भास्वत् —(V. सूर्य्य, Sl. 13, C. III.) (2) उस्र—'भानुः करो मारीचिः स्त्री-पुंसयोर्दीधितिः स्त्रियाम्।' (अ.) [First two lines of it, V. Sanjivani.]

Different meanings.—(1) उस्र—'उस्रोवृषे च किरणेऽप्युस्रार्जुन्यप-चितर्याः' (मे.) (2) शर्—'शरस्तु तेजने बाणे दध्यग्रे ना शरं जलं' (वि. मे. (3) रस—(V. **Sanj**. Sl. 18, C. I.)

Derivation.—(1) प्रतस्थे—प्र+स्था+लिट्—ए (V. उपस्थितान्, I. 45.) (2) कौबेरीम्—कुत्सितं बेरं (शरीरं) यस्य स कुबेरः—तस्य इयम्—कुबेर+अण्+ङीप् (2nd c. s.) (3) भास्वान्—भास्+मतुप्—म of मतुप् is changed into व (1st c. s.) (4) उस्रैः—वस्+रक् (3rd c. p.)

'स्फायितञ्चि—' (उ. २।१३) व of the root is changed into उ because it falls under यजादि। When व of वस् is changed into उ by संप्रसारण, the स् after उ is not changed into ष् by the rule,—"न रपरसृपिसृजिस्पृशिस्पृहिसवनादीनाम्," (८।३।११० पा. ११६८ सि.) [The स् of सृप्, सृज्, स्पृश्, स्पृह् as well as of सवन &c., followed by र् does not become ष] The Sutra which enjoins सम्प्रसारण is "वचिस्वपियजादीनां किति" (६।१।१५ पा. २४०९)। It means वच्, स्वप् as well as यज् &c. admit सम्प्रसारण; *i.e.*, व and य of these roots changed into उ and इ। (5) उदीच्यान्—उदीची + यत् (भवार्थ, 2nd c. p.) "द्युप्रागपागुदक्प्रतीचो यत्" (४।२।१०१ पा. १३११ सि.) [यत् is added to द्यु, प्राच्, अपाच्, उदक् as well as प्रतीच् in the sense of भव। E. g., दिव्यं, प्राच्यम्, अपाच्यम्, उदीच्यं, प्रतीच्यम्] (6) उद्धरिष्यन्—उत् + हृ + स्य in लृट् (1st c. s.) "धातुसम्बन्धे प्रत्ययाः" इति नियमात् अतीतकालेऽपि लृट्। (7) रश्मीन्—(V. Sl. 18, C. I.)

Conjugation.—(1) हृ—(V. Sl. 39, C. III.) (2) स्था—(V. Sl. 45, C. I.)

Rhetoric.—The figure of speech is Simile. Raghu is compared to the sun, his shaft to the solar rays, and the northern kings to the moisture of the Earth. As the sun destroys the moisture so sure would Raghu kill and vanquish the northern kings.

Geography.—The following tribes were known as उदीच्य:—सिन्धु, सौविर, मद्रक, शतद्रुज, पारद, केकर, माटर, कम्बोज, दरद, बर्बर चीन, खार, आत्रेय, पुष्कल, कसेरक, लम्पक, शूलकार, चुलिक, तामस, हंसमार्ग, काश्मीर, &c. See Márkandeyapurána which includes even the पाञ्चाल in the list.

विनीताध्वश्रमास्तस्य सिन्धुतीरविचेष्टनैः।
दुधुवुर्वाजिनः स्कन्धान् लग्नकुङ्कुमकेसरान् ॥ ६७ ॥

मूलस्य पाठान्तरम्।

सिन्धु—वङ्क्षु (°पा. व.), मङ्क्षु Nand. (foot-notes).

Prose order.—सिन्धुतीरविचेष्टनैः विनीताध्वश्रमाः तस्य वाजिनः लग्नकुङ्कुमकेसरान् स्कन्धान् दुधुवुः।

Explanation by use of synonyms.—सिन्धुतीरविचेष्टनैः (सिन्धुतटे अङ्गपरिवर्त्तनैः) विनीताध्वश्रमाः (अपनीतमार्गखेदाः) तस्य (रघोः) वाजिनः (अश्वाः) लग्नकुङ्कुमकेसरान् (संसक्तकुङ्कुमकिञ्जल्कान्) स्कन्धान् (अंसान्) दुधुवुः (कम्पयामासुः)।

Substance.—सिन्धुनदमवलम्ब्य रघुरुदङ्मुखं ययौ। तस्य वाजिनः अध्वखेदापनोदनार्थं तन्नदस्य तटे अङ्गपरिवर्त्तनं चक्रुः। तत्र कुङ्कुमो जायते, कुङ्कुमकेसराः वाजिनां गात्रेषु संसक्ताः ते च उत्थाय यथास्वभावम् अङ्गानि कम्पयामासुः। पथि स सिन्धुतीरस्थान् राज्ञो विजिग्ये इति ध्वनितम्।

Change of voice.—...विनीताध्वश्रमैः...वाजिभिः लग्नकुङ्कुमकेसराः स्कन्धाः दुधुविरे।

Sanjivani.—विनीतेति। सिन्धुर्नाम काश्मीरदेशेषु कश्चिन्नदविशेषः—"देशे नदविशेषेऽब्धौ सिन्धुर्ना सरिति स्त्रियाम्" इत्यमरः (Cole. p. 329) सिन्धोः तीरे विचेष्टनैः, अङ्गपरिवर्त्तनैः [सिन्धुतीरविचेष्टनैः] (विनीताध्वश्रमाः) (तस्य) रघोः (वाजिनः) अश्वाः—लग्नाः कुङ्कुमकेसराः, कुङ्कुमकुसुमकिञ्जल्काः येषां तान्, यद्वा,—लग्नकुङ्कुमाः केसराः, सटाः येषां तान् [लग्नकुङ्कुमकेसरान्]—"अथ कुङ्कुमं काश्मीरजन्म" इत्यमरः (Cole. p. 170) "केसरो नागकेसरे, तुरङ्गसिंहयोः स्कन्धकेशेषु बकुलद्रुमे। पुन्नागवृक्षे किञ्जल्के स्यात्।" इति हैमः—(स्कन्धान्) कायान्—"स्कन्धः प्रकाण्डे कायेऽसे विज्ञोनादिषु पञ्चसु। नृपे समूहे व्यूहे च।" इति हैमः—(दुधुवुः) कम्पयन्तिस्म॥ ६७ ॥

N. B.--It is curious to note that almost all the Bengal editions', including Mr. S. Ray's, Mallinátha says बहुलद्रुमे for बकुलद्रुमे। The Bombay editions avoid the error. It is very much to be regretted that Bengal editions, as a rule, rarely verify the quotations they meet with.

Sanjivani Explained.

देशे * * स्त्रियाम्—सिन्धु, when masculine, means the country so called, the river so named as well as the sea. When faminine it means any river.

अथ कुङ्कुमं काश्मीरजन्म—कुङ्कुम had Kas'mira its home. So काश्मीरजन्म is its synonym.

केसरो नागकेसरे * * * स्यात्—केसर means नागकेसर (*Messva ferrea*), the manes of a horse and a lion, बकुलद्रुम (Mimusops Eleni) the tree called पुन्नाग (Collophyllum inophyllum), as well as the pollens (of flowers and fruits).

"स्कन्धः ० ० व्यूहे च"—स्कन्ध means the trunk of a tree, body, shoulder, the five elements *viz.* (phenomenal) cognition &c. of the Bauddha philosophy, asking, collection, as well as an array of army.

लग्नकुङ्कुमकेसरान् is explained by Mallinátha (1) as 'with pollens of saffron adhering'; and (2) 'with manes having saffron adhering to them'. In one case केसर means pollens of the flowers, in the other it means the manes on the neck of a horse. In the last case कुङ्कुम stands for कुङ्कुमरेणु by लक्षणा।

यद्वा—When two or more interpretations are given introduced by यद्वा, the last should be taken as that which is approved by the commentator.

Bengali.—তাঁহার অশ্বসমূহ সিন্ধুনদতটে অঙ্গপরিবর্ত্তনহেতু পথশ্রম দূর করিয়া কুঙ্কুমকেসরসংসক্ত শরীর কম্পিত করিতে লাগিল। ৬৭।

English rendering.—Their fatigue (caused) by (long) march, dispelled by rolling on the banks of Sindhu, his steeds

shook their necks with pollens of saffron adhering to them (or with manes having such pollens adhering to them).—67.

Grammatical notes, &c., &c.

Sama'sa.—(1) अध्वजातः श्रमः अध्वश्रमः (शाकपार्थिवादित्वात् मध्यपदलोपी कर्मधा) विनीत. अध्वश्रमः यैः ते विनीताध्वश्रमाः (बहु) । When सिन्धुतीरविचेष्टनैः is in अनुक्ते कर्त्तरि तृतीया, the विग्रहवाक्य is विनीतः अध्वश्रमः येषां (2) सिन्धोः तीरं सिन्धुतीरम् (षष्ठीतत्) तत्र विचेष्टनानि सिन्धुतीरविचेष्टनानि (सप्तमीतत्) तैः (3) कुङ्कुमानां केसराः कुङ्कुमकेसराः (षष्ठीतत्) लग्नाः कुङ्कुमकेसराः येषु ते लग्नकुङ्कुमकेसराः (बहु) तान् or लग्नानि कुङ्कुमानि येषु ते लग्नकुङ्कुमाः (बहु) तादृशाः केसराः येषां ते लग्नकुङ्कुमकेसराः (बहु) तान्।

Case-ending.—(1) तस्य—शेषे षष्ठी 'वाजिनः' इत्यनेन सम्बन्धः (2) सिन्धुतीरविचेष्टनैः—हेतौ तृतीया, or अनुक्ते कर्त्तरि तृतीया—'विनीत' इत्यस्य (3) विनीताध्वश्रमाः is the adjective of वाजिनः (4) लग्नकुङ्कुमकेसरान्—adjective of स्कन्धान्।

Synonyms.—(1) कुङ्कुम—'अथ कुङ्कुमम्। काश्मीरजन्माग्निशिखं वरं बाह्लीकपीतनम्। रक्तसंकोचपिशुनं धीरं लोहितचन्दनम्॥' (अ.) (2) केसर—'किञ्जल्कः केसरोऽस्त्रियाम्' (अ.) (3) स्कन्ध—(V. Sl. 57, C. IV.)

Different meanings.—(1) वाजिन्—(V. Sl. 25, C. IV.)

Derivation.—(1) विनीतः—वि + नी + क्तः (कर्मणि) (2) अध्वन्—अद् + क्वनिप्—द् of the root is changed into ध्—'अदेर्धश्च' (उ. ४।११५। (3) सिन्धुः—(V. Sl. 35, C. IV.) (4) विचेष्टनैः—वि + चेष्ट् + ल्युट् (भावे, 3rd c. p.) The plural number in it indicates the frequent turnings. (5) दुधुवुः—धू or धु + लिट्—उस् (6) वाजिनः—(V. Sl. 25, C. IV.) (7) स्कन्धान्—(V. Sl. 50, C. IV.) (8) लग्नः—(V. Sl. 53, C. IV.) (9) कुङ्कुमम्—'कुङ्कुम्' इति शब्दोऽस्ति

वाचकत्वं नास्य—इति भर्मं आदित्वादच् or कुक् (आदाने) + बाहुलकात् उमच्—"बाष्कोमदोर्गुम्" (V. notes on कुर्वती, Sl. 24, C. IV.) इत्यत्र 'गुम्' इति योगविभागात् गुम् [V. R. T. of Amarakosha, N. S. P. Ed. p. 280.] (10) केसरः—के + सृ + अच्—के (जले) सरति—"हलदन्तात् सप्तम्याः संज्ञायाम्" (६।३।९ पा. २६६ सि.) [To denote संज्ञा, सप्तमी after a हलन्त or अजन्त word, does not elide in Samása. E. g. त्वचिसार (bamboo)]

It is also spelt as केशर is the same sense—के + शृ + अच्। केसर and केशर both have the same meaning. 'आन्दोल कुसुमकेशर-शरेणुमुखी' इति वाचस्पतौ तालव्यमध्यदर्शनात्—इति रायमुकुटः (V. foot-note of R. T. of Amarakosha, N. S. P. p. 124.) See notes on केसरिणाम् in II, 29.

Conjugation.—(1) धु or धू—(V. Sl. 53, C. I.).

Rhetoric.—The figure of speech is स्वभावोक्ति or a fine natural description.

Geography.—Sindhu is well-known. It is the *Hydespes* of the Greek and the Indus of the English. The name Hindu applied to us by the Mussalman invaders is said to be a corruption of Sindhu.

Remark.—Cháritravardhana and others read between 66 and 67.

जितानजय्यस्तानेव कृत्वा रथपुरःसरान्।
महार्षवमिवौर्वाग्निः प्रविवेशोत्तरापथम्॥

तत्र हूणावरोधानां भर्तृषु व्यक्तविक्रमम्।
कपोलपाटलादेशि बभूव रघुचेष्टितम्॥ ६८॥

मूलस्य पाठान्तरम्।

पाटल—पाटव (चा. वा.)

Prose order.—तत्र भर्तृषु व्यक्तविक्रमं रघुचेष्टितं हूणावरोधानां कपोल-पाटलादेशि बभूव।

Explanation by use of synonyms.—तत्र (उदीच्यां दिशि) भर्तृषु (पतिषु) व्यक्तविक्रमं (स्फुटपराक्रमं) रघुचेष्टितं (रघुव्यापारः) हूणावरोधानां (हूणान्तःपुरस्त्रीणां) कपोलपाटलादेशि (गण्डेषु ताडनादिकृतरक्तिमवर्णज्ञापकं) बभूव (आसीत्)।

Substance.—सिन्धुतीरेण गच्छन् तत्तीरवासिनां हूणानां देशेषु रघुरुपस्थितः। तत्र तस्य घोरं युद्धमभूत्। हूणाः पराभूताः विध्वस्ताश्च। तेषां स्त्रियः पतिवियोगात् दुःखितास्तत्रनादमकुर्वत, अविरतताडनादिना च स्वकपोलान् रक्तवर्णान् विदधुः।

Change of voice.—...व्यक्तविक्रमेण रघुचेष्टितेन...कपोलपाटलादेशिना बभूवे।

Sanjivani.—तत्रेति। (तत्र) उदीच्यां दिशि (भर्तृषु) (व्यक्तविक्रमं) भर्तृवधेन स्फुटपराक्रमम् इत्यर्थः—(रघुचेष्टितं) रघुव्यापारः—हूणाः जनपदाख्याः क्षत्रियाः तेषाम् अवरोधाः, अन्तःपुरस्त्रियः, तेषां [हूणावरोधानां]—कपोलेषु पाटलस्य पाटलिम्नः, ताडनादिकृतारुण्यस्य आदेशि उपदेशकं बभूव अथवा पाटलः आदेशो, आदेष्टा ; यस्य तत् बभूव— स्वयं लक्ष्यायते इत्यर्थः ॥ ६८ ॥

Sanjivani Explained.

हूणाः जनपदाख्याः क्षत्रियाः—Mallinátha calls the Hunas a kshatriya race. Their country is also called हूण। Mallinátha takes हूण to be क्षत्रियजनपदवाचक शब्द। Hence, by "द्व्यञ्मगधकलिङ्गसूरमसादण्" (४।१।१७० पा. ११८८ सि. *Vide* notes on मागधी in III,5) हूण admits the तद्राज affix अण् in the sense of 'it is a deseendant' or 'a king of the Hunas'.

कपोलपाटलादेशि—Mallinátha gives two constructions to the word. One is कपोलेषु पाटलस्य आदेशि (the teacher of the redness on the cheeks. The Huna-wives, at the loss of their husbands, indulged in grief. Their custom, says Cháritravardhana, was to cry and beat their cheeks and breasts. The cheeks, often beat, became red. Hence the feats of Raghu are spoken of as ordaining the redness of their cheeks. The alternative

explanation कपोलेषु पाटल: आदेष्टो यस्य तत् रघुचेष्टितम् । In this case the redness of the cheeks are spoken of as the recorder of Raghu's exploits.

स्वयं लिख्यायते—The ruddiness of the cheeks acted as लेख्य *i.e.* or विजयलेख्य (recorder of victory).

Bengali.—সেখানে রঘুর কার্য্য পতিগণের উপরি বিশদবিক্রম প্রকাশ করিয়া হূণরমণীগণের গণ্ডস্থলে রক্তিমাবিধায়ক হইল—অথবা হূণরমণীগণের গণ্ডস্থলস্থ রক্তিমা রঘুকার্য্যের বিজ্ঞাপক হইল । ৬৮ ।

English rendering.—There the exploits of Raghu, the vigour of which was mainfested on their husbands, became the teacher of the ruddiness on the cheeks of the Hunas women (or had the ruddiness on the cheeks of Huna-women as their recorder).—68.

Grammatical notes, &c., &c.

Sama'sa.—(1) हूणानाम् अवरोधा: हूणावरोधा: (षष्ठीतत्) तेषाम् (2) व्यक्त: विक्रम: यस्य तत् व्यक्तविक्रमम् (बहु) (3) कपोलेषु पाटल: कपोल-पाटल: (सप्तमीतत्) तम् आदिशतीति कपोलपाटलादेशि (उपपदतत्) (4) रघो: चेष्टितं रघुचेष्टितम् (षष्ठीतत्) (5) कं (मुखं) पोलति (वर्द्धयति) इति कपोल: (उपपदतत्) ।

Case-ending.—(1) हूणावरोधानाम्—शेषे षष्ठी 'कपोल:' इत्यनेन सम्बन्ध: (2) भर्तृषु—विषयाधिकरणे सप्तमी (3) व्यक्तविक्रमम् and कपोल-पाटलादेशि are the adjectives of रघुचेष्टितम् (4) तत्र—अव्ययं,—औपश्ले-षिकाधारे सप्तमी ।

Synonyms. (1)—अवरोध—'स्त्र्यगारं भूभुजामन्त:पुरं स्यादवरोधनम् । शुद्धान्तश्चावरोधश्च ।' (अ.)

Different meanings.—(1) अवरोध—'अवरोधस्तिरोधाने राज-दारेषु तद्गृहे ।' (मे.) (2) विक्रम—'शक्तिसम्पत्ति: क्रान्तिमात्रं' च विक्रम:, (भरत्वि:) (3) पाटल—'श्वेतरक्तस्तु पाटल: ... (अ.)' ।

Derivation.—(1) अवरोधानाम्—अव + रुध् + घञ् (अधिकरणे, 6th c. p.) But in कर्मवाच्य, अवरुध्यन्ते इति अवरोधाः—अन्तःपुरचारिण्यो रमण्यः । Here कर्मवाच्य is preferable. In अधिकरणवाच्य it means अन्तःपुर (seraglio) (2) भर्तृषु—भृ + तृच् (कर्त्तरि, 7th c. p.) (3) व्यक्तः—वि + अन्ज् + क्तः (कर्त्तरि) (4) विक्रमः—वि + क्रम् + घञ् (भावे, करणे वा) For the reason why the penultimate अ of the root is not lengthened, see आगम, Sl. 48, C. I. (5) कपोलः—कपि + ओलच्—'कपिगडिगण्डि—' (उ. १।६६।) 'कपि' इति निर्देशात् नलोपः, or क + पुल् + अण्—"कर्मण्यण्" (३।२।१। पा. २९१३ सि.) (6) पाटलः—पाटल + अच् (अर्श आदित्वात्) पाटलवर्णोऽस्ति अस्य इति पाटलः, or पट् + णिच् + कलच्—वृषादित्वात् (उ. १०६।) (7) आदर्शि—आ + दिश् + णिनिः (शीलार्थे) (8) बभूव—भू + लिट्—णल् (9) चेष्टितम्—चेष्ट् + क्त (भावे)

Conjugation.—(1) भू—(V. Sl. 15, C. III).

Geography.—For हूण's and their countries see Introduction p. LXIII and LXIV.

काम्बोजाः समरे सोढुं तस्य वीर्य्यमनीश्वराः ।
गजालानपरिक्लिष्टैरक्षोटैः सार्द्धमानताः ॥ ६९ ॥

मूलस्य पाठान्तरम् ।

अक्षोटैः—अङ्कोलैः (चा. व.)

काम्बोजाः—कम्बोजाः (भट्टोजि) It is easier.

Prose order.—काम्बोजाः समरे तस्य वीर्य्यं सोढुम् अनीश्वराः (सन्तः) गजालानपरिक्लिष्टैः अक्षोटैः सार्द्धम् आनताः ।

Explanation by use of synonyms.—काम्बोजाः (कम्बोजदेशीयाः राजानः) समरे (युद्धे) तस्य (रघोः) वीर्य्यं (प्रभावं) सोढुं (प्रतिरोद्धुम्) अनीश्वराः (अक्षमाः सन्तः) गजालानपरिक्लिष्टैः (गजबन्धनपरिचितैः) अक्षोटैः (तन्नामकवृक्षैः) सार्द्धं (सह) आनताः (अवनताः) ।

Substance.—क्रमाद् रघुः काम्बोजेषु उपस्थितः। तत्र महान्तोऽक्षोट-पादपाः प्रचुरा आसन्। तेषु रघुगजा आबद्धा जाताः। तेषामाकर्षणेन परिक्लिष्टाः ते वृक्षा अवनतशीर्षा भुवि निपतिताः काम्बोजाधिपतयश्च रघोर्वीर्य्यमसहमानाः पराजिताः सन्तः तद्वृक्षयोर्निपेतुः।

Change of voice.—काम्बोजैः...अनीश्वरैः...आनतम्।

Sanjivani.—'काम्बोजा इति। (काम्बोजाः) राजानः (समरे) (तस्य) रघोः (वीर्य्यं) प्रभावम्—"वीर्य्यं तेजः प्रभावयोः" इति हैमः—(सोढुम्) (अनीश्वराः) असमर्थाः सन्तः—गजानाम् आलानम्, बन्धनम्—भावे ल्युट्—"विभाषा लीयतेः" (६।१।५१। पा. २५०९ सि.) इत्यात्वम्—तेन परिक्लिष्टैः परि-क्षतैः [गजालानपरिक्लिष्टैः] (अक्षोटैः) वृक्षविशेषैः (सार्द्धम् आनताः) ॥ ६९ ॥

Sanjivani Explained.

"विभाषा लीयतेः"—The ई of ली (क्र्यादि and चुरादि) as well as लीङ् (दिवादि) is optionally changed into आ if the affix ल्यप् or an affix which has the capacity of changing the vowel of the root into ए, is added to ली or लीङ्। आलान is derived as आङ्+ली+ल्युट्। ल्युट् is एज्विषय। So ली is changed into ला।

Bengali.—কম্বোজদেশীয় নৃপতিগণ সমরে তাঁহার বীর্য্য সহ্য করিতে অক্ষম হইয়া (রঘুর) গজবন্ধনপরিক্লিষ্ট অক্ষোটবৃক্ষগণের সহিত নত হইয়া পড়িল। ৬৯।

English rendering.—The Kámboja kings, unable to endure his prowess in battle, bent down (along) with (their) walnut trees excessively afflicted by having become stakes unto which (his) elephants had been tied.—69.

Grammatical notes, &c., &c.

Sama'sa.—(1) न ईश्वराः अनीश्वराः (नञ्तत्) (2) परि (विशेषेण) क्लिष्टाः परिक्लिष्टाः (प्रादिः) गजानाम् आलानं गजालानम् (षष्ठीतत्) तेन परिक्लिष्टाः गजालानपरिक्लिष्टाः (तृतीयातत्) तैः (3) अक्षंस्येव छटाः (पर्णानि) येषां ते अक्षोटाः (उपमानोत्तरपदलोपी बहु) तैः।

Case-ending—(1) समरे—विषयाधिकरणे सप्तमी (2) तस्य—शेषे षष्ठी 'शौर्यम्' इत्यनेन सम्बन्धः (3) अक्षौटैः—सहार्थक 'सार्द्धं' योगे तृतीया (4) गजालानपरिक्लिष्टैः—adjective of अक्षौटैः (5) कम्बोजाः—adjective of कम्बोजाः।

Synonyms.—(1) अक्षौट—'अक्षोटकर्परालाक्षौ' (अ.) (2) समर—(V. संग्राम, Sl. 62, C. IV.)

Different meanings.—(1) शौर्य—(V. Sanjivani.) (2) ईश्वर—(V. Sl. 1, C. I.)

Derivation.—(1) काम्बोजाः—To mean कम्बोजदेशीयाः राजानः the तद्राज affix अण् should drop by the Sutra "कम्बोजाल्लुक्" (४।१।१७५। पा. ११८४ सि.) The Vritti is अस्मात् तद्राजस्य लुक्। कम्बोजः, कम्बोजौ। So कम्बोज+अण् becomes कम्बोजाः and not काम्बोजाः। How to get काम्बोजाः? Bhattoji says—'कम्बोजाः समरे इति पाठः सुगमः—दीर्घादि पाठे तु कम्बोजाः अभिजनो येषामित्यर्थः।' In deriving 'काम्बोजाः' we have fall upon the rule "सिन्धुतक्षशिलादिभ्योऽणञौ" (४।३।९३ पा. १४७२ सि.) [The words that are under the list सिन्धु &c., take the affix अण् and those that are under तक्षशिलादि take the affix अञ् in the sense of सोऽस्याभिजनः] कम्बोज is under the list of सिन्ध्वादि words, so it takes अण् in the sense of अभिजन।. अभिजन means 'the place where one's ancestors lived; निवास means the place where one oneself lives. (2) सोढुम्—The alternative form is सहितुम् (3) शौर्यम्—शूर+यत्—"अचो यत्" (३।१।९७ पा. २८४१ सि.) [A root ending in a vowel admits यत्] or, शूरस्य भावः शौर्यम्—"तत्र साधुः" (४।४।९८ पा. १६५० सि.) This is the तद्धित derivation. (4) आलानम्—आ+ली+ल्युट् (भावे)—ली is changed ला। (5) परि+क्लिश्+क्त (कर्मणि,

3rd c. p.) (6) अक्षोटै:—अक्ष + ओट:—(आङ्लकात्, 3rd c. p.) (7) आनता:—आ + नम् + क्त (कर्त्तरि, 1st c. p.) The म् of the root नम् drops by the rule :—"अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति" (६।४।३७। पा. २४२८ सि. V. notes on गति, Sl. 4, C. I.)

Conjugation.—(1) नम्—(V. I, 14) (2) सह्—(V. IV, 61)

Geography.—काम्बोज lay near वाह्लीक which is indentified with Bactria. काम्बोज is wrongly identified with Cambodia which is situated near Siam. From Sabháparvan Ch. 27, we know it lay to the north-west of Kásmira.

Rhetoric.—The figure of speech is सहोक्ति। It is defined in काव्यप्रकाश as "सा सहोक्ति: सहार्थस्य बलादेकं द्विवाचकम्"। Where through the use of a सहार्थ word, one can express two senses the figure of speech is सहोक्ति if there is charm in the whole statement. Here आनत expresses two senses, being connected with two objects. आनत, in the case of काम्बोज, means submission ; and in that of अक्षोट, bent down.

तेषां सदश्वभूयिष्ठास्तुङ्गा द्रविणराशय:।
उपदा विविशु: शश्वन्नोत्सेका: कोशलेश्वरम् ॥ ७० ॥

मूलस्य पाठान्तरम्।

तुङ्गा: द्रविणराशय:—तुङ्ग द्रविणराशय: Nand (foot-note)

शश्वत्—तं च " "

For the second foot we find the readings विविशुस्तं कोशलेशमुदन्वन्तमिवापगा:, विविशुस्तं विशां नाथं सरस्वन्तमिवापगा:, विविशुस्तं विशां नाथमुदन्वन्तमिवापगा:, and उपदा विविशु: शश्वत्—समुद्रमिव निम्नगा:।

Prose order.—तेषां सदश्वभूयिष्ठा: तुङ्गा: द्रविणराशय: (एव) उपदा: कोशलेश्वरं शश्वत् विविशु: उत्सेका: न (विविशु:) One of the Calcutta editors desires to improve the prose order of Mallinátha by connecting 'उत्सेका:' with 'तेषाम्'। He defends such a cons-

truction on the ground, that as उपदाः of the kings of Kamboja is in plural number so 'उत्सेकाः' being plural in number, must be connected with 'तेषाम्'। He explains the sloka thus :— 'Although the kings of Camboja gave innumerable presents to Raghu, still they were not proud of their gifts.' We ask the learned editor how could the vanquished kings of Kamboja, who prostrated at the feet of Raghu, have any pride at that time? The editor's improvement may satisfy him, but not others.

Explanation by use of synonyms.—तेषां (कम्बोजानां) सदश्वभूयिष्ठाः (उत्कृष्टाश्वबहुलाः) तुङ्गाः (उन्नताः) द्रविणराशयः (हिरण्यराशयः एव) उपदाः (उपहाराः) कोशलेश्वरं (कोशलदेशाधिपतिं) शश्वत् (असकृत्) विविशुः (अधिजग्मुः) उत्सेकाः (गर्वाः) तु न विविशुः तं रघुमिति शेषः।

Substance.—कम्बोजभूपतयः समरे रघुणा पराभूताः सन्तः उत्कृष्टवाजिराजीरसंख्यहिरण्यराशींश्च रघवे उपहारीचक्रुः। इत्यमतुलैश्वर्याधिगमनेनापि गर्वो रघुहृदये पदं न लेभे।

Change of voice.—...सदश्वभूयिष्ठैः तुङ्गैः द्रविणराशिभिः उपदाभिः कोशलेश्वरः...विविशे, उत्सेकैः...(विविशे)।

Sanjivani.—तेषामिति। (तेषां) कम्बोजानां—सद्भिः अश्वैः भूयिष्ठाः, बहुलाः [सदश्वभूयिष्ठाः] (तुङ्गाः) द्रविणानां हिरण्यानाम्—"हिरण्यं द्रविणं द्युम्नम्" इत्यमरः (Cole. p. 242) राशयः [द्रविणराशयः] एव—(उपदाः) उपायनानि—"उपायनमुपग्राह्यमुपहारस्तथोपदाः" इत्यमरः (Cole. p. 198) (कोशलेश्वरं) कोशलदेशाधिपतिं तं रघुं (शश्वत्) असकृत् (विविशुः)—मुहुः पुनःपुनः शश्वदभीक्ष्णमसकृत् समाः" इत्यमरः (Cole. p. 376)—तथापि—(उत्सेकाः) गर्वाः तु (न विविशुः) । तथापि गर्वकारणे न जगर्व इत्यर्थः ॥७०॥

सञ्जीवन्याः पाठान्तरम् ।

Nand. adds "विविशुस्तं विशां नाथमुदन्वन्तमिवापगाः" इति पाठान्तरे आपगा नद्यः उदन्वन्तं समुद्रमिव विशां नाथं तं रघुं विविशुः।

Sanjivani Explained.

"हिरण्यं द्रविणं द्युम्नम्"—Each of the three words mean wealth.

"उपायनम् * * उपदा:"—उपायन, उपग्राह्य, उपहार and उपदा are synonymous, meaning a present.

"मुहु: * * असकृत्"—" मुहुर्, पुन:पुनर्, शश्वत्, अभीक्ष्णम्, as well as असकृत् are synonymous.

सत्यपि गर्वकारणे न जगर्व—Raghu was not puffed up with pride though there was reason to be so. The tribute received from the vassals was exceedingly large.

द्रविणराशय: उपदा:—Mallinatha takes both as substantives and connects them by एव । The sense is the heaps of treasure were the presents. A better mode of connecting the two is to make द्रविणराशय: an adjective of उपदा: by taking it as a बहुव्रीहि compound. द्रविणानां राशय: यत्र ता: See notes on रघवंश । It is an instance of व्यधिकरण बहुव्रीहि । The rule of Pánini is that both the components of the बहुव्रीहि compound should be in the first case is modified by Pánini himself in the Sutra—"सप्तमीविशेषणे बहुव्रीहौ" (२।२।३५। पा. ८६८ सि.), implying that a word in the seventh case may form a बहुव्रीहि with another in the first case. The followers of Pánini take it as a ज्ञापकसूत्र enjoining व्यधिकरणबहुव्रीहि । So a word in any case other than the first may form बहुव्रीहि with another case in the first case. Indeed, if it were not so, such compounds as समगुणयोग प्रीतय: (VI, समगुणयोगेन प्रीतिर्येषाम् ते), कुवकुब्जन्मा (कुवकुखात्जन्म यस्य स:), शोणितमयकुल्या (VII, शोणितमयानां कुल्या यत्र सा), would be impossible.

Bengali.—কম্বোজ নৃপতিগণের উৎকৃষ্টবাজিরাজি এবং অসংখ্য হিরণ্যরাশি উপহারস্বরূপ, কোশলেশ্বর রঘুর সমীপে উপস্থিত হইল, তথাপি গর্ব্ব তাঁহার হৃদয়ে প্রবেশ করিল না । ৭০ ।

English rendering.—Their tributes of huge heaps of treasure abounding with excellent steeds came repeatedly to the lord of the Kos'alas but no pride (with them).—70.

Grammatical notes, &c., &c.

Sama'sa.—(1) सन्तः अश्वाः सदश्वाः (कर्मधा) तैः भूयिष्ठाः सदश्वभूयिष्ठाः (तृतीयातत्) यद्वा भूयिष्ठा: सदश्वाः यत्र (बहु) आहिताग्न्यादित्वात् भूयिष्ठस्य परनिपातः पाक्षिकः। In a बहुव्रीहि compound of the group of आहिताग्नि, the component which should precede shall optionally succeed the other component. E. g., आहिताग्नि, अग्न्याहित; गृहसत्यक्त, संत्यक्तगृह &c. The group आहिताग्न्यादि is आकृतिगण or unlimited. So a compound having भूयिष्ठ for its component may fall under this group. Here भूयिष्ठ succeeds its noun. In भूयिष्ठद्विजबालवृद्ध (उत्तररामचरिते ४र्थे अङ्के) भूयिष्ठ precedes the noun. (2) द्रविणानां राशयः द्रविणराशयः (षष्ठीतत्) इति मल्लिनाथः। द्रविणानां राशयो यत्र (बहु) इति वयम्। (3) कोशलानाम् ईश्वरः कोशलेश्वरः (षष्ठीतत्) तम्।

Case-ending.—(1) तेषाम्—शेषे षष्ठी (2) उपदाः—विधेयकर्त्ता—सदश्वभूयिष्ठाः and 'द्रविणराशयः' are उद्देश्यकर्त्तारौ (3) शश्वत्—अव्ययं, क्रियाविशेषणम्।

Synonyms.—(1) द्रविण—"द्रव्यं वित्तं स्वापतेयं रिक्थमृक्थं धनं वसु। हिरण्यं द्रविणं द्युम्नमर्थरैविभवा अपि॥" (अ.) (2) तुङ्ग—"उच्चप्रांशून्नतोदग्रो-च्छ्रितास्तुङ्गे" (अ.) (3) उपदा—(V. Sanjivani.)

Different meanings.—तुङ्ग—'तुङ्गः पुन्नागनगयोर्बुधे स्यादुन्नतेऽन्यवत्। पुङ्गी मांसा हरिद्रायां वर्वरायामपीष्यते॥' (हे.) (2) द्रविण—'द्रविणं न द्वयोर्वित्ते काञ्चने च पराक्रमे'। (वि. मे.)

Derivation—(1) द्रविणम्—द्रु + इनन्—'द्रुदक्षिभ्यामिनन्' (उ. २।५४) (2) उपदा:—उप + दा + अङ् (कर्मणि, 1st c. p.) "आतश्चोपसर्गे" (३।३।१०६। पा. ३२८३ सि.) (3) त्यागः—त्यज् + घञ् (1st c. p.)। ज् of the root is changed into ग् by the rule—"चजोः कुघिण्यतोः" (७।३।५२। पा. २८६३ सि. V. notes on चर्मोद्यम्, Sl. 65, C. III.) (4) भूयिष्ठाः—बहु + इष्ठन् (1st c. p.) "बहोर्लोपो भू च बहोः" (६।४।१५८। पा. २०१७ सि.) [इष्ठन् and ईयसुन् elide after बहु and बहु is changed into भू] "इष्ठस्य यिट् च" (६।४।१५९। पा. २०१८ सि.) [इष्ठ elides after बहु and यिट् takes the place of इष्ठ i.e., य् comes before इष्ठ] (5) विविशुः—विश् + लिट् + उस् (6) उत्सेकाः—उत् + सिच् + घञ् (भावे, 1st c. p.) च् of the root is changed in to क् by the rule—"चजोः कुघिण्यतोः"।

Conjugation.—(1) विश्—(V. Sl. 28, C. III.)

Rhetoric.—The figure of speech is विशेषोक्ति। It is thus defined in Kávyaprakás'a.—

"विशेषोक्तिरखण्डेषु कारणेषु फलावचः"

When the effect is not represented to come to pass though all the causes are mentioned, the figure of speech is विशेषोक्ति। Here all the causes of Raghu's pride are present, yet he was not proud.

ततो गौरीगुरुं शैलमारुरोहाश्वसाधनः ।
वर्धयन्निव तत् कूटानुद्धूतैर्धातुरेणुभिः ॥ ७१ ॥

मूलस्य पाठान्तरम् ।

उद्धतैः—उद्धतैः (द्वि.)

Prose order.—ततः (सः) अश्वसाधनः (सन्) गौरीगुरुं शैलम्, उद्धूतैः धातुरेणुभिः तत् कूटान् वर्धयन् इव आरुरोह।

Explanation by use of synonyms.—ततः (तदनन्तरं) सः—अश्वसाधनः (अश्वसेनासहायः सन्) गौरीगुरुं (हिमालयं) शैलं (पर्वतम्)

उद्धतैः (अश्वखुरोत्थापितैः) धातुरेणुभिः (गैरिकादीनां रजोभिः) तत्कूटान् (तच्छृङ्गाणि) वर्द्धयन्निव (उन्नमयन्निव) आरुरोह (अधिरूढवान्)।

Substance.—ततो रघुर्हिमालयवासिनो विजेतुं ययौ। तस्मिन् हिमाचलमारोहति तस्यापरिमितानामश्वानां खुरैः क्षुण्णानि गैरिकादिधातुरजांसि नभ्याकारेणोड्डीय तथावर्द्धन्त यत् हिमाचलस्य शृङ्गवर्द्धनभ्रमः समजनि।

Change of voice.—(तेन) अश्वसाधनेन गौरीगुरुः शैलः...वर्द्धयता... आरुरुहे।

Sanjivani.—तत इति। (ततः) अनन्तरम् (अश्वसाधनः) सन्—गौर्य्याः गुरुं, पितरं [गौरीगुरुं] (शैलं) हिमवन्तम् (उद्धतैः) अश्वखुरोद्धूतैः—धातूनां गैरिकादीनां रेणुभिः [धातुरेणुभिः] (तत्कूटान्) तस्य शृङ्गाणि—"कूटोऽस्त्री शिखरं शृङ्गम्" इत्यमरः (Cole. p. 84) (वर्द्धयन् इव आरुरोह)। उत्पतद्धूलिदर्शनाद्गिरिशिखरवृद्धिभ्रमः अजायत इति भाव॥ ७१॥

Sanjivani Explained.

उत्पतद्धूलिदर्शनात् * * * इति भावः—At the sight of the dust raised by the marching army, the illusion was engendered of the mountain-summits having been loftier than they actually were.

Bengali.—অনন্তর রঘু, অশ্বসৈন্য সহায় হইয়া (অশ্বখুর দ্বারা) উত্থাপিত(গৈরিকাদিধাতু) ধূলিপটলে তাহার শৃঙ্গ সকলকে যেন বর্দ্ধিত করিয়াই গৌরীগুরুশৈলে (হিমাচলে) আরোহণ করিলেন॥ ৭১॥

English rendering.—Then equipt with cavalry he ascended the mountain (Himalays)—the father of Gouri, augmenting, as it were, his peaks with the mineral dust thrown up (by the hoops of his horse).—71.

Grammatical notes, &c., &c.

Sama'sa.—(1) गौर्य्याः गुरुः गौरीगुरुः (षष्ठीतत्) तम् (2) अश्वाः साधनं यस्य सः अश्वसाधनः (बहु) (3) तस्य कूटाः तत्कूटाः (षष्ठीतत्) तान् (4) धातूनां रेणवः धातुरेणवः (षष्ठीतत्) तैः।

Case-ending.—(1) धातुरेणुभिः—करणे तृतीया।

Synonyms.—(1) रेणु—(V. रजस्, Sl. 29, C. IV.)

Different meanings.—(1) गौरो—'गौरीत्वसंजातरजःकन्याशङ्कर-भार्य्ययोः। रोचनीरजनीपिङ्गाप्रियङ्गुवसुधासु च। आपगायां विशेषेऽपि यादसां-पतियोषिति॥' (मे.) (2) गुरुः—(V. Sl. 29, C. III.) (3) रेणु—(V. Sl. 47, C. IV.)

Derivation.—(1) गौरी—गौरोवर्णोऽस्त्यस्याः—इति गौर+ङीष्—गौरादित्वात् (2) शैलम्—शिला+अण् (सघातार्थे, 2nd c. s.) (3) आरुरोह—आ+रुह्+लिट्-णल् (4) साधनम्—(V. Sl. 36, C. IV.) (5) वर्द्धयन्—वृध्+णिच्+शतृ (1st c. s.) (6) उद्धूतैः—उत्+धू+क्तः (कर्मणि 3rd c. p.) (7) धातुः—धा+तुन्—See 'सितनिगमि—' (उ. १।६९) (8) रेणुभिः—(V. Sl. 47, C. IV.)

Conjugation.—(1) रुह्—(V. Sl. 26, C. II.) (2) वृध्—(V. Sl. 37, C. IV.) वर्द्धयन्—"धातुसम्बन्धे प्रत्ययाः" इति सूत्रादत्तीति शतृप्रत्ययः—(V. notes on कुर्वन्, Sl. 29, C. IV.)

Force of इव is उत्प्रेक्षा।

Rhetoric.—The figure of speech is उत्प्रेक्षा। The dust, raised by the hoops of Raghu's horse, might be huge in quantity. But that they enhanced the loftiness of the mountain-summits is a pure poetic fancy. It suggests the vastness of Raghu's cavalry.

शशंस तुल्यसत्त्वानां सैन्यघोषेऽप्यसम्भ्रमम्।
गुहाशयानां सिंहानां परिवृत्त्यावलोकितम्॥ ७२॥ ७१।

मूलस्य पाठान्तरम्।

गुहाशयानां—गुहाशयाणाम्।

Prose order.—तुल्यसत्त्वानां गुहाशयानां सिंहानां परिवृत्य अवलोकितं सैन्यघोषे अपि असम्भ्रमं शशंस।

Explanation by use of synonyms.—तुल्यसत्त्वानां (सैन्यैः समानबलानां) गुहाशयानां (पर्वतकन्दरशयनानां) सिंहानां (केसरिणां) परिवृत्य (परावृत्य) अवलोकितं (ग्रीवाभङ्गेनावलोकनं) सैन्यघोषेऽपि (सेनाकलकले सत्यपि) असम्भ्रमम् (अन्तःक्षोभविरहं) शशंस (कथयामास, सैन्येभ्यः इत्यर्थः)।

दिनकरमतेऽस्य टीकस्यार्थः अन्यविधः स यथा—(स रघुः) परिवृत्य (वक्रीभूय, मुखं पराहृत्य अर्थात् ग्रीवाभङ्गं पार्श्वयोरवलोक्य) तुल्यसत्त्वानाम् (स्वसमानबलानाम्) गुहाशयानाम् (हिमवद्गह्वरशायिनाम्) सिंहानां (केसरिणाम्) सैन्यघोषेऽपि असम्भ्रमं (सेनाकलकलेऽपि निर्भीकम्) अवलोकितं (दृष्टिम्) शशंस (प्रशशंस)।

Substance.—विपुलं रघुसैन्यं यदा हिमाचलगुहाम् प्रविष्टस्तदा तस्य भीषणकलकलध्वनिना गिरिगुहाः सर्वतः प्रतिध्वनिताः। तत्र सुखशयिताः सिंहास्तं भयङ्करध्वनि श्रुत्वापि न भीताः। ते रघोः समानबला आसन् समबलेभ्यस्तेषां भयकारणं न सम्भवति। अतस्ते केवलं शयित्वा ग्रीवाभङ्गेनैव सैन्यमवलोकयामासुः। एतेन रघुः सिंहविक्रम इत्युक्तम्।

Change of voice.- ...अवलोकितेन...असम्भ्रमः शशंसे

Sanjivani.—शशंसेति। (तुल्यसत्त्वानां) सैन्यैः समानबलानां—गुहासु शेरत इति गुहाशयाः तेषां [गुहाशयानाम्]—"अधिकरणे शेतेः (३।२।१५।पा. २९९९ सि.) इत्यच्प्रत्ययः।—"दरी तु कन्दरी वा स्त्री देवखातबिले गुहा" इत्यमरः (Cole. p 85)—(सिंहानां) हरीणाम्—"सिंहो मृगेन्द्रः पञ्चास्यो हर्यक्षः केसरी हरिः" इत्यमरः (Cole. p. 121)—सम्बन्धि—(परिवृत्य) परावृत्य (अवलोकितं) शयित्वैव ग्रीवाभङ्गेनावलोकनं—कर्तृ—(सैन्यघोषे) सेनाकलकले सम्भ्रमकारणे सति (अपि) (असम्भ्रमम्) अन्तःक्षोभविरहम्—"नञः प्रसज्यप्रतिषेधेऽपि समास इष्यते" (Bháshya on २।२।६ पा.) (शशंस) कथयामास। सैन्येभ्यः इत्यर्थाल्लभ्यते। बाह्यचेष्टितमेव मनोवृत्तेरवमापकम् इति भावः। असम्भ्रान्तत्वे हेतुः तुल्यसत्त्वानामिति। नहि समबलः समबलाद् बिभेति इति भावः॥ ७२॥

Sanjivani Explained.

"अधिकरणे शेतेः" इत्यच्—अच् is determined by the Sutra अधिकरणे शेतेः । It means शी admits अच् in कर्त्तृवाच्य when it is preceded by its अधिकरण । Here शी is preceded by its अधिकरण गुहा ।

नञः प्रसज्यप्रतिषेधेऽपि समासः इष्यते—Sometimes नञ् which is प्रसज्यप्रतिषेध *i.e.* which signifies absolute negation and is, therefore, prominent, is seen to form a नञ् तत्पुरुष समास with other words. नञ् तत्पुरुष should be formed by the नञ् which loses its prominence is, hence, known as पर्य्युदास, because the components of a समास lose their prominence. But sometimes नञ् is seen to retain its prominence though it is compounded. In that case, नञ् must be said to be प्रसज्यप्रतिषेध । Hence Bháshyakára says that even the नञ् which is प्रसज्यप्रतिषेध is, sometimes, seen to form a compound. He uses असन्देह in the sense of सन्देहाभाव । Mallinátha takes असम्भ्रम to means not सम्भ्रमादन्य but सम्भ्रमाभाव । In other words it is not something positive, but is a thing purely negative. This नञ् is, therefore, प्रसज्यप्रतिषेध and not पर्य्युदास । असम्भ्रमं शशंस means सम्भ्रमं न शशंस । (For प्रसज्यप्रतिषेध and पर्य्युदास see notes on अवज्ञ in I, 21). If we take असम्भ्रम to mean 'courage', नञ् becomes पर्य्युदास । But that sense does not suit the text well.

Bengali:—সমবল গুহাশায়িসিংহগণের গ্রীবাভঙ্গদ্বারা অবলোকন সৈন্য কলকলধ্বনিতেও ভয়াভাব প্রকাশ করিল ॥ ৭২ ॥

English rendering.—The look, askance, of the lions of equal might, reposing in the caves, spoke (their) absence of fear even at the tumult of the (marching) troops. [Or, Raghu, turning round, applauded the look, fearless even at the din of his army, of the lions possessed of equal might and reposing in the caves of the mountain.]

Grammatical notes, &c., &c.

Sama'sa.—(1) तुल्यं सत्त्वं येषां ते तुल्यसत्त्वाः (बहु) तेषाम् (2) गुहासु

शेरते इति गुहाशयाः (उपपदतत्) गुहासु शयः (शयनं) येषां ते इति गुहाशयाः (बहु) तेषाम् (3) सैन्यानां घोषः सैन्यघोषः (षष्ठीतत्) तस्मिन् (4) न सम्भ्रमः असम्भ्रमः (नञतत्) तम्।

Case-ending.—(1) सिंहानाम्—क्तयोगेऽनुक्ते कर्त्तरि षष्ठी (V. notes on सागरम्, Sl. 2, C. I.) (2) अवलोकितम्—Noninative of the verb शशंस (3) सैन्यघोषे—भावाधिकरणे सप्तमी—"यस्य च भावेन भावलक्षणम्" (V. notes on तस्मिन्, Sl. 14, C. II.) (4) तुल्यसत्त्वानाम् and गुहाशयानाम् are the adjectives of सिंहानाम्।

Synonyms.—(1) सैन्य—(V. सेना, Sl. 19, C. I.)

Different meanings.—(1) गुहा—(V. Sl. 28, C. II.) (2) सिंह—(V. Sl. 27, C. II.) (3) सत्त्व—(V. II, 8).

Deivation.—(1) शशंस--शन्स् + लिट्—णल् (2) सत्त्वम्—सद् + त्वन् —'अन्येभ्योऽपि दृश्यन्ते' (उ. ४।१०५।) (3) सम्भ्रमम्—सम् + भ्रम् + घञ् (भावे, 2nd c. s.) "अनुदात्तोपदेश—" (V. notes on आश्रम, Sl. 38, C. I.) (4) तुल्यम्—तुलया संमितमित्यर्थे—तुला + यत्—"नौवयोधर्मविष—"(V. notes on नाव्या Sl. 31, C. IV.) (5) घोषे—घुष् + घञ् (भावे, 7th c. s.) (6) गुहाशयानाम्—(For गुहा, V. Sl. 28, C. II.) गुहा + शी + अच् (कर्त्तरि 6th c. p.)—"अधिकरणे शेतेः" (V. Sanj. Expl.) (7) सिंहासनम्—(V. Sl. 27, C. II.) (8) परिवृत्य—परि + वृत् + ल्यप् (9) अवलोकितम्—अव + लोक् + क्तः (भावे)।

Conjugation.—(1) शंस्—(V. Sl. 52, C. II.)

Force of अपि is यत्नं। Although there was every probablity of fear from the tumult raised by the marching army of Raghu, yet the lions did not fear them.

Parallel passage.—"हरसैनिकाः प्रतिभयेऽपि गजमदसुगन्धिकेसरैः स्वस्थमभिददृशिरे सहसा। प्रतिबोधजृम्भितमुखैर्मृगाधिपैः॥ (V. Kirátárjuniam, Sl. 48, C. XII.)

Remark.—In Mallinatha's interpretation, परिक्रम्य has reference to the genitive सिद्धानाम् which must be taken as an instance of कर्तरि षष्ठी। Such constructions are certainly inelegant. Dinakara avoids the inelegance by taking परिक्रम्य as referring to Raghu understood. In Mallinatha's case शशंस has अवलोकितम् for its कर्म and in that of Dinakara रघु (understood) is its nominative.

भूर्जेषु मर्मरीभूताः कीचकध्वनिहेतवः।
गङ्गाशीकरिणो मार्गे मरुतस्तं सिषेविरे॥ ७३॥

Prose order.—भूर्जेषु मर्मरीभूताः कीचकध्वनिहेतवः गङ्गाशीकरिणः मरुतः मार्गे तं सिषेविरे।

Explanation by use of synonyms.—भूर्जेषु (भूर्जपत्रेषु) मर्मरीभूताः (मर्मरशब्दमुत्पादयन्तः) कीचकध्वनिहेतवः (सरन्ध्रवंशविशेषशब्दोत्पादकाः) गङ्गाशीकरिणः (भागीरथीजलकणशीतलाः) मरुतः (पवनाः) मार्गे (पथि) तं (रघुं) सिषेविरे (सेवितवन्तः)।

Substance.—हिमालयं वर्णयन्नाह। तत्र मन्दः सुखस्पर्शश्च समीरणः रघोर्मुदं विदधे। स समीरणः भागीरथीसलिलशीकरमिश्रणात् शीतलो बभूव। भूर्जपत्रेषु वहन् स मर्मरं ध्वनिमुत्पादयामास। सरन्ध्राः कीचकास्तेन पूरिता मधुरं वंशीस्वरं च विदधिरे।

Change of voice.—...मर्मरीभूतैः कीचकध्वनिहेतुभिः गङ्गाशीकरिभिः मरुद्भिः...सः सिषेवे।

Sanjivani.—भूर्जेष्विति। (भूर्जेषु) भूर्जपत्रेषु—"भूर्जपत्रो भुजो भूर्जो मृदुत्वक् चर्मिका मता" इति यादवः—मर्मरः शुष्कपर्णध्वनिः—"मर्मरः शुष्कपर्णानाम्" इति यादवः—अयञ्च शुष्कादिशब्दवद्गुणिनि अपि वर्तते, यथोच्यते च—"मर्मरैरगुरुधूपगन्धिभिः" इति—अतः (मर्मरीभूताः) मर्मरशब्दवन्तो भूताः इत्यर्थः—

कीचकानां वेणुविशेषाणां ध्वनिहेतव: [कीचकध्वनिहेतव:] शीतसुखाश्च इति भाव:—(गङ्गाशीकरिण:) शीतला: इत्यर्थ:—(मरुत:) वाता: (मार्गे तं सिषेविरे) ॥ ७३ ॥

Sanjivani Explained.

भूर्जपत्रो भूर्जो भूर्ज: * * मता—भूर्जपत्र, भूर्ज, भूर्ज, मृदुत्वक् and चर्मिका are the names of the birch tree.

"मर्मर: शुष्कपर्णानाम्"—मर्मर means the rustling of dry leaves.

अयञ्च * * वर्तते—Here मर्मर does not mean गुण but गुणिन् just as शुक्ल &c. express गणिन् though they generally mean गुण। In other words as शुक्ल means whiteness as well as a white object. So मर्मर means here मर्मरवत् (an object murmuring) though it generally means the sound murmur.

प्रयोज्यते च "मर्मरैरगुरुधूपगन्धिभि:"—And, indeed, मर्मर is used to express a murmuring object in the following place—"मर्मरै: &c." The expressions quoted means 'with whistling winds bearing the fragrance of incense and sandal wood.'

मर्मरीभूता: here, means मर्मरशब्दवन्त: (having whisthing noise).

Bengali—ভূর্জপত্রে মর্মরশব্দ ও সরন্ধ্র বংশমধ্যে (শ্রুতিমধুর) ধ্বনি উৎপাদন করিয়া গঙ্গাজলকণস্পর্শে সুশীতল পবন, পথে তাঁহার সেবা করিতে লাগিল।

English rendering.—Endued with arustling noise (for blowing) through the leaves of birch, causes of the whistling of (bored) Kichakas, (and) charged with the spray of Ganga, the breezes ministered to him (like servitors) on the way.—73.

Grammatical notes, &c. &c.

Sama'sa.—(1) (For कीचक, V. Sl. 12, C. II.) कीचकानां ध्वनय: कीचकध्वनय: (षष्ठीतत्) तेषां हेतव: कीचकध्वनिहेतव: (षष्ठीतत्) (2) गङ्गाया: शीकरा: गङ्गाशीकरा: (षष्ठीतत्) ते सन्ति एषाम् इति गङ्गाशीकरिण: ।

Case-ending.—(1)भूर्जेषु—आधाराधिकरणे सप्तमी (2) मार्गे—आधाराधिकरणे सप्तमी (3) मर्मरीभूताः, कीचकध्वनिहेतवः and गङ्गाशीकरिणः are the adjectives of मरुतः V. Sl. 12, C. II.।

Synonyms.—(1) गङ्गा—(V. Sl. 32, C. IV.) (2) मार्ग—(V. Sl. 33, C. IV.) (3) मरुतः—(III, 12).

Different meanings.—(1) शीकर—'शीकरं सरलं वातसृताम्बुकणयोः पुमान्' (मे.) (2) कीचक—(V. Sl. 12, C. II.) (3) मरुत्—'मरुद्देवे समीरे ना ग्रन्थिपर्णे नपुंसकम्' (मे.)।

Derivation.—(1) मरुतः—मृ+उतिः (1st c. p.) 'मृग्रोरुतिः' (उ. १।९४ ।) (2) मर्मरीभूताः—मर्मर+अच्—अर्श आदित्वात्। मर्मर is now adjective. As शुक्लगुणोऽस्ति अस्य इति शुक्लः, so मर्मरशब्दोऽस्ति येषामिति मर्मराः। Mallinátha however, takes मर्मर itself to be an adjective. अयञ्च शुक्लादिशब्दवद् गुणिनि वर्तते, प्रयुज्यते च। अमर्मराः मर्मराः भूताः इति मर्मरीभूताः—मर्मर+भू+क्तः (कर्तरि, 1st c. p. अभूततद्भावे च्विः) [For च्वि, V. notes on पयोधरीभूत—' Sl. 3, C. II.] (3) कीचकः—(V. Sl. 12, C. II.) (4) गङ्गाशीकरिणः—(For गङ्गा, V. Sl. 32, C. IV.) शीक्+अरन् 'कृशृकृभ्योऽरन्' (उ. ३।१३।१) गङ्गाशीकर+इनि (मत्वर्थे, 1st c. p.) Some spell it as सीकर। (5) मार्ग—(V. Sl. 33, C. IV.) (6) सिषेविरे—सेव्+लिट्—इरे (7) भूर्जेषु—भू+ऊर्ज्+घञ् (भावे, 7th c. p.) Bhánuji gives its derivative meaning thus :—भूः (पृथिवी) एव ऊर्जः (बलं or जीवनीशक्तिः) अस्य इति भूर्जः।

Conjugation.—(1) सेव् (V. Sl. 13, C. II.)

Parallel passages.—'भागीरथीनिर्झरशीकराणां वोढा मुहुः कम्पितदेवदारुः। यद्वायुरन्विष्टमृगैः किरातैरासेव्यते भिन्नशिखण्डिबर्हः॥' (V. Kumárasambhavam, Sl. 15, C. I.) Also Raghu, Sl. 13, C. II.

Rhetoric.—The figure of speech is स्वभावोक्ति। Moreover the gentleness, fragrance and coolness of the wind are suggested by the epithets मर्मरीभृताः, कीचकध्वनिहेतवः, and गङ्गाशीकरिणः।

Geography.— गङ्गा issues from Gomukhi near Hardwar. The present verse tells us that Raghu brought the Himálaya residing as far Hardwar tribes under subjugation.

विशश्रमुर्नमेरूणां छायास्वध्यास्य सैनिकाः।
दृषदो वासितोत्सङ्गा निषण्णमृगनाभिभिः॥ ७४॥

Prose order.—सैनिकाः नमेरूणां छायासु निषण्णमृगनाभिभिः वासितोत्सङ्गाः दृषदः अध्यास्य विशश्रमुः।

Explanation by use of synonyms.—सैनिकाः (सेनायां समवेताः पुरुषाः) नमेरूणां (सुरपुन्नागानां) छायासु (अनातपेषु) निषण्णमृगनाभिभिः (उपविष्टकस्तूरीमृगाणां तुन्दिभिः) वासितोत्सङ्गाः (सुरभिततलाः) दृषदः (शिलाः) अध्यास्य (अधिष्ठाय) विशश्रमुः (विश्रामं लेभिरे)।

Substance.—तत्र दीर्घा नमेरुपादपाः बहुला आसन्। तेषां विततासु छायासु रघोः सैनिकाः शिलाखण्डान्यधिष्ठाय सुखमुपविविशुः। तानि शिलाखण्डानि कस्तूरीमृगाणां सततमुपवेशनात् कस्तूरिकाभिः सुवासितान्यभूवन्। अतः स पर्व्वतः सर्व्वथा तस्य राज्ञः प्रीतिं विदधे।

Change of voice.—सैनिकैः...विशश्रमे।

Sanjivani.—विशश्रमुरिति। (सैनिकाः) सेनायां समवेताः—प्रज्ञ्-वहुतीयष्ठक्प्रत्ययः—(नमेरूणां) सुरपुन्नागानां (छायासु) निषण्णानां, दृषदुपविष्टानां, मृगाणां, कस्तूरीमृगाणां नाभिभिः [निषण्णमृगनाभिभिः] (वासितोत्सङ्गाः) सुरभिततलाः (दृषदः) शिलाः (अध्यास्य) अधिष्ठाय—"अधिशीङ्स्थासां कर्म"—(१।४।४६ पा. ५४२ सि.) इति कर्मत्वम्—दृषत्सु अधिष्ठाय इत्यर्थ.—(विशश्रमुः) विश्रान्ताः॥ ७४॥

Sanjivani Explained.

"अधीशीङ्स्थासां कर्म"—(V. Sanjivani Explained, I, 95).

प्राग्वहतेष्ठक्—सैनिक is derived from सेना and ठक् । This ठक् is determined by the Sutra "प्राग्वहतेष्ठक्" (४।४।१ पा. १५४८ सि.) which means that ठक् should have connection with all the Sutras previous to "तद्वहति रथयुगप्रासङ्गम्" (४।४।७६ पा. १६२७ सि.)

Bengali—(রঘুর) সৈনিকগণ নমেরুপাদপসমূহের ছায়াতে উপবিষ্টমৃগগণের কস্তূরিকাগন্ধে সুবাসিততলশিলাখণ্ডসমূহে অধিষ্ঠান করিয়া বিশ্রাম করিতে লাগিল ॥ ৭৪ ॥

English rendering.—His soldiers rested under the shades of Namerus (*Elaeocarpus Gramitrus*), seated on stones with surfaces perfumed by the navels of musk-deer that had reposed upon them.—74.

Grammatical notes, &c., &c.

Samas'a—(1) वासिता: तल्पा: (तलानि) यासां ता: वासिततल्पा: (बहु) (2) निषण्णा: मृगा: निषण्णमृगा: (कर्मधा) तेषां नाभय: निषण्णमृगनाभय: (षष्ठीतत्) ताभि: or तै: ।

Case-ending.—(1) नमेरूणाम्—शेषे षष्ठी—'छायासु' इत्यनेन सम्बन्ध: (2) दृषद:—अधिपूर्वस्य आसधातोर्योगे अधिकरणस्य कर्म—"अधिशीङ्स्थासां कर्म" (3) वासिततल्पा:—Adjective of दृषद: (4) निषण्णमृगनाभिभि:—अनुक्ते कर्त्तरि तृतीया—'वासित' इत्यस्य—Here करणे तृतीया is not preferrable because मृगनाभि is the agent of the क्रिया वासित । One of the Calcutta editors is wrong in parsing it as करणे तृतीया ।

Synonyms.—(1) दृषद—'पाषाणप्रस्तरग्रावोपलाश्मानश्शिला दृषत्' (अ:) ।

Different meanings.—(1) दृषद—'दृषत्पाषाणमात्रके, । निषेषणार्थपट्टेऽपि ।' (मे.) (2) नाभि—'नाभिर्मुख्यनृपे चक्रमध्यक्षत्रिययो: पुमान् । द्वयो: प्राण्यिवतीके स्यात् स्त्रियां कस्तूरिकामदे ॥' (मे.)

Derivation.—(1) दृषद:—दृ + आदिः (2nd c. p.) पुक् (ष्) comes after the root and the vowel of the root becomes short. 'दृणातेः पुक् ह्रस्वश्च' (उ. १।१२१।) (2) विशश्रमुः—वि + श्रम् + लिट्—उस्. (3) नमेरुणाम्—नम् + एरुः (6th c. p. औणादिकः.) (4) छायासु—(V. Sl. 70, C. III.) (5) अध्यास्य—अधि + आस् + ल्यप् (6) सैनिकाः—सेना + ठक् (समवेतार्थे, 1st c. p.)—See Sanjivani. (7) वासिताः—वास (अदन्तः) + क्तः (कर्मणि, 1st c. p.) (8) उत्सङ्गाः—उत् + सञ्ज् + घञ् (अधिकरणे, 1st c. p.) (9) निषण्णाः—नि + सद् + क्तः (कर्त्तरि 1st c. p.) (10) मृग—मृग (अदन्तः) + कः (11) नाभिभिः—नम् + इञ् (3rd c. p.) 'इणजादिभ्यः' (३।३। १०८। पा. वा. ३२८५ सि. वा.) The word नाभि is both masculine and feminine in the sense of a limb of the body.

Conjugation.—श्रम्—(V. Sl. 54, C. I.) (2) आस्—(V. Sl. 95, C. I.)

Parallel pessage.—

"गणा नमेरुप्रसवावतंसा भूर्जत्वचः स्पर्शवतीर्दधानाः ।
मनःशिलाविच्छुरिता निषेदुः शैलेयनद्धेषु शिलातलेषु ॥"

(V. Kumárasambhavam, Sl. 55, C. I.)

Rhetoric.—The figure of speech is स्वभावोक्ति or natural description. The balmy shades of Nameru trees, the cool stony seats and the sweet fragrance of musk are all pleasing. Kálidása is fond of describing the source of Ganga, the shades of the tall *Devadaru* trees, the delicious breezes, and the fragrance of the musk.

सरलासक्तमातङ्गग्रैवेयस्फुरितत्विषः ।
आसन्नोषधयो नेतुर्नक्तमस्नेहदीपिकाः ॥ ७५ ॥

Prose oreder.—सरलासक्तमातङ्गग्रैवेयस्फुरितत्विषः ओषधयः नक्तं नेतुः अस्नेहदीपिकाः आसन् ।

Explanation by use of synonyms.—सरलासक्तमातङ्गग्रैवेयस्फुरितत्विषः (देवदारुविशेषासक्तगजकण्ठशृङ्खलेषु प्रतिफलितभासः) ओषधयः ज्योतिर्लताविशेषाः) नक्तं (रजन्यां) नेतुः (नायकस्य रघोः) अस्नेहदीपिकाः तैलनिरपेक्षप्रदीपाः) आसन् (अभूवन्) ।

Substance.—अहो हिमालयस्य प्रभावः । रजनी तत्र दिनायते । एवभूतास्तत्र लताः सन्ति या रात्रौ भास्वरा भवन्ति । तासां प्रभा नैशं तमो नाशयन्ति । रघुर्यदा तत्र गतः तदा ज्योतिर्लतानां भासः देवदारुषु सक्तानां तस्य गजानां कण्ठशृङ्खलेषु प्रतिफलिताः सत्यः रजन्यां तैलनिरपेक्षाः प्रदीपा इवाभवन् ।

Change of voice.—सरलासक्तमातङ्गग्रैवेयस्फुरितत्विड्भिः ओषधिभिः...अस्नेहदीपिकाभिः अभूयत ।

Sanjivani.—सरलेति । सरलेषु, देवदारुविशेषेषु आसक्तानि यानि मातङ्गानां, गजानां, ग्रीवासु भवानि, ग्रैवेयाणि, कण्ठशृङ्खलानि—"ग्रीवाभ्योऽण् च" (४।३।५७। पा. १४३४ सि.) इति चकारात् ढञ्प्रत्ययः—तेषु स्फुरितत्विषः प्रतिफलितभासः [सरलासक्तमातङ्गग्रैवेयस्फुरितत्विषः] (ओषधयः) ज्वलन्तः ज्योतिर्लताविशेषाः (नक्तं) रात्रौ (नेतुः) नायकस्य रघोः (अस्नेहदीपिकाः) तैलनिरपेक्षाः प्रदीपाः (आसन्) ॥ ७५ ॥

Sanjivani Explained.

"ग्रीवाभ्योऽण् च"—अण् is also added to ग्रीवा । च means that ढञ् is as well added to it. So we get double froms ग्रैवेय and ग्रैव ।

Bengali.—ওষধি সকলের প্রভা দেবদারু বৃক্ষে আবদ্ধগজসমূহের কণ্ঠশৃঙ্খলে প্রতিফলিত হইয়া রজনীতে (সেনা) নায়ক রঘুর প্রচুর তৈলনিরপেক্ষ দীপরূপে পরিণত হইল । ৭৫ ।

English rendering.—Their lustre enhanced (by falling) upon the neck-chains of elephants tethered to Saralas (*Pinus lougifolia*) trees, the (luminous) herbs became, at night unto that leader (of men), lamps without oil.—75.

Grammatical notes, &c., &c.

Sama'sa.—(1) सरलेषु आसक्तानि सरलासक्तानि (सप्तमीतत्) मातङ्गानां यं वेयाणि मातङ्गयं वेयाणि (षष्ठीतत्) सरलासक्तानि मातङ्गयं वेयाणि सरलासक्तमातङ्गयं वेयाणि (कर्मधा) तेषु स्फुरिता सरलासक्तमातङ्गयं वेयस्फुरिता (सप्तमीतत्) तादृशी त्विट् यासां ताः सरलासक्तमातङ्गयं वेयस्फुरितत्विष. (बहु) or, सरलेषु आसक्ताः सरलासक्ताः (सप्तमीतत्) तादृशाः मातङ्गाः सरलासक्तमातङ्गाः (कर्मधा) तेषां यं वेयाणि सरलासक्तमातङ्गयं वेयाणि (षष्ठीतत्) तेषु स्फुरिता सरलासक्तमातङ्गयं वेयस्फुरिता (सप्तमीतत्) तादृशी त्विट् यासां ताः सरलासक्तमातङ्गयं वेयस्फुरितत्विषः (बहु) (2) ओषः (दाहदीप्तिः) धीयते अत्र इति ओषधयः (उपपदतत्) (3) अविद्यमानः स्नेहः यासु ताः अस्नेहाः (बहु) अस्नेहाः दीपिकाः अस्नेहदीपिकाः (कर्मधा)।

Case-ending.—(1) नक्तम्—अव्ययम्, used in seventh case always—कालाधिकरणे सप्तमी (2) नेतुः—शेषे षष्ठी—'दीपिका' इत्यनेन सम्बन्धः (3) सरलासक्त...त्विषः—Adjective of ओषधयः।

Synonys.—(1) त्विष्—'स्युः प्रभारुग्रुचिस्त्विड्भाभाश्छविद्युतिदीप्तयः। रोचिः शोचिरुभेक्लीवे।' (अ.) (2) सरलः—'पीतद्रुः सरलः पूतिकाष्ठञ्च' (अ.)

Different meanings.—(1) सरल—'सरलःपूतिकाष्ठे ना, अथोदारा वक्रयोस्त्रिषु।' (मे.) (2) मातङ्ग—"मातङ्गः श्वपचे गजे" (मे.) (3) स्नेह—'स्नेहः प्रेम्णि घृतादिके' (मे.) पूतिकाष्ठ = *Pinus longifolia.* ना = Masculine श्वपच = चाण्डाल।

Derivation.—(1) सरल—सृ + अलच् (औणादिकः) बाहुलकात् (2) आसक्तः—आ + सञ्ज् + क्तः (कर्त्तरि) (3) मातङ्गः—मद् + अङ्गच् (औणादिकः) = मतङ्गः। द of the root is changed into त्। मतङ्ग is a name of a sage मतङ्ग + अण् (अपत्यार्थे) or मतङ्गस्यायं मातङ्गः—"तस्येदम्" इति सूत्रात् अण्। N. B. The eliphants were formerly born of the sage मतङ्ग—or, this sage controlled them. He is also said to be

the author of गजशास्त्र । (4) ग्रैवेयम्—ग्रीवा + ढ ञ् (भवार्थे)—"ग्रीवाभ्योऽण्च" (V. Sanji- Expl. (5) त्विषः—त्विष् + क्विप् (1st c. p.) (6) आसन्—अस् + लङ्—अन् (7) ओषधयः—ओष + धा + कि (अधिकरणे, 1st c. p.) "कर्मण्यधिकरणे च" (३।३।९३। पा. ३२७१ सि.) [कि is added to a root technically called घु in अधिकरणवाच्य when its कर्म is its उपपद । धा is घु । (See दत्तम् in IV, 1). (8) नेतुः—नी + तृन् (कर्तरि, 6th c. s.) (9) दीपिका.—दीप् + णिच् + ण्वुल् (कर्तरि) + टाप् (1st c. p.) 'दीपिका.' is विधेयकर्त्ता of ओषधयः । The words formed by the affix कि are always masculine, except ओषधि which is always feminine. The alternative form of ओषधि is ओषधी (V. notes on प्रतिपत्तये, Sl. 1, C. I.)

Conjugation.—(1) अस्—V. Sl. 15, C. III.)

Parallel Passage.—

"वनेचराणां वनितासखानां दरीगृहोत्सङ्गनिषक्तभासः ।
भवन्ति यत्रौषधयो रजन्यामतैलपूराः सुरतप्रदीपाः ॥"
(V. Kumárasambhavam, Sl, 12, C. I.)

Rhetoric.—Here the figures of speech are रूपक and विभावना । The herbs are represented as so many lamps. The attributes of lamps are transferred to the herbs. Here is रूपक । Sáhityadarpana calls it परिणाम which is a variety of रूपक । When the आरोप (attribution) of one's quality to the other well suits the context, Sáhityadarpana calls it परिणाम instead of रूपक । No doubt, here the आरोप of the qualities of lamps to the herbs suits the context. The herbs behaving like lamps dispelled the nocturnal darkess and came to Raghu's use. Kávyaprakas'a does not distingush परिणाम from रूपक because रूपक does not mean such आरोप of one's attribute to the other as does not suit the context, rather it means merely the आरोप of one's धर्म to the other. The statement अतैलदीपिका 'unfed by oils' constitutes विभावना । Lamps burn only when they are

fed by oils. These herbs were so many burning lamps yet not a drop of oil was there. The effect results though the cause is not present. (For रूपक see I, 4 ; and for विभावना see I, 23).

तस्योत्सृष्टनिवासेषु कण्ठरज्जुक्षतत्वचः।
गजवर्ष्म किरातेभ्यः शशंसुर्देवदारवः॥ ७६ ॥

मूलस्य पाठान्तरम्।

गजवर्ष्म—गजवर्म—Nand. (foot-notes) It is undoubtedly a mistake.

Prose order.—तस्य उत्सृष्टनिवासेषु कण्ठरज्जुक्षतत्वचः देवदारवः किरातेभ्यः गजवर्ष्म शशंसुः।

Explanation by use of Synonyms.—तस्य (रघोः) उत्सृष्टनिवासेषु (परित्यक्तसेनानिवेशेषु) कण्ठरज्जुक्षतत्वचः (गजग्रैवनिष्पिष्टवल्कलाः) देवदारवः (शक्रपादपाः) किरातेभ्यः (म्लेच्छवनचरेभ्यः) गजवर्ष्म (गजशरीरप्रमाणं) शशंसुः (कथयामासुः)।

Substance.—प्रयाणकाले पथि यत्र यत्र रघोः सैन्यमवतस्थे तत्र तत्रैव देवदारुपादपेषु गजाः बद्धाः। तेषां कण्ठशृङ्खलेन तद्वृक्षत्वचः क्षता अभूवन्। यदा तत् तत् स्थलं परित्यज्य सैनिकाः प्रतस्थिरे, तदा तद्वनवासिनः किरातास्तत्रागत्य देवदारुपादपानामत्युच्चस्थलेषु गजबन्धनक्षतचिह्नान्यवलोक्य रघुकरिणां दैर्घ्यमत्यं परिममुः। विशालाः हिमालयप्रमाणाः तस्य गजाः आसन्। एतैः स इत् हिमालयं जेष्यतीति कः सन्देहः इति भावः।

Change of voice.—...कण्ठरज्जुक्षतत्वग्भिः देवदारुभिः...शशंसे।

Sanjivani.—तस्येति। (तस्य) रघोः, उत्सृष्टेषु, उज्झितेषु, निवासेषु, सेनानिवेशेषु [उत्सृष्टनिवासेषु] कण्ठरज्जुभिः, गलग्रैवैः, क्षताः निष्पिष्टाः त्वचः येषां ते [कण्ठरज्जुक्षतत्वचः] (देवदारवः) (किरातेभ्यः) वनचरेभ्यः, गजानां वर्ष्म,

प्रमाणं [गजवर्ष्म]—"वर्ष्म देहप्रमाणयोः" इत्यमरः (Cole. p. 336) (आशंसुः) कथितवन्तः । देवदारुस्कन्धत्वक्क्षतैर्गजानामौन्नत्यमनुमीयते इत्यर्थः ।

Sanjivani Explained.

वर्ष्म देहप्रमाणयोः—वर्ष्मन् means देह (body) as well as प्रमाण (measure).

देवदारुस्कन्धत्वक्क्षतैः ◦ ◦ इत्यर्थः—The plain sense of the verse is that the height of the elephants were inferred by the Kirátas through the scratches on the bark of the Devadáru trees. Elephants were tied there. Their bark was bruised. From those bruises the Kirátas could infer the height of the beasts.

Bengali.—রঘুর পরিত্যক্তসেনানিবাসসমূহে (গজগণের) কণ্ঠ-রজ্জুদ্বারা ক্ষতত্বক্ দেবদারুপাদপগণ কিরাতদিগকে তদীয় করিগণের দেহৌন্নত্য বলিয়া দিল । ৭৬ ।

English rendering.—In the halting stations abandoned by him, the *Devadaru* trees, with their barks bruised by neck chains, spoke unto the Kirátas (hunters) the stature of his elephants.—76.

Grammatical notes, &c., &c.

Sama'sa.—(1) उत्सृष्टाः निवासाः उत्सृष्टनिवासाः (कर्मधा) तेषु (2) कण्ठानां रज्जवः कण्ठरज्जवः (षष्ठीतत्) or, कण्ठस्थिताः रज्जवः कण्ठरज्जवः (शाकपार्थिवादित्वात्मध्यपदलोपी कर्मधा) ताभिः क्षताः कण्ठरज्जुक्षताः (तृतीयातत्) तादृशी त्वक् येषां ते कण्ठरज्जुक्षतत्वचः (बहु) (3) देवानां दारवः देवदारवः (षष्ठीतत्) or, देवप्रियाः दारवः (शाकपार्थिवादित्वात् मध्यपदलोपी कर्मधा) । The word दारु is both masculine and neuter. So the alternative form is देवदारूणि—'पुंनपुंसकयोर्दारु' इति त्रिकाण्डशेषः (4) गजानां वर्ष्म गजवर्ष्म (षष्ठीतत्) (5) (किरं (पर्यन्तप्रदेशम्, out sides of towns) अतन्ति (अवन्ति) इति किराताः (उपपदतत्—वाचस्पत्ये)

or, किरयासी भतरोति किरातः (कर्मधा) किरात is a म्लेच्छजाति [V. R. T. of Amarakosha, N. S. P. Ed. P. 397.] or, किलकिल इत्युच्चार्य्य अतति, भ्रमति वनान्तः इति किरातः—Says Raghunátha, one of the commentators of Amarakosha. In this case, ल of किल is changed into र ।

Case-ending.—(1) तस्य—शेषे षष्ठी—'निवास' इत्यनेन सम्बन्धः (2) उत्सृष्टनिवासेषु—आधाराधिकरणे सप्तमी (3) किरातेभ्यः—'क्रियाग्रहणमपि कर्त्तव्यम्' इति मतात् चतुर्थी । (4) कण्ठरज्जुक्षतत्वचः—Adjective of देवदारवः ।

Synonyms.—(1) देवदारु—(V. Sl. 36, C. II.) (2) वर्ष्मन् and (V. Sl. 34, C. III.)

Different meanings.—(1) वर्ष्मन्—' देहप्रमाणातिसुन्दराकृतिषु स्मृतम्' (मे.) Also see Sanjivani. (2) किरात—'किरातो म्लेच्छभेदेस्याद्भूनिम्बेऽल्पतनावपि । स्त्रियां चामरवाहिन्यां कुट्टनीदुर्गयोरपि ॥' (मे.) (3) रज्जु—'रज्जुर्वेण्यां गुणे योषित्' (वि. मे.)

Derivation.—(1) वर्ष्म—वृष + मनिन् (उ. ४।१४५।) (2) निवासेषु—नि + वस् + घञ् (अधिकरणे, 7th c. p.) (3) रज्जुः—सृज + उः (निपात्यते) 'सृजेरसुम्‌च' (उ. १।१५।) स् of the root सृज् drops and ज् is doubled. The word रज्जु is always feminine, and is declined like धेनु (4) किरातेभ्यः—कॄ + कः = किरः । किर + अत् + अण् (4th c. p.) (5) प्रशशंसुः —शंस + लिट्—उस् (6) लैक्—(V. Sl. 37, C. II.)

Conjugation.—(1) शंस्—(V. Sl. 16, C. III.)

Rhetoric.—The figure of speech is अतिशयोक्ति because Deodar trees are represented as telling the kirátas the height of Raghu's elephants. The bruises on their barks were their mouths through which they could speak.

तत्र जन्यं रघोर्घोरं पर्वतीयैर्गणैरभूत् ।
नाराचक्षेपणीयाश्मनिष्पेषोत्पतितानलम् ॥ ७७ ॥

मूलस्य पाठान्तरम् :

पर्वतीयैः—पार्श्वतीयैः (पा. व.)

For the first line Nand. gives in foot notes संग्राम.सह सैन्यैश्च पार्वतीयैरभूत् रघोः; and for the second विमर्दः सह तैस्तत्र निष्पेषोत्पतिता-नलः ।

Prose order.—तत्र रघोः पर्वतीयैः गणैः नाराचक्षेपणीयाश्मनिष्पेषोत्-पतितानलं घोरं जन्यम् अभूत् ।

Explanation by use of synonyms.—तत्र (हिमाद्रौ) रघोः (दिलीपसूनोः) पर्वतीयैः (पर्वतभवैः) गणैः (उत्सवसङ्केताख्यैः सप्तभिः म्लेच्छ-विशेषैः सह) नाराचक्षेपणीयाश्मनिष्पेषोत्पतितानलं (लौहमयबाणभिन्दिपाल-पाषाणखण्डसंघर्षोद्गतपावकं) घोरं (भीमं) जन्यं (युद्धम्) अभूत् (जज्ञे) ।

Substance.—हिमाचले तत्पर्वतवासिभिरुत्सवसङ्केताख्यैर्म्लेच्छजातीयै-र्जनैः सह रघोरतिभीमं संग्रामं विदन्, तत्र युद्धे रघुसैन्या नाराचभिन्दिपालाद्यायुधानि पर्वतीयगणान् प्रति निचिक्षिपुः । ते च पाषाणखण्डनिक्षेपणेन रघुसैन्यान् विना-शयितुमुपचक्रमिरे । नाराचभिन्दिपालादीनां प्रस्तरखण्डानां च परस्परसंघर्षेण-नानलः समुत्पेदे ।

Change of voice.—...नाराचक्षेपणीयाश्मनिष्पेषोत्पतितानलेन घोरेण जन्येन अभावि ।

Sanjivani.—तत्रेति । (तत्र) हिमाद्रौ (रघोः)—पर्वतभवैः (पर्व-तीयैः—"पर्वताच्च" (४।३।१४३ । पा॰ १२६७ सि.) इति छप्रत्ययः—(गणैः) उत्-सवसङ्केताख्यैः सप्तभिः सह—"गणान् उत्सवसङ्केतान् अजयत् सप्तपाण्डवः ।" इति महाभारते—(V. Mahabhárataṁ, Sabháparvan ch. 27.) नारा-चानां, बाणविशेषाणां, क्षेपणीयानां, भिन्दिपालानाम्, अश्मनां च निष्पेषेण, संघर्षेण,

त्सपतिताः अनलाः यस्मिन् तत् तथोक्तं [नाराचक्षेपणीयाश्मनिष्पेषोत्पतितानलं]—"क्षेपणीयो भिन्दिपालः खङ्गो दीर्घो महाफलः" इति यादवः—(घोरं) भीमं (जन्यं) युद्धम् (अभूत्) । "युद्धमायोधनं जन्यम्" इत्यमरः (Cole. p. 216) ॥७७॥

Sanjivani Explained.

उत्सवसङ्केताख्यैः सह—Mallinátha takes गण to mean not any Himálayan tribes but rather those seven tribes of the Himálayas that were known as उत्सव ।

"गणान् * * " इति महाभारते—Mallinátha quotes this passage to show that गण meant, even in the days of Vyása, the seven Himálayan tribes called उत्सव । The passage means—"That the son of Pándu *viz*, Arjuna conquered the tribes known as उत्सव who were seven in number." Here is another instance from Mahábhárata showing that गण means उत्सवाख्य tribes :— "गणानुत्सवसङ्केतान् व्यजयत् पुरुषर्षभः ।

"पर्व्वताच्च"—The nominal affix छ is added to पर्व्वत as well. E. g. पर्व्वतीय । The next Sutra "विभाषाऽमनुष्ये" which means that छ is optionally added to पर्व्वत to mean anything else than a human being. It suggests that to mean a human inhabitant of a hill छ must be added to पर्व्वत । The affix alternate with छ is अण् । so to mean a hilly man, we shall have one form पर्व्वतीय, while to mean any hilly object except man, e. g., a hilly tree or fruit, we shall have forms पर्व्वतीय, and पार्वत ।

N. B.—How to defend the reading पार्व्वतीयैः । Jánendrasarasvati defends it thus पर्वतीयस्य राज्ञः इमे इत्यर्थे छान्तादण् । He derives first पर्वतीय as पर्वत + छ and takes it to mean 'hilly chieftain'. Then he adds अण् to पर्वतीय to mean 'the men of the hilly chieftain'. The अण् is determined by "तस्येदम्" (४।३।१२० पा. १५००० सि.) One of the Calcutta editos says that भट्टोजि adopts the reading पार्वतीय । He depends upon his memory which is a very treacherous guide. It is ज्ञानेन्द्र and not भट्टोजि who adopts and defends this reading.

বিরতামোদ করিয়া কিন্নরগণকে (স্ব) ভুজদ্বয়ের জয়সূচক প্রবন্ধগানে নিযুক্ত করিলেন। ৭৮।

English rendering.—Causing with his arrows, the tribes called *Utsavas* to be reft of their festivities, he made the *Kinnaras* sing the story of the triamps of his two arms.—78.

Grammatical notes, &c., &c.

Sama'sa.—(1) उत्सवः (आनन्दजनकः) सङ्केतः (स्त्रीपुंसयोः रत्यर्थ-मनुरागादाह्वानं (येषां ते उत्सवसङ्केताः (बहु) तान्—अस्मिन् स्त्रीत्येवं दाम्पत्य-नियमशून्ये स्त्रीपुंसयोरनुरागमात्रहेतुकस्वैरविहारशालि-पर्वतीयजातिभेदः। [V. वाचस्पत्याभिधानम्] These mountain-tribes had no system of marriage among them. When males and females were enomoured of themselves, they enjoyed the sweets of love after their own will. They never wore tho nuptial chains on their feet. They realised in practice what the most civilised section of the modern Americans theorise. (2) विरतः उत्सवः येषां ते विरतोत्सवाः (बहु) तान् (3) जयस्य उदाहरणं जयोदाहरणम् (षष्ठीतत्) तत् (4) कुत्सिताः नराः किन्नराः (नित्यसमासः) तान्—"किंक्षेपे" (२।१।६४। पा. ७४३ सि.) [The word किम् shall be compounded with another to mean 'ceusure'. This compound is called तत्पुरुष। E.g. 'to mean a bad king'. किम् is compounded with राजन् the resultant is किंराजन्]. Generally किन्नर's are supposed to have mouths like those of the horse, and the rest of body like that of men. There is another sort of किन्नर's that have the face like those of men and the trunk like that of the horse. But both are, no doubt, cases of deformity. As says वाचस्पत्य—"अश्वमुख-विशिष्टदेहत्वात् नरमुखत्वे वाश्वदेहत्वात् कुत्सा।' भानुजि says the samething —कुत्सा च कस्यचिन्नरमुखाश्वकायत्वात्, कस्यचिदश्वमुखनरशरीरत्वात्।'

Case ending.—(1) शरैः—करणे तृतीया (2) किन्नरान्—प्रयोज्ये-मुख्येकर्मणि द्वितीया। In the non-causative stage active voice किन्नराः

was nominative of the verb गै as, किन्नरा जयोदाहरणं जगुः। In the causative stage active voice the form रघुः किन्नरान् जयोदाहरणं गापयामास। The अणिजन्तकर्तृ becomes the णिजन्तकर्म "गतिबुद्धिप्रत्यवसानार्थ"—(V. I, 1) (3) जयोदाहरणम्—अनुक्तगौणे कर्मणि द्वितीया (4) बाह्वोः—कृद्योगेऽनुक्ते कर्त्तरि षष्ठी। जय is the कृदन्त word, बाहू जयतः——बाह्वोः जयः—"कर्त्तृकर्मणोः कृति" (V. notes on सागरम्, Sl. 2, C. I.) (5) विरतोत्सवान्—Adjective of उत्सवसङ्केतान् (6) सः—प्रयोजककर्त्ता, to the verb गापयामास।

Synonyms.—(1) किन्नर—'स्यात किन्नरः किम्पुरुषस्तुरङ्गवदनोमयुः।' (अ.)

Different meanings.—(1) उत्सव—'उत्सवोमह उत्सेक इच्छाप्रसवकोपयोः।' (मे.)

Derivation.—(1) शरैः—शृ + अप् (करणे, 3rd c. p.) "ऋदोरप्" (३।३।५७। पा. ३२३२ सि.) [अप् is added to a root ending in ऋ or ॠ as well as उ or ऊ] (2) उत्सवः—उत् + सु + अप् (भावे) 'षु प्रसवैश्वर्ययोः' (3) सङ्केतः—सङ्केत (अदन्तः) + अच् (4) कृत्वा—कृ + क्त्वाच् (5) विरतः—वि + रम् + क्तः (कर्त्तरि) (6) जयः—जि + अच्-भावे(7) उदाहरणम्—उत् + आ + हृ + ल्युट् (भावे) (8) बाह्वोः—बाधृ + उः (6th c. d.) धृ of the root is changed into ह्—'अर्जि दृशिकम्यमि—' (उ. १।२७।) (9) गापयामास—(गै + णिच् =) गापि + लिट्-णल्। गै beomes गा। Then by "अर्त्तिह्रीव्ली—" (See धारयतः in II, 25,) पुक् comes after गा।

Conjugation.—(1) गै—(V. Sl. 20, C. IV.)

The locality of the kinnaras:—Form Mahábhárata we understand that at the north west of the Himálayas there was the mountain called श्वेतपर्व्वत। Arjuna crossed it and found the country of the kimipurushas or kinnaras. The son of द्रुम was then the lord of the country. मानससरोवर (the lake Mánasa)

was not far off the country. This justifies us to identify it with the south-western portion of Tibet.

The locality of the उत्सव tribs—Evidently Kálidása assigns them the eastern part of the Himálayás to them for he says that after conquering the उत्सव Raghu crossed लौहित्य and invaded प्राग्ज्योतिष (the Modern Assam). Mahábhárata mentions two habitats of the उत्सव tribes. Arjuna conqured the seven उत्सव tribes of Himálaya, Nakula the उत्सव tribes of the पुष्कर forest which is at Rajputana. Moreover, Vyása assigns to the Himálayan उत्सव's a site near Kasmira. He mentions various tribes. Probably in the days of Kálidása all except the Utsavas fell into insignificance.

परस्परेण विज्ञातस्तेषूपायनपाणिषु।
राज्ञा हिमवतः सारो राज्ञः सारो हिमाद्रिणा॥ ७९॥

मूलस्य पाठान्तरम्।

परस्परेण—परस्परस्य (चा.)

Prose order.—तेषु उपायनपाणिषु परस्परेण राज्ञा हिमवतः सारः हिमाद्रिणा (च) राज्ञः सारः विज्ञातः।

Explanation by use of synonyms.—तेषु (गणेषु) उपायन पाणिषु (उपढौकनहस्तेषु सत्सु) परस्परेण (अन्योन्यं) राज्ञा (नृपेण रघुणा) हिमवतः (हिमालयस्य) सारः (धनरूपः स्थिरांशः) हिमाद्रिणा—च (हिमाचलेन—च) राज्ञः (नृपतेरघोः) सारः (बलरूपः स्थिरांशः) विज्ञातः (विदितः)।

Substance.—समरनिर्जितानामपि बहुविधमहार्घरत्नाद्युपहारान् रघवे ददुः। अमूल्यानि तानि मणिरत्नादीन्यवलोक्य रघुर्हिमाचलस्यानन्तरत्नप्रभवत्वं बुबुधे—हिमाचलोऽपि दुर्जयगणसमूहस्य पराजयात् रघोरतुलविक्रमं विज्ञाञ्चकार।

Change of voice.—...परस्परः राजा...सारं हिमाद्रिः...सारं विज्ञातवान्।

Sanjivani.—परस्परेणेति। (तेषु) गणेषु—उपायनयुक्ताः पाणयः येषां तेषु [उपायनपाणिषु] सत्सु (परस्परेण) अन्योन्यं (राज्ञा हिमवतः) (सारः) धनरूपः, विज्ञातः (हिमाद्रिणा) अपि (राज्ञः) (सारः) बलरूपः (विज्ञातः)। एतेन तत्रत्यवस्तूनामनर्घ्यत्वं गणानामभूतपूर्व्वश्च पराजय इति ध्वन्यते॥ ७९॥

Sanjivani Explained.

एतेन * * इति ध्वन्यते—By this it is suggested that the Hemálayan gems are priceless, and that this was the extraordinary discomfiture of Himálayan tribes.

उपायनयुक्ताः पाणयः येषां तेषु—This is the समास of Mallinátha. He makes a समानाधिकरण बहुव्रीहि of उपायन and पाणि। True, he says उपायनयुक्ताः instead of उपायनाः but that is because he means to show that उपायन is here an adjective. How can उपायन, which is a noun be made an adjective of पाणि? We sre to add अच् to उपायन by the Sutra "अर्श आदिभ्योऽच्" (५।२।१२७ पा. १९२३ सि.) for the purpose. As अर्शस् + अच् makes अर्शस meaning 'one having piles', so उपायन + अच् yields the form उपायन meaning उपायनयुक्त। Although उपायन is not found in the list of अर्श आदि yet it falls under that list by the spirit of आदि which is प्रकारवचन।

We cite a few examples. "पुण्योमहाब्रह्मसमूहजुष्टः सन्तर्पणीनाकसदां वरेण्यः" (भट्टिकाव्य I, 4). In deriving 'पुण्य' Bharatamallika and Joyamangala say that 'अत्यन्तपुण्यकरणात् स राजा पुण्य इत्युच्यते पुण्यं विद्यते अस्य इति पुण्यः—अर्श आदित्वादच्'। Here पुण्य is adjective. It is derived as पुण्य + अच्। Yet it is not found in the list of अर्श आदि। In the derivation of पद्मा, Bhanuji says that 'पद्ममस्त्यस्याः—अर्श आद्यच्' (V R. T. of Amarakosa, N. S. P. Ed. P. 14.) 3. In Venisamhara nataka, we find "पापं पापाः कथयत कथं शौर्यराशेः पितुर्मे (Act III). Pandit Táránátha Tarkavàchaspati has derived पापाः as 'पापमस्ति एषामिति पापाः—अर्श आदित्वादच्'। Yet पाप is not in the list of अर्श आदि। In the said examples पुण्य, पद्म and पाप admit अच् by the spirit of आदि। A Calcutta editor says

that उपायन here means उपायनयुक्त by लक्षणा। We cannot adopt this view because we are averse to the secondary if the primary sense can do. If उपायन by अभिधा can mean उपायनयुक्त, why should we admit लक्षणा to it to have the same sense. It would be an outrage to the rhetorical maxim that लक्षणा comes into operation only when अभिधा fails.

Bengali.—সেই গণসমূহ হস্তে উপঢৌকন লইয়া (রঘুর নিকট আগমন করিলে) রাজা হিমাচলের এবং হিমাচল রাজার সার পরস্পর জানিতে পারিলেন। ৭৯।

English rendering.—Upon the *Utsavas* appearing with presents in their hands, the strength of Himavat by the king and the strength of the king by Himavat were mutually known.—79.

Grammatical notes, &c., &c.

(1) उपायनपाणिषु. According to Mallinátha उपायनाः पाणयः येषां तेषु (समानाधिकरण बहु) We may make as well as व्यधिकरण बहुव्रीहि of the nouns उपायन and पाणि। The वाक्य would be उपायनानि पाणिषु येषाम्। पाणि though in the seventh case does not come before पाणि by the Várttika 'गड्वादिः परा सप्तमी वाच्या' enjoins that सप्तम्यन्त component comes after the other component such as गडु। E. g. गडुकण्ठ। गड्वादि is आकृतिगण। So there is no difficulty in admitting उपायन to that class. This Várttika counteracts the operation of the Sutra "सप्तमी विशेषणे बहुव्रीहौ" (२।२।३५ पा. ८५८ सि. meaning that a सप्तम्यन्त or a विशेषण component precedes the other in बहुव्रीहि समास। A Calcutta editor says that Mallinátha does not resort to व्यधिकरण बहुव्रीहि because he thought that in that case the form would be पाण्युपायनाः by the Sutra सप्तमीविशेषणे बहुव्रीहौ।" The editor remarks that Mallinátha forgets that पाणि is treated as an exception to the above rule by भाष्य which uses कमण्डलुपाणि। We cannot take Mallinátha to be so ignorant of grammar as not to see this use of

Bháshya. See Sanjivani explained. (२) हिमं प्रधानं यस्य स हिमप्रधानः हिमप्रधानः अद्रिः हिमाद्रिः (शाकपार्थिवादित्वात् मध्यपदलोपी कर्मधा—) तेन ।

Case-ending—(1) परस्परेण—Adjective of राज्ञा and हिमाद्रिणा (2) राज्ञा and हिमाद्रिणा—अनुक्ते कर्त्तरि तृतीया (3) तेषु—भावाधिकरणे सप्तमी (4) उपायनपाणिषु—Adjective of तेषु (5) हिमवतः and राज्ञः—शेषे षष्ठी 'सारः' इत्यनेन सम्बन्धः ।

Synonyms.—(१) उपायन—(V. उपदा, Sl. 70, C. IV.)

Different meanings.—(1) सार—सारो बले स्थिरांशे च मज्ज्ञि पुंसि जले धने' (मे).

Derivation.— (1) परस्परेण—(V. Sl. 40, C.I.) (2) विज्ञातः—वि + ज्ञा + क्तः (भूते) (3) उपायनम्—उप + इ (ण्) or, अय् + ल्युट् (कर्मणि) [V. R. T. of Amárakosá, N. S. P. Ed. P. 315,] (4) हिमवतः—हिम + मतुप् (अतिशय्यार्थे, 6th c. s. म of मतुप् is changed into व (5) सारः—(V. Sl. 14 C. I.)

Conjugation.—(1) ज्ञा—(V. Sl. 15, k. I.) सार is धन as regards हिमाद्रि and बल as regards रघु ।

Rhetoric.—The figure of speech is अन्योन्य ।

It is thus defined in Kávyaprakasa :—

क्रियया तु परस्परम् ।
वस्तुनोर्जनने ऽन्योन्यम् ।

When through the same act things mutually become the causes of one another the figure of speech is अन्योन्य ।

Here, two things are prominent, the king and the Himálayas. The king could know the Himálayas' might and the Himálayas could know his. Each was the cause of the knowledge of the other.

तत्राक्षोभ्यं यशोराशिं निवेश्यावरुरोह सः ।
पौलस्त्यतुलितस्याद्रेरादधान इव ह्रियम् ॥ ८० ॥

Prose order.—सः तत्र अक्षोभ्यं यशोराशिं निवेश्य पौलस्त्यतुलितस्य अद्रेः ह्रियम् आदधान इव अवरुरोह ।

Explanation by use of synonyms.—सः (रघुः) तत्र (हिमाद्रौ) अक्षोभ्यम् (अधृष्यं) यशोराशिं (ख्यातिपुञ्जं) निवेश्य (निधाय) पौलस्त्यतुलितस्य (रावणचालितस्य) अद्रेः (कैलासाख्यपर्वतस्य) ह्रियं (लज्जाम्) आदधान इव (जनयन्निव) अवरुरोह (अवततार)।

Substance.—रघुर्हिमाचले अविनश्वरं कीर्तिपुञ्जं संस्थाप्य तस्मादवतीर्णः। कैलासादिजयार्थं स न ययौ। स मनसि विभावयामास, यत् स पर्वतः सकृद्रावणेन उत्तोलितः अतस्तस्याहात्म्यं गतं, पुनर्वीरान्तरेण तज्जयनं वीरत्वदूषकम् इति मत्वा तदभिमुखमप्रयाणेन तस्य हृदि लज्जां जनयन्निव अवज्ञया तं परित्याज।

Change of voice.—तेन...आदधानेन...अवरुरुहे ।

Sanjivani.—तत्रेति। (सः) रघुः (तत्र) हिमाद्रौ (अक्षोभ्यम्) अधृष्यं (यशोराशिं) (निवेश्य) निधाय, पौलस्त्येन, रावणेन; तुलितस्य, चालितस्य [पौलस्त्यतुलितस्य] (अद्रेः) कैलासस्य (ह्रियम्) (आदधानः) जनयन् (इव) (अवरुरोह) अवततार—कैलासमगत्वैव प्रतिनिवृत्तः इत्यर्थः। नहि शूराः परैः पराजितमभियुञ्जते इति भावः ॥ ८० ॥

Sanjivani Explained.

कैलासमगत्वैव प्रतिनिवृत्तः इत्यर्थः—The sense, of the second line is—"He returned with going as far as *Kailása.*"

नहि शूराः * * अभियुञ्जते इति भावः—The purport is that 'The true heroes think it beneath their dignity to assail him who is defeated by others.'

The idea of the verse is this :—Raghu conquered the Himáláyn region. He did not proceed to subjugate Kailása.

The poet furnishes a reason for Raghu's disregard of Kailása. This mountain had been uplifted by Rávana and had lost its glory. To conquer an already conquered one does not redound to the conqueror's glory.

Bengali.—তিনি সেই স্থলে (হিমালয়ে) অক্ষয় যশোরাশি সংস্থাপিত করিয়া রাবণচালিত পর্ব্বতের (কৈলাসের) লজ্জা জন্মাইয়াই যেন অবতীর্ণ হইলেন। ৮০।

English rendering.—Having established there an enduring mass of fame, he came down causing, as it were, the shame of the (Kailás) mounntain which had been uplifted by (Rávana) the grandson of Pulasta.—80.

Grammatical notes, &c., &c.

Sama'sa.—(1) न क्षोभ्यः अक्षोभ्यः (नञ्तत्) तम् (2) यशसः राशिः यशोराशिः (षष्ठीतत्) तम् (3) पौलस्त्येन तुलितः पौलस्त्यतुलितः (तृतीयातत्) तस्य।

Case-ending.—(1) तत्र—अव्ययं, आधाराधिकरणे सप्तमी (2) अद्रेः—संबन्धे षष्ठी 'ह्रियम्' इत्यनेन सम्बन्धः, or, कृद्योगेऽनुक्ते कर्त्तरि षष्ठी। क्विप् is the कृदन्त affix, added to the root ह्री in ह्रियम् (3) पौलस्त्यतुलितस्य—Adjective of अद्रेः (4) आदधान.—Adjective of सः (5) ह्रियम्—शानच् प्रत्ययान्तस्य 'आदधान' शब्दस्य योगे द्वितीया—"न लोकाव्ययनिष्ठाखलर्थतृनाम्" (V. notes on सागरम्, Sl. 2, C. I.) (6) यशोराशिम्—Objeet of the transitive verb निवेश्य (7) अक्षोभ्यम्—Adjective of यशोराशिम्।

Synonyms.—(1) यशस्—'यशः कीर्त्तिः समज्ञा च' (अ.)(2) ह्री—मन्दाक्षं ह्रीस्त्रपा व्रीड़ा लज्जा' (अ.)

Different meanings.—(1) अद्रि—'अद्रिस्तु पर्वते। सूर्य्ये शाखिनिच।' (हे.)

Derivation.—(1) अद्रेः—अद् + क्रिन् (6th c. s.) 'अदिशदिभूशु-

भिभ्य: क्विप् (उ. ४।६४।) (2) अधीभ्यम्—अभ् + ण्यत् (कर्मणि) = ओभ्य: (अ + ओभ्य:) 2nd c. s. (3) यश:—(V. Sl. 19, C. IV.) (4) निवेश्य—नि + विश् + णिच् + ल्यप् (5) अवरुरोह—अव + रुह् + लिट्-णल् (6) पौलस्त्य:—पुलस्त + यञ् (गोत्रापत्ये) पौलस्त्य: = रावण:—The father of रावण is a sage named विश्रवस्; and विश्रवस्, is the son of the sage पुलस्त who is one of the seven will-born sons of Brahmá himself. (7) तुलितस्य—तुलाशब्दात् करणार्थे णिच् = तुलि (नामधातु:) तुलि + क्त: (कर्मणि, 6th c. s.) तुलां करोति तुलयति—'तत्करोति तदाचष्टे' इति वार्त्तिकसूत्रात् णिच् (See सचयिष्यता in III, 35 for the Expl. of the वार्त्तिक) (8) आदधान:—आ + धा + शानच् (कर्त्तरि) (2) ह्रियम्—ह्री + क्विप् (भावे, 2nd c. s.) The word ह्री is feminine and declined like श्री ।

Conjugation.—(1) रुह्—(V. Sl. 26, C. II.) (2) विश्—(V. Sl. 28, C. III.) (3) धा—(V. Sl. 24, C. I.)

Allusion.—पुरा दशानन: वैमात्रेयभ्रातरं कुवेरं समरे पराजित्य तस्य मनोजवं पुष्पकविमानमारुह्य च कार्त्तिकेयजन्मभूमिं शरवणं दिदृक्षु: कैलासाभिमुख-मागच्छन्नासीत् तत्रागमनमात्रेणैव तन्मनोजवं विमानं कैलासशृङ्गसङ्गं जातम् । नन्दिकेश्वरेण निषिद्धोऽपि तद्वचसि कर्णपातं न कृत्वा स क्रुद्ध: सन् तद्गिरिवरं बाहुप्रसारणेन धृत्वा उन्मीलितवान् । शिवस्तु पादाङ्गुष्ठेन तस्य स्थैर्यं सम्पाद्य भीतया: पार्वत्या: सन्त्रस्तगणानाञ्च भयं विदूरयामास । (V. Rámáyanam, Uttara-kándam C. XV.—XVI.)

In times of yore Rávana defeated his brother Kuvera and wrenched from him his best possession *Puspaka* car which could move according to the will of the owner. Mounted on that car he went on to see the bush of reeds where Kárttikeya was born. Its motion was arrested by a peak of the *Kailása* mountain. Instead of making a circuit round the peak, he wanted to remove the whole mountain. Nandi, the attendant

of S'iva, wanted to stop him. Without heeding his words Rávana raised the mountain with his arms. It was the habitat of S'iva Párvati and all the Ganas, the attendants of the God, who were afraid at the repeated shocks the mountain received. S'iva pressed it down with the thumb of His foot. Rávana could no longer uphold the mountain. His arms were pressed. He left it and it was restored to its former tranquility.

चकम्पे तीर्णलौहित्ये तस्मिन् प्राग्ज्योतिषेश्वरः।
तद्गजालानतां प्राप्तैः सह कालागुरुद्रुमैः॥ ८१॥

Prose order.—तस्मिन् तीर्णलौहित्ये प्राग्ज्योतिषेश्वरः तद्गजालानतां प्राप्तैः कालागुरुद्रुमैः सह चकम्पे।

Explanation by use of synonyms.—तस्मिन् (रघौ) तीर्णलौहित्ये (उत्तीर्णलौहित्यनामकनदे) प्राग्ज्योतिषेश्वरः (प्राग्ज्योतिषनामकजनपदेश्वरः) तद्गजालानतां (रघुगजबन्धनस्तम्भतां) प्राप्तैः (आपन्नैः) कालागुरुद्रुमैः (कृष्णागुरुवृक्षैः) सह (सार्द्धं) चकम्पे (विवेपे)

Substance.—अथ रघुर्ब्रह्मपुत्रमतिक्रम्य प्राग्ज्योतिषमाचक्राम। प्राग्ज्योतिषाधिपतिः भयेन चकम्पे। किञ्च येषु रघोर्गजघटा बद्धावभवन् ते कृष्णागुरुद्रुमा गजानां शृङ्खलाकर्षणेन चकम्पिरे।

Change of voice.—......प्राग्ज्योतिषेश्वरेण......।

Sanjivani.—चकम्प इति। (तस्मिन्) रघौ, तीर्णः लौहित्यो नामनदो येन तस्मिन् (तीर्णलौहित्ये) सति, प्राग्ज्योतिषाणां जनपदानाम् ईश्वरः [प्राग्ज्योतिषेश्वरः] तस्य, रघोः गजानाम् आलानतां [तद्गजालानतां] (प्राप्तैः) (कालागुरुद्रुमैः) कृष्णागुरुवृक्षैः (सह) (चकम्पे) कम्पितवान्॥ ८१॥

सञ्जीवन्याः पाठान्तरम्।

तीर्णः लौहित्योनाम नदो येन—तीर्णा लौहित्या नाम नदी येन—All the editions. लौहित्य (ब्रह्मपुत्र) is a नद and so it is masculine. In Kálikápurána, we see that the word लौहित्य indicating the river

ब्रह्मपुत्र is used in masculine, and there is no such name of लौहित्या। "तस्य नामविषयकं स्वयं लौहितगङ्गकम्। लौहित्यात् सरसो जातो लौहित्याख्यस्ततोऽभवत्। स कामरूपमखिलं पीठमाप्लाव्य वारिणा॥ गोपयन् सर्वतीर्थानि दक्षिणं याति सागरम्॥" (V. कालिकापुराणम्, Chap. 85.) We have therefore, adopted the reading तीर्णे: लौहित्यनाम नदी येन। and we are supported by the MS. consulted by us.

Bengali—তিনি লৌহিত্য (ব্রহ্মপুত্র) নামক নদ অতিক্রম করিলে প্রাগ্‌জ্যোতিষনরপতি তদীয় গজবন্ধনস্তম্ভরূপে পরিণত কালাগুরুবৃক্ষসমূহের সহিতই কম্পিত হইলেন। ৮১।

English rendering—On his having crossed the Lauhitya, the lord of the Prágjyotishas trembled along with the Black Agurus (*Aquilaria* Agallocha) trees (of his domain) that had attained the condition of tying posts of his (*viz*, Raghu's) elephants.—81.

Grammatical notes, &c., &c.

Sama'sa.—(1) तीर्णः लौहित्यः (तन्नामकनदः) येन स तीर्णलौहित्यः (बहु) तस्मिन् (2) प्राक् (पूर्वं) ज्योतिषं (ज्योतिःसम्बन्धिसर्वं मं) येषु ते प्राग्ज्योतिषाः (बहु) तेषाम् ईश्वरः (षष्ठीतत्) (3) तस्य गजाः तद्गजाः (षष्ठीतत्) तेषाम् आलानं तद्गजालानम् (षष्ठीतत्) तस्यभावः तद्गजालानता—ताम् (4) कालानि अगुरूणि कालागुरूणि (कर्मधा—) तान्येव द्रुमाः कालागुरुद्रुमाः (रूपककर्मधा) तैः।

Case-ending.—(1) तस्मिन्—भावाधिकरणे सप्तमी (I, 22) (2) तीर्णलौहित्ये is adjective of तस्मिन् (3) कालागुरुद्रुमैः—सहयोगे तृतीया (4) प्राग्ज्योतिषेश्वरः is the nominative of the verb चकम्पे।

Synonyms.—(1) कालागुरु—'कालागरु गुरु' (अ.) (2) द्रुम—(V. पादप, Sl. 33, C. IV.)

Different meanings.—(1) अगुरु—'अगुरुशिंशपा ' (श्री)। शिंशपायाम्' (मे:) (2) द्रुम—'द्रुमस्तुपादपे पारिजाते किंपुरुषेश्वरे (मे.)

Derivation.—(1) चकम्पे—कम्प् + लिट्-ए (2) तीर्णः—तॄ + क्तः (कर्मणि) The निष्ठा—क्त is changed into न by the rule—"रदाभ्यां निष्ठातो नः पूर्व्वस्य च दः" (V. I, 4). (3) द्रुमैः—द्रु + म (अस्त्यर्थे, 3rd. c.p.) द्रुः (शाखा) अस्यास्ति इति द्रुमः—"द्युद्रुभ्यां मः" (५।२।१०८ पा. १९१५सि) (4) लौहित्यः—लोहित्य + अण् (जातार्थे) लौहित्ये सरसि जातः। "तत्रजातः" (४।३।२५ पा. १३९३ सि) [To mean 'born there', a word admits अण्] (5) आलानताम्—आलान + तल् (भावे, 2nd c. s.) [For आलान V. Sl. 69, c. IV.] (6) प्राप्तैः—प्र + आप् + क्तः (कर्त्तरि, 3rd c. p.) (7) अगुरु—गॄ + कुः = गुरु (न + गुरु)

Conjugation.—(1)—कम्प् (to tremble) कम्पते (लट्) कम्पताम् (लोट्) अकम्पत (लङ्) कम्पेत (वि. लिङ्) चकम्पे (लिट्) अकम्पिष्ट (लुङ्) कम्पयति (णिच्—लट्) अचकम्पत् (णिच्—लुङ्) अकम्पि (भावे—लुङ्) कम्पिता (लुट्) कम्पिष्यते (लृट्) अकम्पिष्यत (लृङ्) चिकम्पिषते (सन्—लट्) चङ्कम्पते (यङ्—लट्) कम्पितः (क्तः)।

Allusion in the name of प्राग्ज्योतिषः—Brahman first created the stars and other luminous planets from this place, so the country has got the appealation of प्राग्ज्योतिष।

"अत्रैव हि स्थितो ब्रह्मा प्राङ्नक्षत्रं ससर्ज ह। ततः प्राग्ज्योतिषाख्येयं पुरी शक्रपुरीसमा॥" (V. कालिकापुराण, chp. 37)

Rhetoric.—The figure of speech is सहोक्ति। Not only the king of Prákjyotishas trembled, even the trees in his domain quaked. One quaked before Raghu, the other at the sudden pulls by Raghu's elephants. The whole country was in parturbation at the approach of Raghu (For सहोक्ति see Retoric Sl. 69.)

Geography.—(1) प्राग्ज्योतिष—Kálidása gives its other name कामरूप (IV. 84). The latter name is as yet extant. It is a division of Assam. So प्राग्ज्योतिष is identifiable with the modern Assam. The whole country at the foot of the Himá-

lays from east to west had the appellation ज्योतिष । By time it was divided into two broad divisions; one उत्तरज्योतिष and the other प्राग्ज्योतिष । We hear of both the names in the Mahábhárata. Arjuna is represented to conquer both the *Jyotishas*. From this verse we understand that Brahmaputra was the western boundary of प्राग्ज्योतिष in the days of Kálidása. लौहित्य—Kálikápurana identifies it with Brahmaputra. It is so called because it arises from the lake called लौहित्य । (See the passage quoted ante p.) We know that Brahmaputra arises from the lake Manasa. We do not find the name ब्रह्मपुत्र or लौहित्य in the list of rivers given in भीष्मपर्व । In सभापर्व chap. 30. Bhima is said to conquer the country लौहित्य after conquering वङ्ग, मङ्ग and the coast of the Bay of Bengal. प्राग्-ज्योतिष and लौहित्य are distinguished by Vyása. In वनपर्व we hear लौहित्य is specified as a holy place of pilgrimage. Upto this day a *mela* is being held on अशोकाष्टमी by the shore of Brahmaputra on the other side of Gauháti.

न प्रसेहे स रुद्धार्कमधारावर्षदुर्दिनम् ।
रथवर्त्मरजोऽप्यस्य कुत एव पताकिनीम् ॥ ८२ ॥

Prose order.—सः रुद्धार्कम् अधारावर्षदुर्दिनम्, अस्य रथवर्त्मरजः अपि न प्रसेहे, पताकिनीं कुत एव ।

Explanation by use of synonyms.—सः (प्राग्ज्योतिषेश्वरः) रुद्धार्कम् (आवृतसूर्यम्) अधारावर्षदुर्दिनं (धारावर्षणं विना घनध्वान्तम्) अस्य (रघोः) रथवर्त्म रजः अपि (स्यन्दनोद्धूतधूलिपटलमपि) न प्रसेहे (न सोढुं शशाक) पताकिनीं (सेनां) कुत एव (कथमेव प्रसेहे? न कथमपीत्यर्थः)।

Substance.—यदा रघुः प्राग्ज्योतिषं सचतुरङ्गबलः प्रविवेश, तदा तद्रथोद्धूतधूलिपटलः एवमुद्गतः यत् सूर्यः समाच्छन्नः सन् नालक्ष्यत । वृष्टिधारावर्षणं विनापि दुर्दिनमभूत् । प्राग्ज्योतिषाधिपतिः तादृशं धूलिपटलमालोक्यैवमितरां भयं भेजे । रघुसैन्यैः सह संग्रामस्य का कथा ।

Change of voice.—तेन...पताकिनी...।

Sanjivani.—नेति। (सः) प्रागज्योतिषेश्वरः (रुद्धार्कम्) आवृतसूर्य्यम्—अधारावर्षञ्च तद् दुर्दिनञ्च [अधारावर्षदुर्दिनं] धारावृष्टिं विना दुर्दिनभूतम् (अस्य) रघोः (रथवर्त्म रजः अपि न प्रसेहे) (पताकिनीं) सेनां (कुत एव) प्रसेहे—न कुतोऽपि इत्यर्थः॥ ८२॥

Sanjivani Explained.

अधारावर्षदुर्दिनम्—The idea is that so thick masses of dusts arose that the sun could not be seen. So the day was gloomy and foul Yet neither speck of cloud was there, nor was a drop of rain. The dusts were really the cause of दुर्दिन। Yet it is here, mentioned as the same as दुर्दिन। दुर्दिन, by लक्षणा, means दुर्दिनकारक।

Bengali.—তিনি আবৃতসূর্য্য, ধারাবৃষ্টিশূন্য ঘোর জলদধ্বান্তরূপ রঘুর রথবর্ত্মোত্থিত ধূলিপটলই সহ্য করিতে পারিলেন না, (তাঁহার সেনার (প্রতাপ সহ্য করা) দূরের কথা। ৮২।

English rendering.—He was unable to endure the very dust, that intercepted the sun and that was a cloudy gloom with a downpour, of the track of Raghu's cars—how then his army?—82.

Grammatical notes, &c., &c.

Sama'sa.—(1) रुद्धः अर्कः येन तत् रुद्धार्कम् (बहु) तत् (2) धारायां वर्षं धारावर्षम् (षष्ठीतत्) अविद्यमानं धारावर्षं यस्मिन् तत् अधारावर्षम् (बहु) दुः (निन्दितं) दिनं दुर्दिनं (सुपसुपा) अधारावर्षञ्च तत् दुर्दिनञ्च (कर्मधा) तत्। Here दुर्दिन means घनान्धकारकारण (3) रथस्य वर्त्म रथवर्त्म (षष्ठीतत्) तस्य रजः रथवर्त्मरजः (षष्ठीतत्) तत्।

Case-ending.—(1) रथवर्त्मरजः—Object of the transitive verb प्रसेहे (2) अधारावर्षदुर्दिनम्—विधेयकर्म of रथवर्त्मरजः which is उद्देश्य कर्म (3) रुद्धार्कम् is the adjective applicable to both the

sides. (4) कुतः—अव्ययं, क्रियाविशेषणं—केन प्रकारेण इत्यर्थः (5) अस्य—शेषे षष्ठी 'रथ' इत्यनेन सम्बन्धः।

Synonyms.—(1) अर्क—(V. मर्घ्य, Sl. 13, C. III.) (2) वर्त्मन् V. मार्ग, 33, C. IV.) (3) रजस्—(V. Sl. 20, C. II.) (4) सेना—(V. I. 19).

Different meanings.—(1) अर्क—'अर्कों द्रुमेदे स्फटिके ताम्रे सूर्ये बिड़ौजसि' (मे.)

Derivation.—(1) प्रमेहे—प्र+मह्+लिट्—ए (2) कद्रः—कद्+क्तः (कर्मणि) (3) अर्कः—अर्च्+घञ् (कर्मणि) च् of the root is changed into क् by "चजोः कुघिण्ण्यतोः" (V. notes on अर्मात्थ Sl. 65, C. III.) or अर्च्+क.—'कृदाधाराचिकलिभ्यः कः' (उ. ३।४०) Now च of the root is changed into क् by the rule "चोः कुः" (८।२।३० पा. ३०८ सि.) [A letter of चवर्ग is changed into the corresponding letter of कवर्ग if a letter of the group झल् follows or if the चवर्ग be at the end of a पद] Again, अ of the root drops by the rule "झरो झरि सवर्णे" (८।४।६५ पा. ७२ सि.) or अर्क् (चुरादि. प. to praise)+अच् But after कैयट, the affix घञ् should be used to the roots which are causative. So he wishes घञ् in this case. Cf. 'परञ्जन्याल्लानाम्'। Bhanuji does not follow कैयट and says that घञ्, in this case, is अनार्ष (not used by the Rishis, i.e. पाणिनि, कात्यायन and पतञ्जलि)। The foot note of Amarakos'a also says that 'परञ्जन्याल्लानाम् इति वचनमनार्षम्' इति कैयटबोधिताकचिः सूचिता। [V. R. T. of Amarakosa, N. S. P. Ed. pp. 46 47.] (4) वर्षम्—वृष+घञ् (भावे) (5) वर्त्म—(V. Sl. 17, C. I.) (6) रजः—(V. Sl. 29, C. IV.) (7) कुतः—किम्+तसिल् (in 3rd case) (8) पताकिनीम्—पत+आकः+टाप्=पताका। 'बलाकादयश्च' (उ. ४।१४) पताका+इनि+ङीप् (2nd c. s.)

Conjugation.—(1) सह्—(V. Sl. 70, C. III.)

अपि—when the king of प्राग्ज्योतिष could not bear the dusts raised by the chariots of Raghu, how could he bear the fury of his army. अपि here indicates गर्हा (censure).

तमीशः कामरूपाणामत्याखण्डलविक्रमम्।
भेजे भिन्नकटैर्नागैरन्यानुपरुरोध यैः॥ ८३॥

Prose oreder.—कामरूपाणाम् ईशः, यैः अन्यान् उपरुरोध (तैः) भिन्नकटैः नागैः अत्याखण्डलविक्रमं तं भेजे। Mallinātha places 'यैः अन्यान् उपरुरोध' in the last, and 'भिन्नकटैः नागैः' after 'तम्'।

Explanation by use of synonyms.—कामरूपाणां (तदाख्यदेशानाम्) ईशः (अधीश्वरः) यैः (यैर्नागैः) अन्यान् (अपरान् नृपान्) उपरुरोध (निवारितवान्) तैः भिन्नकटैः (स्रवन्मदगण्डैः) नागैः (करिभिः) अत्याखण्डलविक्रमम् (अतीन्द्रपराक्रमं) तं (रघुं) भेजे (आराधयाञ्चकार)।

Substance.—कामरूपेश्वरस्य बहवः मदस्राविणः विपुलबलाः गजाः आसन्। विपक्षा नृपतयर्यंत् तद्राज्यमाक्रमितुं समागच्छन्ति स्म तदा तैरेव गजैस्तेषां गतिं प्रतिरुणद्धि स्म। अधुना स रघुवीर्येण पराजितः सन् अतीन्द्रवीर्याय तस्मै रघवे तादृशान् महापराक्रमान् नागान् दत्त्वा तदधीनतां स्वीचकार।

Change of voice.—...ईशेन...अन्ये उपरुरुधिरे...अत्याखण्डलविक्रमः सः...।

Sanjivani.—तमिति। (कामरूपाणां) नाम देशानाम् (ईशः) (अत्याखण्डलविक्रमम्) अतीन्द्रपराक्रमं (तं) रघुं—भिन्नाः, स्रवन्मदाः कटाः, गण्डाः येषां तैः [भिन्नकटैः] (नागैः) गजैः—साधनैः (भेजे) नागान् दत्त्वा शरणं गतः इत्यर्थः—कीदृशैर्नागैः—(यैः) नागैः (अन्यान्) रघुव्यतिरिक्तान् नृपान् (उपरुरोध)। शूराणामपि शूरो रघुरिति भावः॥ ८३॥

Sanjivani Explained.

शूराणामपि * * रघुरिति भावः—The purport is that Raghu is the hero of the heroes.

नागैर्भेजे is explained as 'sought his help by giving unto him the elephants'.

Bengali.—কামরূপাধিপতি, যে সকল গজ দ্বারা অপর নৃপতিগণের আক্রমণ নিবারণ করিতেন, সেই সকল গণ্ডনিঃস্থতমদজলগজদ্বারা ইন্দ্রাধিক প্রভাব সেই রঘুর সেবা করিলেন। ৮৩।

English rendering.—Him who transcended Akhandala himself in valour, the lord of the Kámarupas submitted to, with (presents of) elephants having rent temples, with which he used to oppose others.—83.

Grammatical notes, &c., &c.

Samása.—(1) कामरूपाणाम्—कामः (स्वेच्छा) रूपं येषां ते कामरूपाः (बहु) तेषाम्। वाचस्पत्य gives such a विग्रहवाक्य। Or, कामेन (स्वेच्छया) रूपं येषां ते (2) आखण्डयति असुरान्, पर्वतपक्षान् वा आखण्डलः—तस्य विक्रमः आखण्डलविक्रमः (षष्ठीतत्) अतिक्रान्तः आखण्डलविक्रमम् इति अत्याखण्डलविक्रमः (प्रादितत्) तम् (3) V. Sanjivani. (4) नागैः—न गच्छन्ति इति अगाः, न अगाः नागाः (सुपसुपा) तैः—नञर्थस्य नञन्तस्य सुपसुपेति समासः (V. notes on नातिप्रमनाः, Sl. 67, C. III.) [V. R. T. of Amarakosa, N. S. P. Ed. P. 317.]

Case-ending.—(1) कामरूपाणाम्—शेषे षष्ठी 'ईशः' इत्यनेन सम्बन्धः (2) नागैः—करणे तृतीया (3) यैः—used for नागैः—करणे तृतीया (4) भिन्नकटैः—Adjective of नागैः (5) अत्याखण्डलविक्रमम् is the adjective of तम् (6) ईशः—Nominative of the verb भेजे।

Synonyms.—(1) नाग—"मतङ्गजो गजो नागः कुञ्जरो वारणः करी इभः स्तम्बेरमः पद्मी—" (2) आखण्डल—(V. मघवन्, Sl. 26, C. I.)

Different meanings.—(1) नाग—(V. Sl. 23, C. IV.) (2) ईश—'ईशः स्वामिनि रुद्रे च स्यादीशा हलदण्डके' (मे.)

Derivation.—(1) ईशः—(Sl. 5—9, C. I. (2) आखण्डलः—आ + खण्ड् (भ्वा. प.) + कलच्—'वृषादिभ्यः कलच्' (उ. १।१०६) (3) विक्रमम्—

(V. Sl. 22, C. IV.) (4) भेजे—भज् + लिट्-ए (5) भिन्नः—भिद् + क्तः (कर्त्तरि) भिन्न means flowing. Ichor flowing from temples (6) उपरुरोध—उप + रुध् + लिट्—णल्।

Conjugation.—(1) रुध् (to obstruct) रुणद्धि, रुन्धे (लट्) रुणद्ध, रुन्धाम् (लोट्) अरुणत्, अरुन्ध (लङ्) रुन्ध्यात्, रुन्धीत (वि. लिङ्) रुध्यात्, रुत्सीष्ट (आ. लिङ्) रुरोध, रुरुधे (लिट्) रोद्धा (लुट्) रोत्स्यति—ते (लृट्) अरोत्स्यत्—त (लृङ्) अरुधत्, अरौत्सीत्, अरुधताम्, अरौद्धाम्, अरुधन्, अरौत्सुः, अरुद्ध (लुङ्) अरोधि (कर्मणि-लुङ्) रोधयति (णिच्—लट्) अरूरुधत् (णिच्-लुङ्) रुरुत्सति—ते (सन्-लट्) रोरुध्यते (यङ् लट्) रुद्धः (क्तः) This is also दिवादि and आत्मनेपदी in the sense of wish, and it is always used with the prefix अनु—अनुरुध्यते (लट्) (2) भज्—(V. Sl. 5, C. IV.)

Geography.—कामरूप—See प्राग्ज्योतिष in IV, 81.

कामरूपेश्वरस्तस्य हेमपीठाधिदेवताम्।
रत्नपुष्पोपहारेण छायामानर्च पादयोः॥ ८४॥

मूलस्य पाठान्तरम्।

रत्नपुष्पोपहारेण—हेमपुष्पोपहारेण Nanda. (foot—notes.)

Prose order.—कामरूपेश्वरः हेमपीठाधिदेवतां तस्य पादयोः छायां रत्नपुष्पोपहारेण आनर्च।

Explanation by use of synonyms.—कामरूपेश्वरः (कामरूपाधिपतिः) हेमपीठाधिदेवतां (कनकमयपादपीठाधिष्ठातृदेवतासदृशीं) तस्य (रघोः) पादयोः (चरणयोः) छायां (कान्तिं) रत्नपुष्पोपहारेण (रत्नरूपकुसुमसमर्पणेन) आनर्च (अर्चयामास)।

Substance. न केवलं कामरूपेश्वरः रघोः सकाशात् पराभवं मेने, अपितु रघुं स्वकीयसिंहासनम् आरोप्य स्वाभीष्टदेवमिव तं पूजयामास। हेममयपीठे स्थितयोस्तस्य चरणयोः रत्नानि अञ्जलिपरिमितानि स ददौ।

Change of voice.—कामरूपेश्वरेण हेमपीठाधिदेवता......छाया... आनर्चे।

Sanjivani.—कामरूपेश्वर इति (कामरूपेश्वरः) हेमपीठस्य अधिदेवतां [हेमपीठाधिदेवतां] (तस्य) पदोः (पादयोः (छायां) कनकमयपादपीठव्यापिनीं कान्तिं रत्नानि एव पुष्पाणि तेषाम् उपहारेण. समर्पणेन [रत्नपुष्पोपहारेण] (आनर्च) अर्चयामास॥ ८४॥

Sanjivani Explained.

हेमपीठाधिदेवता—The idea is this: The feet of Raghu were placed on a golden stool. Their splendour was reflected upon it. The poet represents the image of the foot as its presiding goddess.

Bengali.—কামরূপাধিপতি স্বর্ণময়পীঠাধিষ্ঠাত্রী দেবতার ন্যায় তাঁহার পদযুগলের ছায়াকে রত্নকুসুমোপহারদ্বারা অর্চনা করিলেন॥ ৮৪॥

English rendering.—The lord of the Kamarupas worshipped with offerings of gems as flowers, the sheen of Raghu's feet, which was, as it were, the presiding divinity of the golden foot-stool.—84.

Grammatical notes, &c., &c.

Sama'sa.—(1) कामरूपाणाम् ईश्वरः कामरूपेश्वरः (षष्ठीतत्) [For the Samasa of कामरूप V. Sl. 83] (2) हेममयः पीठः हेमपीठः (शाकपार्थिवादित्वात् मध्यपदलोपी कर्मधा) अधिष्ठात्री देवता अधिदेवता (प्रादि) हेमपीठस्य अधिदेवता हेमपीठाधिदेवता (षष्ठीतत्) ताम् (3) रत्नानि एव पुष्पाणि रत्नपुष्पाणि (रूपककर्मधा) तेषाम् उपहारः रत्नपुष्पोपहारः (षष्ठीतत्) तेन।

Case-ending.—(1) तस्य—शेषे षष्ठी 'पादयोः' इत्यनेन सम्बन्धः (2) हेमपीठाधिदेवताम्—विधेयकर्मपदम्, 'छायाम्' इत्युद्देश्यकर्मपदस्य (3) पादयोः—शेषे षष्ठी 'छायाम्' इत्यनेन सम्बन्धः (4) रत्नपुष्पोपहारेण—करणे तृतीया।

Synonyms.—(1) हेमन्—स्वर्णं सुवर्णं कनकं हिरण्यं हेमहाटकम्। तपनीयं शातकुम्भं गाङ्गेयं भर्म कर्बुरम्॥ चामीकरं जातरूपं महारजतकाञ्चने। रुक्मं कार्तस्वरं जाम्बूनदमष्टापदोऽस्त्रियाम्॥' (अ.)

Different meanings.—(1) पाद—'पादौ ब्रध्नतुरीयांशौ शैलप्रत्यन्तपर्वते । चरणं च मयूखेच ।' (मे.) (2) ईश्वर—(V. Sl. 1. C. I. (3) छाया —(V. Sl. 5, c. IV.)

Derivation.—(1)ईश्वरः—(V. Sl. 1, C. I.) (2) हेम—हि + मनिन् (उ. ४।१४५ ।) (3) पीठः—पिठ + घञ् (अधिकरणे) बाहुलकाद्दीर्घः or, पी(ङ्) + ठक्—बाहुलकात्—"विष्टरः पीठमस्त्रियाम्" इति त्रिकाण्डशेषः । The word पीठ is used both in the masculine and the neuter genders. But according to Amara it is only neuter. "पीठमासनम्" (4) देवता—देव + तल् (स्वार्थे) (5) रत्नम्—V. Sl. 65, C. I.) (6) उपहारेण—उप + हृ + घञ् (कर्मणि, 3rd c. s.) (7) छायाम्—V. Sl. 5, C. IV. (8) आनर्च—अर्च + लिट्—णल् (9) पादयोः—पद + घञ् (करणे, 6th c.d.)

Conjugation.—(1) अर्च्—(V. Sl. 21. C. II.)

इति जित्वा दिशो जिष्णुर्न्यवर्त्तत रथोद्धतम् ।
रजो विश्रामयन् राज्ञां छत्रशून्येषुमौलिषु ॥ ८५ ॥

मूलस्य पाठान्तरम् । विश्रामयन्—विश्रमयन् (चा. व.)

Prose order.—जिष्णुः इति दिशः जित्वा रथोद्धतं रजः राज्ञां छत्रशून्येषु मौलिषु विश्रामयन् न्यवर्त्तत । Mallinátha places 'राज्ञाम्' after 'छत्रशून्येषु' ।

Explanation by use of synonyms.—जिष्णुः (जयशीलो रघुः) इति (अनेन प्रकारेण) दिशः (दिङ्मण्डलं) जित्वा (विजित्य) रथोद्धतं (स्यन्दनोद्धतं) रजः (धूलिपटलं) राज्ञां (नृपाणां) छत्रशून्येषु (आतपत्रहीनेषु) मौलिषु (किरीटेषु) विश्रामयन् (संक्रमयन्) न्यवर्त्तत (राजधानीं प्रतिनिवृत्तः)।

Substance.—जयशीलः रघुरनेन प्रकारेण दिङ्मण्डलं विजिग्ये। सर्वे नृपाः पराभूतत्वात् निश्छत्रा बभूवुः । रघुरपि एकच्छत्राधिपो बभूव । अतः कविराह यत् स्वीयस्यन्दनोद्धतधूलिपटलैः पराभूतानां भूपानां छत्रशून्यानि किरीटान्याच्छाद्य स स्वराज्यं प्रत्यावर्त्तत।

Change of voice.—जिष्णुना...विश्रामयता न्यवृत्यत।

Sanjivani.—इत्थेति। (जिष्णुः) जयशील:—"ग्लाजिस्थश्च ग्स्नुः" (३।२। १२९ पा. ३११९ सि.) इति ग्स्नु प्रत्ययः—सः रघुः (इति) इत्थं (दिशः जित्वा) —रथैः उद्धतं [रथोद्धतं] (रजः छत्रशून्येषु) रघोरेकच्छत्रकत्वादिति भावः— (राज्ञां) (मौलिषु) किरीटेषु—"मौलिः किरीटे धम्मिल्ले चूडाकङ्केलिमूर्द्धजे" इति हैमः—(विश्रामयन्) संक्रामयन् इत्यर्थ (न्यवर्त्तत) निवृत्तः॥ ८५॥

Sanjivani Explained.

"मौलिः * * "—मौलि means किरीट (diadem), धम्मिल्ल (chiguon), चूडा (tuft of hair), कङ्केलि or अशोकवृक्ष (*Saraca Indica*) मूर्द्धज (hair.)

"ग्लाजिस्थश्च ग्स्नुः"—ग्स्नु affixed in कर्त्तृवाच्य to the roots ग्ला, जि, as well as स्था। E.g. ग्लास्नु, जिष्णु, स्थास्नु।

Bengali—জয়শীল রঘু এইরূপে দিক্‌সকল জয় করিয়া সাম্যন্তো-চ্ছত্রশিখরগণের রাজগণের ছত্রশূন্যমুকুটে সংস্থাপন করিতে করিতে প্রতিনিবৃত্ত হইলেন ॥৮৫॥

English rendering.—Having conquered (all) the points of the compass, the victor returned causing the dust raised by this cars to rest upon the heads bared of umbrella of the (vanquished) kings.—85.

Grammatical notes, &c., &c.

Samasa.—(1) रथैः उद्धतं रथोद्धतम् (तृतीयातत्), (2) छत्रैः शून्याः अछत्रशून्याः (तृतीयातत) तेषु।

Case-ending.—(1) इति—अव्ययं, क्रियाविशेषणम् (2) राज्ञाम्—शेषे षष्ठी—'मौलिषु' इत्यनेन सम्बन्धः (3) छत्रशून्येषु—Adjective of मौलिषु (4) मौलिषु—आधाराधिकरणे सप्तमी (5) रजः—णिच्प्रत्ययान्त 'विश्रामयन्' शब्दयोगे कर्म (6) रथोद्धतम् is the adjective of रजः (7) दिशः is the object of जित्वा (8) जिष्णुः—Here it is used as nominative, at though it is adjective—न्यवर्त्तत is its finite uerb.

Different meanings.—(1) मौलि—'मौलिःकिरीटे धम्मिल्ले चूडायां न नपुंसकम्। अशोकपादपे पुंसि।' (मे.) Also see Sanjivani. In the new editsons of मेदिनीकोष, we see this reading—'नाऽशोकद्रौ स्त्रियां भमौ।' (V. foot note of R. T. of Amarakos'a, N. S. P. Ed. P. 496.)

Derivation.—(1) जित्वा—जि+क्त्वाच् (2) जिष्णुः—जि+ग्स्नु; (शीलार्थे) (3) न्यवर्त्तत—नि+वृत्+लङ्—त (4) उद्धतम्—उत्+हन्+क्तः (कर्मणि, 2nd c. s.) The न् of हन् drops by the rule:—"अनुदात्तोपदेश—" (V. notes on गति, Sl. 4, C. I.) (5) विश्रामयन्—वि+श्रम्+णिच्+शतृ (1st c. s.) The alternative form is विश्रमयन्—(V. notes on विश्रामय, Sl. 54, C. I.) शतृ in विश्रामयन् is used in अतीतकाल—"धातु सम्बन्धे प्रत्ययाः" (V. notes on कुर्वन्, Sl. 29, C. IV.) (6) छत्रम्—(V. Sl. 16, C. IV.) (7) मौलिषु—मूलस्यादूरे भवः इति मूल+इञ् (7th c. p.)—सुतङ्गमादित्वात् (V. ४।२।८०। पा. १२८२ सि.) or मूलस्यापत्यम्—मूल+इञ् "अत इञ्" (४।१।९५। पा. १०९५ सि.) [इञ् is added to an अदन्त word to mean 'its अपत्य']

The word मौलि is both feminine and masculine after मेदिनी and रभस, but after अमर it is only masculine.

Conjugation.—(1) श्रम्—(V. Sl. 54, C. I.) (2) जि—(V. I, 5-9.)

स विश्वजितमाजह्रे यज्ञं सर्वस्वदक्षिणम्।
आदानं हि विसर्गाय सतां वारिमुचामिव॥ ८६॥

मूलस्य पाठान्तरम्। आजह्रे—आरेभे (चा. व.)

Prose order.—सः सर्वस्वदक्षिणं विश्वजितं यज्ञम् आजह्रे, सतां वारिमुचाम् इव आदानं विसर्गाय हि।

Explanation by use of synonyms.—सः (रघुः) सर्वस्वदक्षिणं (निखिलवित्तदक्षिणं) विश्वजितं यज्ञं (स्वनामख्यातमध्वरम्) आजह्रे (कृतवान्) सतां (साधूनां) वारिमुचामिव (मेघानामिव) आदानम् (अर्जनं) विसर्गाय (सत्पात्रविनियोगाय) हि (निश्चितं) भवति।

Substance.—निखिलं दिङ्मण्डलं विजित्य रघुः विश्वविजयि कर्मण्यं विश्वजितं नाम यज्ञं विदधे। तत्र स दिग्विजयादर्जितानि यावन्ति वित्तानि सत्पात्रेभ्यो ददौ। ननु तर्हि किमर्थं वित्तमर्जितं तदुपमया व्यनक्ति। यथा मेघा जलदानार्थमेव समन्ताज्जलानि गृह्णन्ति, तथा स रघुवंश्यं विधाय सत्पात्रविनियोगार्थमेव निखिलदिङ्मण्डलात् धनान्याहृतवान्।

Change of voice.—तेन सर्वस्वदक्षिणः विश्वजित् यज्ञः...आदानेन ...(भूयते)

Sanjivani.—स इति। (सः) रघुः, सर्वस्वं दक्षिणा यस्य तं (सर्वस्वदक्षिणं)—"विश्वजित् सर्वस्वदक्षिणः" इति श्रुतेः—(विश्वजितं) नाम (यज्ञम्) (आजह्रे) कृतवान् इत्यर्थः। युक्तञ्चैतदित्याह—(सतां) साधूनां (वारिमुचां) मेघानाम् (इव) (आदानम्) अर्जनं (विसर्गाय) त्यागाय (हि) पात्रविनियोगाय इत्यर्थः॥ ८६॥

Sanjivani Explained.

विश्वजित् सर्व्वस्वदक्षिणः—in विश्वजित् sacrifice, the sacrificer should give away everything he has.

Bengali.—তিনি বিশ্বজিৎ নামক যজ্ঞ সম্পাদনান্তে (ভুজবলোপার্জ্জিত) নিখিল ধন দক্ষিণাস্বরূপে দান করিলেন। মেঘসমূহের ন্যায় সজ্জনগণের ধনোপার্জ্জন দানের জন্যই হয়। ৮৬।

English rendering.—He (then) made arrangements for the *Viswajit* sacrifice, the final present whereof consists of the (sacrificer's) whole wealth. Verily, of the good as of the cloud's acquisition is for bestowal.—85.

Gmmatical notes, &c. &c.

Sámása.—(1) विश्वं जयति इति विश्वजित् (उपपदतत्) तम् (2) सर्वं

स्वं सर्वस्वम् (कधर्मा) तत् दक्षिणा यस्य वा यस्मिन् स सर्वस्वदक्षिणः (बहु) तम् (3) वारि मुञ्चन्ति इति वारिमुचः (उपपदतत्) तेषाम्।

Case-ending.—(1) विसर्गाय—"तुमर्थाच्च भाववचनात्" इति चतुर्थी—विसृष्टमित्यर्थः (V. I, 1. Samása) or 'क्लृपि सम्पद्यमाने च' (१।४।४४। पा. वा. ५८० सि. ,वा.) इति वार्त्तिकसूत्रात् क्लृप्यर्थक मधातुयोगे सम्पद्यमानात् विसर्गाच्चतुर्थी। [When transformation is signified and a root having the sense of क्लृप् is used, the word denoting the transformed object, admits चतुर्थी, as in भक्तिर्ज्ञानाय कल्पते—ज्ञान, the transformed object is in चतुर्थी] (2) सताम्—कृद्योगेऽनुक्ते कर्त्तरि षष्ठी—ल्युट् is a कृत् affix which is added to the root दा of आदानम् (3) वारिमुचाम्—विधेय and उपमान पद 'सताम्' is its उद्देश्य and उपमेय पद—कृद्योगेऽनुक्ते कर्त्तरि षष्ठी (4) आदानम्—nominative, to the verb 'भवति' (understood) (5) सर्वस्वदक्षिणम्—Adjective of यज्ञम् (6) विश्वजितम्—Adjective of यज्ञम् which is the object of आजह्रे (7) सः—Nominative, to the verb आजह्रे।

Synonyms.—(1) यज्ञ—(V. अध्वर, Sl. 31, C. I.)

Different meanings.—(1) स्व—'स्वः स्यात्पुंस्यात्मनि ज्ञातौ त्रिष्वात्मीयेऽस्त्रियां धने' (मे.) (2) यज्ञ—(I, 26)

Derivation—यज्ञम्—यज् + नङ् (करणे, अधिकरणे वा, 2nd c. s.) (2) दक्षिणा—(V. Sl. 31, C. I.) (3) विश्वजितम्—विश्व + जि + क्विप् (कर्त्तरि, 2nd c. s.) तुक् (त्) comes after the short vowel of the root जि by the rule—"ह्रस्वस्य पिति कृति तुक्" (V. notes on जगतः, Sl. 1, C. I.) (4) आजह्रे—आ + हृ + लिट्—ए। Here the result of the action goes to the agent—कर्त्रभिप्राये क्रियाफले आत्मनेपदम्। (5) आदानम्—आ + दा + ल्युट् (भावे) (6) विसर्गाय—वि + सृज् + घञ् (भावे, 4th c. s.) The root सृज् when allied with the prefixes वि and

उत्, indicates the sense of त्याग—in other place it is used in the sense of 'doing' (7) सताम्—अस् + शतृ (6th c. p.) (8) वारिमुचाम्—वारि + मुच + क्किप् (6th c. p.)

Conjugation.—(1) ह—V. Sl. 39, C. III.

Force of हि is अवधारण—'हि हेतावधारणे' (अ.)

Rhetoric.—The figure of speech is अर्थान्तरन्यास। The general stacment of the second line asserts the special one of the first. Raghu having conquered the whole of India earned a hoard of wealth, and he spent the whole of it in the sacrifice विश्वजित्। Why did he spend all his earnings? The reason which the poet assigns is that the good never earn for amassing but for giving away the earnings to the deserved.

Remark.—विश्वजित् is the sacrifice which the conquerer of the Earth celebrates as राजसूय is performed by the suzerain.

सत्रान्ते सचिवसखः पुरस्क्रियाभि-
गुर्वीभिः शमितपराजयव्यलोकान्।
काकुत्स्थश्चिरविरहोत्सुकावरोधान्
राजन्यान् स्वपुरनिवृत्तयेऽनुमेने ॥ ८७ ॥

Prose order.—काकुत्स्थः सत्रान्ते सचिवसखः (सन्) गुर्वीभिः पुरस्क्रियाभिः शमितपराजयव्यलीकान् चिरविरहोत्सुकावरोधान् राजन्यान् स्वपुरनिवृत्तये अनुमेने।

Explanation by use of Synonyms.—काकुत्स्थः (ककुत्स्थवंशीयरघुः) सत्रान्ते (यज्ञावसाने) सचिवसखः (अमात्यानुचरः सन्) गुर्वीभिः (महतीभिः) पुरस्क्रियाभिः (पूजाभिः) शमितपराजयव्यलीकान् (विनीतपराजयदुःखान्) चिरविरहोत्सुकावरोधान् (दीर्घविच्छेदोत्कण्ठितदारान्) राजन्यान् (क्षत्रियभूपतीन्) स्वपुरनिवृत्तये (स्वराज्यप्रतिगमनाय) अनुमेने (आज्ञापयामास)।

Substance.—ककुत्स्थवंशीयरघुः विश्वजिदयज्ञसाधनप्रवृत्तः सन् समरपराजितान् क्षत्रियराजान् सर्वान् स्वराजधान्याम् आजुहाव। तद्यज्ञसम्पादने सुविपुलकालः अतीयाय। अतएव तत्र उपस्थितानां राज्ञामपि दीर्घकालावस्थानात् तेषामन्तःपुररमण्यस्तदर्थं भृशमुत्कण्ठिता जाताः। रघुः यज्ञावसाने स्वराज्यप्रतिगमनाय तान् आज्ञापयामास। स च अमात्यसहितः सन् विपुलसत्कारैस्तान् एवं सम्भावयामास यत् ते परमाह्लादिता बभूवुः। एवम्भूतस्य सम्राजोऽधीनता न क्लेशकरीति मत्वा ते पराजयजनितं दुःखं च जहुः। रघोरपि राज्यं दृढीभूतम्।

Change of voice.—काकुत्स्थेन...सचिवसखेन......शमितपराजयव्यलीकाः चिरविरहोत्सुकावरोधाः राजन्याः...अनुमेनिरे।

Sanjivani.—सत्रान्त इति। (काकुत्स्थः) रघुः (सत्रान्ते) यज्ञान्ते—"सत्रमाच्छादने यज्ञे सदादाने वनेऽपि च" इत्यमरः (Col. p. 351) सचिवानाम्, आमात्यानां सखा इति (सचिवसखः) सन्—"सचिवौ भृतकेऽमात्ये" इति हैमः—तेषामत्यन्तानुसरणद्योतनार्थं राज्ञः सखित्वव्यपदेशः—"राजाहःसखिभ्यष्टच्" (५।४।९१। पा. ७८८ सि.) (गुर्वीभिः) महतीभिः—"गुरुर्महत्याङ्गिरसे पित्रादौ धर्मदेशके" इति हैमः (पुरस्क्रियाभिः) पूजाभिः—शमितं पराजयेन व्यलीकं दुःखं वैलक्ष्यं वा येषां तान् [शमितपराजयव्यलीकान्] "दुःखे वैलक्ष्ये व्यलीकम्" इति यादवः—चिरविरहेण उत्सुकाः उत्कण्ठिताः, अवरोधाः, अन्तः—पुराङ्गनाः, येषां ताम् [चिरविरहोत्सुकावरोधान्] राज्ञः अपत्यानि राजन्याः, क्षत्रियाः तान् [राजन्यान्]—"राजश्वशुराद्यत्" (४।१।१३७ पा. ११५२ सि.) इति अपत्यार्थे यत् प्रत्ययः—"मूर्द्धाभिषिक्तो राजन्यो बाहुजः क्षत्रियो विराट्" इत्यमरः—(Col. p. 191) स्वपुरं प्रति निवृत्त्यै, प्रतिगमनाय [स्वपुरनिवृत्त्यै] (अनुमेने) अनुज्ञातवान् ॥ ८७ ॥

Sanjivani Explained.

"सत्रमाच्छादने * * वनेऽपि च"—सत्र means आच्छादन (covering) यज्ञ (sacrifice), सदादान (daily munifisence), वन (forest).

"सचिवौ भृतकेऽमात्ये"—सचिव means भृतक (servant), as well as अमात्य (minister). तेषामत्यन्तानुसरणद्योतनार्थं राज्ञः सखित्वव्यपदेशः—

King is called सखि of ministers. Mállinátha seems it improper. So he defends it. He says that king is represented as the friend of ministers to suggest that ministers attended upon him constantly.

"गुरुर्महत्याङ्गिरसे * * * धर्मदेशकी"—गुरु means महत् (great), आङ्गिरस् (Vribaspati, the son of Angiras), पित्रादि (*Pirtis*) and others), धर्मदेशक (teacher of religion).

"दुःखे वैलक्ष्ये व्यलीकम्"—व्यलीक means दुःख (sorrow) and व्यलीक (reverse).

"मूर्द्धाभिषिक्तः * * * विराट्"—मूर्द्धाभिषिक्त (lit. one who is capable of being inaugurated), राजन्य, बाहुज, क्षत्रिय, and विराज् are synonymous.

"राज्ञाहः सखिभ्यश्च" (V. Exp. under the notes on मह्विर्षसख, Sl. 48. C. I.)

"राजश्वशुराद्यत्"—यत् is added to राजन् and श्वशुर to mean अपत्य। But Várttika lays down that राजन् admits यत् in the sense of जाति। To mean the caste Kshatriya, राजन् gets यत् and yields the form राजन्य। श्वशुर get यत् to mean श्वशुरस्य अपत्यं, and adopts the form श्वशुर्य। Why does not न् of राजन् drop when यत् is added to it? The Sutra "ये चाभावकर्मणोः" (६।४।१६८ पा. १७५ सि.) enjoins that अन of a word does not elide when a nominal affix beginning is added to it provided the affix does not indicate भाव (status) or कर्म (action). Thus to mean the status or act of king the form will be राज्य and not राजन्य। राजन्य means 'one born of Kshatriya father and mother; राजन् means 'one born of क्षत्रिय father and Vaisya or Sudra mother.'

Bengali.—কাকুৎস্থরঘু অমাত্যবর্গের সহিত (পরাজিত ক্ষত্রিয় রাজগণের) বিপুলসংকার দ্বারা পরাজয়জাত দুঃখ প্রশমিত করিলেন। তাহাদিগের দীর্ঘকাল বিচ্ছেদহেতু তদন্তঃপুররমণীবৃন্দ অত্যুৎকণ্ঠিতা হইয়াছিল। অতএব যজ্ঞাবসানে রঘু সেই ক্ষত্রিয় ভূপতিগণকে স্বরাজ্য প্রতিগমনের জন্য আদেশ করিলেন॥ ৮৭॥

English rendering.—Upon the completion of the sacri-

fice that descendant of Kakutstha, with ministers for his assistants permitted the (vassals) kings whose mortification due to defeat was allayed by high honours (showed unto them by the monarch) and whose wives were anxious on account of their long absence to repair to their (respective) capitals.—87.

Grammatical notes &c., &c.

Samasa.—(१) सवस्य अन्तः सवान्तः (षष्ठीतत्) तस्मिन् (2) सचिवानां सखा सचिवसखः (षष्ठीतत्) राजाहः सखिभ्यष्टच् " The faminine form of सचिवसख is सचिवसखी—टित्त्वात् ङीष् [The affixes whose ट् is elided take ङीष् in feminine, here टच् is the affix, whose ट् and च् are elided] (3) विगतम् अलीकं व्यलीकम् (प्रादि) (V. R. T. of Amarkosá, N. S. P. Ed. P. 460) पराजयजं व्यलीकं पराजयव्यलीकम् (शाकपार्थिवादित्वात् मध्यपदलोपी कर्मधा) or, पराजयेन हेतुना व्यलीकम् (तृतीयातत्) शमितं पराजयव्यलीकं येषां ते शमितपराजयव्यलीकाः (बहु) तान् (4) चिरं विरहः चिरविरहः (द्वितीयातत्) तेन उत्सुकाः चिरविरहोत्सुकाः (तृतीयातत्) तादृशाः अवरोधाः (अन्तःपुराङ्गनाः) येषां ते चिरविरहोत्सुकावरोधाः (बहु) तान् (5) स्वस्य पुरं स्वपुरम् (षष्ठीतत्) तस्मै निवृत्तिः स्वपुरनिवृत्तिः (चतुर्थीतत्) तस्यै। The alternative form is स्वपुरनिवृत्तये।

Case-ending.—(1) सवान्ते—भावाधिकरणे सप्तमी or कालाधिकरणे। (2) पुरस्क्रियाभिः—करणे तृतीया (3) गुर्वीभिः—Adjective of पुरस्क्रियाभि. (4) शमित...व्यलीकान् and चिरविरहोत्सुकावरोधान् are the adjectives of राजन्यान् (5) स्वपुरनिवृत्तये—तादर्थ्ये चतुर्थी (6) राजन्यान्—Object of अनुमेने (7) काकुत्स्थः—Nominative, to the verb अनुमेने (8) सचिवसखः is the adjectives of काकुत्स्थः।

Synonyms.—(1) अवरोध—(V. Sl. 68, C. IV.) (2) राजन्य—(V. Sanjivani.)

Differement meanings.—(1) अवरोध—(V. Sl. 68, C. IV.) (2) सव—(V. Sanjivani.) (3) व्यलीक—(V. Sanjivani.)

Derivation.—(1) सक्तम्—सञ्ज (भ्वदम्भः, सरादिः आत्म०) + घञ् (कर्मणि) सज्यते, सक्त्यते इति सक्तम् (2) पुरस्क्रियाभिः—पुरस् + कृ + श + टाप् (3rd c. p.) (3) शमितम्—शम् + णिच् + क्तः (कर्मणि)। The alternative form is शान्तम्—"वा दान्तशान्तपूर्णदस्तस्पष्टच्छन्नज्ञप्ताः" (७।२।२७। पा. ३०६८ सि.) [दान्त, शान्त, पूर्ण, दस्त, स्पष्ट, छन्न and ज्ञप्त are optionally admitted for दमित, शमित, पूरित, दासित, स्पाशित, छादित and ज्ञपित respectively. The former are as much causative in form as the latter, but are anomalous.] (4) पराजयः—परा + जि + अच् (5) व्यलीकम्—वि + अल् + कीकन् 'अलीकादयश्च' (उ. ४।२५) (6) काकुत्स्थ—(V. Sl. 41, C. IV.) (7) उत्सुकाः—V. Sl. 22, C. II.) (8 अवरोधाः—(V. Sl. 68, C. IV.) (9) राजन्यान्—राजन् + यत् (अपत्यार्थे, 2nd c. p.) "राजश्वशराद् यत्" (V. Sanjivani Explained.) (10) निर्वृत्ये—नि + वृत् + क्तिन् (भावे, 4th c. s.) The alternative form is निवृत्तैः (11) अनुमेने—अनु + मन् + लिट्—ए।

Conjugation.—(1) मन्—(V. Sl. 2, C. I. or, Sl. 65, C. III) The allusion in the name of काकुत्स्थ—V. Sl. 41, C. IV.)

Remark.—(1) One of the Calcutta editors takes the word 'अवरोध' (harem) as a feminine. Here is his derivation 'अवरुध्यन्ते एताः अवरोधाः महिष्यः'। It is a blunder. Though implying the word is really a masculine like दार &c., Amara has "—शुद्धान्तश्चावरोधश्च।" Medini says "अवरोधस्तिरोधाने राजदारेषु तद्गृहे" In the Sloka 32, C. I. Kálidása uses it as masculine.

Scanning—This Sloka is in the metre प्रहर्षिणी—(V. Sl. 95, C. I.)

Mr. Nandargikar points out that Sumati and others read after this the following vsrse :—

यश्चान्तितमवभृथाभिषिक्तपूतं सत्कारैः शमितपराजयव्यलीकाः।
आमन्त्र्य त्रितमुकवनितानिवृत्तचित्ताः स्वानि स्वान्यवनिभुजः पुराणि जग्मुः ॥

It is a weak repetition of the present verse.

ते रेखाध्वजकुलिशातपत्रचिह्नं
सम्राजश्चरणयुगं प्रसादलभ्यम्।
प्रस्थानप्रणतिभिरङ्गुलीषु चक्रु-
र्मौलिस्रक्च्युतमकरन्दरेणुगौरम्॥ ८८॥

इति श्रीरघुवंशे महाकाव्ये कालिदासकृतौ रघुदिग्विजयो नाम चतुर्थः सर्गः।

Prose order—ते रेखाध्वजकुलिशातपत्रचिह्नं प्रसादलभ्यं सम्राजः चरणयुगं प्रस्थानप्रणतिभिः अङ्गुलीषु मौलिस्रक्च्युतमकरन्दरेणुगौरं चक्रुः।

Explanation by use of synonyms—ते (राजन्याः) रेखाध्वजकुलिशातपत्रचिह्नं (रेखारूपध्वजवज्रच्छत्रचिह्नितं) प्रसादलभ्यम् (अनुग्रहलभ्यं) सम्राजः (सार्वभौमस्य रघोः) चरणयुगं (पादद्वयं) प्रस्थानप्रणतिभिः (प्रयाणकालनमस्कारैः) अङ्गुलीषु (पादशाखासु) मौलिस्रक्च्युतमकरन्दरेणुगौरं (किरीटमालाभ्रष्टपुष्परसपरागगौरवर्णं) चक्रुः (विदधुः)।

Substance—ते राजन्याः स्वपुरप्रतिगमनकाले सार्वभौमस्य रघोः ध्वजवज्रच्छत्रचिह्निते चरणद्वन्द्वे प्रणतिं चक्रुः। तादृशं चरणयुगलम् अनुग्रहं विना केनापि लब्धुं न शक्यते। तत्र नृपतिः सम्राट् प्रसन्नो बभूव, तत्तेषामिदं महाभाग्यमभूत्। प्रणतिसमये तेषां किरीटस्थितमालाभ्यः पुष्परसाः परागाश्च रघोरङ्गुलीषु निपतिताः। तेन तत्पदद्वयं गौरवर्णं जातम्।

Change of voice—तैः ... चक्रे।

Sanjivani—स इति। (ते राजानः, रेखा एव ध्वजाश्च कुलिशानि च आतपत्राणि च, ध्वजाद्याकाररेखाः इत्यर्थः चिह्नानि यस्य तत् तथोक्तं [रेखाध्वजकुलिशातपत्रचिह्नं] प्रसादेन एव लभ्यं (प्रसादलभ्यं। सम्राजः) सार्वभौमस्य रघोः (चरणयुगं) प्रस्थाने, प्रयाणसमये याः प्रणतयः, नमस्काराः, ताभिः करणैः [प्रस्थानप्रणतिभिः] (अङ्गुलीषु) मौलिषु, केशबन्धेषु, याः स्रजः, माल्यानि; ताभ्यः च्युतैः मकरन्दैः, पुष्परसैः!—"मकरन्दः पुष्परसः" इत्यमरः। (Cole. p. 80) रेणुभिः, परागैश्च—"परागः सुमनोरजः" इत्यमरः। (Cole. p. 90) गौरं, गौरवर्णं [मौलिस्रक्च्युतमकरन्दरेणुगौरं] (चक्रुः) ॥८८॥

इति श्रीमहामहोपाध्याय-कोलाचलमल्लिनाथसूरिविरचितायां रघुवंशटीकायां सञ्जीवनीसमाख्यायां चतुर्थः सर्गः।

Sanjivani Expiained.

ध्वजाद्याकाररेखाः—Great men have peculier lines on their-sole. These are called by the palmists signs of banner, thunderbolt and umbrella &c. Theyprognosticate the greatness of the man who bears those signs. Indeed, Vishnu is represented as having the signs of banner, thunderbolt &c.

"मकरन्दः पुष्परसः"—मकरन्दः and पुष्परस mean honey.

"परागः सुमनोरजः"—पराग means the pollens of flowers.

Bengali.—সেই নৃপতিবৃন্দ, ধ্বজবজ্রচ্ছত্রাদ্যাকাররেখাচিহ্নিত প্রসাদলভ্য সম্রাট্ (রঘুর) চরণযুগল, প্রস্থানকালীন প্রণামহেতু কিরীট-স্থিতমালাচ্যুতপুষ্পরস এবং পরাগসমূহ দ্বারা গৌরবর্ণ করিলেন।৮৮।

English rendering.—They rendered, by their parting prostrations the pair of the emperor's feet, obtainable through favour (alone) and marked with lines representing flag, thunder-bolt and umbrella, red at the toes, with the honey and pollens dropped from the chaplets on their heads.—88.

Grammatical notes, &c. &c.

Sama'sa.—(1) कुलिनं (पर्वतं) श्यन्ति (नाशयन्ति) इति कुलिशानि (उपपदत) आतपात् त्रायन्ते इति आतपत्राणि (उपपदतत्) ध्वजाश्च कुलिशानि च आतपत्राणि च ध्वजकुलिशातपत्राणि (द्वन्द्वः) रेखाः एव ध्वजकुलिशातपत्राणि (रेखाध्वजकुलिशातपत्राणि (रूपककर्मधा) तानि चिह्नानि यस्य वा यस्मिन् तत् रेखाध्वजकुलिशातपत्रचिह्नम् (बहु) (2) सम्यक् राजते (शोभते) छत्र-चामरादिभिरिति सम्राट् (उपपदतत्) तस्य (3) चरणयोः युगं चरणयुगम् (षष्ठीतत्) (4) प्रसादेन लभ्यं प्रसादलभ्यम् (तृतीयातत्) (5) प्रकर्षेण नतयः प्रणतयः (प्रादिः) प्रस्थाने (प्रस्थानकाले) याः प्रणतयः प्रस्थानप्रणतयः (सप्तमीतत्) ताभिः (6) मौलिस्थिताः स्रजः मौलिस्रजः (शाकपार्थिवादित्वात् मध्यपदलोपी कर्मधा) or मौलौ याः स्रजः मौलिस्रजः (सप्तमीतत्) तासाम्

द्विर्नान्ति) इति करः—मनुष्याणां करः मकरः (षष्ठीतत्) मकरमपि यन्ति—कामजनकत्वात् (खण्डयन्ति) धातूनां बहुविधार्थत्वात्—उन्मदयन्ति इति मकरन्दाः (उपपदतत्) The floral juice surpasses even मकर, who is the sign of काम। So it is called मकरन्द। Or मकरमपि अन्दन्ति (बध्नन्ति) (V. R. T. of Amarakos'a, N. S. P. Ed. pp. 144 and 153.) मकरन्दाश्च रेणवश्च मकरन्दरेणवः (द्वन्द्वः) Although रेणु has fewer vowels than those of मकरन्द yet it has been placed after. It is a violation of the rule—"अल्पाच्तरम्" (V. notes on पार्वतीपरमेश्वरौ, Sl. 1, C. I.)। The followers of Pánini justify such violation thus. Panini has the Sutra "समुद्राभ्राद्घः" (४।४।११८ पा ४६४ सि.) Here समुद्राभ्र is a द्वन्द्व compound. The form should have been अभ्रसमुद्र। Yet Pánini uses समुद्राभ्र। Hereby he suggests that the rules about पूर्वनिपातन is sometimes not observed. This is a ज्ञापकसूत्र। पद्मनाभ says "सर्वमेतत् प्रायिकं व्यभिचारदर्शनात्—उदूखलमुसले, चित्ररथबाह्लीकौ"। मुसल and बाह्लीक are of fewer vowels than those of उदूखल and चित्ररथ. still they are placed after. मौलिस्रग्भ्यः च्युताः मकरन्दरेणवः. मौलिस्रक्च्युतमकरन्दरेणवः (पञ्चमीतत्) तैः or ताभिः गौरं मौलिस्रक्च्युतमकरन्दरेणुगौरम् (तृतीयातत) तत्।

Case-ending.—(1) अङ्गुलीषु—आधाराधिकरणे सप्तमी (2) प्रध्यानप्रणतिभिः—हेतौ तृतीया। Mallinátha says करणे। The bowing of the kings is the cause of making the feet of Raghu yellow by the floral juice and the pollens of the garlands that were in the king's heads. (3) रेखाध्वज...चिह्नम्, प्रसादलभ्यम् and मौलि...गौरम् are all the adjectives of चरणयुगम् (4) ते—Nominative, to the verb चक्रुः (5) चरणयुगम्—कर्म of the transitive verb चक्रुः।

Synonyms.—(1) रेणु—(V. Sl. 2, C. II. (2) ध्वज—(V. 74, C. II.) (3) कुलिश—(V. अशनि, Sl. 56, C. III.)

Different meanings—(1) चरण—'चरणोऽस्त्रीबह्वृचाद्ये गोत्रे पदेऽपि च । भ्रमणे भक्षणे चापि नपुंसक उदाहृतः ॥' (मे.) (2) कुलिश—(V. Sl. 50, C. III.) (3) ध्वज—(V. Sl. 56, C. III.) (4) मौलि—(V. Sl. 85, C. IV.) (5) रेणु—V. Sl. 47, C. IV.)

Derivation.—(1) ध्वज—V. Sl. 56, C. IV. (2) कुलिशम्—(V. Sl. 68, C. IV.) (3) आतपत्रम्—(V. Sl. 5, C. IV.) (4) सम्राट्—(V. साम्राज्य, Sl. 5, C. IV.) (5 चरणम्—चर् + ल्युट् (करणे) In the sense of पाद it is masculine and neuter both (V. on different meanings. (6) प्रसादः—प्र + सद् + घञ् (भावे) favo. The form प्रासाद means palace. (See II, 68 (7) लभ्यम्—लभ् + यत् (कर्मणि) (8) प्रणतिभिः—प्र + नम् + क्तिन् (3rd c. p.) (9) अङ्गुली—V. Sl. 25, C. III.) The alternative form is अङ्गुलि । (V. notes on प्रतिपत्तये, Sl. 1, C. I.) (10) चक्रुः—कृ + लिट्—उस् (11) मौलिः—V. Sl. 85, C. IV.) (12) स्रक्—V. Sl. 41, C. I (13) मकरन्दः—मनुष्य + कृ (to kill) + अच्—मकरः (V. Samása पृषोदरादित्वात् साधुः । मनुष्य is changed into म । मकर + दो to cut —कः—"आतोऽनुपसर्गे कः" (३।२।३ पा. २९०५ सि.) । नुम् comes afte मकर by पृषोदरादि । Or मकर अन्द् (to tie) + अण्—शकन्ध्वादित्वात् The last vowel (अ) of मकर drops—शकन्ध्वादिषु पररूपं वाच्यम्' (V. notes on मनीषिणाम्, Sl. 11, C. I. (14) रेणु—(V. Sl. 47, C. IV (15, गौरम्—गुर् (गौ) + रन्—निपातनात् गुणाभावः—"ऋज्रेन्द्राग्रवज्र—(उ. २।२८) or गु (इ) + रन् (निपात्यते) or गुर् + घञ् (करणे)—गौर गौर एव गौरम् "प्रज्ञादिभ्यश्च" (५।४।३८। पा. २१६ सि.) इति स्वार्थे अण् ।

Conjugation.—(1) कृ—(V. Sl. 8, C. III.)

सम्राट्—"यस्य पादतले पद्मं चक्रं वाप्यथ तोरणम् । अङ्कुशं कुलिशं स सम्राड् भवति ध्रुवम् ॥" इति सामुद्रिकलक्षणम् ।

Scanning.—This sloka is also composed of the metre प्रहर्षिणी—(V. Sl. 95, C. I.)